This is a commentary on S'abarasvāmin's Pūrvamīmāṁsāsūtrabhāṣya. The commentary is called Bhāṣyadīpa and follows the view of the Prabhākara school of Mīmāṁsā. The author mentions his name as Kṣīrasamudravāsin. He has written another work *viz.*, Arthavādādivicāra discussing certain topics on the Mīmāṁsā philosophy, Vide further number of this volume).

Contains the adhyāyas 2 to 8 with gaps in the middle.

Beginning :

भावार्थाः । प्रथमेऽध्याय इति । अनपेक्षत्वं प्रमाणलक्षणशब्देन विवक्षितम् । तद् वृत्तम् उक्तमित्यर्थः । तेन हि चोदना प्रमाणमिति ज्ञायते । असति तस्मिन् सापेक्षतया ज्ञानानुत्पादकत्वमनाप्तवाक्यवच्चानुवादकत्वं स्यात् । तथाच चोदना प्रमाणमिति न ज्ञायते । अनपेक्षितत्वेवगु(?) ते त्वित एव बोधोत्पादकत्वात् प्रमाणमिति ज्ञायते । तस्मात् तत्प्रमाणलक्षणम् । नन्वेवं प्रामाण्यं हेत्वनपेक्षत्वमेव भेदस्यापि हेतुरित्युक्तं स्यात् । तथाच लक्षणद्वयस्य तन्त्रहेतुकत्वादन्योन्यहेतुता न स्यात् । उच्यते— प्रामाण्यप्रकारभूतं ह्यनपेक्षत्वं तस्य लक्षणमिति प्रमाणभूतस्य वृत्तत्वकथनम् । तेन यद्वृत्तं प्रामाण्यं तदेव कीर्तितम् ।

Colophon at the end of the 2nd adhyāya :

इति महोपाध्यायक्षीरसमुद्रवासिमिश्रविरचिते भाष्यदीपे द्वितीयोऽध्यायः ।

End :

लक्षणायेति । वेदिपरिधिशब्दाभ्यां तद्देशो लक्ष्यत इति तयोरपि लिङ्गयोरप्रवृत्तिरित्यर्थः । यथेति । रजनीतिलकाभ्यां तयोरभावेऽपि तद्देशो लक्ष्यत इत्यर्थः ।

Colophon :

इति भाष्यदीपेऽष्टमाध्यायस्य चतुर्थः पादः । समाप्तश्चाष्टमोऽध्यायः ।

43 1. A. 27.

मीमांसानयविवेकः—भवनाथमिश्रकृतः

Paper. 1006 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Grantha script. New. Good. Good writing.

Bound in four volumes.

Foll. 52b, 53a and 89 to 100 are left blank causing some gaps in the matter.

The Mīmāṁsā-Nayaviveka or simply Nayaviveka is an excellent treatise on the Pūrvamīmāṁsā. It elucidates the original sūtras of Jaimini according to the school of Prabhākara. The author was Bhavanāthamiśra. Nothing is known about his lineage etc. He should not be confounded with Bhavadeva of the later period. He refers to Vācaspati, S'rīkara, Umbeka, S'ālikanātha, Mahodadhi, Vivaraṇa, Nibandhana, Dīpaśikhā etc. He is referred to by Ānandapūrṇa (1200 A.D.) in his S'ābdanirṇayadīpikā. Therefore he may be fixed in the 11th century A.D. The Tarkapāda alone of this work together with a commentary called Vivekatattva has been printed and published in the

Madras University Sanskit Serris No. 12 in the year 1937.

Begins in the 2nd pāda of the 1st adhyāya and ends in the 8th adhyāya with gaps in the 3rd and 4th pādas of the 1st adhyāya.

Beginning :

त्रिपाद्यामनवद्यं यन्मतं व्यक्तं गुरोः स्वतः ।
विस्तरं सुग्रहं कर्तुं भवः संगृह्य वक्ष्यति ॥

आम्नायस्य क्रियार्थत्वात् । उक्तं कार्यमर्थं प्रतिपादयतो वेदस्य प्रामाण्यमिति इदमपि समानपूर्वपक्षोत्थानायोक्तम् । चोदनासूत्रे अर्थाद्वा शब्दाद्वा चोदनात्वेन वेदस्य प्रामाण्यं कार्यतयैवोक्तम् । कृतिसाध्यता कार्यता इष्टसाधनता वास्तु । कार्यमेव प्रधानतया वेदार्थः । योऽपि परमते वेदान्तानां सिद्धोऽर्थः सोऽप्यात्मज्ञानचोदनैव कार्यतया कार्यप्रधानकः । अथवा न वेदान्तानां चोदनैकवाक्यता ।

End :

राद्धान्तस्तु—तर्ह्यपूर्वमेको हि विध्यन्तो ग्राह्यः । आकाङ्क्षाबलाद्धि परकीयविध्यन्तग्रह इति न विकल्पेनाप्यनेकग्रहः । जुहोतिशब्दोऽपि न विशेषलिङ्गम्, सर्वगामित्वात् । राष्ट्रभृत्स्वन्यत्रोपदेशोक्तिः पाठाभिप्राया । सप्तम . . . . प्युक्त . . . . . वमनीतिकर्तव्यताया दर्विहोमापूर्वाणां चोदनार्थता सामान्यश्रुता । स्मार्ताचारप्राप्तधर्मैरंगत्योपकारकल्पनास्तु ॥

Colophon :

इति श्रीमहामहोपाध्यायभवनाथमिश्रविरचितमीमांसानयविवेके अष्टमाध्यायस्य चतुर्थः ।

44 27. H. 5.

मीमांसानयविवेकः—भवनाथमिश्रकृतः

Palm-leaf. 128 Foll. 16¼ × 1¼ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

The leaves bear the numbers 61 to 188.

Wants beginning in the 1st pāda of the 2nd adhyāya and goes on up to the end of the 4th adhyāya.

45 27. H. 6.

मीमांसानयविवेकः—भवनाथमिश्रकृतः

Palm-leaf. 101 Foll. 16 × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Fol. 101 is lost.

Begins in the 1st pāda of the 6th adhyāya and breaks off in the 4th pāda of the 8th adhyāya.

46 29. J. 21.

मीमांसानयविवेकः—भवनाथमिश्रकृतः

Palm leaf. 193 Foll. 17⅛ × 1¼ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing. Wooden boards are added to both sides.

Wants beginning in the 1st pāda of the 5th adhyāya and ends in the 4th pāda of the 8th adhyāya.

47 39. G. 14.

मीमांसानयविवेकः—भवनाथमिश्रकृतः

Paper. 222 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in two volumes. Transcribed from a paper MS. of the Trivandrum Palace Library.

The first volume (pp. 1—275) contains the Tarkapāda *i.e.*, the Ist pāda of the 1st adhyāya and the second volume (pp. 1—167) contains the first two pādas incomplete of the 9th adhyāya.

I Vol. beginning:

गणाधिपं ग्रहान् वन्दे हरिं हरमुमां गुरून् ।
वाग्देवीं स्वर्धुनीं विप्रान् कर्तुं गुरुनये कृतिम् ॥
विहाय विस्तरं शब्दसौन्दर्यपरनिन्दने ।
व्यज्यते भवदेवेन तत्त्वं नयविवेकतः ॥
महता प्रणिधानेन शक्यमेव विधान्तरम् ।
लोकानुमतमित्येव शालिकोक्तं प्रसाध्यते ॥
ग्रन्थेऽस्मिन् विस्मयो भावी न वा किं तस्य दुष्करम्।
यो ददाति हि सर्वस्वं सहसोत्पत्तिशासनम् ॥

अथातो धर्मजिज्ञासा ।

देवगुरुपूजास्तुतिनमस्कारादिरूपं मङ्गलमुच्यते । मङ्गलाचारयुक्तानां विनिपातो न विद्यते इत्यादिस्मृतेश्चाभिमताविनिपातोऽस्य फलम् । ग्रन्थारम्भे च पक्षप्राप्तविघ्नहेतुपापक्षयापेक्षया मङ्गलं युक्तम् । तन्निवेशनं च ग्रन्थे युक्तम् ।

End:

तदसंबद्धार्थमेव उन्मत्तवाक्यतुल्यमस्त्वित्युपन्यस्य निरस्तमिति गुणवादव्याहृतिः । अपिचाविप्रगीतः सुहृदुपदेश इत्यादिभाष्यम् । तत् सर्वजनविपर्ययाचोदनाप्रामाण्यदार्ढ्यार्थम् ।

Colophon:

इति श्रीमहोपाध्यायश्रीभवनाथकृतौ नयविवेके प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः ।

II Vol. beginning:

यज्ञकर्मप्रधानं तद्धि चोदनाभूतं तर्ह्यद्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात् ।

अत्र निबन्धने विकृतप्रयोग ऊह इत्युक्तम् । ननु ऊहनमूहस्तर्को विमर्शो विचारः प्रमाणेतिकर्तव्यतेति यावत् । ज्ञानमेव तत् न प्रयोगविकारः । तदुक्तं न्यायदर्शने—तर्कश्च प्रमाणविषययुक्तायुक्तविचारात्मा प्रमाणं युक्ते तत्त्वे प्रवर्तमानमनुजानन्ननुगृह्णाति । तदनुगृहीतं प्रमाणं तत्त्वनिश्चयाय कल्पत इति ।

End:

अस्यार्थः—सस्वरवर्णोच्चारणक्रियाचयभेदात्मकं समारम्भाद्युच्चार्याभिलप्यमित्यारं . . दिविश्लेषादिचयात्मकं तच्चयश्च स्वरवर्णाभिव्यक्तिभेद इति वर्णवश एवोपाया ।

48 40 C. 34.

मीमांसानयविवेकः—भवनाथमिश्रकृतः

Paper. 53 Foll. $10\frac{1}{2} \times 3\frac{3}{4}$ inches. 12 lines in page. Devanāgarī script. Old. Slightly injured. Good writing.

Contains the pādas 1 to 3 complete and 4 incomplete in the 10th adhyāya.

Beginning:

कथं पुनरूहो बाधहेतुः । यावता कार्यस्य सत्त्वादूहः, असत्त्वात् बाध इति नैतयोरन्योन्यसंबन्धः संभवति । संबन्धे वा वैपरीत्यमेव यावत् । सत्येवाग्निपदबाधे तत्स्थाने सूर्यपदोहात् मन्त्रोहे वैपरीत्यमेव ।

Colophon:

इति श्रीमद्गुरुतन्त्रयन्त्रणाभिज्ञभवनाथोन्नीते नयविवेके दशमाध्यायस्य प्रथम पादः ।

End:

ग्रहा । अग्निष्टुत्येकाहे आग्नेया ग्रहा भवन्तीत्यत्र किं प्राकृतयोः स्तुतशस्त्रयोर्यथादैवतमूहः, उताविकार इति ।

49 10. I. 10.

मीमांसानयविवेकव्याख्या नयविवेकदीपिका—वरदराजकृता

Paper. 1040 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 5 volumes, containing pp. 1 to 540; 1 to 440; 1 to 640; 1 to 224; 1 to 236 respectively.

This is the famous commentary on Bhavanāthamiśra's Mīmāṁsā-Nayaviveka described above. The author Varadarāja was the son of Raṅgarājādhvarin, grand son of Devarāja and great grandson of Praṇatārtiharācārya of Kiḍāmbi family of Ātreya gotra. He was the disciple of Sudarśana guru of the same family. He mentions himself as wellversed also in Vaidya, Jyautiṣa, Vyākaraṇa and Prābhākaramata. He refers to Śrīkara, Prakāśa and Śālikanātha. He incidentally states that Prabhākara wrote first Vivaraṇa and then Nibandhana also called Laghvi and Bṛhatī respectively. In giving his genealogy the author refers to his native place on the bank of a river. The name of the river is read variously in different MSS. The MS. now under description reads it as Śukāpaga. The Travandrum Library MS. reads it as Śugāpaga. The Madras Govt. Oriental MSS. Library reads as Gaṅgāpagā (R 5301). As the names Varadaraja, Raṅganātha, Devaraja, Praṇatārtihara, etc. are purely South Indian names and the place Kāñcīpura is a resident of numerous members of Kiḍāmbi family, it is presumed that the correct reading of the name of the river must be Vegāpagā as the synonymous name of the river Vegavatī flowing at Kāñcīpura. This conjecture seems to be sensible in view of the fact that Kāñcīpura is seen even now as a residence of the members of Kiḍāmbi family of Ātreya gotra and that the names of Praṇatārtihara, Devarāja, Raṅganātha, Varadarāja etc. are familiar in the Kiḍāmbi family of Kāñcīpura. It is also traditionally known that Sri Vedāntadeśika's preceptor Rāmānujācārya was the son of Raṅganātha, grandson of Rāmānuja and great grandson of Praṇatārtihara of Kiḍambi family of Kāñcīpura and that an image of Sri Hayagrīva which had been worshipped by the members of Kiḍāmbi family was presented to Sri Vedāntadeśika by his preceptor. Mr. V. A. Ramaswami Sastri assignes the author to the 16th century A.D. in his Introduction to the Tattvabindu.

Begins in the 2nd pāda of the 1st adhyāya and breaks off in the 2nd pāda of the 2nd adhyāya; then begins in the 1st pāda of the 3rd adhyāya and goes on up to the end of the 1st pāda of the 4th adhyāya with a gap in the 5th pāda of the 3rd adhyāya.

Beginning:

प्रणताज्ञानसंदोहध्वान्तध्वंसनकर्मठम् ।
नमामि तुरगग्रीवं हरिं सारस्वतप्रदम् ॥
यन्नामग्रहणादेव क्षीयन्ते विघ्नहेतवः ।
तमेकदन्तं वन्देऽहं वन्दकाभीष्टदायिनम् ॥
यत्पादपङ्कजद्वन्द्वनिरन्तरनिषेवणात् ।

विद्यानिधिः शिष्यगणो नमामस्तं सुदर्शनम् ॥
नमामि पितरौ वृद्धानपि कल्याणचेतसः ।
यत्प्रसादेन मूकोऽपि भवेद्वाचस्पतेः समः ॥
नमामि जैमिनिमुनिं भाष्यकारप्रभाकरौ ।
नाथं भवं निबन्धृंश्च चन्द्रादीन् समुपास्महे ॥
पुरा शुकापगातीरे किडाम्बिकुलभूषणम् ।
यज्ञद्रोणात्समभवत्प्रणतार्तिहराभिधः ॥
तस्मात्समभवत्प्राज्ञो देवराजो बहुश्रुतः ।
ततः श्रीरङ्गनाथाख्यो विपश्चित्सत्तमोऽजनि ॥
तत्सूनुना वरदराजबुधाग्रिमेण
व्याख्यायते नयविवेक इति प्रबन्धः ।
तत्संप्रदायमहिता नयदीपिकेति
ख्याता यदीयकृतिरादरणीयभावा ॥
तत्र त्रिपाद्यां गम्भीरं भवदेवसमीरितम् ।
अहं नयविवेकं तं व्याचक्षे दुर्ग्रहं परैः ॥
महान्तं यत्नमास्थाय कर्तुं शक्यं विधान्तरम् ।
तथापि संप्रदायोऽत्र दुर्लभः संप्रकाश्यते ॥
अनेकविधदोषेण दुष्टा यद्यपि मत्कृतिः ।
अदोषयन्तु तां सन्तः कृपाबहुलचेतसः ॥
अवज्ञां येऽस्माकं विदधति जनाः केचिदपि ते
विजानन्ति प्रायः स्वमतिपरिमाणावधि कियत् ।
न तानुद्दिश्येयं कृतिरपि तु मत्तुल्यमहिमा
जनिष्यत्येकोऽपि स्वकृतगुरुसेवाहततमाः ॥

तत्र प्रथमपादोक्तस्य सर्वग्रन्थसाधारणतया सुगमत्वात् तत्र गुरुणा ग्रन्थः संक्षिप्त इति तदीयगम्भीराशयविवृतये स्वेन तत्र प्रपञ्चितं त्रिपाद्या वाद्यन्तराप्रसिद्धवाक्यवृत्तिविषयत्वात् न्यायानां तत्सुखावगत्युन्मुखशिष्यव्युत्पत्तये विस्तरप्रधानो गुरुग्रन्थ इति श्रोतृमनःसमाधानार्थमाह—त्रिपाद्यामिति ।

End of the 1st volume :

इत्थं त्रिपाद्यां भवनाथभावं निरन्तराभ्यासनिरस्तमोहः ।
प्राकाशयद्दीपिकयानवद्यममीष्टदाय्यत्रिकुलोत्थवर्यः ॥

इत्यात्रेयसुदर्शनाचार्यशिष्यस्य श्रीरङ्गराजाध्वरिसूनोर्वरदराजस्य कृतौ नयविवेकदीपिकायां प्रथमाध्यायस्य चतुर्थः पादः ॥

Beginning of the 2nd volume :

प्रणमदमरमौलिश्रेणिरत्नप्रभाभि-
र्विकसितपदपद्मं पद्मयानन्तयापि ।
सह समुपनिविष्टं भद्रपीठे हयास्यं
निखिलविषयबोधोत्पादहेतुं नमामः ॥
विद्वदग्रिममुदग्रवैभवं तं सुदर्शनगुरुं वयं नुमः ।
यत्प्रसादलवतो गुरोर्मते शिष्यवर्ग इह सर्वतोऽधिकः ॥
रचयति वरदार्यो दीपिकां शास्त्रभेदे
महितनयविवेकद्योतिनीं तीक्ष्णमेधः ।
गुरुणि गुरुमतेऽपि ज्यौतिषे शासनेऽपि
प्रथितविमलकीर्तिर्वैद्यके शब्दशास्त्रे ॥

टीकाकृतैव शास्त्रभेदलक्षणं सम्यगभिहितमिति स्वकृतिवैयर्थ्यमाशङ्क्याह—द्वितीयेनेति । द्वितीयाध्यायेन ।

* * *

यद्वा द्वितीयेन निबन्धेनेति पदद्वयम् । निबन्धो निबन्धनटीका । तस्या विवरणटीकापेक्षया द्वितीयत्वम् । टीकाकारो हि प्रथमं विवरणटीकां कृत्वा पश्चान्निबन्धनटीकां कृतवानिति किंवदन्ती । द्वितीयेनाध्यायेन निबन्धेन निबन्धनटीकया यन्निबध्यते तदेव निरवद्यं निगद्यत इति श्लोकार्थः । यद्यपि विवरणोक्तमप्यत्र वक्ष्यते तथापि निबन्धनप्राधान्यार्थेयमुक्तिः, निबन्धनमतस्याद्यापि शिष्यप्रशिष्यपरंपरया वर्तमानत्वात् वर्तमाननिर्देशः ।

Beginning of the 3rd volume :

सुदर्शनगुरुं वन्दे गम्भीरं गुरुदर्शनम् ॥
यत्प्रसादेन शिष्याणां करस्थामलकायते ॥

आत्रेयकुलसंभूतो वरदाख्यो बहुश्रुतः।
विवेकद्वदयज्ञाने दीपिकां निर्ममे सुधीः ॥

स्वकीयग्रन्थे श्रोतृजनाविलम्बितप्रवृत्त्यर्थं गुरुनाथमतप्रवृत्तये स्वकृतिवैयर्थ्यपरिहारार्थं चाह—पञ्जिकाद्वयेति। विवरणनिबन्धनपञ्जिकाद्वये सम्यगर्थस्वरूपमवगमयन्ती।

Beginning of the 5th volume :

प्रणम्य तुरगाननं हरिमशेषविद्याप्रदं
सुदर्शनगुरुं तथा रचयितुं चतुर्थे यते।
यथामति यथाश्रुतं नयविवेकविद्योतनी-
महं वरदकोविदो नयविदाहृतां दीपिकाम् ॥

End of the 5th volume :

राद्धान्तप्रयोजनमाह—राद्धान्त इति। तया समाननयत्रयोक्तं च प्रयोजनमित्याह—अपरमिति। एतेनोक्तनयत्रयमन्योन्यापेक्षमित्युक्तं भवति।

Colophon :

इत्यात्रेयश्रीसुदर्शनाचार्यशिष्यश्रीरङ्गनाथसूनोः वरदराजस्य कृतौ नयविवेकदीपिकायां चतुर्थाध्यायस्य प्रथमः पादः।

50 27. H. 4.

मीमांसानयविवेकव्याख्या नयविवेकदीपिका—वरदराजकृता

Palm-leaf. 152 Foll. 15½ × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Leaves bear the serial numbers 8 to 176 with many leaves missing in the middle.

Contains the adhyāya 3 only without beginning in the 1st pāda and breaking off in the 4th pāda.

51 19. G. 13.

मीमांसानयविवेकव्याख्या नयविवेकदीपिका—वरदराजकृता

Palm-leaf. 8 Foll. 17 × 1½ inches. 10 lines in a page. Grantha script. Old. Much injured. Good writing.

Contains a small portion in the 1st pāda of the 1st adhyāya.

52 38. G. 11.

मीमांसानयविवेकव्याख्या विवेकतत्त्वम्—रविदेवकृतम्

Paper. 645 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in three volumes, containing pages 1 to 560, 561 to 1021, and 1022 to 1290 respectively.

This also is a good commentary on Bhavanātha's Mīmāṁsā-Nayaviveka, by Ravideva. Nothing is known about the personality and date of the author. He may be assigned to the 15th century A.D.

The Tarkapāda only of the work has been printed and published in the Madras University Sanskrit Series, No. 12 in the year 1937.

Breaks off in the 6th pāda of the 3rd adhyāya without the 4th pāda of the same adhyāya.

Beginning :

संसिद्धगुरुभावस्य भवस्य पदगोचरे।
निवेशयन्वाङ्मनसे सुकृती स्यामहं चिरम् ॥

ग्रन्थेऽल्पे विततेऽर्थे व्याख्या नोचेच्छ्रुतैषिणः केचित्।
गुरुकुल (एव जरेयुः) श्रुतमर्थं विस्मरेयुर्वा ॥

ननु गणाधिपं ग्रहान्वन्दे इत्येतद्वाचिकवन्दनं किं स्वार्थं क्रियते? उत परज्ञापनार्थम्? किमुभयथापि? इति चेत् स्वार्थवन्दनत्वेऽन्यं प्रति ज्ञापकत्वाभावात् किमर्थमिति तस्याक्षेपाभावात् अपेक्षिततत्समर्पकतया कर्तुं गुरुनये कृतिमित्यस्यानन्वयापत्तिः।

Colophon:

इति मीमांसानयविवेकव्याख्याने रविदेवकृते विवेकतत्त्वे प्रथमस्याध्यायस्य प्रथमः पादः।

End:

तत्प्रकृत्यर्थम्। उक्तोपजीवनेनासंगतं पूर्वपक्षं चाह— उक्तेऽप्यर्थ इति। ननु अग्नीनामाधानविधेः प्राक् स्वरूपासिद्धेरविनियोगात् तन्मुखेन क्रत्वर्थत्वमाधानस्यासिद्धमिति पर्णतादिवैषम्या।

53 28. D. 12.

न्यायरत्नमाला—पार्थसारथिमिश्रकृता

Palm-leaf. 142 Foll. 18½ × 1½ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

This is an original treatise in verse and prose on the Pūrvamīmāṁsā philosophy, by Pārthasārathimiśra, the son and pupil of Yajnātman. The author is known to have written three more works besides this, *namely* Tantraratna, S'āstradīpikā and Nyāyaratnākara. In this work he refutes the views of Prābhākaras including S'ālikanātha and upholds those of Bhāṭṭas. For this purpose he takes here those subjects which were dealt with by S'ālikanātha in his Prakaraṇapañcikā with criticism against Kumārila and maintains the views of Kumārila. The work may be devided into seven chapters dealing with the following topics: 1. Prayukti, 1. Svataḥprāmāṇya, 3. Vidhi, 4. Vyāpti, 5. Vākyārtha, 6. Nityakāmyaviveka and 7. Aṅgatva. The author may be fixed in the latter part of the 11th century.

Complete in 7 chapters mentioned above.

The scribe gives the serial numbers to folios 1 to 37 with the Tamil figures, to folios 39 to 110 with Telugu figures (38 being missed) and to further folios with Grantha letters ವ to ಖೂ.

Beginning:

आनन्दममृतं ज्ञानमजं साक्षिणमीश्वरम्।
ब्रह्म सर्वमसर्वं सदसद्वन्दे विभुं हरिम् ॥
मीमांसार्णवसंभूतैः कुमारस्वामिना हृतैः।
न्यायरत्नैरहं मालां संग्रथ्नामि मनोरमाम् ॥
तत्र स्वाध्यायविध्यर्थः प्रथमं तावदुच्यते।
आचार्यपक्षमाश्रित्य प्रतिपक्षनिरासतः ॥
तत्र तावदिमं केचित्पूर्वपक्षं प्रचक्षते।
आचार्यकनियोगार्थः स्वाध्यायस्तत्प्रयुक्तितः ॥
प्रथमावगतत्वेन तद्धि युक्तं प्रयोजनम्।
न तु वाक्यार्थविज्ञानं तद्धि पश्चात्प्रतीयते ॥
तेनाविवक्षितार्थत्वाद्वेदस्यार्थविचारणम्।
न कर्तव्यमतः शास्त्रं मीमांसाख्यमनर्थकम् ॥

आचार्यकरणविधिप्रयुक्तस्य हि स्वाध्यायाध्ययनस्य प्रयोजनापेक्षायां पुरुषान्तरगामित्वेन बहिरङ्गमपि प्रथमावगतत्वेन तत्सिद्धिरेवास्य प्रयोजनं युक्तम्। न त्वर्थज्ञानम्, तस्य पश्चाद्भावित्वात्।

End :

तस्मात्प्रक्रान्तरूपोऽपि विधिस्तावत्प्रतीक्षते ।
यावद्योग्यत्वमापन्ना भावनान्यानपेक्षिणी ॥

इत्य . . . वेदितव्यम् ।

Colophon :

इति न्यायरत्नमालायामङ्गनिर्णये पञ्चमः परिच्छेदः ।

One extra leaf added at the end reads a few lines of the Vidhinirṇaya chapter of this work in duplicate.

54 28. E. 1.

न्यायरत्नमाला—पार्थसारथिमिश्रकृता

Palm-leaf. 75 Foll. 14¾ × 1½ inches. 7 lines in a page. Telugu script. Old. Injured. Illegible writing.

Breaks off in the 4th chapter dealing with Vyāpti.

The following verse is added in the beginning.

यन्नामस्मरणाद्वाणी संनिधत्ते मुखे मम ।
मानसे मामके सास्तु कृष्णानन्दसरस्वती ॥

One extra leaf added at the beginning reads some lines from the 1st chapter of the work in duplicate.

55 28. E. 24.

न्यायरत्नमाला—पार्थसारथिमिश्रकृता

Palm-leaf. 110 Foll. 16 × 1¼ inches. 8 lines in a page. Telugu script. Old. Much injured. Good writing.

Complete.

Reads the following end :

मीमांसाब्धिं व्याकुलं चोद्यनेत्रै-
र्मन्दप्रज्ञैर्दुर्विगाहं विगाह्य ।
मङ्क्त्वाचार्यैराश्रितैर्न्यायरत्नै-
र्मालामेतां कल्पयामास धीरः ॥

Colophon :

इति पार्थसारथिमिश्रविरचितायां न्यायरत्नमालायामङ्गनिर्णयः समाप्तः ।

56 39. A. 9.

न्यायरत्नमालाव्याख्यानम्, नायकरत्नम् —रामानुजाचार्यकृतम्

Paper. 447 Foll. 8½ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in two volumes.

This is a commentary on Pārthasārathimiśra's Nyāyaratnamālā described in previous numbers. The commentary is called Nāyakaratna. The author Rāmānujācārya speaks of himself in this work and Tantrarahasya (another work on Pūrvamīmāṁsā) as a native of the village Dharmapurī on the banks of Godāvarī river and a disciple of Jātavadaguru in Pūrvamīmāṁsā and Veṅkaṭādriguru in Uttaramīmāṁsā. He does not speak anything about his parentage. It is said that a MS. of this work available in the Bhandarkar Oriental Institute, Poona, bears the date of copying as Saṁ. 1657 corresponding to 1595 A.D. So, he may be fixed atleast in the beginning of the 16th century A.D. Both of his

works *namely* Nāyakaratna and Tantra-rahasya have been published in the Gaekwad's Oriental Series, Baroda, as Nos. 24 and 75 respectively. The fourth section of the last chapter of this MS. have been divided into two separate sections in the printed edition.

Complete.

Beginning :

सम्यङ्नयाञ्जनसमेधितमस्तदोष-
मास्नायसंज्ञमनुशास्ति विशुद्धचक्षुः ।
मानान्तरानधिगतं खलु धर्मतत्त्वं
मानान्तरं च पुरुषोत्तमसंज्ञकं तत् ॥
आम्नायान्तिमसीमनि स्फुरति यः सद्भावनागोचरः
स्वे स्वे कर्मणि यः प्रशास्ति पुरुषं योग्याधिकारक्रमात् ।
आधत्ते विविधोपकारमखिलैरङ्गैरशेषाङ्गिनां
साक्षाद्विष्णुरिवैधते यिधिरयं नानावताराश्रयः ॥
अविभक्तविभक्तमार्गयो-
र्मतयोर्भट्टगुरूपदिष्टयोः ।
उभयोरपि पार्थसारथिः
प्रथितोऽप्याद्यमतेऽभियोगवान् ॥
अस्पष्टभावमपरीक्षकदुष्प्रवेश-
माचार्यतन्त्रमधिकृत्य दृढप्रकाशम् ।
न्यक्कृत्यपार्थरथसारथिरन्यतन्त्रं
सत्प्रीतये ग्रथितवान्नयरत्नमालाम् ॥
गुरुतन्त्रनियन्त्रितोऽप्यहं
बहुमानादिह पार्थसारथेः ।
विवृणोमि मतान्तराश्रितां
स्थिरभावां नयरत्नमालिकाम् ॥

प्रारिप्सितग्रन्थस्य प्रत्यूहप्रशान्तये सर्वोत्कृष्टां श्रुतिशिरःसमधिगतां स्वेष्टदेवतां नमस्यति—आनन्दमिति ।

End :

स्वग्रन्थस्य संप्रदायशुद्धिं दर्शयति—भुवनत्रयेति । तत एव स्वकीयपितृसकाशादेव । स्वप्रबन्धस्योपादेयतां दर्शयति—मीमांसाब्धिमिति । मीमांसैवाब्धिः मीमांसाब्धिः शाबरभाष्यम् । मत्या, स्वबुद्धिकौशलेन । आचार्यैः, भट्टाचार्यैः । धीरः, पार्थसारथिरिति शेषः ।

Colophon :

इत्यङ्गनिर्णये चतुर्थः परिच्छेदः ।

इति श्रीरामानुजाचार्यविरचितं न्यायरत्नमालाव्याख्यानं नायकरत्नं संपूर्णम् ।

57 20. J. 15.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 209 Foll. 16 × 1¾ inches. 13 lines in a page. Grantha script. Old. Injured Good writing.

Wooden boards are added to both sides.

The S'āstradīpeka is an independent treatise elucidating the various adhikaraṇas of the Pūrvamīmāṁsāsūtras according to the views of the Bhāṭṭa school. The author Pārthasārathimis'ra was the son and pupil of Yajñātman. He was also the author of Tantraratna, Nyāyaratnākara, and Nyāyaratnamālā. He may fixed in the last part of the 11th century A.D.

Contains from the 2nd pāda of the 1st adhyāya to the end of the 12th adhyāya.

Beginning :

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते । अथातो धर्मजिज्ञासेत्यत्र प्रमाणस्वरूपसाधनफलैः साभासैर्धर्मो जिज्ञास्यत्वेन प्रतिज्ञातः ।

तत्रास्मिन्नध्याये प्रमाणं निरूप्यते। किं प्रमाणं धर्म इति। तेन यदेव किंचित् धर्मप्रमाणनिरूपणमर्थवाद-मन्त्रस्मृतिनामधेयादिगोचरं तत्सर्वमत्रैव संगतम्। न ह्यत्र चोदना प्रामाण्यसाधनं लक्षणार्थः, येन स्मृत्यादेरसंगतिः स्यात्। किं तर्हि? धर्मप्रमाणनिरूपणम्। तदुक्तं भाष्यकारेण—को धर्मः कथं लक्षणक इति।

Colophon of the 2nd pāda :

इत्युपाध्यायपार्थसारथिमिश्रकृतौ शास्त्रदीपिकायां प्रथमस्याध्यायस्य द्वितीयः पादः।

End :

राजयाजकयाज्यस्य विनश्यति यथाहविरिति अब्राह्मणार्त्विज्ये हविर्नाशश्च स्मृतः। लिङ्गानि च दर्शितानि ब्राह्मणानामिदं हविरित्येवमादीनि। तस्माद्ब्राह्मणानामेवार्त्विज्यमिति सिद्धम्।

मध्येतन्त्रं यस्य येषां विधानं
तेषु प्रोक्तो मुख्यतन्त्रप्रसङ्गः।
जिज्ञास्यो यो धर्म उक्तश्चतुर्धा
स प्रज्ञातो लक्षणैर्द्वादशान्तैः॥

Colophon :

इत्युपाध्यायश्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां द्वादशास्याध्यायस्य चतुर्थः पादः।

58 20. J. 5.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. Foll. 122. 15⅛ × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Begins in the 2nd pāda of the 1st adhyāya and breaks off in the 26th Sūtra of the 3rd pāda of the 2nd adhyāya.

59 20. J. 6.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 195 Foll. 15 × 1 inches. 5 lines in a page. Telugu script. Old. Injured. Good writing.

Wants the leaves 1, 41 to 47.

Begins in the 6th adhyāya and goes on up to the end of the 12th adhyāya with gap.

Four blank leaves are inserted in the middle.

60 20. L. 14.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 84 Foll. 15½ × 1½ inches. 11 lines in a page. Grantha script. Old. Fair. Clear writing.

Fol. 28*b* is left blank.

Begins in the fourth adhyāya and breaks off in the 1st pāda of the 10th adhyāya.

61 20. L. 16.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 129 Foll. 14 × 1⅜ inches. 7 lines in a page. Grantha script. Old. Much injured. Good writing.

The first leaf is much broken.

Begins in the 2nd pāda of the 1st adhyāya and breaks off in the 1st pāda of the 3rd adhyāya.

62 20. L. 17.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 110 Foll. 10½ × 1½ inches.

8 lines in a page. Telugu script. Old. Much injured. Good writing.

Contains the pādas 3 (without the beginning) and 4 of the first adhyāya and pādas 1 to 8 (incomplete) of the 10th adhyāya.

63 20. L. 19.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 204 Foll. $16\frac{3}{4} \times 1\frac{1}{2}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Folios. are numbered 1 to 206; but Foll. Nos. 36, 43, 53 and 158 are missing and 2 folios are marked with duplicate Nos. 17 and 57.

Contains the adhyāyas 3 to 8 complete.

64 20. L. 21.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 87 Foll. $15 \times 1\frac{1}{8}$ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Wants one leaf in the beginning of the 8th adhyāya and goes on up to the 12th adhyāya wanting the last leaf for the end.

65 20. L. 22.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 160 Foll. $13\frac{1}{4} \times 1$ inches. 8 lines in a page. Grantha script. Old. Fair. Good writing.

Contains the adhyayas 3 and 4 complete and pādas 3rd complete and 4th incomplete in the 6th adhyāya.

66 20. L. 23.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 160 Foll. 15×1 inches. 6 lines in a page. Telugu script. Old. Much injured. Clear writing.

Begins in the 3rd pāda of the 7th adhyāya and breaks off in the 3rd pāda of the 10th adhyāya.

67 20. L. 24.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 233 Foll. $15\frac{1}{2} \times 1\frac{1}{4}$ inches. 9 lines in a page. Grantha and Telugu scripts. Old. Very much injured. Illegible writing.

Contains the 5th adhyāya (without beginning) and the adhyāyas 7 to 12.

68 20. L. 26.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 104 Foll. $18 \times 1\frac{1}{2}$ inches. 2 lines in a page. Grantha script. Old. Injured. Good writing.

Begins in the 2nd pāda of the 1st adhyāya and breaks off in the 3rd pāda of the 3rd adhyāya.

69 20. M. 1.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 36 Foll. $15 \times 1\frac{1}{2}$ inches. 11 lines in a page. Grantha script. Old. Injured. Good writing.

The first leaf is half broken.

Begins in the sixth adhyāya and breaks off in the 1st pāda of the 9th adhyāya.

70 20. M. 2.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 37 Foll. Size, 16 × 1¼ inches. 10 lines in a page. Telugu script. Old. Much injured. Good writing.

Wants the beginning in the 3rd pāda of the 1st adhyāya and breaks off in the 2nd pāda of the 2nd adhyāya.

71 22. R. 18.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 37 Foll. 17½ × 1½ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Begins towards the end of the 9th adhyāya and breaks off in the 5th pāda of the 10th adhyāya.

72 23. D. 10.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 125 Foll. 18¼ × 1½ inches. 11 lines in a page. Grantha script. Old. Injured. Clear writing.

Wants two leaves in the beginning of the 2nd pāda of the 1st adhyāya and goes on up to the end of the 6th adhyāya.

73 23. D. 11.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 63 Foll. 16¼ × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Foll. are numbered 50 to 112.

Begins in the 2nd pāda and breaks off in the 4th pāda of the 1st adhyāya.

74 23. E. 30.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 146 Foll. 17 × 1½ inches. 10 lines in a page. Grantha script. Old. Much injured. Good writing.

Wooden boards are added to both sides.

Begins in the 2nd pāda of the 1st adhyāya and goes on up to the end of the 4th adhyāya.

75 24. A. 1.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 201 Foll. 13½ × 2 inches. 13 lines in a page. Grantha script. Old. Fair. Good writing.

Wooden boards are added to both sides.

Begins in the 4th pāda of the 5th adhyāya and goes on up to the end of the 12th adhyāya.

Six blank leaves are added at the end.

Reads the following stanza at the end.

न्यायभानुसहस्रेण शिष्यलोकदृशां तमः ।
निरस्तं येन जीयात्स यादवेन्द्रगुरू रविः ॥

76 24. B. 4.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 5 Foll. 14 × 2 inches. 10 lines in a page. Grantha script. Old. Injured. Legible writing.

Wooden boards are added to both sides.

Contains the 2nd pāda of the 1st adhyāya.

77 24. B. 18.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 90 Foll. 14 × 2 inches. 11 lines in a page. Grantha script. Old. Injured. Good writing.

Four blank leaves are added in the beginning.

Contains the adhyāyas 2 and 4 complete and a portion of the 1st pāda of the 5th adhyāya.

78 24. B. 19.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 157 Foll. $14\frac{1}{2} \times 2\frac{1}{8}$ inches. 10 lines in a page. Grantha script. Old. Fair. Good writing.

Wooden boards are added to both sides.

Contains the adhyāyas 1 and 2 complete.

79 24. F. 10.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 2 Foll. $14\frac{1}{2} \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good condition.

Contains the Aruṇādhikaraṇa only (3 - 1 - 12).

80 24. K. 4.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 5 Foll. $15 \times 1\frac{3}{8}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the 2nd pāda of the 1st adhyāya.

One extra leaf containing in duplicate a few lines in the beginning of the portion said above has been added.

81 27. I. 88.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 25 Foll. $17\frac{1}{2} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Clear writing.

Contains the pādas 4 and 5 complete and the 6 in the 3rd adhyāya.

82 28. F. 18.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 157 Foll. $15 \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha and Telugu scripts. Old. Much injured. Good writing.

Wants the beginning in the 3rd pāda of the 1st adhyāya and breaks off in the 1st pāda of the 10th adhyāya with a few gaps in the 5th and 6th adhyāyas.

The leaves are in disorder.

83 29. K. 28.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 184 Foll. $15 \times 1\frac{1}{2}$ inches. 8 lines in a page. Granth script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Begins in the 2nd pāda of the 1st adhyāya and breaks off in the 8th pāda of the 3rd adyāya.

84 30. B. 16.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 354 Foll. 15 × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Bamboo boards are added to both sides.

Begins in the 2nd pāda of the 1st adhyāya and breaks off in the 8th pāda of the 3rd adhyāya.

85 34. F. 10.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 28 Foll. 18 × 1¼ inches. 7 lines in a page. Grantha script. Old. Much injured. Good writing.

Wooden boards are added to both sides.

Wants beginning in the 2nd pāda and breaks off in the 4th pāda of the 1st adhyāya.

86 34. J. 11.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 100 Foll. 15 × 1½ inches. 13 lines in a page. Grantha script. Old. Much Injured. Clear writing.

Wants the beginning in the 3rd adhyāya and breaks off in the 12th adhyāya.

87 34. M. 29.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 189 Foll. 17 × 1¼ inches. 8 lines in a page. Grantha script. Old. Much injured. Good writing.

Wooden board is added in the beginning.

Begins in the 2nd pāda of the 1st adhyāya and breaks off in the 1st pāda of the 8th adhyāya.

88 39. G. 18.

शास्त्रदीपिकाव्याख्या कर्पूरवर्तिका—राजचूडामणिदीक्षितकृता

Paper. 719 Foll. 8¼ × 6½ inches. 14 lines in a page. Grantha script. New. Good. Good writing.

Bound in 3 volumes.

The Karpūravartikā is a commentary on the S'āstradīpikā of Pārthasārathimis'ra. The commentator Rājacūḍāmaṇidīkṣita was the son of Kāmākṣī and S'rīnivāsadīkṣita (Satyamaṅgala Ratnakheṭa) of Vis'vāmitragotra and known with the title Dantidyoti-Divāpradīpa. He was the disciple of his elder brother Ardhanārīs'varadīkṣita who gives the following geneology of his family in his Ambāstavavyākhyā (R. No. 5996 of the Triennial Catalogue of the Sanskrit MSS. in the Madras Govt. Oriental MSS. Library).

1. Bhavasvāmin I (The author of the Bhāṣya on the Bodhāyanas'rautasūtra).

2. Kṛṣṇasomayājin I.
|
3. Kumāra Bhavasvāmin (The author of the Advaitacintāmaṇi.
|
4. Kṛṣṇasomayājin II.
|
5. Bhavasvāmin II.
|
6. Ratnakheṭa S'rīnivāsadīkṣita (The author of the Bhāvanāpuruṣottama, S'atakaṁdharavijaya, Sāhityasaṁjīvanī, Vedāntaratnāvali, Vādatārāvali, Madhvavidambana, Bauddhavidhvaṁsana, Maṇidarpaṇa, Advaitakaustubha, Vidhinirṇaya, Sarvasamayasarvasva, Smṛtiratnadīpa, Ṣaṣṭhībhaṅgavyākhyāna, Dhātupariśuddhi, Tattvabodha, Bhāvodbheda and Raṣārṇava.
|
7. Rājacūḍāmaṇidīkṣita (The younger brother of Kes'avayajvan and Ardhanārīs'varadīkṣita). The following 27 works have been ascribed to Rājacūḍāmaṇidīkṣita—1. Upaniṣadvyākhyā, 2. Yajurvedabhāṣya, 3. Prāyas'cittapradīpikā, 4. Tantras'ikhāmaṇi, 5. Saṁkarṣamuktāvali, 6. Karpūravartikā, 7. Maṇidarpaṇa, 8. Nyāyacūḍāmaṇī, 9. Rāghavakṛṣṇapāṇḍavīya, 10. Ratnakheṭavijaya, 11. Yuddhakāṇḍacampū, 12. Bhāraṭacampū, 13. Vṛttatārāvali, 14. S'aṁkaratārāvali, 15. S'aṁkarābhyudaya, 16. Kaṁsavidhvaṁsana, 17. Kāntimatīpariṇaya, 18. Kamalinīkalahaṁsa 19. Citramañjarī, 20. S'ṛṅgārāsarvasva, 21. Ānandarāghava, 22. Raghunāthabhūpavijaya, 23. Sāhityasāmrājya, 24. Kāvyadarpaṇa, 25. Alaṁkaracūḍāmaṇi, 26. Rukmiṇīkalyāṇa and 27. Rāmakathā. These works have been mentioned in the Kāvyadarpaṇa and Bālayajñavedes'vara's Rukmiṇīkalyāṇavyākyā.

The author gives in his Tantras'ikhāmaṇi the date of its composition as धीमन्मान्ये, S'aka 1559 corresponding to 1637 A.D., the year in which the Nīlakaṇṭhavijaya was composed by Nīlakaṇṭhadīkṣita. The author mentions in his Kamalinīkalahaṁsa the names of the Kings Cinna-Bomma, Acyutappa and Raghunāthabhūpa.

Begins in the 7th adhyāya and breaks off in the 1st pāda of the 11th adhyāya.

Beginning :

श्रीमानङ्घ्रिसरोजनम्रजनताकामाभिपूर्तिक्षमो
वामार्धेन समृद्धतामुपनयन् कामावलेपश्रियः ।
भूमा कश्चन कृत्रिमेतरवचःसीमाभिगम्याकृतिः
श्यामाकामुकशेखरो भवतु वः श्यामारुणः श्रेयसे ॥

(सू) श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् ।

ननु यथा पूर्वस्मिन् षट्केऽग्निहोत्रादिप्रकृतिविषयविचारः कृतः .

Colophon in page 54 :

इति श्रीदन्तिद्योतिदिवाप्रदीपाङ्कविश्वामित्रवंशमुक्तफलविश्वजिदतिरात्रयाजिसत्यमङ्गलरत्नखेटश्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसंभवस्य श्रीमदर्धनारी-

श्वरदीक्षितगुरुचरणसहजतालब्धविद्यावैशद्यस्य श्रीराजचूडामणिदीक्षितस्य कृतिषु कर्पूरवर्तिकाव्याख्यायां शास्त्रदीपिकाव्यायां सप्तमस्याध्यायस्य प्रथमः पादः ।

End :

तथात्रापि सहितानामेव संबन्धेन कथंभावाकाङ्क्षेति तद्वशात्साहित्यस्याविवक्षितत्वेऽपि विहितेष्वेवाङ्गसंबन्धः स्यादिति वा . . . . साध्यसा . . . . . इतिकर्तव्यतामाकाङ्क्षति । करणत्वं चाग्नेयादीनामुत्पत्तिवाक्यैः प्रत्येकमेवावगतमिति

89 25. B. 14.

शास्त्रदीपिकाव्याख्या कर्पूरवर्तिका—राजचूडामणिदीक्षितकृता

Palm-leaf. 200 Foll. $17\frac{1}{2} \times 1$ inches. 8 lines in a page. Grantha script. Old. Much injured. Good writing.

Begins in the 8th pāda of the 3rd adhyāya and goes on up to the end of the 4th adhyāya.

90 19. N. 33.

शास्त्रदीदिकाव्याख्या कर्पूरवर्तिका—राजचूडामणिदीक्षितकृता

Palm-leaf. 98 Foll. $18 \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden board is added at the end.

Foll. are numbered 156—163 and then 200 to 289.

The author Rājacūḍāmaṇidīksita says that he is embodying in his Karpūravartikā, the commentary on the 1st pāda of the 9th adhyāya which was written by his disciple and nephew (sister's-son) Veṅkaṭādri.

Contains a small portion of the 7th adhyāya (Foll. 156—163). Then contains the 9th adhyaya complete (Foll. 200—to 289). Foll. 241 to 245 are left blank without break in the matter.

Beginning of the 9th adhyayā.

यस्योपवीतगुण एव फणावृतैक-
वक्षोरुहः कुचपटीयति वामभागे ।
तस्मै ममास्तु नमसामवसानसीम्ने
चन्द्रार्धचारुशिरसे महसे नमस्या ॥
टीका या नवमाद्याङ्घ्रेर्लिखिता वेंकटाद्रिणा ।
भागिनेयेन सैवात्र शिष्यप्रीत्या विलिख्यते ॥

(सू)—यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात् ।

वृत्तवर्तिष्यमाणलक्षणयोर्हेतुहेतुमद्भावलक्षणां संगतिं दर्शयन् लक्षणार्थविचारं प्रतिजानीते—सिद्ध इति । ऊहस्यातिदिष्टप्रयाजादिविषयताभ्रमं वारयितुमूहविषयान् परिगणय्य दर्शयति—मन्त्रेति ।

End :

नन्वेवमपि तृतीयायाः का गतिरित्यत आह—तृतीयेति । साप्यर्थप्राप्तकरणत्वसंबन्धानुवादिनीत्यर्थः । शिष्यबुद्धिसौकर्यार्थमेतस्मिन्नध्याये प्रतिपादितमुत्तरस्मिन्नध्याये प्रतिपादयिष्यमाणं चार्थं श्लोकेन संगृह्णाति—प्राकृतार्थेति ।

Colophon :

इति दन्तिद्योतिदिवाप्रदीपाङ्क + नवमस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

91 20. D. 83.

शास्त्रदीपिकाव्याख्या मयूखावली—अप्पयदीक्षितकृता

Palm-leaf. 148 Foll. 15½ × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Legible writing.

This also is a commentary on Pārthasārathimiśra's S'āstradīpikā by the famous Appayadīkṣita, son of Raṅgarājādhvarin of Bhāradvājagotra. The author's date has been fixed between 1520to 1593 A.D. His other works on Mīmāṁsā are Upakaramaparākrama, Vidhirasāyana with commentary, Citrapaṭa and Vādanakṣatramālā. He was under patronage of Cinna Timma, Cinna Bomma and Veṅkaṭadeva I.

Begins in the 2nd pāda and breaks off in the 4th pāda of the 1st adhyāya.

The first Fol. is very much broken.

Beginning in the 2nd Fol.

ननु चोदनालक्षणोऽर्थो धर्म इति सूत्रे विध्युद्देशस्यैव प्रामाण्यं प्रतिज्ञातम्। चुद प्रेरणे इति धातुनिष्पन्नस्य चोदनाशब्दस्य प्रवर्तकवाचित्वात्, विध्युद्देशस्यैव कार्यप्रवर्तकत्वादिति प्राभाकरमतमाशङ्क्याह—न हीति। मन्त्रार्थवादाद्युपेतमहावाक्यरूपो विध्युद्देशश्चोदना। तस्यैव क्रतुविशेषसंकल्पप्रभृति सकलाङ्गसहितप्रधानविषयप्रवृत्त्युपयोगित्वान्न विध्युद्देशमात्रम्। एवं च विध्यर्थवादमन्त्ररूपेण त्र्यंशस्य कृत्स्नस्यापि वेदस्य धर्मे प्रामाण्यं प्रतिज्ञातं भवति।

Colophon in Fol. 24:

इति श्रीमदप्पयदीक्षितस्य कृतौ शास्त्रदीपिकामयूखावल्यां प्रथमस्याध्यायस्य द्वितीयः पादः।

End:

अपिच तत्सिद्धिसूत्रेण निमित्ते यत्रानिरूपणमपि न लभ्यते तत्र हि सारूप्यपदं प्रत्यक्षसारूप्यपरम्। अतः सारूप्यमात्रस्य तत्सिद्धयुदाहरणसाधारण्येऽपि।

The work is being printed in the S'rī Vānī Vilās Press, Srirangam.

92 34. C. 11.

शास्त्रदीपिकाव्याख्या मयूखावली—अप्पयदीक्षितकृता

Palm-leaf. 70 Foll. 16 × 2½ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

The Foll. bear the numbers 1 to 91. Foll. 39 to 59 are missing.

Contains the pādas 2 and 3 (in complete) and a fragment of the 4th pāda of the 1st adhyāya.

Beginning:

सुदूरस्थं देशं हयहृदयविद्येव तुरगान्
नयत्याशु ग्रन्थान्महि(ततरशास्त्रेषु विषमान्।
अधीतैवार्थं या सहृदय) मनःसंततिपदं
विभोर्व्याख्यामुद्रां मनसि कलये तां पशुपतेः॥
गुरुभिरुपदिष्टभावां व्याकुर्वे शास्त्रदीपिकामनवाम्।
आकृष्टसकलसारां लघुभिर्वाक्यैः प्रसन्नगम्भीरैः॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते। प्रथमसूत्रसंकीर्तनेन त्रिपाद्यां करिष्यमाणस्यार्थवादादिप्रामाण्यविचारस्य शास्त्रसंगतिं दर्शयति—अथात इति।

End:

तस्माद्योगपक्षे न कश्चिद्दोषः। अत्र संस्कारजातमपि प्रयोगकाले अनुष्ठेयम्। सिद्धान्तपक्षे मथनमात्रम्। द्वितीयपूर्वपक्षे तु न तदपि। किंतु लौकिकमग्निमात्रमानीयेष्टकाः पक्तव्या इति विशेषः।

93 64881.

शास्त्रदीपिकाव्याख्टा मयूखावली—अप्पयदीक्षित-कृता

Paper. 368 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcipt made from the original palm-leaf MS. described in the last number.

Contains the pādas 2 and 3 (in complete) and a fragment of the 4th pāda of the 1st adhyāya.

94 40. C. 4.

शास्त्रदीपिकाव्याख्या प्रभा—वैद्यनाथभट्टकृता

Paper. 28 Foll. 11 × 5 inches. 12 lines in a page. Dèvanāgarī script, Old. Slightly injured. Good writing.

This is another commentary on Pārthasārathimiśra's S'āstradīpikā by Tatsat Vaidyanāthabhaṭṭa, son of Rāmabhaṭṭa alias Rāmacandrabhaṭṭa of the Tatsat family. This Rāmacandrabhaṭṭa is known to have written a work called Kṛtyaratnāvali wherein he mentions his father's name as Viṭṭhala and grand father's name as Bālakṛṣṇabhaṭṭa. (See Notices of Sanskrit MSS. by R. L. Mitra, Vol. IX, 1888, page 111.) Our author is distinct from Pāyuguṇḍe Vaidyanātha who was the son of Mahādeva and pupil of the famous Nāgeśabhaṭṭa of Benares. Tatsat Vaidyanātha is known to have been the author of the following works: Kāvyaprakāśavyākhyā Udāharaṇacandrikā; Kāvyapradīpavyākhyā Prabhā; Kuvalayānandavyākhā Alaṁkāracandrikā; Mādhavīyakārikāvivaraṇa (Kālanirṇaya) and Nyāyabindu (Mīmāṁsā.)

In his Udāharaṇacandrikā he gives the date of the composition of that work thus:

वियद्वेदमुनिक्ष्माभिर्मितेऽब्दे कार्तिके सिते ।
बुधाष्टम्यामिमं ग्रन्थं वैद्यनाथोऽभ्यपूरयत् ॥

Saṁ. 1740 corresponding to 1684 A.D. M. A. Stein's Catalogue of Sanskrit MSS. in the Raghunatha temple Library, Jammu, adds the following two mors works to the credit of Tatsat Vaidyanātha; Cāturmāsyaprayoga and Kādambariṭīkā Viṣamapadavivṛti. It also mentions a complete MS. of the S'āstradīpikāvyākhyā Prabhā which mentions the date of composition as Saṁ. 1767=1710 A.D.

Contains the 2nd pāda complete and the 3rd pāda incomplete of the 1st adhyāya.

Beginning:

सौजन्यसीमाहृतराममुद्रमगाधगाम्भीर्यनमत्समुद्रम् ।
सदा सदाचारनिरस्ततन्द्रं श्रीरामचन्द्रं पितरं नमामि ॥
श्रीमन्महागणपतेश्चरणारविन्द्र-
मानम्य भक्तजनसिद्धिदमादरेण ।
श्रीवैद्यनाथकविरद्भुतभाष्टतन्त्र-
सिद्धान्ततत्त्वममलं विशदीकरोति ॥
अधीत्य सकलं शास्त्रं परिशील्य यथामति ।
सद्गुरूणां प्रसादेन व्याख्यास्ये शास्त्रदीपिकाम् ॥
आम्नायस्य । तत्र तावत्,
विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरः ।
प्रयोजनं च पञ्चाङ्गं शास्त्रेऽधिकरणं मतम् ॥

इत्युक्तलक्षणोदाहरणसंशयपूर्वपक्षसिद्धान्तप्रयोजनरूपपञ्चाङ्गविचारात्मकाधिकरणघटिताध्यायस्तोमरूपेऽस्मिन् शास्त्रे प्रत्यधिकरणं चतुर्धा संगतिं प्राहुः। शास्त्रसंगतिः, अध्यायसंगतिः, प्रकृतसंगतिः, अनन्तरसंगतिरिति।

Colophon (Foll. 23):

इति श्रीमत्पदवाक्यप्रमाणज्ञतत्सद्रामभट्टात्मजवैद्यनाथभट्टोन्नीतायां शास्त्रदीपिकाटीकायां प्रथमस्याध्यायस्य द्वितीयचरणः संपूर्णः।

End:

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति सूत्रे श्रुत्यादिभिर्लिङ्गादीनां बाध उक्तः। सोऽनुपपन्नः। अग्निचयनप्रकरणपठितस्य कदाचनस्तरीरसि नेन्द्रसश्चसि दाशुष इति इन्द्रप्रकाशकमन्त्रस्य ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति श्रुत्या गार्हपत्योपस्थाने लिङ्गादिन्द्रो . . . .

95 35. B. 137.

शास्त्रदीपिकाव्याख्या प्रभा—वैद्यनाथभट्टकृता

Paper. 6 Foll. 11 × 5 inches. 14 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

Foll. bear the numbers 5 to 14. The Foll. 7, 9 to 11 are missing.

Contains a fragment of the 5th adhyāya.

Beginning:

नैवमिति। प्रथमावगतिर्हि अनुष्ठेयस्मृतेर्विप्रकृष्टा। मन्त्रपाठस्तु संनिकृष्टः। तदानीं मन्त्रोच्चारणेन स्मृत्युत्पत्तेरिति भावः। एवं सति विधिवाक्यस्य प्रामाण्यं न स्यादत आह—तदभावे त्विति। विरोधे मन्त्रतो नियमः स्यात्प्रयोगस्वरूपे तस्य सामर्थ्यात्। तस्मात् स विधिक्रम उत्पत्तिगत एवाध्ययनार्थो नानुष्ठानार्थ इति सूत्रार्थः।

End:

इहाप्यापवादिकी संगतिः। प्रकृतितुल्यत्वापवादात्। विकृतीनां सोमविकृतीनाम्। द्वयोश्चेति व्याचष्टे—एकश्चायमिति। अवरोद्धुं प्राप्तुम्। सूत्रे चोर्ध्वमित्यनुषङ्गो बोध्यः।

Colophon:

इति श्रीमद्विद्वन्मान्यश्रीमत्तत्सद्रामभट्टात्मजवैद्यनाथकृतायां शास्त्रादीपिकाव्याख्यायां प्रभा . . . . .

96 54. A. 11.

शास्त्रदीपिकाव्याख्या न्यायमञ्जरी—नारायणशास्त्रिकृता

Paper. 152 Foll. 8 × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from the palm-leaf MS. described in the next number.

This also is a commentary on Pārthasārathimiśra's S'āstradīpikā. The author Kollūri Nārāyaṇas'āstrin was the son of Kollūri Raṅganātha-Somayājin and Accamāmbā and the pupil of Niṭṭala Somanāthadīkṣita, probably the author of the Mayūkhamālikā, which is another commentary on the S'āstradīpikā. The author Nārāyaṇas'āstrin was the author of the three more works on Mīmāṁsā, *namely* the Vidhiviveka, Vidhidarpaṇa and Mimāṁsāsarvasva.

Rājaśekhara the author of the Sāhitya-kalpadruma (R. 2126a of the Madras Govt. Oriental MSS. Library) was our author's 6th descendant. As Somanātha-dīkṣita lived about 1600 A.D. our author may be fixed about 1630 A.D. He mentions Kṣirasāgaramiśra, the commentator on Śābarabhāṣya (No. 42 of this vol.). His brother's name is mentioned as Kāmasomayājin.

Wants beginning in the 3rd pāda of the 2nd adhyāya and goes on up to the end of the 3rd adhyāya with a gap in the 5th pāda.

Beginning :

यागे द्वौ द्वौ संपाद्य दवतग्रसंधिपयसी कुम्भीनां सहोदितत्वात् ताभिः सह प्रस्थाने रूपगुणस्य प्रसिद्धत्वात् सह प्रस्थाय सुप्रसिद्ध . . . . . तत्संबन्धित्वात्- साकंप्रस्थाय . . . य इति कर्मसामानाधिकरण्योपपत्तेर्गुणविधिर्न कर्मान्तरमित्यर्थः । सूत्रार्थस्तु-अयनेषु दाक्षायणादिवाक्येषु संज्ञोपबन्धात् कर्मान्तरमिति ।

संस्कारश्चाप्रकरणे कर्मशब्दात् ।

पूर्ववदिहापि गुणमात्रविधिरित्येवं पूर्वपक्षोत्पानादवान्तरसंगतिः । इतरदिति । सौर्यवाक्यादितरत् वायव्यवाक्यम् ।

End :

एवं प्रतिपादितमध्यायार्थं शिष्यसुखबोधनाय श्लोकेन संगृह्णाति—उक्तशेष इति । सूत्रार्थस्तु—सवनीयानां मांसं विधीयते, न पुरोडाशानाम् । कुतः ? चोदनाविशेषात्, चोदनायां संनिहितत्वान्वयरूपविशेषलाभादिति ।

Colophon :

इति तृतीयस्याध्यायस्याष्टमः पादः समाप्तः ।

इति श्रीसोमनाथदीक्षितगुरुचरणारविन्दानुसंधानविशदीकृतशास्त्रतत्त्वस्य अच्चमाम्बागर्भसंभूतस्य कोल्लूरिसोमयाजितनूभवस्य वादिकण्ठीरवस्य नारायणशास्त्रिणः कृतौ शास्त्रदीपिकाव्याख्यायां न्यायमञ्जरीसमाख्यायां तृतीयस्याध्यायस्याष्टमः पादः ।

समाप्तश्चाध्यायः । इति तृतीयाध्यायः समाप्तः ।

97 28. D. 53.

शास्त्रदीपिकाव्याख्या न्यायमञ्जरी—नारायणशास्त्रिकृता

Palm-leaf. 79 Foll. $17\frac{1}{2} \times 1\frac{1}{4}$ inches. 7 lines in a page. Telugu script. Old. Injured. Illegible writing.

This is the original MS. of the transcript described in last number.

Wants the beginning in the third pāda of the 2nd adhyāya and breaks off in the first pāda of the 4th adhyāya with a gap in the 5th pāda of the 3rd adhyāya.

End :

पुरुषार्थपदेन प्रयोजनं लक्ष्यते । ततश्च अथ शेषशेषिभावविचारानन्तरं अतः शेषिण एव प्रयोजकत्वात् हेतोः प्रयोजकप्रयोज्यविचार आरभ्यत इति। यस्मिन् प्रीतिः । वक्ष्यमाणयोरिति । लक्षणानुक्त्या तयोर्मिथो भेदः ।

98 34. C. 11.

शास्त्रदीपिकाव्याख्या प्रभावली—देवराजदीक्षितकृता

Palm-leaf. 17 Foll. $16 \times 2\frac{1}{2}$ inches 10 lines in a page. Grantha script. Old. Injured. Good writing.

The Foll. bear the numbers 91 to 107.

This also is a commentary on Pārthasārathimiśra's Śāstradīpikā, by Devarāja-

dīkṣita son of Caṇḍikāmbā and Kālanāthamiśra of Ātreya family. The author says that he acquired the proficiency on S'āstrās when he lived in Benares.

Contains the 4th pāda of the 1st adhyāya without the beginning.

Beginning :

वैश्वदेवविकल्प इति चेत् । निर्मन्थ्यशब्दवद्वैश्वदेवशब्दोऽपि यौगिकस्वप्रवृत्तिनिमित्तभूतगुणविधिपरोऽस्त्वित्येवं पूर्वपक्षोत्थानादवान्तरा संगतिरिति दर्शयन्विषयविचारावुपन्यस्यति—चातुर्मास्येति ।

End :

शिष्यबुद्धिवैशद्याय प्रतिपादितानि प्रमाणान्यनुक्रममाणः प्रमाणलक्षणसमाप्तिं दर्शयन् प्रमाणलक्षणस्य प्रमेयचिन्तार्थोत्तरैकादशलक्षणीहेतुत्वादनन्तरं तदारम्भावसर इत्याह—नामार्थवादेति ।

Colophon :

इत्यात्रेयश्रीमत्कालनाथमिश्रसूनोश्चण्डिकाम्बागर्भसंभवस्य काशीवाससंवर्धितविद्यावैभवस्य श्रीमद्देवराजदीक्षितस्य कृतौ शास्त्रदीपिकाव्याख्यायां प्रभावल्यां प्रथमस्याध्यायस्य चतुर्थः पादः ।

समाप्तश्चाध्यायः ।

99 64881.

शास्त्रदीपिकाव्याख्या प्रभावली—देवराजदीक्षितकृता

Paper. 71 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Clear writing.

This is a transcript made from the original palm-leaf MS. described in the last number.

Contains the 4th pāda of the 1st adhyāya without the beginning.

100 10. I. 9 1 & 2

शास्त्रदीपिकाव्याख्यानं प्रभामण्डलम्—यज्ञनारायणदीक्षितकृतम्

Paper. 597 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in two volumes (Foll. 350+247 =597).

This is a transcript made from the MSS. deposited in the Tanjore Palace Library. Burnell Nos. 9553 and 9554. Des. Nos. 6930 and 6931, Vol. XII of the catalogue.

This also is a commentary on Pārthasārathimiśra's S'āstradīpikā, by Yajñanārāyaṇadīkṣita of Carkūri family who lived on the bank of river Kṛṣṇā in Āndhradeśa. He was the son of Gaṅgāmbikā and Koṇḍubhaṭṭopādhyāya, grandson of Yajñeśvarabhaṭṭa and great grandson of Tirumalayajvan I. He was the younger brother of Tirumalayajvan II. The line of his genealogy is thus :



He was the pupil of his grand-father Yajñeśvarabhaṭṭa. It is understood that the author of the Anargharāghavavyākhyā Iṣṭārthakalpavallī, who was originally called as Lakṣmīdhara *alias* Lakṣmaṇa in his household life and later Rāmānanda in his Saṁnyāsa life, was the younger brother of Koṇḍubhaṭṭopādhyāya mentioned above and a protege of Tirumalarāya (1580 A.D.) of Aravīḍu dynasty of Vijayanagaram. Therefore our author Yajñanārāyaṇa may be fixed in the period (1580 A.D.) as a junior contemporary of Lakṣmīdhara of Carkūri family. *Vide* for the details regarding the works, date etc., of Yajñanārāyaṇa and Lakṣmīdhara, the Manuscripts Notes byPandit V. Krishnamacharya, published in the Adyar Library Bulletin, Vol. X, Part I—1946. Our author Yajñanārāyaṇa should not be confounded with the other Yajñanārāyaṇa who was the son of the famous Govindadīkṣita, the minister of King Raghunātha of Tanjore. It is also wrong to identify our author's paternal uncle Lakṣmīdara with the author of the Advaitamakaranda who must be far earlier as his work (Advaitamakaranda) was commented by Brahmānanda-Bhāratī, whose Puruṣārthaprabodha was referred to by Appayadīksita (1520 to 1593 A.D.) in his S'ivatattvaviveka. Therefore the author of the Advaitamakaranda must have lived not later than the first half of the 15th century A.D.

Begins in the 2nd Pāda of the 1st adhyāya and goes on up to the end of the 2nd adhyāya.

Beginning :

. . . संबन्धिवीचिनिचयखचितधनैः ।
पूर्णबिम्बाधरः . . . . . मधृतकलङ्का . . . ॥
वन्देऽस्मत्प्रपितामहं तिरुमलश्रीयज्वराजं तथा
यज्ञेशं च पितामहं स्वपितरं श्रीकोण्डुभट्टारकम् ।
तच्छिष्यानुजनिं पितृव्यतिलकं श्रीलक्ष्मणार्यं गुरुं
ज्येष्ठं श्रेष्ठगुणान्वितं तिरुमलाख्यानं वरं यज्वनाम् ॥
कदलिकपोतमहेशप्रीतिपरिप्राप्तभारतीश्रीकान् ।
श्रीचरकूरिकुलेन्दूनन्यानपि नौमि पुरुषधौरेयान् ॥
सुत्वेह गौतमाम्बातनयोऽलंकारनाटकादिकरः ।
वेदान्ततर्कशब्दग्रन्थकृदाभाति जगति यज्ञेशः ॥
प्रभिन्नतमसं शास्त्रदीपिकार्थप्रकाशकम् ।
प्रभामण्डलनामानं प्रबन्धं सोऽहमारभे ॥

आम्नायस्य क्रियार्थत्वात् ।

तत्रास्मिन्नध्याये करिष्यमाणार्थवादमन्त्रस्मृतिनामधेयविचारस्य संगतिं कथयितुं प्रथमसूत्रवृत्तार्थं कीर्तयति—अथातो धर्मजिज्ञासेत्यत्रेति । अथातो धर्मजिज्ञासेत्यत्र धर्मो जिज्ञास्यत्वेन विचार्यत्वेन प्रविज्ञात इत्यन्वयः । जिज्ञासाशब्दस्य विचारे लक्षणा । प्रकारस्तु प्रथमसूत्रव्याख्याने सम्यगस्माभिरुपपादितो द्रष्टव्यः ।

Beginning of the 2nd adhyāha.

पतन्ती . . शिरोगङ्गा पुरे वटफलावली ।
तयोः प्रवालमालेव धार्यमाणा धिनोतु माम् ॥
श्रीपितामहयज्ञेशगुर्वनुग्रहचोदितः ।
व्याकरोम्यहमध्याये द्वितीये शास्त्रदीपिकाम् ॥

End :

शिष्याणां सुखबोधार्थमेतल्लक्षणार्थं वक्ष्यमाणलक्षणार्थं च कारिकया संगृह्णाति—शब्दान्तरेति । ससंख्यैः शब्दान्तराभ्यासगुणैः नाम्ना दूरेण प्रकारान्त-

रेण च सह सापवादः त्रयाणामयं भेदः साधितः। अस्मिन्नध्याय इति शेषः। ततः परं तृतीयाध्याये एतेषां भिन्नानां कर्मणां विनियोगचिन्ता करिष्यत इति योजना।

Colophon :

इति श्रीसकलपण्डितमण्डलाखण्डलचरकूरिकोण्डुभट्टोपाध्यायतनयेन पितामहश्रीयज्ञेश्वरभट्टोपाध्यायशिष्येण काश्यपगोत्रबह्वृचाग्रेसरेण तिरुमलयज्वप्रियसोदरेण गङ्गाम्बिकेयेन श्रीयज्ञनारायणदीक्षितेन विरचिते शास्त्रदीपिकाव्याख्याने प्रभामण्डलाख्याने द्वितीयाध्यायस्य चतुर्थः पादः।

101 19. I. 9$\frac{3}{4}$

शास्त्रदीपिकाव्याख्या प्रभामण्डलम्—अनुभवानन्दकृतम्

Paper. 152 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from a MS. deposited in the Tanjore Palace Library. Burnell No. 9555, Descriptive Catalogue No. 6932.

This is another commentary on Pārthasārathimiśra's, Śāstradīpikā, by Anubhavānanda, disciple of Kṛṣṇānanda. Like Yajñanārāyaṇa's this commentary also is called Prabhāmaṇḍala. The author Anubhavānanda is known to have been the class-mate of Carkūri Lakṣmīdhara (1680 A.D.) under Kṛṣṇānanda. For more details about the author and his works etc., see the MSS. Notes by Pandit V. Krishnamacharya, published in the Adyar Library Bulletin Vol. X, Part I—1946.

Wants the beginning in the 42 pāda of the 3rd adhyāya and breaks off in the end of the 6th pāda of same adhyāya.

Beginning :

. . . . तादर्थ्यनिर्णयादेव प्रतिषेधैदमर्थ्यनिर्णयासिद्धेः संदेहायोगादिति चेन्मैवम्। एतदधिकरणकार्यप्रवृत्तकैमर्थ्यस्य विचारात्प्राङ् निषेधैदमर्थ्यानिर्णयेन निषेधैदमर्थ्यव्याप्यनिर्णयात् संशयसंभवेनोदाहरणत्वोपपत्तेरिति भावः।

Colophon (page 125) :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमत्कृष्णानन्दपूज्यपादशिष्यश्रीमदनुभवानन्दविरचिते शास्त्रदीपिकाव्याख्याने प्रभामण्डलाख्याने तृतीयाध्यायस्य चतुर्थः पादः।

End :

स्वयमेवेति। संस्थानपेक्षयैवेत्यर्थः। संस्थानां तु आश्रयापेक्षतया तमनादृत्याङ्गजातग्राहकत्वाशक्तेर्न तत्र . . . . . .

102 40. B. 18.

शास्त्रदीपिकाव्याख्या आलोकः—कमलाकरभट्टकृतः

Paper. 213 Foll. $11 \times 4\frac{3}{4}$ inches. 10 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

The Foll. are arranged in three sets each containing the leaves with separate serial numbers.

The first set contains 111 Foll. the second 72 and the third 30. The bundle contains also another work Śāstradīpikāvyākhyā Prakāśa by Śaṁkarabhaṭṭa.

The Āloka is a commentary on the Śāstradīpikā of Pārthasārathimiśra. The

author of the commentary Kamalākarabhaṭṭa was the son of Rāmakṛṣṇabhaṭṭa, grandson of Nārāyaṇabhaṭṭa and great-grandson of Rameśvarabhaṭṭa of the Baṭṭa family of Benares. He is said to have written 2 more works on Mīmāṁsā, *namely* Śāstramālā and a commentary on Kumārila's Tantravārttika. He is also credited with about 40 works dealing with various subjects. His famous Dharmaśāstra work Nirṇayasindhu gives the date of its composition as Saṁ. 1668 corresponding to 1612 A.D. Therefore his activities in literary field might have been in the first half of the 17th century A.D. For more details about the author and other members of his family, refer to the MSS. Notes by Pandit V. Krishnamacharya, published in the Adyar Library, Bulletin, Madras, Vol. XI, Part 4—1947.

Begins in the 2nd pāda of the 1st adhyāya and goes on up to the end of the 1st pāda of tho 3rd adhyāya.

Beginning :

श्रीरामकृष्णं पितरं नत्वोमाख्यां च मातरम् ।
श्रीरामं च शिवं नत्वा व्याख्यास्ये शास्त्रदीपिकाम् ॥
यस्तु राणकचौर्येण स्वपाण्डित्यं प्रकाशयन् ।
निनिन्द बहुभाषित्वात्तस्य शिक्षेह तन्यते ॥
मूर्खान्प्रतारयन्बालान् यः सिद्धान्तमनीनशत् ।
विन्यस्यत्यस्य शिरसि दशार्धं कमलाकरः ॥

आम्नायस्य । द्वितीयपादे करिष्यमाणार्थवादादिप्रामाण्यविचारस्य संगतिमध्यायसंगतिं प्रकृतसंगतिं च वक्तुं वृत्तमनुकीर्तयति—अथात इति । अथातो धर्मजिज्ञासेति शास्त्रारम्भप्रतिज्ञार्थं सूत्रस्थाथशब्देन सामर्थ्यादध्ययनविधिमूलकत्वाच्च वेदाध्ययनानन्तर्यमुच्यते । वेदार्थस्य धर्मत्वेन तज्जिज्ञासायास्तदनन्तरमेव संभवात् ।

End :

विज्ञानेश्वरादयस्तु विकल्पेन अध्येतृप्रवर्त्यभेदात्तत्रापीच्छन्ति । एकशाखायामपि संबन्धभेदे भवत्येवोपसंहारः । यथानारभ्योक्तस्य सात्तदश्यस्य पशुमित्रविन्दादाविति दशमे वक्ष्यते । मनोतायां वचनात् त्वाष्ट्रे तद्धितद्वयात् सत्रे कर्तृबहुत्वस्यैकत्रघटितत्वाच्चान्यग्रहणम् । सूत्रार्थस्तु—अग्निगुणयुक्तः शेषश्चतुर्धाकरणं साधारणं स्यात् । तेषां शेषिणामन्योन्यसंबन्धाभावादिति शङ्का ।

Colophon :

इति जगद्गुरुनारायणभट्टसूरितनूजरामकृष्णभट्टात्मजमहामहोपाध्यायकमलाकरभट्टकृते शास्त्रदीपिकाकालोके तृतीयाध्यायस्य प्रथमः पादः ।

The scribe adds.

देवविद्येश्वरस्य चन्द्रदेवविभागे ।

103 64909 & 64910.

शास्त्रदीपिकाव्याख्या आलोकः—कमलाकरभट्टकृतः

Paper. 336 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in two volumes.

This is a transcript made from the orginal MS. described in last number.

Begins in the 2nd pāda of the 1st adhyāya and goes on up to the end of the 1st pāda of the 3rd adhyāya.

104 40. B. 18.

शास्त्रदीपिकाव्याख्या प्रकाशः—शंकरभट्टकृतः

Paper. 50 Foll. 11 × 4¾ inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing. The bundle contains also other work—S'āstradipikāvākhyā Āloka.

Like the previous one, this also is a commentary on the S'āstradīpikā of Pārthasarāthi-mis'ra. The author S'aṁkarabhaṭṭa was the son of Nārāyaṇabhaṭṭa and grandson of Rāmes'varabhaṭṭa of the Bhaṭṭa family of Benares. He is known to have written some more works on Mīmāṁsā *namely* Mīmāṁsābālaprakās'a in which he mentions this work, Mīmāṁsāsārasaṁgraha, and Vidhirasāyanadūṣana. His father Nārāyaṇabhaṭṭa wrote a commentary on Kedārabhaṭṭa's Vṛttaratnākara. The date of that commentary is given as Saṁ. 1616 corresponding to 1559 A.D. As S'aṁkarabhaṭṭa was the author of the Vidhirasāyanadūṣaṇa, a refutation of the Vidhirasāyana of Appayadīkṣita (1520 A.D.) and was referred to by Khaṇḍadeva (1600 A.D.,) he may be fixed in the latter part of the 16th century A.D. Kamalākarabhaṭṭa, the author of the S'āstradīpikāvyakhyā Āloka etc., was his brother's son.

Refer for more details about the author and other members of his family, to the MSS. Notes by Pandit V. Krishnamacharya, published in the Adyar Library Bulletin, Vol. XI, Part 4—1947.

Contains the adhyāya 11th only.

Beginning :

प्राप्तबाधमपवादतयास्या-
भ्युच्चयं च दशमे प्रविचिन्त्य ।
तन्त्रमेतदपवादतया चा-
वापमुद्यत इहेत्यभिधातुम् ॥

प्रयोजनाभिसंबन्धात् । दशमैकादशाध्याययोः संगतिं वक्तुं दशमार्थमनुवदति—दशम इति । अभ्युच्चय उपहोमैरनूयाजान् बाध्यन्त इति बाधाभावमात्रं न भावरूपं पदार्थान्तरं शास्त्रप्रमेयम् । न चैवमर्थभेदादध्यायभेदापत्तिः कर्मभेदस्यैव द्वितीयलक्षणार्थत्वेऽपि तदपवादतयैवाभेदस्याप्युक्तेः स्वातन्त्र्येणानुक्तेर्यथा नार्थभेदः । न हि तत्राङ्गपरिमाणवदेकं किंचिद्भेदाभेदचिन्ताद्वारा चिन्तनीयमस्ति ।

End :

हविष्कृदादिकृतं तु प्रकाशनमर्थान्तरप्रकाशनैर्व्यवधानात् न स्वरूपेण न वा संस्काररूपेण कालान्तरं यावत्तिष्ठतीत्यावृत्तिरित्याशयः । एतदध्यायार्थमुपसंहरन् उत्तराध्यायार्थमुपक्षिपति—तन्त्रेति । सिद्धान्तसूत्रं स्पष्टम् ।

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाद्वैतसाम्राज्यधुरंधरश्रीभट्टनारायाणात्मजभट्टशंकरकृते शास्त्रदीपिकाप्रकाशे एकादशोऽध्यायः ।

105 64911.

शास्त्रदीपिकाव्याख्या प्रकाशः—शंकरभट्टकृतः

Paper. 117 Foll. 8½ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from the original MS. described in the last number

Contains the 11th adhyāya only.

106 20. L. 25.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथयज्वकृता

Palm-leaf. 249 Foll. 16¾ × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

This is a standard commentary on Pārthasārathimisra's S'āstradīpikā. The commentary is called Mayūkhamālikā. The commentator Somanāthayajvan or Somanāthadīkṣita was the son of Sūrubhaṭṭamahopādhyāya and younger brother and pupil of Veṅkaṭādriyajvan of Niṭṭila family.

In the Ūha portion (2-1-34) of this commentary he gives his own case as an illustration, mentioning his great grandfather as Sūres'varayajvan, grand-father as Somanāthayajvan, mother as Mairammadā. As he refutes the view of Appayadīkṣita by mentioning his Vidhirasāyana he must be later than the 16th century A.D. He has been mentioned by S'aṁbhubhaṭṭa in his Prabhāvalī which was composed in 1708 A.D. Therefore Somanāthayajvan must be placed in the period about 1640 A.D.

The commentary has been printed and published in the Nirnaya Sāgar Press, Bombay.

Begins in the 2nd pāda of the 1st adhyāya and goes on up to the end of the 2nd adhyāya.

Beginning :

आविष्करोतु विबुधैरभिनन्दनीयां
वाचं स कोऽपि मम वल्लभसार्वभौमः ।
वंशोऽपि यत्परिगृहीततया बिभर्ति
वाचालतां त्रिभुवनैकविमोहयित्रीम् ॥
अधिगत्य कलामखिलामग्रभावाकटाद्रियज्वगुरोः ।
वचनैरनतिप्रचुरैर्व्याकुर्वे शास्त्रदीपिकां विशदाम् ॥
विबुधाः प्रणम्य मूर्ध्ना बहुधा वः प्रार्थये कृतावस्याम् ।
अर्पयत दृशं सूक्ष्मां निन्दत परतोऽभिनन्दत वा ॥
परिलिखतः किंचिदपि प्रकृतिर्भवति प्रमाद इति ।
अन्विष्य गुणकणानप्यभिनन्दत वीतमत्सरा विबुधाः ॥

सू—आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ।

नन्वर्थवादादेः प्रामाण्यविचारस्य धर्मविचारात्मकत्वाभावात् कथं शास्त्रसंगतिरित्याशङ्क्य शास्त्रार्थप्रदर्शनपरप्रथमसूत्रार्थकथनेन शास्त्रसंगतिं तावद्दर्शयति —अथात इति । अत्राथशब्द आनन्तर्यार्थकः । अतःशब्दस्तु अनधीतवेदो वेदार्थभूतं धर्मं विचारयितुं न शक्नोतीति पूर्ववृत्ताध्ययनहेतुत्वस्थिरीकरणार्थः, तन्मुखेनाथशब्दस्यार्थान्तरपरत्वशङ्कानिराकरणार्थश्च ।

End :

सूत्रार्थस्तु—काठकमित्यादिसंज्ञयाष्टाकपालद्वादशकपालादिना रूपेण कारीर्याद्यध्ययनेषु भूरिभोजनादिधर्मविशेषेण पुनरुक्त्योदितानुदितहोमनिन्दयैकस्मिन् कर्मणि सर्वशाखागतानामज्ञानामनुष्ठानाशक्त्याग्निचयनादेः शाखाभेदात्समाप्तिभेदेनोदितानुदितहोमयोः स्वस्वकालातिक्रमे प्रायश्चित्तविधानेनेष्टयज्ञानामनिष्टयज्ञानां च द्वादशाहे दर्शनादिरूपान्यार्थदर्शनेन च शाखान्तरे कर्मभेदः स्यादिति ।

Colophon :

इति निट्टलकुलतिलकसूरुभट्टोपाध्यायतनूभवस्य वेंकटाद्रियज्वगुरुचरणानुजस्य सोमनाथस्य सर्वतो-

मुखयाजिनः कृतौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकाख्यायां द्वितीयस्याध्यायस्य चतुर्थः पादः ।

107 8. E. 18.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथयज्वकृता

Paper. 311 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 16 lines in a page. Devanāgarī script. New. Good. Good writing.

Contains the 3rd adhyāya only complete.

Beginning :

अथातः शेषलक्षणम् । हेतुहेतुमद्भावसंगतिं सूचयन् वृत्तकथनपूर्वकं वर्तिष्यमाणं प्रतिजानीते—एवमिति । इदानीमित्यनेन भेदाधीनत्वाविशेषेऽपि प्रयुक्त्यादिनिरूपणस्य नायं समयः, तेषां शेषशेषिभावापेक्षत्वात् । किंतु शेषशेषिभावनिरूपणस्यैवेति दर्शयति ।

End :

सूत्रार्थस्तु—श्रौततरसशब्दव्याख्यानं मांसमिति तद्धानादीनां सवनीयानामेव । न तु सवनीयासवनीयपुरोडाशानां संनिहितान्वयरूपविशेषलाभादिति ।

Colophon :

इति निट्टिलकुलतिलकसूरिभट्टमहोपाध्यायतनयस्य वेंकटाद्रियज्वगुरुचरणानुजस्य सोमनाथसर्वतोमुखयाजिनः कृतौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकाख्यायां तृतीयस्याध्यायस्याष्टमः पादः । समाप्तश्चाध्यायः ।

This transcript is said to have been made from the original MS. available at Belur.

108 19. N. 33.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथयज्वकृता

Palm-leaf. 36 Foll. $18 \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured Good writing.

Wooden board is added at the end.

Wants beginning in the 6th pāda of the 3rd adhyāya and completes almost the 8th pāda of the same adhyāya.

109 20. E. 52.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथयज्वकृता

Palm-leaf. 224 Foll. $15 \times 1\frac{1}{4}$ inches. 8 lines in a page. Telugu and Grantha script. Old. Much injured. Legible writing.

Wants the beginning in the 1st pāda of the 7th adhyāya and goes on up to the end of the 2nd pāda of the 12th adhyāya.

110 20. M. 4.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथयज्वकृता

Palm-leaf. 262 Foll. $15 \times 1\frac{1}{4}$ inches. 9 lines in a page. Telugu script. Old. Much injured. Clear writing.

Begins in the 3rd adhyāya and goes on up to the 2nd pāda of the 6th adhyāya.

111 20. M. 5.

Palm-leaf. 132 Foll. $17 \times 1\frac{1}{2}$ inches.

8 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the pādas 2 to 4 (almost complete) in the 1st adhyāya.

Three fly-leaves added at the beginning contain some notes on the work in Nandināgiri script.

112 20. M. 6.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथयज्वकृता

Palm-leaf. 272 Foll. 14 × 2 inches. 13 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves are arranged into two sets with serial numbers 1 to 90 and 1 to 182. There are five extra leaves added at the end and they contain a portion of the work in duplicate on 3-2-14. The Fol. 28 in the first set is too much broken and it has been kept tied with thread.

Contains the adhyāyas 2 and 3 complete.

113 20. M. 7.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथयज्वकृता

Palm-leaf. 265 Foll. 14½ × 1½ inches. 8 lines in a page. Grantha script. Old. Much injured. Good writing.

Begins in the 2nd pāda of the 1st adhyāya and breaks off in the 3rd pāda of the 2nd adhyāya.

114 20. M. 8.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथयज्वकृता

Palm-leaf. 249 Foll. 16 × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the adhyāyas 10 to 12 Complete.

Beginning :

कनति कनकमञ्चे कामिनीमङ्कलीनां
करधृतशुभवीणां लीलया लालयन्तम् ।
अरुणमखिलभूषालंकृतं चन्द्रचूडं
दलितविनमदार्तिं दक्षिणामूर्तिमीडे ॥

(सू-) विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात् । शिष्यावधानार्थं वृत्तकथनपूर्वकं वर्तिष्यमाणं प्रतिजानीते—ऊह इति । विकृतिष्वतिदिष्टानामज्ञानामित्यन्वयः । अभ्युच्चयो वैकृतैः प्राकृतानां समुच्चयः ।

End :

शास्त्रार्थमपरार्धेन संगृह्णाति—जिज्ञास्य इति । अथातो धर्मजिज्ञासेति स्वरूपप्रमाणसाधनफलैः प्रकारैर्यो धर्मो जिज्ञास्यत्वेन प्रतिज्ञातः । स धर्मः प्रथमादिभिर्द्वादशान्तैरध्यायैः प्रतिज्ञातः । धर्मनिर्णयरूपं फलं सिद्धमित्यर्थः ।

Colophon :

इति श्रीनिट्टलकुलतिलकसूरुभट्टमहोपाध्यायतनूभवस्य वेंकटाद्रियज्वगुरुचरणानुजस्य सोमनाथसर्वतोमुखयाजिनः कृतौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकाख्यायां द्वादशस्याध्यायस्य चतुर्थः पादः । अध्यायश्च समाप्तः ।

Then reads the following stanzas :

गृह्णन्त्वन्तिकवर्तिनीमिव तलक्षोणीं तटस्था जनाः
प्रासन्न्यादिह पार्थसारथिसुधीवाचां ह्रदानामिव ।
अन्तस्तत्र निमज्ज्य गाढमसकृद्धे व्याप्रियन्ते जना
गाढं ते तु कथं च तेन च पुनर्गृह्णन्ति गाम्भीर्यतः ॥

ईदृशीयमपि शास्त्रदीपिका
व्याकृता यदिह साहसान्मया ।
व्यक्तमेतदुपदेशदार्ढ्यतो
वेंकटाद्रिमखिनोऽग्रजन्मनः ॥

115 20 M. 40.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 184 Foll. $16\frac{3}{4} \times 1\frac{1}{4}$ inches. 7 lines in a page. Telugu script. Old. Injured. Clear writing.

Begins in the 6th adhyāya and breaks off in the middle of the 4th pāda of the 10th adhyāya.

116 20. M. 45.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 102 Foll. $14\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Much injured. Good writing.

Wooden boards are added to both sides.

Begins in the 2nd pāda and breaks off in the middle of the 4th pāda of the 1st adhyāya.

117 20. M. 47.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 118 Foll. $16 \times 1\frac{1}{2}$ inches. 9 lines in a page. Telugu script. Old. Much injured. Good writing.

Contains the adhyāyas 10 and 12 (almost complete).

The leaves are marked with numbers 95—186 and 216 to 241.

118 21. A. 79.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 184 Foll. $18 \times 1\frac{1}{2}$ inches. 7 lines in a page. Grantha script. Old. Much injured. Good writing.

Wooden boards are added to both sides.

Wants beginning in the 3rd pāda of the 3rd adhyāya and goes on up to the end of the 6th adhyāya.

119 23. D. 16.

शास्त्रदीपिकाव्याख्या मयूखमालिका— सोमनाथ-यज्वकृता

Palm-leaf. 132 Foll. $12 \times 1\frac{1}{2}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Begins in the 2nd pāda of the 3rd adhyāya and breaks off in the middle of the 8th pāda of the same adhyāya.

120 23. M. 7.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 87 Foll. $18 \times 1\frac{1}{2}$ inches. 8 lines in a page. Telugu script. Old. Much injured. Clear writing.

Begins in the 7th adhyāya and breaks off in the middle of the 4th pāda of the 9th adhyāya.

The commentary is named in this MS. as Aṁsumālikā instead of Mayūkhamālikā.

121 24. B. 4.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 13 Foll. $18\frac{3}{4} \times 2$ inches. 11 lines in a page Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the 2nd pāda complete and a few lines in the beginning of the 3rd pāda of the 1st adhyāya.

122 24. D. 2.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 54 Foll. $19 \times 2\frac{1}{4}$ inches. 12 lines in a page. Grantha and Malayalam scripts. Old. Injured. Illegible writing.

The leaves are in disorder.

Wooden boards are added to both sides.

Begins towards the end of the 2nd pāda and breaks off in the middle of the 3rd pāda of the 1st adhyāya. 8 extra leaves added at the end contain a few miscellaneous passages taken from Vyākaraṇa works.

123 24. F. 10.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 22 Foll. $18 \times 1\frac{1}{2}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the 1st pāda only of the 3rd adhyāya.

124 26. K. 11.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 112 Foll. $15 \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha and Telugu scripts. Old. Much injured. Good writing.

Wants beginning in the 2nd pāda of the 1st adhyāya and breaks off in the 1st pāda of the 3rd adhyāya.

125 28. D. 53.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 31 Foll. $17\frac{1}{2} \times 1\frac{1}{4}$ inches. 7 lines in a page. Telugu script. Old. Injured. Illegible writing.

Contains fragments of the 11th and 12th adhyāyas.

126 30. G. 10.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 74 Foll. $16\frac{1}{4} \times 1\frac{1}{2}$ inches. 6 lines in a page. Grantha script. Old. Much injured. Good writing.

Contains the pādas 1 to 4 (incomplete) in the 3rd adhyāya. The first leaf begins with a few lines of the end of the 4th pāda of the 2nd adhyāya.

127 30. H. 3.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 124 Foll. $18\frac{1}{2} \times 1\frac{1}{2}$ inches.

7 lines in a page. Grantha script. Old. Much injured. Clear writing.

Wooden boards are added to both sides.

Contains the adhyāya 10 complete.

The leaves bear the numbers 133 to 256.

The fly-leaf mentions the name of Dharmaśivācārya as the former owner of the MS.

128 30. H. 25.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 40 Foll. 16 × 1¼ inches. 10 lines in a page. Grantha script. Old. Fair. Good writing.

Contains the pādas 2 to 4 of the 4th adhyāya.

129 30. I. 1.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 98 Foll. 16 × 1½ inches. 8 lines in a page. Telugu script. Old. Much injured. Good writing.

The first 10 leaves are half-broken.

Wants two leaves for the beginning of the 2nd pāda of the 1st adhyāya and goes on up to the end of the 4th pāda of the same adhyāya.

130 30. I. 20.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 152 Foll. 16 × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Clear writing.

Wooden boards are added to both sides.

Contains the adhyāyas 7 to 11 (incomplete).

131 30. I. 29.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 101 Foll. 17 × 1⅛ inches. 8 lines in a page. Grantha script. Old. Injured. Good and small writing.

Contains the pādas 2 to 4 of the first adhyāya.

The last page mentions the total number of Granthas of the portion contained as 3400.

132 34. B. 4.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 78 Foll. 17½ × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Contains fragments of the adhyāyas 10, 11 and 12.

133 34. F. 10.

शास्त्रदीपिकाव्याख्या मयूखमालिका—सोमनाथ-यज्वकृता

Palm-leaf. 110 Foll. 18 × 1¼ inches. 7 lines in a page. Grantha script. Old. Much injured. Illegible writing.

Wooden boards are added to both sides.

Wants beginning in the 2nd pāda of the 1st adhyāya and break off in the 1st pāda of the 2nd adhyāya.

134 27. O. 12.

जैमिनीयन्यायमाला—माधवाचार्यकृता

Palm-leaf. 90 Foll. 13 × 1¼ inches. 7 lines in a page. Grantha script. New. Good. Good writing.

This is a metrical summary of the purport of the Pūrvamīmāṁsāsūtras of Jaimini. It contains about 1700 verses. The author of the work was the well-known Mādhavacārya the minister of Bukkaṇa or the King Bukka I (1356 to 1377) of the Vijayanagaram dynasty. Mādhavācārya was the son of Māyaṇa and S'rīmatī and had two brothers called Sāyaṇa and Bhoganātha. Some of the MSS. of the Jaiminīyanyayamālāvistra by the same author (available in the Madras Govt. Oriental MSS. Library and the Tanjore Palace Library) and the printed edition of the Poona Ānandāsrama series, mention the author with the name Bhaṭṭa-Mādhava with the titles of Trikāṇḍa-mīmāṁsāmaṇḍana and Prativasantasomayājin. This leads the readers to guess the identity of this author with the father of Bhaṭṭa-Somesvara, the author of the Nyāyasudhā, which also mentions Mādhava with the same titles.

Bamboo boards are added to both sides.

Complete In 12 adhyāyas. The first leaf is partly broken.

Beginning :

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
युक्तिं मानवतीं विदन् स्थिरधृतिर्भेदे विशेषार्थभा-
गाप्तोहः क्रमकृत्प्रयुक्तिनिपुणः श्लाघ्यातिदेशोन्नतिः ।
नित्यस्फूर्त्यधिकारवान्गतसदाबाधः स्वतन्त्रेश्वरो
जागर्ति श्रुतिमत्प्रसङ्गचरितः श्रीबुक्कणक्ष्मापतिः ॥
यद्ब्रह्म प्रतिपाद्यते प्रगुणयत्तत्पञ्चमूर्तिप्रथां
तत्रायं स्थितिमूर्तिमाकलयति श्रीबुक्कणक्ष्मापतिः ।
विद्यातीर्थमुनिस्तदात्मविलसन्मूर्तिस्त्वनुग्राहक-
स्तेनास्य स्वगुणैकखण्डितपदं सार्वज्ञ्यमुद्द्योतते ॥

Ends :

आर्त्विज्यं किं त्रिवर्णानां विप्राणामेव वाग्रिमः ।
विद्यावत्त्वान्न तद्युक्तं ब्राह्मणस्यैव तत्स्मृतेः ॥

Colophon :

इति जैमिनीयन्यायमालायां द्वादशस्याध्यायस्य चतुर्थः पादः । अध्यायश्च समाप्तः ।

Then the following stanza is added :

स्मरामि हृदयाम्बुजे कमपि वीरमम्भोनिधे-
र्निबन्धनमबिन्धनज्वलनबन्धुतूणीशयम् ।
न कश्चिदपि दृश्यते जगति यस्य शक्तो जये
स्मरप्रहितजानकीनयनपद्मबाणं विना ॥

A fly-leaf added at the end gives the number of adhikaraṇas of each of the pādas of the Pūrvamīmāṁsāsūtras.

Some colophons incorrectly read the work as Jaiminīyanyāyamālāvistara.

135 30. I. 25.

जैमिनीयन्यायमालाविस्तरः—माधवाचार्यकृतः

Palm-leaf. 88 Foll. $14\frac{3}{4} \times 1\frac{1}{4}$ inches. 11 lines in a page. Grantha script. Old. Injured. Good writing.

This is a commentary by the famous Madhavācārya on his own Jaiminīya-nyāyamālā described under the last number. The Commentary is called Vistara.

Wants a small portion in the beginning of the adhyāya and goes on up to the end of the 4th pāda of the 6th adhyāya.

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
जैमिनीयन्यायमाला श्लोकैः संगृह्यते स्फुटम् ॥

जैमिनिप्रोक्तानि धर्मनिर्णायकान्यधिकरणानि न्यायाः । तेऽस्य ग्रन्थस्य विषयाः । पठितुं सुशकैः श्लोकैः कतिपयैरेव तेषां स्फुटीभावः प्रयोजनम् । न्यायमाला संगृह्यत इति ग्रन्थनामनिर्देशपूर्विका प्रतिज्ञा । करिष्यमाणस्य ग्रन्थस्य प्रकारं दर्शयति—

एको विषयसंदेहपूर्वपक्षावभासकः ।
श्लोकोऽपरस्तु सिद्धान्तवादी प्रायेण कथ्यते ॥

End :

शाखा वत्सापाकरणादावुपयुक्ता । तस्याः पुनरङ्गत्वविधिर्न संभवति, विनियुक्तविनियोगस्यान्याय्यत्वात् । तस्मात् शाखा प्रतिपत्तिमपेक्षत इति तत्प्रतिपत्त्यर्थः कालः प्रस्तरप्रहरणेनोपलक्ष्यते । तथा सति यदा प्रस्तरं प्रहरति तदा शाखामपि विद्यमानां प्रहरेत् । न तु सांनाय्यरहितेन संपादनीयेति ।

Colophon :

इति श्रीमाधवीये जैमिनीयन्यायमालाविस्तरे षष्ठाध्यायस्य चतुर्थः पादः ।

136 21. F. 52.

जैमिनीयन्यायमालाविस्तरः—माधवाचार्यकृतः

Palm-leaf. 185 Foll. $17 \times 1\frac{3}{8}$ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Begins in the 3rd adhyāya and breaks off in the 2nd pāda of the 10th adhyāya.

137 25. G. 28.

जैमिनीयन्यायमालाविस्तरः—माधवाचार्यकृतः

Palm-leaf. 123 Foll. $16\frac{1}{2} \times 1\frac{3}{8}$ inches. 5 lines in a page. Telugu script. Old. Slightly injured. Clear writing.

Begins in the 2nd pāda of the 1st adhyāya and breaks off in the 3rd pāda of the 3rd adhyāya.

Two extra leaves added at the end contain a few lines of the Pratāparudrayasobhūṣaṇa.

138 26. C. 31.

जैमिनीयन्यायमालाविस्तरः—माधवाचार्यकृतः

Palm-leaf. 27 Foll. $17\frac{1}{4} \times 1\frac{1}{4}$ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the pādas 1 to 6 only in the 3rd adhyāya.

The following two stanzas are found in the beginning.

प्रमाणभेदशेषत्वप्रयुक्तिक्रमकर्तृभिः ।
सातिदेशविशेषोहबाधतन्त्रप्रसङ्गतः ॥
स्वरूपमादौ तद्भेदस्तदुपासनपूर्वकम् ।
फलं च देवताकाण्डे देवतानां विधीयते ॥

The first stanza gives the contents of the 12 adhyāyas of the Karmakāṇḍa and the second of the 4 adhyāyas of the Devatākāṇḍa.

139 139. H. 30.

जैमिनीयन्यायमालाविस्तरः—माधवाचार्यकृतः

Palm-leaf. 54 Foll. 14 × 1 inches. 8 lines in a page. Grantha script. Old. Good. Good writing.

Begins in the 4th adhyāya and breaks off in the 6th pāda of the 6th adhyāya.

140 26. K. 27.

जैमिनीयन्यायमालाविस्तरः—माधवाचार्यकृतः

Palm-leaf. 150 Foll. 16 × 1¼ inches. 7 lines in a page. Grantha script. Old. Much injured. Good writing.

The leaves are arranged into two groups. The first group consists of 42 Foll. (1 to 42) and contains from the 2nd pāda of the 6th adhyāya to the end of the 7th adhyāya. The second group consists of 108 Foll. (1 to 108) and contains the adhyāyas 10 to 12.

End:

पञ्चदशं रचयति—

आर्त्विज्यं किं त्रिवर्णानां विप्राणामेव वाग्मिनः ।
विद्यावत्त्वान्न तद्युक्तं ब्राह्मणस्यैव तत्स्मृतेः ॥

. . . . . तथा च याज्ञवल्क्यः—प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथेति । एवं स्मृत्यन्तराण्यप्युदाहरणीयानि । तस्माद्विप्रस्यैवा . . . . . .

Colophon:

. . . . . मालाविस्तरे द्वादशस्याध्यायस्य चतुर्थः पादः ।

141 26. N. 30.

जैमिनीयन्यायमालाविस्तरः—माधवाचार्यकृतः

Palm-leaf. 103 Foll. 14¾ × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Bamboo boards are added to both sides.

The leaves are arranged into three groups. The first group consists of 8 Foll (1-8) and the second 22 (1-22). These two groupts contain the pādas 1 to 3 (incomplete) of the 3rd adhyāya. The third group consists of 73 Foll. (1 to 73) and contains the 5th adhyāya complete and the 6th adhyāya incomplete.

142 30. H. 14.

जैमिनीयन्यायमालाविस्तरः—माधावाचार्यकृतः

Palm-leaf. 80 Foll. 14 × 1 inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

The Fol. 13th is wrongly numbered as 12 and hence the error continues in further folios also.

Begins in the 2nd pāda of the 1st adhyāya and breaks off in the 3rd pāda of the 3rd adhyāya.

143 30. I. 3.

जैमिनीयन्यायमालाविस्तरः—माधवाचार्यकृतः

Palm-leaf. 193 Foll. 17½ × 1¼ inches.

7 lines in a page. Telugu script. Old. Much injured. Good writing.

Wooden boards are added to both sides.

Wants the beginning in the 1st pāda of the 1st adhyāya and breaks off in the 2nd pāda of the 9th adhyāya.

144 34. J. 18.

जैमिनीयन्यायमालाविस्तरः—माधवाचार्यकृतः

Palm-leaf. 222 Foll. $18\frac{1}{2} \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Much injured. Clear writing.

Wants the beginning in the 2nd pāda of the 1st adhyāya and breaks off in the 1st pāda of the 9th adhyāya.

The fly-leaf found at the beginning reads a few verses of the Naiṣadhīyā carita.

145 40. D. 18.

जैमिनीयन्यायमालाविस्तरः—माधवाचार्यकृतः

Paper. 20 Foll. $12 \times 5\frac{3}{4}$ inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

Contains the adhyāya 4 only complete.

146 10. I. 11.

शास्त्रमालावृत्तिः ज्योत्स्ना—अनन्तभट्टकृता

Paper. 207 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

The S'āstramālā is a metrical treatise on Pūrvamīmāṁsā explaining briefly the principles taught in each of the adhikaraṇas of the Sūtras of Jaimini. Its author was Kamalākarabhaṭṭa, son of Rāmakṛṣṇabhaṭṭa, son of Nārāyaṇabhaṭṭa, son of Rāmesvarabhaṭṭa of the Bhaṭṭa family of Benares. The present work is a commentary on the S'āstramālā, by Anantabhaṭṭa, the son of Kamalākarabhaṭṭa. The commentary is called Jyotsnā. The commentary. quotes also the relevant text portions then and there so that we may have the body of text also by collecting all the quotations. Anantabhaṭṭa may be fixed in the middle of the 17th century A.D. For more details on the author and other members of his family, refer to the MSS. Notes by Pandit V. Krishnamacharya published in the Adyar Library Bulletin, Madras Vol. XI, part 4—1947.

Begins in the 1st pāda of the 1st adhyāya and breaks off in the middle of the 1st pāda of the 2nd adhyāya. Then begins in the 2nd pāda of the 6th adhyāya and goes on up to the end of the 12th adhyāya.

Beginning :

सूर्यवंशावतंसाय दशास्यन्दनसूनवे ।
जगज्जाड्यापहाराय जानकीपतये नमः ॥
मीमांसानलिनीभानुं नत्वा श्रीकमलाकरम् ।
तत्सूनुना त्वनन्तेन शास्त्रमाला विविच्यते ॥
कमलाकरभट्टाख्यैः श्रीतातपादैः कृते तु शास्त्रमालाख्ये ।
ग्रन्थे वृत्तिः क्रियतेऽनन्तेन तत्सूनुना विशदा ॥

अथातो धर्मजिज्ञासा ।

ननु स्वाध्यायोऽध्येतव्य इत्यध्ययनविधौ स्वाध्यायस्य कर्मोत्पन्नतव्यप्रत्ययेन साध्यत्वावगतेः पारायणाद्यु-

पयुक्तत्वादक्षरग्रहणमेव भाव्यम्। ततश्च विचारायोगादनारभ्यं शास्त्रमत आह--

स्वाध्यायो ह्यर्थधीहेतुर्न विचारं विना भवेत्।
तदर्थं शास्त्रमारभ्यं जिज्ञासासूत्र ईरितम्॥

न तव्यप्रत्ययेन स्वाध्यायस्य भाव्यत्वं संभवति, तथात्वेऽपुरुषार्थसाधकभावनायां विधेरप्रवर्तकत्वापत्तेः; कर्मोपयुक्तार्थरूपदृष्टार्थत्वे संभवत्यदृष्टार्थत्वायोगात्। तेन तव्यप्रत्ययेन साध्यत्वोक्तावपि सक्तूनितिवत् करणत्वे लक्षणा। रेवतीवारवन्तीयवद्भावनाविशिष्टभावनाविधिरिति पितृचरणाः। क्वचिदक्षरग्रहणार्थत्वमपि, पारायणविधिना तस्यापेक्षितत्वात्। न च वैरूप्यम्, यच्छक्यते तत्कुर्यादित्यनेन सर्वसंग्रहात्। तेनाध्ययनविधेर्दृष्टार्थत्वात् विचारार्थमिदं शास्त्रमारभ्यमित्युपोद्घातः।

End:

तत्प्रसङ्गादार्त्विज्यस्य कर्तारश्चिन्त्यन्ते। तत्रार्त्विज्यं विद्वत्त्वात् त्रयोऽपि वर्णाः कुर्युः। न च याजनादित्रयं ब्राह्मणस्यैवेति नियमात् ब्राह्मणस्यैवार्त्विज्यमिति वाच्यम्, नियमस्य पुरुषार्थत्वेन तदुल्लङ्घने क्षत्रियादेः स्वातन्त्र्येण दोषसत्त्वेऽपि क्रत्ववैगुण्यात्। केषामार्त्विज्यमित्याशङ्क्य यज्ञं व्याख्यास्याम इत्युपक्रम्य ब्राह्मणानामार्त्विज्यमिति क्रतुं प्रक्रम्यैवार्विज्याङ्गत्वेन ब्राह्मणानामिदं हविरिति लिङ्गात्, रामायणेऽपि—

क्षत्रियो याजको यस्य चण्डालस्य विशेषतः।
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः॥

इति लिङ्गात् 'राजयाजकयाज्यस्य विनश्यति यथा हविः' इति महाभारतोक्तेश्च ब्राह्मणानामेवार्त्विज्यं नान्येषामित्याह—आर्त्विज्यं ब्राह्मणानां स्यान्नान्येषामिति निश्चयः। इति।

सर्वतन्त्रस्वतन्त्राणां कमलाकरयज्वनाम्।
अखण्डपाण्डित्यजुषां शास्त्रमालाकृतौ कृतौ॥
वृत्तिं ज्योत्स्नां सुविशदां तत्सुतोऽनन्तसंज्ञकः।
बालबुद्धिप्रबोधार्थमकरोत्प्रीतये सताम्॥
अनन्तविबुधेनात्र कमलाकरसूनुना।
योऽत्र श्रमः कृतस्तेन प्रीयतां रघुनन्दनः॥

Colophon:

इति श्रीमज्जगद्गुरुमीमांसाकमलाकररामकृष्णभट्टसूरिसूनुकमलाकरभट्टात्मजानन्तभट्टविरचितायां शास्त्रमालावृत्तौ द्वादशाध्यायस्य चतुर्थः पादः। द्वादशाध्यायश्च समाप्तः। समाप्तश्चायं ग्रन्थः।

This MS. is said to have been copied from the original MS. available in the Tanjore Palace Library.

147 9. G. 17.

शास्त्रमालावृत्तिः ज्योत्स्ना—अनन्तभट्टकृता

Paper. 128 Foll. 11½ × 5 inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Contains the folios 5 to 16 and 33 to 148=128 Foll.

Begins in the 2nd pāda of the 1st adhyāya and goes on up to the end of the 4th pāda of the same adhyāya. Then begins towards the middle of the 1st pāda of the 3rd adhyāya and breaks off in the middle of the 7th pāda of the 10th adhyāya.

148 39. B. 14.

षोडशाध्यायी

Paper. 664 Foll. 8¼ × 6⅛ inches.

14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in three volumes.

This is a short work explaining the sūtras of the 16 adhyāyas including the 12 adhyāyas of the Pūrvamīmāṁsā and the 4 adhyāyas of the Uttaramīmāṁsā.

The author's name is not known. In explaining the adhikaraṇas the author follows the views of Kumārilabhaṭṭa and Srī S'aṁkara in regard to the Pūrva and Uttara Bhāgas of the Mīmāṁsā respectively.

The work seems to be very recent.

Complete in 16 adhyāyas.

Beginning of the Pūrvabhāga:

जैमिनिबादरायणशबरस्वामिशंकराचार्येभ्यो नमः। ओं स्वाध्यायोऽध्येतव्य इति श्रूयते। स्वाध्यायो वेदः। तत्र संशयः—किमस्य वेदाध्ययनविधेरदृष्टार्थत्वेन वेदार्थस्याविवक्षितत्वात् तदर्थं निश्चयोपायभूतमीमांसाशास्त्रारम्भस्यावैधत्वात् चोदनालक्षणार्थो धर्म इत्यारभ्य वा अथातो धर्मजिज्ञासेत्यारभ्य वा अन्वाहार्ये च दर्शनात् इत्यन्तमिदं वेदार्थधर्मनिश्चयोपायविचारन्यायशास्त्रमध्वरमीमांसाख्यमनारम्भणीयम्। उत अध्ययनविधेर्दृष्टार्थज्ञानार्थत्वात् वेदार्थस्य विवक्षितत्वात् तदर्थनिश्चयोपायभूतस्य मीमांसाशास्त्रारम्भस्याप्यध्ययनविधिनैवार्थाद्विहितत्वेन वैधत्वादारम्भणीयमिति। तत्र सर्वविधीनामप्यदृष्टार्थत्वावश्यंभावात् अध्ययनविधेरप्यदृष्टार्थत्वात् वेदार्थस्याविवक्षितत्वात् तन्निश्चयोपायभूतशास्त्रारम्भवैयर्थ्यादिदं शास्त्रं नारम्भणीयमिति प्राप्ते ब्रूमः।

End:

किं ब्राह्मणक्षत्रियवैश्यानां सर्वेषामप्यार्त्विज्यं स्यात्, उत ब्राह्मणानामेवेति संशयः। तत्र सर्वेषामध्ययनवतां विदुषामार्त्विज्यं कर्तुं शक्यत्वात् सर्वेषां स्यादिति प्राप्ते ब्रूमः—ब्राह्मणानामार्त्विज्यमिति स्मरणात् ब्राह्मणानामेवार्त्विज्यमिति।

Colophon:

इति द्वादशाध्याये चतुर्थः पादः समाप्तः।

Beginning of the Uttarabhāga:

शारीरकमीमांसायां प्रथमस्याध्यायस्य प्रथमः पादः।

बृहदारण्यके चतुर्थाध्याये चतुर्थे षष्ठाध्याये पञ्चमे च मैत्रेयीब्राह्मणे श्रूयते—आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति। तत्र एतावदरे खल्वमृतत्वमिति वचनात् प्राप्तममृतत्वसाधनमात्मदर्शनं द्रष्टव्य इत्यनूद्य तत्साधनत्वेन श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति मननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणमङ्गि न वा अरे पत्युः कामायेत्युपक्रम्य आत्मनस्तु कामाय सर्वं प्रियं भवतीत्युपसंहारात् सर्वतो विरक्तस्य मुमुक्षोर्विधीयते।

End:

छान्दोग्ये अष्टमेऽध्याये पञ्चदशे खण्डे न च पुनरावर्तत इति श्रवणाच्च ब्रह्मलोकं प्राप्तानां न पुनरावृत्तिरिति बोध्यम्। सर्वोपप्लवरहितप्रज्ञानघनप्रत्यगर्थो ब्रह्मैवाहमस्मि।

Colophon:

इति श्रीषोडशाध्याय्यां शारीरकमीमांसायां चतुर्थाध्यायस्य चतुर्थो ब्रह्मप्राप्तिपादः। फलाध्यायश्च समाप्तः।

149 38. G. 14.

षोडशाध्यायीविवरणम्

Paper. 441 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a commentary on the Ṣoḍaśādhyāyī described in the last number. The author's name is not known. The commentary is called Keralīya. From the name Keralīya it may be conjectured that the author of the commentary may be a native of the Kerala country. Though the commentator is a follower of S'ri Saṁkara, he differs slightly in certain points from him. For instance, the commentator interprets the word *Atha* in the 1st sūtra to mean 'after Dharmavicāra' while S'ri Saṁkara interprets it to mean 'after the acquisition of four-fold Sādhanas.'

Complete in 16 adhyāyas.

Beginning of the Pūrvabhāga :

जैमिनिबादरायणशबरस्वामिशंकराचार्येभ्यो नमः।

ग्रन्थारम्भे शिष्टाचारमनुविदधान आचार्यनत्यात्मकं मङ्गलं कृत्वा शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति—जैमिनीत्यादिना। मङ्गलस्य च नियमेन फलवत्कार्यान्तरसंयोगात् साक्षादफलत्वाच्च फलवत्संनिधावफलं तदङ्गमिति न्यायेन कार्यान्तरारम्भाङ्गत्वेऽवधृते सत्यारम्भस्य समाप्तिपर्यन्तत्वादपेक्षितविघ्नपरिसमाप्तिः प्रयोजनम्, अपेक्षितविधेरनपेक्षितविधानं दुर्बलमिति-न्यायेन फलान्तरकल्पनाया दुर्बलत्वात्। संशयं दर्शयति—तत्रेत्यादिना।

End :

अस्तु वृत्युपायनियमस्मृतिः पुरुषार्थैव; तथापि क्रत्वर्थापि नियमस्मृतिरस्तीत्याशयेनाह—ब्राह्मणानामिति। अत्र हि यज्ञं व्याख्यास्याम इत्युपक्रमात् क्रत्वर्थत्वं विस्पष्टमेवेति भावः।

Colophon :

इति केरलीये षोडशाध्यायीटिप्पणे द्वादशस्याध्यायस्य चतुर्थः पादः। समाप्तश्चाध्यायः।

Beginning of the Uttarabhāga :

एवं द्वादशभिरध्यायैर्धर्मो विचारितः। अथ चतुर्भिरध्यायैर्ब्रह्म विचार्यते। न हि धर्ममीमांसामकृत्वा ऐहिकामुष्मिकफलानि तत्साधनभूताग्निहोत्रादिविश्वसृजामयनान्तकर्मरूपा धर्मास्तेषां नित्यनैमित्तिककाम्यत्वानि च तत्त्वतो ज्ञातुं शक्यन्ते। नापि तान्यज्ञत्वा तेषां फलानामनित्यत्वेन दुःखसंमिश्रत्वेन सातिशयत्वेन चासारत्वं सुज्ञेयम। तदज्ञात्वा च नैहिकामुष्मिकफलविरागः संभवति। वैराग्यं च ब्रह्मविचारहेतुरिति धर्ममीमांसानन्तरं ब्रह्ममीमांसारम्भः। किंच तस्मात् ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति श्रुतावध्येय इत्यनेन शब्दज्ञानस्य ज्ञेय इत्यनेनार्थज्ञानस्य निष्कारण इत्यनेन च तयोर्नित्यत्वस्य च विवक्षितत्वात् साङ्गवेदाध्ययनार्थज्ञानयोर्नित्यत्वं सिद्धम्।

End :

अत्रेदमवधेयम्। अत्र यज्ञादीनां विद्योपयोगकथनेन सकलविद्यास्थानानामेकवाक्यत्वेन ब्रह्मप्रतिपादकत्वमुक्तमिति। इदानीं सकलविद्यास्थानैकतापन्नस्य परममहावाक्यस्य शास्त्रस्यार्थं दर्शयन् शिष्टाचारं चानुविदधानो ग्रन्थान्ते कृतं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति—सर्वोपप्लवेति। एतादृशं सकलविद्यास्थानैकत्वम्। तदर्थं च ब्रह्मणोऽन्यत्र श्रमं कुर्वन् प्रत्यवैतीत्यभिप्रायः।

Colophon :

इति केरलीये षोडशाध्यायीटिप्पणे षोडशस्याध्याययस्य चतुर्थः पादः समाप्तः ।

150 38. A. 19.

संकर्षकाण्डभाष्यम्—देवस्वामिकृतम्

Paper. 293 Foll. $8\frac{1}{4} \times 6\frac{1}{8}$ inches. 14 lines in a page. Grantha script. New. Good. Good writing.

This seems to be a transcript made from a MS. of the Madras Govt. Oriental MSS. Library, R. No. 2695.

The Saṁkarṣakāṇḍa is a supplement to the Pūrvamīmāṁsāsūtras of Jaimini written by the same author. This portion consists of four adhyāyas dealing with some miscellaneous topics relating to the Karmakāṇḍa, omitted in the 12 chapters of the Pūrvamīmāṁsāsūtras. This Saṁkarṣakāṇḍa which is also known by the name Saṁkarṣaṇakāṇḍa, seems to be different from the Devatākāṇḍa also known as Saṁkarṣakāṇḍa referred to by the commentators on the Brahmasūtras. The MS. under reference contains the commentary on the Saṁkarṣakāṇḍa other than the Devatākāṇḍa. The commentator was Devasvāmin. He is also known to have written a commentary on the original 12 adhyāyas as well. But it is not available now. His other well-known works are the commentaries on the Āśvalāyanasūtras on S'ranta and Gṛhya. He has been fixed in the first half of the 11th century A.D.

Complete in 4 adhyāyas with gaps.

Beginning :

अथ संकर्षकाण्डः प्रस्तूयते । तदनुपपन्नम्, व्यतिरिक्ताव्यतिरिक्तविकल्पासंभवात् । व्यतिरेक . . . क्रान्तः स प्रागेव तन्त्रप्रसङ्गाभ्यामेवेति चेत्—न, असाकल्यात् । तथा चाहुः—

सिद्धैस्तु तैः प्रसङ्गान्तैः श्रुतियोगं प्रदर्शयन् ।
लक्षणानि श्रुतीश्चैव संकृष्याधिजगे मुनिः ॥

इति । भेदादीनि चत्वारि प्रकृतिविषयाणि । सामान्यातिदेशादीनि चत्वारि विकल्पविषयाणि ।

End :

पशुसंबन्धाधिकरणं चान्ते न्यस्तमध्येतारः पशुमन्तो भवेयुः संप्रैषश्चान्त्यपदं सकलशास्त्रार्थस्यार्थवत्त्वादनुष्ठाना . . . . श्रेयसी . . नेति ।

Colophon :

इति देवस्वामिना कृते संकर्षणकाण्डभाष्ये चतुर्थोऽध्यायः । संकर्षणकाण्डभाष्यं समाप्तम् ।

151 9. D. 2.

संकर्षकाण्डव्याख्या भाट्टदीपिका—भास्करराय-दीक्षितकृता

Paper. 88 Foll. $10\frac{3}{4} \times 5\frac{1}{4}$ inches. 11 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is another commentary on the Saṁkarṣakāṇḍa referred to in the previous number. The commentary was written by Bhāskararāyadīkṣita, son of Gambīrarāyadīkṣita. Bhāskararāya was the famous author of many S'ākta works like Setubhandha, Varivasyārahasya and Saubhāgyabhāskara. He was the pupil of Nṛsiṁha and S'ivadattas'ukla and had his Dīkṣā name Bhāsurānandanātha. The

colophons mention the commentary by the name Bhāṭṭadīpikā as it completes the Bhaṭṭadīpikā of Khaṇḍadeva which deals with 12 adhyāyas only. But the last verse of the commentary seems to mention it by the name Bhāṭṭacandrikā. The auther was the younger brother of Sakhārāmadīkṣita, the author of Choṭīvṛtti on the Piṅgalacchandas. His Vṛttaratnākaravyākhyā Mṛtasaṁjīvanī and Piṅgalacchandassūtravyākhyā Bhāṣyarāja give the dates of their composition as 1705 and 1737 A.D. respectively. Therefore Bhāskararāya may be fixed in the first half of the 18th century A.D. For further details about the author see the Bhāskaravilāsa written by his pupil Jagannātha, and published as an appendix to the Saubhāgyabhāskara, Nirnayasagara Press edition, Bombay 1914 and the Descriptive Catalogue of Sanskrit MSS. in the Adyar Library, Vol. VI. (No. 744). The commentary has been printed and published at Benares.

Complete in 4 adhyāyas with some gaps in middle.

Beginning :

एवं द्वादशभिरध्यायैः प्रकृतिविकृतिभेदेन कतिपयान् न्यायान् संशोध्य तैरेव न्यायैरितस्ततो विप्रकीर्णान् वेदवाक्यार्थानैदंपर्येण सम्यङ् निष्कृष्य निर्णेतुमेषा चतुरध्याय्यारभ्यते । अत एव संकर्षे न प्रत्यधिकरणं संगत्यपेक्षा । अनुयजतीति । ज्योतिष्टोमे सोमस्याग्नेर्वीहीत्यनुयजतीति श्रुते वाक्ये सोमयागोद्देशेन मन्त्रविधिः । इति शब्देन करणत्वस्यानुशब्देन पश्चाद्भाविनः कार्यस्य चोक्तिः ।

Colophon of the 1st pāda of the 13th adhyāya :

इति संकर्षे भाट्टदीपिकायां त्रयोदशस्याध्यायस्य प्रथमः पादः ।

Colophon of the 3rd pāda of the 16th adhyāya :

इति संकर्षे भाट्टदीपिकायां षोडशस्याध्यायस्य तृतीयः पादः । हौत्रकाध्याये वषट्कारपादः ।

End :

जैमिनेर्विमलसूक्तितटिन्यां
मग्नमाप शुचितां मम चेतः ।
तेन खेलतु पिनाकिपदाब्जे
येन जन्मनिवहो न पुनः स्यात् ॥
खण्डदेवकृतभाट्टदीपिका
लक्षणैः कतिपयैरसंभृता ।
इत्युदीक्ष्य बुधभास्कराग्निचि-
द्भारती बरिभरांबभूव ताम् ॥
अद्यावधि कृतिरेषाद्यन्तविहीनेति दीपिकाख्यासीत् ।
षोडशकलाभिरधुना परिपूर्णा भाट्टचन्द्रिकात्वमगात् ॥
आसीत्षोडशलक्षणी श्रुतिपदा या धर्ममीमांसिका
संकर्षाख्यचतुर्थभागविधुरा कालेन साजायत ।
गायत्री त्रिपदात्मिकेव विबुधैरद्यापि या पठ्यते
तां पूर्णामतनोच्छ्रमेण महता गम्भीरजो भास्करः ॥

152 33. G. 19.

संकर्षकाण्डव्याख्या भाट्टदीपिका—भास्कररायकृता

Paper. 8 Foll. 15½ × 1½ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains some stray leaves of the adhyāyas 13 to 15.

153 40. B. 36.

संकर्षकाण्डव्याख्या भाट्टदीपिका—भास्करराय-कृता

Paper. 61 Foll. $9\frac{1}{2} \times 5\frac{3}{4}$ inches. 20 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

Complete.

Reads the following lines at the end:

काशीखण्डे—सोपानत्कश्च नाचामेन्न तिष्ठन् धारया पिबेत् इत्यष्टत्रिंशेऽध्याये। अत्र टीका—सोपानत्कः उपानद्भ्यां पादुकाभ्यां युक्तः। चः समुच्चयेन तिष्ठन्नित्यनेन संबध्यते। तिष्ठंश्च उत्तिष्ठन् द्वाभ्यां हस्ताभ्यां पानपात्रधारणमन्तरेण धारया पानपात्रमुखधारयेति वा।

The Date of copying:

सं. १७६९ ज्येष्ठ वदिचतुर्थ्यां लिखितं केशवेन।

154 1. A. 30.

तन्त्वशिखामणिः—राजचूडामणिदीक्षितकृतः

Paper. 124 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Grantha script. New. Good. Clear writing.

The work is an original treatise on Jaimini's Pūrvamīmāṁsāsūtras. The author Rājacūḍāmaṇidīkṣita was the son of Ratnakheṭa S'rīnivāsadīkṣita of Satyamaṅgalam and Kāmākṣī. He belonged to the Dantidyoti Divāpradīpa family of Vis'vāmitragotra. He also wrote some more works among which the following may be mentioned: Kāvyadarpaṇa, Kamalinīkalahaṁsa, Rukmiṇīkalyāṇa, Ānandarāghava, Yuddhakāṇḍacampū, S'aṁkarābhyudaya, Karpūravartikā and Maṇidarpaṇa. It is said that the Tantras'ikhāmaṇi was composed at the instance of Veṅkaṭes'varadīkṣita son of Govindadikṣita, the minister the three Nāyaka kings of Tanjore—S'evappa, Acyutappa and Raghunātha (1549 to 1614 A.D.). In the beginning of the 7th adhyāya he gives the date of the composition of this work as Saka 1559 corresponding to 1637 A.D. the year in which Nīlakaṇṭhadīkṣita is known to have written his Nīlakaṇṭhavijayacampū. Therefore it is clear that our author was a contemporary of Nīlakaṇṭhadīkṣita. It is also said that Veṅkaṭes'varadīkṣita was the son of Nāgamāmbā and the author of the Sāhityasāmrājya, S'ulbamīmāṁsā, Karmāntasūtravārttika, and Vārttikābharaṇa. Rajacūḍāmaṇidīkṣita was also called simply Cuḍāmaṇidīkṣita. He was the disciple of his elder brother Ardhanārīs'varadīkṣita. He was patronised by king Raghunātha of Tanjore (1614 A.D.).

Contains the pādas 5 to 8 of the 6th adhyāya.

Beginning:

षष्ठाध्यायपञ्चमपादः।
शरणागतहृत्पद्मतरुणारुणसारथिः।
शरणं रघुनाथो मे करुणावरुणालयः॥

सू—अभ्युदये कालापराधादिज्याचोदना स्याद्यथा पञ्चशरावे। पूर्वत्र द्रव्यदेवतात्मकयागान्तरङ्गभूतद्रव्यापचारनिमित्तकप्रायश्चित्ताधिकारश्चिन्तितः। इह

तु बहिरङ्गकालाद्यपराधनिमित्तकप्रायश्चित्ताधिकारश्चिन्त्यत इति ज्ञेयम्। दर्शस्य ह्यमावास्यायामभ्यन्वाधानवत् सापाकरणव्रतोपायनवेदिकरणसायंदोहादीनि कानिचिदङ्गानि कर्तव्यानि। प्रतिपदि तु इतराण्यङ्गानि प्रधानानि च कार्याणीति स्थितिः।

End :

ततश्चैकप्रयोगवचनादपि भवन्विशेष्यविशेषणभावो युक्त इति छागेनैवाधिकारः। तदुक्तम्—

पश्वन्तरानुपादाने चोदना न विरुध्यते।
सामान्यं च विधत्ते सा छागेऽप्यविकलं हि तत्॥

छागेनैवाधिकारः। ततः पशुत्राध इति सिद्धम्।

Colophon :

इति श्रीराजचूडामणिदीक्षितस्य कृतिषु तन्त्रशिखामणौ षष्ठस्याध्यायस्याष्टमः पादः।

155 27. H. 18.

तन्त्रशिखामणिः—राजचूडामणिदीक्षितकृतः

Palm-leaf. 31 Foll. $7\frac{1}{2} \times 2$ inches. 16 lines in a page. Grantha script. Old. Good. Good writing.

Contains the adhyāya 8 only.

Beginning :

अथ विशेषलक्षणम्। विध्यन्तराधिकरणे सौर्यादिषु वैदिकीतिकर्तव्यता चिन्त्यत इति सामान्यातिदेशश्चिन्तितः। इदानीं विशेषातिदेशश्चिन्त्यत इति संगतिः। ननु विशेषातिदेश एव चिन्त्यतां, किं सामान्यातिदेशचिन्तयेति चेत्, उच्यते—अनुपदिष्टेतिकर्तव्यताकेषु सौर्यादिषु श्रुतेषु प्रथमं तावत् किमेतेष्वितिकर्तव्यतान्यतः प्राप्यते, न वेति जिज्ञासा जायते।

Colophon :

इति श्रीमद्द्वैतविद्याचार्यसर्वतन्त्रस्वतन्त्रसाम्राज्यचित्याप्तवाजपेययाजिश्रीवेंकटेश्वरदीक्षितनियोगानुभावसमुन्मिषितमनीषाविशेषस्य विश्वविद्याजिनः श्रीराजचूडामणिदीक्षितस्य कृतिषु तन्त्रशिखामणौ अष्टमस्याध्यायस्य प्रथमः पादः।

End :

एवमनुपदिष्टेतिकर्तव्यताकेषु तेष्वाकाङ्क्षापूरणमिति न दर्वीहोमाः पूर्ववन्त इति सिद्धम्।

Colophon :

इत्यष्टमस्याध्यायस्य चतुर्थः पादः।

156 27. H. 20.

तन्त्रशिखामणिः—राजचूडामणिदीक्षितकृतः

Paper. 8 Foll. $8\frac{3}{4} \times 2$ inches. 16 lines in a page. Grantha script. Old. Injured. Illigible writing.

Contains the 8th adhikaraṇa of the 3rd pāda of the 7th adhyāya.

157 30. A. 18.

तन्त्रशिखामणिः— राजचूडामणिदीक्षितकृतः

Palm-leaf. 137 Foll. $15\frac{3}{4} \times 1\frac{1}{2}$ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves are marked with the serial Nos. 36 to 172.

Contains the adhyāyas 7 to 9 almost complete.

Beginning :

अनन्यप्रकृतेर्यस्मात्समग्रगुणसंपदः।
काङ्क्षितानि लभन्तेऽन्ये तमीडे सोममव्ययम्॥

अस्ति गोविन्दयज्वेन्द्रनागमाम्बातपःफलम् ।
श्रीवेंकटेश्वरमखी सर्वतन्त्रस्वतन्त्रधीः ॥
येनेष्टं साग्निचित्याप्तवाजपेयादिभिर्मखैः ।
कृतं साहित्यसाम्राज्यं नाम काव्यमनुत्तमम् ॥
व्यतानि शुल्बमीमांसा तथा कर्मान्तवार्तिकम् ।
टुप्टीकायाः कृता टीका वार्तिकाभरणाभिधा ॥
प्रतिष्ठापितचोलक्ष्माजानेस्तस्य नियोगतः ।
चूडामणिर्वितनुते यज्वा तन्त्रशिखामणिम् ॥
गोविन्ददीक्षितचिरंतनभाग्यराशेः
श्रीवेंकटेश्वरमखीशितुराज्ञया मे ।
तन्त्रार्णवं तरितुमाहितसाहसस्य
सांयात्रिकीभवतु तत्करुणाकटाक्षः ॥
श्रीवेंकटेश्वरमखिप्रणीतं प्रविविक्षुभिः ।
वार्तिकाभरणाम्भोधिं नौरियं क्रियतां कृतिः ॥
धीमन्मान्ये शकस्याब्दे हायने चेश्वराभिधे ।
चूडामणिः कलयते यज्वा तन्त्रशिखामणिम् ॥

सू-श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् । पूर्वस्मिन्नध्यायषट्के उपदेशात्मकप्रमाणव्यापारश्चिन्तितः । उत्तरस्मिन्नध्यायषट्केऽतिदेशात्मकप्रमाणव्यापारश्चिन्तयिष्यते । ततश्चेत्थं कुर्यादित्येकमर्थं विधाय तद्वत्कुर्यादित्यर्थान्तरं विधातव्यमित्युपदेशपूर्वकत्वादतिदेशस्य षट्कयोर्हेतुहेतुमद्भावः संगतिः ।

End :

आज्यसंस्थाने प्रतिनिधिः स्यात् द्रव्योत्सर्गात् । पर्यग्निकृतानारण्यानित्यत्र तदन्ताङ्गरीतिविधानसंभवेऽपि पर्यग्निकृतं पात्नीवतमित्यत्र तदन्ताङ्गरीति . . . .
. . . . . .

* * *

ततश्च प्रक्रान्तस्य त्वाष्ट्रपशुयागस्य द्रव्याकाङ्क्षायामाज्यपशुप्रतिनिधित्वेन न विधीयत इति प्राप्तेऽभिधीयते ।

158 33. G. 19.

तन्त्रशिखामणिः—राजचूडामणिदीक्षितकृतः

Palm-leaf. 15 Foll. $15\frac{1}{2} \times 1\frac{1}{2}$ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Contains fragments of the 5th pāda of the 6th adhyāya and the first pāda of the 7th adhyāya.

Leaves bear the serial Nos. 4 to 34 wanting the leaves, 10 to 12, 14 and 16 to 27 in the middle.

At the end of the 5th pāda of the 6th adhyāya the following stanza is found.

संध्यानानटदिन्दुचूडमकुटीविभ्राजदभ्रापगो-
दग्रस्फारतरङ्गभङ्गकलनापाण्डित्यपारं गतैः ।
वादिव्रातसमस्तनिग्रहकलावैशद्यविद्योतिभिः
श्रीचूडामणिदीक्षितेन्द्रवचसां गुम्भैः प्रमोदामहे ॥

159 38. B. 8.

तन्त्रशिखामणिः—राजचूडामणिदीक्षितकृतः

Paper. 528 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in three volumes. The first volume contains pp. 1 to 144, the second 1 to 480 and the third 1 to 264 and 1 to 168.

Contains the adhyāyas 7, 9, 11 and 12.

End of the 12th adhyāya :

तत्र यदि राजन्यवैश्ययोरार्त्विज्यं स्यात् तदा तयोरप्यन्वाहार्यदक्षिणा दातव्या स्यात् । तत्र ब्राह्मणग्रहणमनुपपन्नं सत् ब्राह्मणानामेवार्तिज्यं न तु क्षत्रियवैश्ययोरिति दर्शयति । तस्मात् ब्राह्मणानामेवार्तिज्यमिति सत्रे ब्राह्मणानामेवाधिकार इति सिद्धम् ।

Colophon :

इति श्रीमद्वैतविद्याचार्यसर्वतन्त्रस्वतन्त्रसाम्निचित्यासवाजपेययाजिश्रीवेंकटेश्वरदीक्षितनियोगानुभावस - मुन्मिषितमनीषाविशेषस्य दन्तिद्योतिदिवाप्रदी - पाङ्कविश्वामित्रवंशमुक्ताफलसत्यमङ्गलरङ्गखेटश्रीनिवास - दीक्षिततनयस्य कामाक्षीगर्भसंभवस्य श्रीराजचूडामणि-दीक्षितस्य कृतिषु तन्त्रशिखामणौ द्वादशस्याध्यायस्य चतुर्थः पादः ।

160 39. D. 9.

तन्त्रशिखामणिः—राजचूडामणिदीक्षितकृतः

Paper. 600 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Grantha script. New. Good. Clear writing.

Bound in two volumes. The first volume contains pp. 1 to 736 and the second 737 to 1200.

Contains the adhyāya 10 only complete.

Beginning :

(सू-) विधेः प्रकरणान्तरेऽतिदेशः स्यात्सर्वकर्म स्यात् । ऊहनिरूपणानन्तरं बाधो निरूप्यते । नन्वधिकारलक्षणानन्तर्यमेव बाधलक्षणस्य किं न स्यात् ? यदि विकृतिष्वतिदिष्टानामवघातादीनां कृष्णलादिष्वर्थलोपादिना बाधो वक्तव्यः, अतिदेशधर्माणामपूर्वप्रयुक्ततया चोदनालिङ्गविशेषाच्च भवतीति सप्तमाष्टमयोरानन्तर्यमेव बाधलक्षणस्य युक्तम् ।

End :

अजामित्वं फलत्वेन प्रशंसार्थमेव कीर्त्यते । यथोपस्तृणात्यभिघारयत्यमृताहुतिमेवैनां करोतीति उपस्तरणाभिघारणयोश्च हविरमृतीकरणार्थं प्रशंसार्थं कीर्त्यते तद्वत् । तस्मादेकपुरोडाशायामप्युपांशुयाजः स्यादित्यनवद्यम् ।

Colophon :

इति श्रीमद्वैतविद्याचार्यसर्वतन्त्रस्वतन्त्रसाम्निचित्यासवाजपेययाजिश्रीवेंकटेश्वरदीक्षितनियोगानुभावसमु - न्मिषितमनीषाविशेषस्य दन्तिद्योतिदिवाप्रदीपाङ्क-सत्यमङ्गलरङ्गखेटश्रीनिवासदीक्षिततनयस्य कामाक्षी-गर्भसंभवस्य श्रीमदर्धनारीश्वरगुरुचरणसहजतालब्ध-विद्यावैशद्यस्य श्रीविश्वजिद्याजिनः श्रीराजचूडामणि-दीक्षितस्य कृतिषु तन्त्रशिखामणौ दशमस्याध्याय-स्याष्टमः पादः । समाप्तश्चाध्यायः ।

161 8. E. 11.

तन्त्रसिद्धान्तदीपिका—अप्पयदीक्षितकृता

Paper. 487 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in two volumes. The first vol. contains pp. 1 to 434 and the second 435 to 974.

This is an explanatory treatise on Pūrva-mīmāṁsāsūtras, by Appayadīkṣita III, son of Bhūmidevī and Appayadīkṣita II who was the son of Ayyādīkṣita, the brother of the famous Appayadīkṣita I (1550 A.D.). The family of the famous Appayadīkṣita I is traced from Āccādīkṣita who is said to have been honoured by the King Kṛṣṇa-devarāya of Vijayanagaram. Āccādīkṣita's son was Raṅgarājādhvarin who wrote many works like Advaitavidyāmukura and Vivaraṇadarpaṇa. Raṅgarājādhvarin had two sons, the elder being the famous Appayadīkṣita I and the younger Ayyādīkṣita whose grand-son was our author Appayadīkṣita III. Appayadīkṣita II is said to have written many works including Alaṁkāratilaka. The author may be assigned to 1650 A.D. approximately.

Begins in the 2nd pāda of the 1st adhyāya and breaks of 1st pāda of the 4th adhyāya.

Beginning :

अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे ।
यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधी ॥
इति श्रीमत्संततसंतन्यमानश्येनकूर्मषोडशारस्थचक्राकाराद्यनेकगुणविराजमानमहाग्निविलसितप्रौढापरिमितमहाध्वरस्य श्रीशाहजीशरभजीतुक्कोजीभोसलचोलमहीमहेन्द्रत्रयामात्यधुरंधरस्य श्रीमत आनन्दरायविद्वत्सार्वभौमस्य पञ्चपुरुषीपोष्येण बाल्य एव तद्द्यानिर्वर्तितापरिमितमहाग्निविजृम्भितसर्वपृष्ठास्तोर्यामवाजपेयप्रमुखसोममखसंतर्पितशतमखमुखबर्हिर्मुखेन महादेववाजपेययाजिसुतेन अन्नपूर्णाम्बागर्भजातेन अपारपदवाक्यप्रमाणपारावारपारीणाग्रजन्मविश्वेश्वरवाजपेययाजिनो लब्धविद्यावैशद्येन वासुदेवदीक्षितविदुषा

विरचितायामध्वरमीमांसाकुतूहलवृत्तौ तृतीयस्याध्यायस्य तृतीयः पादः समाप्तः ।

End :

न च पश्वर्थानुष्ठितप्रयाजानां कालान्तरभाविपुरोडाश इवाघ्रिगोरपि कालान्तरभाविप्राजापत्यकार्येषूपकारकतासंभव इति वाच्यम्, वैषम्यात् । प्रयाजादिकृतस्तावददृष्टसंस्कारः कालान्तरेऽवतिष्ठते। अघ्रिगुस्तु प्रवृत्तिप्रकाशनार्थः । तत्प्रकाशनस्य च तदानीं प्रध्वस्तस्य कालान्तरे कार्यकरत्वासंभवात् आवृत्तिरघ्रिगोरिति सिद्धम् ।

Colophon :

अध्वरमीमांसाकुतूहलवृत्तौ एकादशस्याध्यायस्य चतुर्थः पादः समाप्तः ।

245 22. O. 24.

अध्वरमीमांसाकुतूहलवृत्तिः—वासुदेवदीक्षितकृता

Palm-leaf. 45 Foll. 15 × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the 3rd pāda (incomplete) of the 1st adhyāya.

246 30. A. 17.

अध्वरमीमांसाकुतूहलवृत्तिः—वासुदेवदीक्षितकृता

Palm-leaf. 100 Foll. 15⅝ × 1⅝ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the adhyāyas 4 and 5 only.

247 39. I. 20.

तन्त्रदर्पणः—अण्णाशास्त्रिकृतः

Paper. 63 Foll. 8¼ × 6 inches. 30 lines in a page. Grantha script. Old. Good. Good writing.

This is an original treatise on the Mīmāṁsāsūtras of Jaimini. In several places he critically examines the views of Sabarasvāmin, Kumārilabhaṭṭa, Pārthasārathimiśra etc. and offers his own views. The author Aṇṇāśāstrin was the son of Rāmabudha of Prayāga family. He was orginally a native of the village Kaṇḍramāṇikkam and subsequently an inhabitant of the village Peralam in Tanjore District, Madras. The work is the same as described in R. No. 3879 (b) of the Triennial Catalogue of Sanskrit MSS. in the Govt. Oriental MSS. Library, Madras, wherein see for the beginning. The title of the work is mentioned as Aṇṇāmaṇīyam in the front page of the MS.

Contains the 2nd pāda (incomplete) of the 2nd adhyāya.

Beginning :

अविरतमथ वल्लीदेवसेनासमेते
दृढविनिहितभक्तिर्देवतासार्वभौमे ।
कलयति विविधानां कर्मणां श्रीमदण्णा-
बुधमणिरिह भेदाभेदचिन्तां क्रमेण ॥

(सू)—शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् ।

उपोद्घातत्वेन धात्वर्थस्य करणत्वं सपरिकरं निरूप्य तत्प्रसङ्गादपूर्वभेदादिकमपि क्वचित्पूर्वपादे विचारितम् । इदानीमध्यायार्थत्वेन प्रतिज्ञातो धात्वर्थभावनापूर्वाणां भेद एव प्राधान्येन प्रतिपाद्यते । तत्रापि शब्दान्तरस्थले धातुभेदात् धात्वर्थभेदस्य स्पष्टत्वेन तन्निबन्धनभावनाभेदस्य सुखप्रतिपत्त्या प्रथमं शब्दान्तराद्भेदोऽभिधीयते । उदाहरणं तु सोमेन

यजेत, हिरण्यमात्रेयाय ददाति, दाक्षिणानि जुहोति, प्रउगं शंसतीत्यादि। तत्र यजति ददाति जुहोतीत्यादिषु किमेका भावना नानाधात्वर्थानुरक्ता विधीयते, किं वा तत्तद्धात्वर्थानुरक्ता भिन्ना विधीयत इति संदेहः। तत्रानेकभावनाविध्याश्रयणे क्रियाभेदात् भाव्यभूतमपूर्वमपि भिद्यते। तथा चानन्तापूर्वकल्पनापत्त्या गौरवं स्यात्।

End :

प्रयोजनं च पूर्वपक्षे विश्वेभ्यो देवेभ्योऽनुब्रूहीति प्रैषः। सिद्धान्ते वाजिभ्योऽनुब्रूहीति। सूत्रार्थस्तु—अपूर्वसंयोगे पूर्वकर्मसंयोगाभावे सति गुणोऽपि भेदक एव स्यात्। उभयोरपि वाक्ययोः परस्परनिरपेक्षतया तुल्यत्वात्। एकस्य गुणविधानार्थमनुवादकतयेतरापेक्षायां हि समत्वाभावात् कर्मभेदो न स्यात्। न च प्रकृते तथा इति।

The MS. described in R. No. 3879 (b) of the Triennial Catalogue of the Madras Govt. Oriental MSS. Library gives the following beginning and Colophon :

हरिणाङ्ककलोज्ज्वलोत्तमाङ्गं
करुणापूरकरम्बितान्तरङ्गम्।
नरदन्तिमयं वपुर्वहन्तं
वरदं देवमुपास्महे भृशं तम्॥
यत्सेवासमयप्रतीक्षणपरा ब्रह्मेन्द्रमुख्याः सुरा
ध्येयो यश्च मुमुक्षुभिर्मुनिगणैः षड्भिर्मुखैरुज्ज्वलम्।
श्रेयःसंततिमातनोति सदयं यद्वीक्षणं प्राणिनां
वाग्गुम्भेषु स एष मे घटयतु प्रागल्भ्यमन्यादृशम्॥
यदनुग्रहमात्रेण तन्त्रार्था विशदीकृताः।
कलये यतिवर्यांस्तान् देशिकान् कांश्चिदद्भुतान्॥
मध्ये कल्पितभावरत्नमहितो वज्रोपमैरुज्ज्वलं
न्यायैरद्भुतयुक्तिमौक्तिकगणैरावेष्टितं दर्पणम्।
तन्त्रार्थस्फुटवीक्षणाय तनुते शब्दैः सुवर्णात्मकैः
श्रीमद्रामबुधात्मजः सविनयः स श्रीमदण्णासुधीः॥
षडाननकृपालब्धप्रगल्भमधुरोक्तिभिः।
भेदलक्षणमारभ्य कलये तन्त्रदर्पणम्॥

Colophon :

इति श्रीप्रयागकुलकलशसिन्धुकौस्तुभस्य श्रीमत्कण्डरमाणिक्यग्रामरत्नाभिजनस्य पेरलग्रामवासिनः श्रीमदण्णाशास्त्रिणः कृतौ तन्त्रदर्पणे द्वितीयस्याध्यायस्य प्रथमः पादः।

248 8. E. 19.

भाट्टनयोद्द्योतः—नारायणसुधीकृतः

Paper. 417 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a brief exposition of the Pūrvamīmāṁsāsūtras of Jaimini following the views of Kumārilabhaṭṭa and Khaṇḍadeva. The author Nārāyaṇasudhī was a resident of the village Govindapuram in Tanjore District and attached to the court of the Maharatha Rulers of Tanjore in the 18th century A.D. He was also the author of the S'abdabhūṣaṇa and the Sabdamañjarī in Vyākaraṇa (Vide No. 17 of the Descriptive Catalogue of Sanskrit MSS. in the Adyar Library, vol. VI. 1947).

Begins in the 2nd pāda of the first adhyāya and ends in the 1st pāda of the 11th adhyāya.

Beginning :

गुरुमानम्य संवीक्ष्य खण्डदेवकृतिं ताताम्।
कुर्वे भाट्टनयोद्द्योतं बालानां सुखक्लृप्तये॥

(सू०)—आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते। 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' इत्याद्यर्थवादानां विधिप्रतिषेधवादे वक्तृस्मरणाभावादपौरूषेयत्वे पूर्वाधिकरणेन सिद्धे संप्रति तद्वदेव धर्माधर्मयोः प्रामाण्यमस्ति न वेति विचार्यते। तत्र विधिप्रतिषेधवाक्याभ्यां स्वशक्त्या साध्यसाधनेतिकर्तव्यताशिष्टभावनाविषयकविधिप्रतिषेधयोः प्रतिपादनादर्थाद्विधिप्रतिषेधयागादेरिवानिष्टसाधनत्वाक्षेपाद्युक्तं तयोरिष्टसाधनरूपधर्माधर्मप्रमाजनकत्वम्।

End:

अतो नात्र पौर्णमास्यादिकालस्यान्तरालकालेन संकोचाख्यो बाधः। तदेवं निरूपितस्त्रिविधो बाधः।

Colophon:

इति श्रीगोविन्दपुरवास्तव्यनारायणसुधीविरचिते भाट्टनयोद्द्योते दशमस्याध्यायस्याष्टमः पादः। समाप्तश्च दशमोऽध्यायः।

अथैकादशाध्यायस्य प्रथमः पादः।

(सू०)—प्रयोजनाभिसंबन्धात्पृथक् सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगात्। तदेवं दशभिरध्यायैः प्रकृतौ विकृतौ चानुष्ठेयपदार्थेष्ववगतेष्वधुना तासां प्रयोगविध्यवगतानुष्ठानतन्त्रत्वं निरूप्यते।

Colophon:

इति श्रीगोविन्दपुरवास्तव्यनारायणसुधीविरचिते भाट्टनयोद्द्योते एकादशाध्यायस्य प्रथमः पादः।

This is a transcript made from a MS. of the Tanjore Palace Library. Burnell No. 2074.

The MS. is bound in 2 vols. the first volume containing pages 1 to 370 and the second 371 to 833. Both the volumes contain some extra pages giving the contents of the each volume.

249 10. J. 20.

तन्त्रनीतिलहरी—रामानुजाचार्यकृता

Paper. 507 Foll. $8\frac{1}{2} \times 6\frac{1}{2}$ inches. 14 lines in a page. Grantha script. New. Good. Good writing.

Bound in two volumes.

A commentary on the Pūrvamīmāṁsāsūtras according to the views of Kumārila and Bhavanātha as held in their Vārttika and Mīmāṁsānayaviveka respectively. The author Rāmānujācārya who calls himself as Rāmānujādāsa, was the son of Raghunāthādhvarin and younger brother of Vedāntācārya of the Tirumalai Nallān cakravarti family of S'rīvatsagotra. He was the pupil of both his father and elder brother mentioned above. The author is believed to have lived about 150 years ago in Ketāṇḍipaṭṭi village in Madras Presidency.

Contains the pâdas 2 and 3 in 1st adhyāya.

Beginning:

अखिलगुणनिकायं मन्त्रसाराभिधेयं
निखिलनिगमकायं कृष्णवाचो विधेयम्।
दनुजरिपुसहायं श्रीमतः स्वं सखायं
दलितकुमतिमायं तं भजे वैनतेयम्॥
भट्टाचार्यगुरुप्रोक्तसिद्धान्तलहरीमिमाम्।
सन्तः पश्यन्तु दयया पक्षिराजविजृम्भिताम्॥
भट्टानुसारेण नयानशेषान्
प्राभाकरीं चापि दुरूहनीतिम्।

प्रकाशयन्ती लहरी विभाति
मुक्ताप्रवालग्रथितेव माला ॥
कामं नयविवेकस्य शास्त्रदीपिकया सह ।
सूक्ष्मबुद्धिजुषामेषा छायाव्याख्या भविष्यति ॥
धर्मोत्पत्तिनिदानगव्युपचिता रीतीः सहस्रं श्रिता
मार्गायातसरस्वतीपरिचया प्राभाकरीसंगता ।
सर्वज्ञेन मुदा धृता च शिरसा नानाकृतिर्लक्षणै-
र्गङ्गाया लहरीव तन्त्रलहरी कामं नरीनर्त्यसौ ॥

(सू०)—आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते। अस्यार्थः—आम्नायस्य वेदस्य तज्ज्ञातानां क्रियार्थत्वेन समाम्नाय इति क्रियार्थत्वावगमात् अक्रियार्थानामर्थवादादीनामानर्थक्यं प्रयोजनवदर्थशून्यत्वम् । तस्मादक्रियार्थं सर्वमनित्यमित्युच्यते। अनित्यशब्दोऽयमनित्यलौकिकवाक्यसादृश्यपरः सन्नप्रामाण्यमाह—तस्मादप्रमाणमुच्यत इति ।

End:

नन्वेवं तर्हि तत्रैवेयं चिन्ता किमिति न कृतेति चेन्न, विनियोगमुखाप्रामाण्यनिराकरणार्थेयं त्रिपादी । इह तु आकृत्यधिकरणे व्यक्तेः क्रियान्वयरूपविनियोगमुखेनाकृत्यर्थताक्षेपे व्यक्त्यर्थत्वेन यदप्रामाण्यं तन्निरासः क्रियत इति त्रिपाद्यामेवेयं चिन्ता युक्ता न प्रथमपाद इति बोध्यम्। संशयाक्षेपसमाधानभाष्यव्याख्यानं तु वस्तुबलमतरीत्या दीपशिखायामेव व्यक्तमिति सर्वं समञ्जसम् ।

Colophon:

इति श्रीवत्सकुलतिलकसर्वतन्त्रस्वतन्त्रविद्वच्चक्रवर्तिचक्रवर्तिरघुनाथदेशिकाध्वरिसूनुना वेदान्ताचार्यगुरुचरणानुजेन तदुभयचरणारविन्दपरिचरणलब्धमीमांसावाल्लभ्येन रामानुजदासेन विरचितायां श्रीमत्तन्त्रनीतिलहर्यां प्रथमस्याध्यायस्य तृतीयः पादः। योऽसौ नागमयाञ्शरान् प्रणिहितान् मायाजुषेन्द्रद्विषा
निर्धूय स्वयमागतो युधि मुदा रामाय सौमित्रये ।
स्वं सख्यं प्रकटीचकार सुतरां श्रीचक्रवर्तिप्रियः
सोऽयं मत्कुलदैवतं हि गरुडः कामं विधत्ते कृतिम् ॥
गुणं वा दोषं वा वदति यदि किंचिन्मम मनो
न हर्षं खेदं वा भजति हि तदा किंतु सुधियः ।
निरूप्यैव ब्रूयुर्निपुणमिह किं वा वदसि रे
स चैतन्निर्माता मधुमथनकेतौ जयति यः ॥

The name of the scribe:

केताण्डिपट्टि नि. श्रीकृष्णचक्रवर्तिदासेन लिखितोऽयं ग्रन्थः ।

250 8. E. 5.

भाट्टदिनकरी—दिनकरभट्टकृता

Paper. 87 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a commentary on the Pūrvamīmāṁsāsūtras of Jaimini by Dinakarabhaṭṭa, son of Umā and Rāmakṛṣṇa, grandson of Nārāyaṇa and great grandson of Rāmeśvara of the Bhaṭṭa family of Benares. He follows the views of Kumārilabhaṭṭa and criticises those of Prabhākara. He refers to Someśvara, Viśveśvara and Appayadīkṣita as the authors of Mīmāṁsā works. This Viśveśvara must be other than the author's son popularly known as Gāgābhaṭṭa. The author may be fixed in the beginning of the 17th century A.D. Another copy of the work is available in the Madras Govt. Oriental MSS. Library (R. 2418) for the adhyāya 1 to 3.

Contains the adhyāya 9 only.

Beginning :

उन्मूलयन् विशदयन् साधयन्वा विधान्तरैः ।
जीर्णाशयं दिनकरो नवमे वक्ति सांप्रतम् ॥

(सू०)—यज्ञकर्मप्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात् । विशेषातिदेशस्योहे हेतुत्वात् तदनन्तरमूहश्चिन्त्यते । स च त्रिविधः । मन्त्रोहः, सामोहः, संस्कारोहश्चेति ।

End :

आज्येन पात्नीवतं कुर्यादिति वाक्यार्थेऽपिआज्येनेति तृतीया संस्थोपपत्तिसंबन्धादुपपन्ना ।

रामेश्वरप्रपौत्रो नारायणशर्मणः पौत्रः ।
श्रीरामकृष्णसूनुर्दिनकरशर्माकरोदमुं ग्रन्थम् ॥

Colophon :

इत्युमारामकृष्णसुतदिनकरकृतायां भाट्टदिनकर्यां नवमाध्यायस्य चतुर्थः पादः । समाप्तश्च नवमोऽध्यायः ।

251 40. A. 92.

भाट्टचिन्तामणिः—विश्वेश्वरभट्टकृतः

Paper. 107 Foll. 11 × 4¾ inches. 11 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is a brief commentary on the Pūrvamīmāṁsāsūtras. The commentator Viśvesvara also known as Gāgābhaṭṭa was the son of Dinakarabhaṭṭa of the famous Bhaṭṭa family of Benares. He refers to his other work Sūtravṛtti called Kusumāñjali. He is said to have taken a leading part at the coronation of the Great Sivāji in 1674 A.D. So he can be assigned to the middle of the 17th century A.D.

The Tarkapāda of this work was printed and published in the Pandit Series, Benares in the year 1870 and subsequently in Chawkkamba Sanskrit Series, Benares in 1900.

Contains the adhyāyas 1 (2 to 4 pādas). 2, 3 (6 to 8 pādas) 4 and 5. Two folios 6 and 7 are missing in the 1st adhyāya.

Beginning :

(सू०)—विधिना त्वेकवाक्यत्वात्स्तुत्यर्थत्वेन विधीनां स्युः ।

विधेः प्रामाण्यं निरूप्य धर्मप्रमाणनिरूपणप्रसङ्गादर्थवादादिप्रामाण्यं निरूप्यते । विध्यर्थवादमन्त्राणामिति वार्तिकस्थविधिपदं नामधेयपरं स्तुतिस्तुत्यसंबन्धप्रामाण्यप्रतिपादनपरमर्थवादकल्प्यं विधिपरं वा ।

End :

(सू०)—सान्नाय्याग्नीषोमीयविकारा ऊर्ध्वं सोमात्प्रकृतिवत् ।

सान्नाय्ययागविकारेष्वामिक्षादियागेषु अग्नीषोमीयविकारेषु काम्यनैमित्तिकाग्नावैष्णवादियागेषु नासोमयाजी सन्नयेदिति वाक्येन सान्नाय्ययागोद्देशेन विहितस्य सोमोत्तरत्वस्यातिदेशतः प्राप्तेः सोमयागोत्तरत्वम् । तथा सोमविकारेष्वेकाहेषु सोमोद्देशेन विहितस्य दर्शोत्तरत्वस्यातिदेशेन प्राप्तस्यानुरोधाय दर्शोत्तरत्वमिति सुहृद्भूत्वोपदिष्टवान् । नात्र पूर्वपक्षेऽभिनिवेष्टव्यम् ।

विश्वामित्रकुलध्वजः समभवद्यो भट्टनारायण-
स्तद्वंशस्य करीरतां दधदयं विश्वेश्वराख्यः कृती ।
गागाभट्ट इति प्रथां दिनकरात्प्राप्तः पितुर्लालनात्
तद्ग्रन्थे खलु पञ्चमः समभवच्छ्रीभाट्टचिन्तामणौ ॥

Colophon :

इति श्रीविश्वेराख्यगागाभट्टकृतभाट्टचिन्तामणौ पञ्चमाध्यायस्य चतुर्थः पादः ।

ग्रन्थसंख्या ४९०.

252 64971.

भाट्टचिन्तामणिः—विश्वेश्वरभट्टकृतः

Paper. 258 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript of the MS. described in the last number.

253 40. B. 13.

भाट्टचिन्तामणिः—विश्वेश्वरभट्टकृतः

Paper. 25 Foll. $10 \times 4\frac{1}{2}$ inches. 16 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The MS. contains a summarized version of the work described above and ends with the following lines :

दर्शपूर्णमासारम्भाङ्गं चेत् विशिष्टोद्देशे वाक्यभेदापत्तिः । अन्वारम्भणीयया दर्शपूर्णमासौ कुर्यात् आरम्भं च कुर्यात् । नचैवं वाक्यवैयर्थ्यम्, प्रकरणात्प्रक्रान्तात् पूर्वसाधनयज्यर्थत्वे । सा.

254 33. L. 23.

भाट्टसंग्रहः—राघवेन्द्रयतिकृतः

Palm-leaf. 125 Foll. $9\frac{1}{4} \times 1\frac{5}{8}$ inches. 9 lines in a page. Grantha script. Old. Slightly injured. Good writing.

This is a short original work explaining the purport of each of the adhikaraṇas of the Pūrvamīmāṁsāsūtras of Jaimini. The author Rāghavendrayati was the disciple of Sudhīndrayati who was the disciple of Vijayīndratīrtha the famous follower of Ānandatīrtha and a contemporary of Appayadīkṣita and Tātācārya of Kumbakonam. He was a powerful writer and noted controversialist. He is said to have taken the Saṁnyāsāśrama and come to the pontificate in the year S'aka 1545=1623 A.D. and continued there till S'aka 1593=1671 A.D. thus presiding over it for a period of 48 years. In his pre-Saṁnyāsāśrama he was called Veṇi-Veṅkaṭabhaṭṭa as the son of Timmaṇabhaṭṭa, grand-son of Kanakācalabhaṭṭa and great-grand-son of Kṛṣṇabhaṭṭa. He is known to have been the author of more than thirty works relating to Vedas, Upaniṣads, Brahmasūtras etc.

Breaks off in the 9th adhikaraṇa of the 3rd pāda of the 3rd adhyāya.

Beginning :

स्वाध्यायेतिकर्तव्यतारूपन्यायनिबन्धनात्मकं शास्त्रं प्रणिनाय भगवान् जैमिनिः । तत्राध्याया द्वादश । तत्र तृतीयषष्ठदशमा अष्टपादाः । अन्ये चतुष्पादाः । सहस्रमधिकरणानीति प्रसिद्धिः । एवमतिगहनात्मकस्यैतस्य शास्त्रस्य विषयादिमत्त्वोपपादनेनारम्भणीयत्वसमर्थनार्थमिदमादिमं सूत्रम्—अथातो धर्मजिज्ञासेति। अत्राध्ययनविधिवाक्यं विचार्यते । लिङ्लोट्तव्यप्रत्ययलेटामन्यतमयुक्तं वाक्यं विधिवाक्यम् । लिङ्गादिरूपविध्यर्थस्तु प्रयत्नापरपर्याया भावना । सा च फलकरणेतिकर्तव्यतारूपांशत्रयवती ।

Colophon :

इति भाट्टसंग्रहे राघवेन्द्रयतिकृते प्रथमाध्यायस्य तर्कपादाख्यः प्रथमः पादः ।

End :

(सू०)—द्वित्वबहुत्वयुक्तं चाचोदनात्तस्य । अत्र पूर्ववैषम्येण शङ्कनात्संगतिः । ज्योतिष्टोमे श्रुतं युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात् एते असृग्रमिन्दव इति बहुभ्यो यजमानेभ्य इति । युवं हीत्यादिकामृचं द्विकर्तृके यागे प्रतिपदं शास्त्रस्य प्रथमां कुर्यात् । एते इति मन्त्रं बहुयजमानके यागे शास्त्रस्यादिभू ।

Two extra leaves added at the end read some verses taken from the Vṛtta-ratnākara and some other works on Vṛtta.

255 19. O. 16.

भाट्टसंग्रहः—राघवेन्द्रयतिकृतः

Palm-leaf. 176 Foll. $16\frac{1}{4} \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Injured. Clear writing.

Fol. 62 is missing.

Wooden boards are added to both sides.

Contains the adhyāyas 1 to 3 almost complete; but wants a few lines in the beginning.

256 23. L. 10.

भाट्टसंग्रहः—राघवेन्द्रयतिकृतः

Palm-leaf. 62 Foll. $19\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves are much broken.

Breaks off in the 3rd pāda of the 3rd adhyāya, but wants a few lines in the beginning.

257 26. F. 23.

भाट्टसंग्रहः—राघवेन्द्रयतिकृतः

Palm-leaf. 167 Foll. $16\frac{1}{4} \times 1\frac{1}{4}$ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Begins in the 2nd adhyāya and breaks off in the 13th adhikaraṇa of the 4th pāda of the 6th adhyāya.

258 54. A. 18.

भाट्टसंग्रहः—राघवेन्द्रयतिकृतः

Paper. 915 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from the MS. No. R. 801 of the Govt. Oriental MSS. Library, Madras.

Bound in 5 volumes.

Contains the adhyāyas 1 to 12 complete; but without a few lines in the beginning of the 1st adhyāya.

End :

सिद्धान्तस्तु — ब्राह्मणा एवार्त्विज्याधिकारिणः क्षत्रियवैश्यावपि । यज्ञसूत्रकारैः पञ्च यज्ञाः यज्ञं व्याख्यास्याम इत्युपक्रम्य ब्राह्मणानामार्त्विज्यमिति स्मरतां ऋत्वर्थेनापि स्मरणात् । तदाह सूत्रकारः— स्मृतेर्ब्राह्मणानां स्यादिति । फलचमसविधानाच्चेतरेषाम् । सांनाय्ये च प्रतिषेध . . हेतुत्वात् ।

चतुर्धा करणे च निर्देशात्। अन्वाहार्ये च दर्शनादिति। सूत्रचतुष्टये चानेकलिङ्गान्यपि भाष्ये दर्शितानि। तस्मात् ब्राह्मणानामेवार्त्विज्यमिति।

यदाराधनरूपाणि कर्माणि निखिलान्यपि।
तद्ब्रह्म मे प्रसन्नं स्यादनया कर्मचिन्तया॥
भाष्यवार्त्तिकटीकादिनानागूढविमर्शिना।
राघवेन्द्रेण यतिना कृतोऽयं भाट्टसंग्रहः॥

Colophon:

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रसुधीन्द्रगुरुपाद-शिष्यराघवेन्द्रयतिकृते द्वादशाध्यायस्य चतुर्थः पादः।

259 38 B. 4.

भावनाविवेकः—मण्डनमिश्रकृतः

Paper. 28 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

The Bhāvanāviveka is an original treatise on the nature and scope of the Bhāvanā a fundamental doctrine of the Pūrvamīmāṁsā school of philosophy. The author Maṇḍanamiśra is traditionally known to have been a disciple of Kumārila-bhaṭṭa. From Vidyāraṇya's S'aṁkara-vijaya it is understood that Maṇḍana had a controversial discussion with S'rī S'aṁkarācārya and was defeated therein by the latter. He then became a disciple of S'rī S'aṁkarācārya and took the Saṁnyā-sāśrama with the name Sureśvara. But critics do not accept the identity of these two as there is considerable difference between the principles taught by the works of both the authors. Maṇḍana is known to have written some other works besides the Bhāvanāviveka. They are: Vidhiviveka, Vibhramaviveka, Mimāṁsāsūtrānukramaṇī, Sphoṭasiddhi and Brahmasiddhi. All the six works including the Bhāvanāviveka are available in print. He may be fixed in the period between 615-695 A.D. The work has two commentaries, one by Umbeka edited by MM. Dr. Ganganatha Jha in the Sarasvati Bhavana series, Benares and the other by Nārāyaṇa described in the next number of this catalogue and printed in the Annamali University Journal 1949.

Complete.

Beginning:

संसर्गमोहितधियो विविक्तं धातुगोचरात्।
भावात्मानं न पश्यन्ति ये तेभ्यः स विविच्यते॥
सामानाधिकरण्यात्तदर्थभेदाभिधानुमा।
न तादर्थ्यानुमानाद्वा वृक्षतां शिंशपाश्रुतिः॥

इह खलु गगनशशविषाणयोरभवतोरक्रियमाण-त्वात् भवितुश्च घटादेस्तत्त्वात् भवत्यर्थस्य कर्तुः करोतिकर्मता। तथाच भवितुः करोत्यर्थस्य कत प्रयोजक इति भवतेः प्रयोजकव्यापारे णिजुत्पद्यमानः करोत्यर्थमवलम्बते। तेन सा भावना। करोतिसमा-नाधिकरणाश्च पचत्यादय इति तेषां तदर्थत्वानु-मानम्।

End:

स्यादेतत्। स्वर्गसिद्धाविच्छापगमे नियोग-निष्पत्तिः। अन्यथा कृतयागोऽपि नियोज्य एव स्यात्, न तु कृतनियोगः। अतो नियोगार्थनिष्पत्ति-सामर्थ्यात् स्वर्गादिसिद्धिप्रतीतिः। न, विषयसिद्धया

नियोगनिष्पत्तेः। स्वर्गादेश्च नियोज्यविशेषणपरत्वेनाविषयत्वात्। अन्यथा गृहदाहादेरपि प्रसङ्गः। तस्मात् फलपराः स्वर्गकामादिश्रुतय इति मनोहरम्।

Colophon :

इत्याचार्यमण्डनस्य कृतिर्भावनाविवेकः समाप्तः।

260 38 B. 4.

भावनाविवेकव्याख्या विषमग्रन्थिभेदिका—नारायणकृता

Paper. 166 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script, New. Good. Good writing.

This is a rare commentary on Maṇḍanamiśra's Bhāvanāviveka described in the last number. The author Nārāyaṇa was the son of Viṣṇu. There was an author called Bhaṭṭa-Viṣṇu who wrote the Nayatattvasaṁgraha. (R. No. 3277 of the Madras Govt. Oriental MSS. Library.) The question whether the author's father Viṣṇu was identical with Bhaṭṭa-Viṣṇu is yet to be decided.

Complete.

Beginning :

यत्पादसेवैकनिबन्धनानि
पुंसां समस्तानि समीहितानि।
सेन्द्रामराद्यर्चितपादपद्मं
विघ्नेश्वरं तं प्रणतोऽस्मि मूर्ध्ना॥
उज्जहारागमाम्भोधेर्यो धर्मामृतमञ्जसा।
न्यायैर्निमथ्य भगवान् स प्रसीदतु जैमिनिः॥
स्वान्तध्वान्तनुदं देवं सर्वज्ञं पुरुषोत्तमम्।
प्रणतोऽस्म्यखिलेशानं स दिश्यान्नो मनोरथम्॥
श्रीमन्मण्डनमार्ताण्डसन्न्यायोक्तिगभस्तयः।
स्फुरन्तो हृदयव्योम्नि मोहध्वान्तं हरन्तु नः॥
भावनाया विवेकस्य तात्पर्यप्रतिपत्तये।
टीकेयं क्रियतेऽस्माभिर्विषमग्रन्थिभेदिका॥

सर्वो हि सांशयिकः सप्रयोजनश्चार्थो विचारगोचरो भवति। नान्यः। अत्रास्य प्रारिप्सितस्य प्रकरणस्य तथाविधो विषयो वक्तव्य इति तत्प्रतिपादनायाह—संसर्गमोहितधिय इति। अयमर्थः—अस्य प्रकरणस्य भावनापदार्थो विषयः। तस्य च स्वरूपसद्भावे शब्दार्थत्वे च विप्रतिपद्यन्ते। न संयोगविभागादेर्गुणविशेषाद्भेदेन क्रियात्मा भावनापदार्थो विद्यते। यद्यपि विद्यते तथापि नासावाख्यातप्रत्ययस्यार्थः। किंतु धातोरेवेति। किं पुनरस्या विप्रतिपत्तेः कारणम्? विवेकानवधारणमेव। ननु स्वतो विविक्ते वस्तुनि कुतो विवेकानवधारणम्? संसर्गात्। तथाहि—स्वतो विविक्तानामपि पदार्थानां पदार्थान्तरसंसर्गात् विवेकानवधारणं दृश्यते। यथा देहादिसंसर्गात् आत्मनः। यथा वोदात्तादिसंसर्गाद्वर्णानाम्। तथेहापि धात्वर्थेन गुणविशेषेण संसर्गात् क्रियारूपा भावना प्रत्ययाभिधेया विवेकेन नावधार्यते। अतो विवेकानवधारणाद्विप्रतिपत्तिः।

End :

एवमुक्तेन न्यायेन स्वर्गादीनां फलभावस्यानन्यलभ्यत्वात् सामर्थ्यलब्धत्वाच्च नियोज्यविशेषणस्य स्वर्गकामादिश्रुतयः फलपरा इत्येष एव पक्षः शोभन इति।

Colophon :

इति भावनाविवेकविवृतिर्नारायणकृता समाप्ता।
श्रीमन्मण्डनमार्ताण्डसन्न्यायोक्तिगभस्तिभिः।
उन्मीलितावगाढेयं भावनानलिनी मया॥
भावनाया विवेकस्य विवृतिं विष्णुनन्दनः।
लब्ध्वीं नारायणश्चक्रे नारायणपरायणः॥
भावनाविवेकव्याख्या समाप्ता।

261 39. A. 6.

नीतितत्त्वाविर्भावः—चिदानन्दपण्डितकृतः

Paper. 256 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a treatise on the Bhāṭṭa school of Pūrvamīmāṁsā dealing with various topics as found in the S'lokavārttika, Tantravārttika and other works. The author Cidānandapaṇḍita was the son of S'rīdhara. He may be fixed in the 14th century A.D.

Complete in the following 44 Vādas.

१. अध्ययनविधिवादः, २. कार्यवादः, ३. प्रामाण्यवादः, ४. कालप्रत्यक्षतावादः, ५. अन्यथाख्यातिवादः, ६. साक्षात्प्रतीतिनिरासः, ७. कल्पनापोढनिरासः, ८. योगरूढिवादः, ९. इन्द्रियवादः, १०. मनोविभुत्ववादः, ११. अजन्यसंयोगवादः, १२. पवनाकाशप्रत्यक्षतावादः, १३. कर्मप्रत्यक्षतावादः, १४. विशेषनिराकरणवादः, १५. समवायनिरासः, १६. तादात्म्यवादः, १७. अवयवावयविवादः, १८. परमाणुवादः, १९. तमोवादः, २०. जातिनिर्णयः, २१. महासामान्यवादः, २२. अवान्तरजातिवादः, २३. भेदवादः, २४. अद्वैतवादः, २५. अनिर्वचनीयवादः, २६. अविद्यावादः, २७. मिथ्यात्ववादः, २८. विज्ञानवादः, २९. स्वयंप्रकाशवादः, ३०. ज्ञानप्रत्यक्षनिरासः, ३१. प्राकट्यवादः, ३२. योगिप्रत्यक्षनिरासः, ३३. अनुमानपरीक्षा, ३४. शब्दपरीक्षा, ३५. उपमानपरीक्षा, ३६. अर्थापत्तिपरीक्षा, ३७. अभावपरीक्षा, ३८. स्फोटवादः, ३९. ईश्वरवादः, ४०. शब्दनित्यत्ववादः, ४१. क्षणिकत्ववादः, ४२. आत्मवादः, ४३. अन्विताभिधाननिरासः, ४४. वेदापौरुषेयत्ववादः।

Beginning:

वन्दे कल्याणयोरेकमिन्दुचूडमुकुन्दयोः।
अङ्गं कलिन्दहिमवत्कन्ययोरिव संगमम्॥
आचार्यकृतिप्रकृतेराविर्भावाय नीतितत्त्वानाम्।
अयमिह यत्नः क्रियते सन्तः पुष्यन्तु संतोषम्॥
विदुषामयं प्रबन्धो दुर्जनदूष्योऽपि जायते प्रीत्यै।
किं शर्करा न मधुरा पित्तोपहतस्य तिक्तेति॥
आदौ स्वाध्यायविध्यर्थनिर्णयाय यतामहे।
शास्त्रारम्भस्य वैधत्वप्रतिपादनसिद्धये॥

यदि हि स्वाध्यायोऽध्येतव्य इति विधिरध्ययनस्य स्वाध्यायसंस्कारद्वारेणार्थज्ञानसाधनत्वं बोधयतीति न प्रतिपाद्येत, तर्हि अर्थज्ञानस्यानुष्ठानस्य वैधत्वाभावात् तदङ्गभूतं मीमांसाश्रवणमपि न वैधं स्यात्।

End:

काठकादिसमाख्यापि कस्यचिदेव कठादेः प्रवचनमिति तेन प्रोक्तमिति प्रवचननिबन्धनैवेति सिद्धमपौरुषेया वेदा इति।

Colophon:

इति श्रीचिदानन्दपण्डितकृतौ नीतितत्त्वाविर्भावे वेदापौरुषेयत्ववादश्चतुश्चत्वारिंशः समाप्तः।

साकूतं गहनं कुमारिलमतं जिज्ञासुभिः पण्डितै-
रप्यस्मास्ववधीरणा यदि परं ग्रन्थोऽयमभ्यस्यताम्।
नो चेदुद्धततर्कतार्किकसभामध्यस्थितानां भवे-
त्तत्तन्मार्गविचक्षणत्वविरहादात्मैव नो वञ्चितः॥
यो भूयः सोमपायी श्रुतिमणिसरणिर्विश्वसाधारणश्री-
र्विद्यानामेकमोकस्त्रिजगति विदितः श्रीधरो ब्रह्मनिष्ठः।
तत्सूनुः सूक्तिभूमिर्जगदुपकृतये श्रीचिदानन्दनामा
तत्त्वाविर्भावमुच्चैर्व्यधित बुधसभारोहणो रौहिणेयः॥

इति श्रीचिदानन्दपण्डितकृतौ नीतितत्त्वाविर्भावः समाप्तः ।

The first two extra Foll. found in the beginning contain the table of contents of the work.

262 39. A. 8.

नीतितत्त्वाविर्भावव्याख्या—परमेश्वरकृता

Paper. *277* Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a Commentary on Cidānanda's Nītitattvāvirbhāva by Parames'vara II. In the family of Payyur Bhaṭṭadri of Porkalam in Malabar District several Parames'varas were known to have been great Mīmāṁsakas. Parames'vara I, was the son of Gaurī and Ṛṣi I. He wrote commentaries on Vācaspati's Nyāyakaṇikā and Kālidās'a's Meghadūta and was the author of a poem Haricarita. (Published in the Adyar Library Series No. 63 in 1948). His son was Ṛṣi II. His son was our author Parames'vara II. He also wrote Commentaries on Vācaspati's Tattvabindu and Maṇḍana's Sphoṭasiddhi and Vibhramaviveka. His son was Ṛṣi III, whose son was Parames'vara III, the author of the Mīmāṁsāsūtrārthasaṁgraha and Mīmāṁsākās'ikāvyākhyā. The author Parames'vara II mentions his paternal uncles—Bhavadāsa, Vāsudeva, S'aṁkara and Subrahmaṇya as his teachers. He may be fixed in the beginning of the 15th century A.D. The first two and half lines are wanted in this MS. They have been supplied from the MS. of the Maharaja's Palace Library Trivandrum, No. 667, Vol. III.

Breaks off in the 15th Vāda *i.e.* समवायनिरास.

Beginning :

(अभिवन्द्य चिदानन्दं परमात्मानमीश्वरम् ।
वागिन्दिरोमासंमिश्रब्रह्मविष्णुशिवात्मकम् ॥
व्याख्या प्रस्तूयते ग्रन्थे) तत्त्वाविर्भावसंज्ञके ।
चिदानन्दकृतौ नत्वा गुरूनपि यथामति ॥

प्रकरणमारिप्सुरभिमतां देवतां नमस्यति—वन्द इति । अहमिन्दुचूडमुकुन्दयोरेकमङ्गं वन्दे । महादेवपुरुषोत्तमयोः साधारणं विग्रहं कायवङ्मनःप्रह्वतालक्षणया प्रणत्या पूजयामि । इन्दुचूडमुकुन्दौ विशिनष्टि—कल्याणयोरिति । देवतात्वादेव कल्याणत्वस्य प्राप्तत्वात् कल्याणयोरिति पुनर्वचनमतिशयद्योतनाय ।

Colophon of the 1st vāda :

इति गोपालिकासूनु ऋषेः पितुरनुग्रहात् ।
अन्तेवासी पितृव्यस्य भवदासस्य धीमतः ॥
चिदानन्दकृतावाद्यं व्याचष्ट परमेश्वरः ।
व्याख्यातुं कार्यवादं च समीहा तस्य संप्रति ॥
प्रथमसूत्रवादः समाप्तः ।

Colophon of the 2nd vāda :

इतिव्याख्यापयामास कार्यवादमिमं सुधीः ।
सुब्रह्मण्यो यथार्थाख्यो भ्रातुरेव च सूनुना ॥
वेदारण्यनिवासिन्या हैमवत्याः प्रसादतः ।
व्याख्यानं कर्तुमेषोऽध्यवस्यति . . . . ॥
इति कार्यवादः समाप्तः ।

Colophon of the 3rd vāda :

एवं स्वतःप्रमावादं व्याख्यद्गोपालिकासुतः ।
वासुदेवपितृव्योक्तरीत्या केवलयैव तु ॥
इति प्रमावादः परिसमाप्तः ।

Colophon of the 4th vāda :

कालप्रत्यक्षतावादमेवं व्याख्यदृषेः सुतः ।
भवदासपितृव्यस्य प्रसादादेव केवलात् ॥
कायवाङ्मनसां सम्यक्प्रह्वीभावेन शंकरे ।
अन्यथाख्यातिवादेऽपि स व्याख्यातुं समुद्यतः ॥

Colophon of the 10th vāda :

मनोवैभववादोऽयं व्याख्यातः सांप्रतं पुनः ।
मरुद्विहायःप्रत्यक्षवादो व्याख्यायते स्फुटम् ॥
यो न्यायकणिकाव्याख्यां चकार परमेश्वरः ।
तस्य पौत्रेण तत्सूनोरेवान्तेवसता स्वयम् ॥
इति मनोवैभववादः ।

End :

कः पुनरस्य विषयः । आश्रयाश्रयिभावः । स च न संबन्धान्तरपूर्वः । तादात्म्यनिमित्तस्तु इति वक्ष्यते । एवं प्रतीत्यानुगुण्याभावः प्रत्यक्षत्वे दर्शितः । व्यापकनिवृत्त्या च नास्य प्रत्यक्षमित्याह—कश्च समवाय . . ।

263 39. A. 11.

नीतितत्त्वाविर्भावव्याख्या—मुकुन्दानन्दयतिकृता

Paper. 214 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is another commentary on Cidānanda's Nītitattvāvirbhāva by Mukundānandayati. Nothing is known about the author's date etc.

The leaves are copied in disorder. Therefore the extent of the portion contained cannot be said definitely. The subjects dealt with here go up to 20th Vāda.

Beginning :

नमामि स्थाणुसंभूत . . . . नृसिंहं च गणाधिपम् ॥
वन्दे वागीश्वरीं देवीं यदीयकरुणावशात् ।
विलसन्ति कवेर्वक्त्रे वाचो वीचिविलासवत् ॥
नमः पदज्ञुषां नृणां मनस्तिमिरहारिणे ।
अरूपालोकदीपाय गुरवेऽपूर्वभानवे ॥
मुकुन्दानन्दयतिना मुदे सुमनसामिदम् ।
मननं नीतितत्त्वाविर्भावाख्यार्थस्य तन्यते ॥
अविज्ञातं यदज्ञातं परैरज्ञातमात्मनः ।
विज्ञापनाय तस्येदं करिष्यामि महाकृतेः ॥

नीतितत्त्वाविर्भावाख्यं प्रकरणं कर्तुकामस्तदविघ्नपरिसमाप्त्यादिप्रयोजनाय महदाचारमूलं मङ्गलमाचरति—वन्दे कल्याणयोरिति ।

End :

अत्रायं श्लोकार्थः । लिङर्थः कार्यम् । तच्च भावार्थसार्थादुत्तीर्णाङ्गमित्याहुर्ये इति संबन्धः । इतिशब्दः प्रकारवाची । या क्रिया स एवार्थो भावार्थः । तस्य सार्थः संघातः । तस्मादुत्तीर्णाङ्गमुत्तीर्णशरीरमिति व्यतिरिक्त ।

264 21. P. 7.

नीतितत्त्वाविर्भावव्याख्या—मङ्गलटीका

Palm-leaf. 78 Foll. $12 \times 1\frac{5}{8}$ inches. 8 lines in a page. Malayālam script. Old. Injured. Good writing.

Wooden boards are to both sides.

This is a rare commentary on Cidānanda's Nītitattvāvirbhāva. The commentary is called Maṅgalaṭīkā. The author's name is not given.

Breaks off in the 6th Vāda.

Beginning :

शेषे संकर्षणे . . . . . चितम् ।
हिरण्यगर्भग . . . . . विभुम् ।

नैक . . . शेष: स्यादिति दुर्बलचेतसाम् ।
दुष्टाशामपनेष्यामि तत्त्वाविर्भावटीकया ॥

अथ मीमांसाप्रकरणमारभमाण आत्मनो भेदाभेद-रसिकत्वात् तदनुरूपां देवतां मङ्गलार्थमभिवन्दते—वन्दे कल्याणयोरिति । कल्याणयोर्मङ्गलयोः सर्वार-म्भेष्वभिगम्ययोरित्यर्थः । गङ्गायमुनासंगमोपमानेन च सितासितरूपत्वं सकलदुरितोच्छेदकरत्वं वर्णाश्रमादि-भेदनियमानपेक्षसकलजन्तुसेव्यत्वं च सूचितम् ।

Colophon :

इति मङ्गलटीकायां शास्त्रारम्भसमर्थनव्याख्यानं समाप्तम् ।

End :

यदि च कालावच्छेदादधिकविषयत्वं तर्हि तन्मात्र-ज्ञानस्य प्रामाण्यप्रसङ्गः । न तु गृहीते वस्तुस्वरूपे । तत्राप्राणाण्यमेव ज्ञानस्य भवेदित्यनधिगतगन्तृत्वं . . . . अत्रासंभवमाशङ्कते—यत्पुनरिति । परिहरति—तदयुक्तमिति । अयमभिप्रायः—अनधिगतग . . . . ।

From the MS. of the Maharāja's Palace Library, Trivandrum, (No. 679, Vol. III) the author's name is known as Nīlakaṇṭha.

265 9. H. 13.

उपक्रमपराक्रमः—अप्पयदीक्षितकृतः

Paper. 16 Foll. 14 × 6½ inches. 24 lines in a page. Telugu script. Old. Injured. Illegible writing.

A treatise on Pūrvamīmāṁsā maintaining the force of the intial passage in relation to the final passage in the interpretation of continuous Vedic texts. The author opines that due regard should be given to the passage found in the beginning and the final passage should be interpreted in consonance with that of the beginning. In this connection he apparently tries to refute the view of the Upasaṁhāravijaya of Vijayīndratīrtha, belonging to the Dvaita school of Vedānta, who was our author's contemporary in the middle of the 16th century A.D.

Complete.

Beginning :

उपक्रमस्य प्रबलत्वमूचिरे
यथोपसंहारविरोधिनो बुधाः ।
प्रतिष्ठितां तामिह तर्कसंततिं
प्रबोधयामः प्रतिकूलजल्पितान् ॥

मीमांसकास्तावत् उपक्रमोपसंहारयोर्विरोधे सत्युपक्र-माबल्ये न्यायमाहुः । सर्वस्यापि शब्दस्य स्वार्थलङ्घने विरोधः कारणम् । स च प्रतियोगिनि दृष्टे ज्ञायते । न चोपक्रमदशायामुपसंहारो विरोधी ज्ञायत इत्युप-क्रमो मुख्यवृत्तिरेव युक्तः ।

End :

तस्मात् उत्तरमीमांसायामप्युपक्रमप्राबल्यमवि-गीतम् । एवं च सकलमीमांसकव्यवहारविरुद्धो नय-सरणिगन्धानभिज्ञैरर्वाचीनैः स्वमतस्येतरमतवैलक्षण्य-प्रकटनाय कल्पित उपक्रमोपसंहारबलाबलव्यत्ययो यवनगुरूपदिष्टशौचमुखप्रक्षालनपौर्वापर्यव्यत्यासवदु-पेक्षणीयः प्रामाणिकैरिति सिद्धम् ।

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजिमखिनः श्रितचन्द्रमौलि-
रस्यप्पदीक्षित इति प्रथितस्तनूजः ॥
अकरोदयमक्लिष्टमात्मबुद्धिविशुद्धये ।
उपसंहृतदुर्न्यायमुपक्रमपराक्रमम् ॥

Date of copying :

ईश्वरसंवत्सरभाद्रपददशमीसोमवारः ।

R 7766

266 22. M. 62.

उपक्रमपराक्रमः—अप्पयदीक्षितकृतः

Palm-leaf. 16 Foll. $18\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Incomplete.

This MS. was presented to the Library by Pandit N. Bhashyacharya.

267 23. A. 8.

उपक्रमपराक्रमः—अप्पयदीक्षितकृतः

Palm-leaf. 13 Foll. $13\frac{1}{2} \times 1\frac{3}{8}$ inches. 7 lines in a page. Telugu script. Old. Injured. Illegible writing.

Incomplete.

268 26. E. 7.

उपक्रमपराक्रमः—अप्पयदीक्षितकृतः

Palm-leaf. 31 Foll. $18\frac{1}{2} \times 1\frac{1}{2}$ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Three fly-leaves in the beginning contain a few lines on the explanation of the 1st verse of the S'rībhāṣya.

One extra leaf at the end discusses the correctness of the word तिरति.

269 29. G. 34.

उपक्रमपराक्रमः—अप्पयदीक्षितकृतः

Palm-leaf. 99 Foll. $7\frac{3}{4} \times 1\frac{1}{2}$ inches. 9 lines in a page. Grantha script. Old. Good. Good writing.

Wooden boards are added to both sides.

Complete.

270 10. I. 13.

चित्रपटः—अप्पयदीक्षितकृतः

Paper. 32 Foll. $8\frac{1}{2} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a metrical summary of the contents of the 12 Chapters of Jaimini's Pūrvamīmāṁsāsūtras. The author Appayadīkṣita was the son of Raṅgarājādhvarin and the famous author of many works on the Pūrva and Uttara Mīmāṁsās. He was patronized by the Vijayanagaram Kings Cinna Timma, Cinna Bomma, and Veṅkaṭa I and II. Appayadīkṣita was also a contemporary of Tātācārya and Vijayīndrabhikṣu who flouished in the court of S'evappa of Tanjore. He is believed to have lived in the 16th century between 1520 to 1592 A.D., thus living for 72 years. The MS. under description does not mention the names of the work and its author, yet they have been mentioned as Citrapaṭa and Appayadīkṣita respectively in the MS. described in R. No. 3875 (c) of the Madras Govt. Oriental MSS. Library and the printed edition of the work in the journal of Oriental Research, Madras, Vols. VIII and IX of 1934 and 1935. The significance on which the work was named Citrapaṭa is not clear.

Complete.

Beginning :

अथातो धर्मजिज्ञासा धर्मोऽर्थो विधिचोदितः ।
तत्प्रमाणं परीक्ष्यं स्यान्नाक्षाद्यैस्तत्प्रमीयते ॥

विधिस्तस्मिन्मानमेव नित्यः शब्दः पदात्मकः ।
नित्यानि वेदवाक्यानि नानित्यानि समाख्यया ॥

End :

याजमानार्त्विज्ययोर्विप्रतिषेधे परं बली ।
आर्त्विज्यं ब्राह्मणा एव कुर्युः सर्वेषु कर्मसु ॥

Colophon :

इति चतुर्थः पादः । इति द्वादशोऽध्यायः समाप्तः । समाप्तेयं मीमांसासिद्धान्तार्या ।

This is a transcript made from a paper MS. available in the Tanjore Palace Library, Burnell No. 212.

271 22. O. 24.

चित्रपटः—अप्पयदीक्षितकृतः

Palm-leaf. 13 Foll. $15\frac{3}{4} \times 1\frac{1}{2}$ inches. 11 lines in a page. Grantha script. Old. Fair. Good writing.

Complete.

272 40. C. 46.

चित्रपटः—अप्पयदीक्षितकृतः

Paper. 5 Foll. $11 \times 4\frac{1}{2}$ inches. 11 lines in a page. Devanāgarī script. Old. Good. Good writing.

Wants the beginning and end.

The leaves are numbered 9 to 14. No. 12 is missing.

273 9. K. 10.

पूर्वोत्तरमीमांसावादनक्षत्रमाला—अप्पयदीक्षितकृता

Paper. 180 Foll. $10 \times 4\frac{3}{4}$ inches. 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a collection of controversial discussions on certain selected topics relating to the Pūrva and Uttara Mīmāṁsā S'astras. The author was the famous Appayadīkṣita, the son of Raṅgarājādhvarin of the Bhāradvājagotra. He was patronized by Cinna Timma, Cinna Bomma and Veṅkaṭa I between 1542 and 1585 A.D. Therefore he must have belonged to the middle of the 16th century A.D. The work has been printed and published in the S'rī Vāṇī Vilas Press, Srirangam in 1912. It contains the following 27 Vādas :

१. मासाग्निहोत्रवादः, २. हिंसिधात्वर्थवादः, ३-५. गुणगुणिशक्तिवादः, ६. गुणलक्षणानिरासवादः, ७-८. अरुणाधिकरणवादः, ९-१६. अन्तर्यामिशक्तिवादः, १७. तृतीयासमर्थनवादः, १८. सर्वशब्दवाच्यत्ववादः, १९-२१. ऐकशास्त्र्यवादः, २२. भस्मोद्धूलनसमर्थनवादः, २३-२५. अयथार्थज्ञानवादः, २६. प्रपञ्चासत्यत्ववादः, २७. आनन्दाभेदसमर्थनवादः ।

Beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
तन्त्रान्तरेष्वनुपपादितमर्थजातं
यत्सिद्धवद्वयवहृतं ध्वनितं च भाष्ये ।
तस्य प्रसाधनमिह क्रियते नयोक्त्या
बालप्रियेण मृदुवादकथापथेन ॥
शेषीभवदपि भाष्ये सुमहति सत्रेऽग्निहोत्रमिव ।
स्वातन्त्र्येण प्रकरणमर्थप्रतिपादने समर्थमिदम् ॥

कुण्डपायिनामयनाख्ये सत्रे श्रूयते—उपसद्विश्चरित्वा मासमग्निहोत्रं जुहोति इति । तन्मासाग्निहोत्रं नैयमिका-

ग्निहोत्रात् भिद्यते न वेति जरन्मीमांसकमतानुसारिणः पूर्वपक्षिणः श्रीकण्ठाचार्यमतानुसारिणः सिद्धान्तिनश्च विप्रतिपत्त्या संशये सति सिद्धान्तमतानुसारिणो वादिनः प्रथमा कक्ष्या ।

End :

न खलु ब्रह्मानन्दमनुभवन्मुक्तः कश्चित् मनुष्यगन्धर्वानन्दमनुभवन्नास्ते । सर्वेषां मुक्तानां निरतिशयब्रह्मानन्दानुभवसत्त्वात् । तस्मात् त्व . . . . . वैषयिकानन्दा एकदेशाः परब्रह्मानन्दस्येति . . . ।

Colophon :

आनन्दाभेदसमर्थनवादः ।

समूल(श्रवणाश्लेषचित्राभाद्रपदोत्तरा ।
नव्या नक्षत्रमालेयं प्रीत्यै सोमस्य निर्मिता ॥)

274 19. G. 14.

पूर्वोत्तरमीमांसावादनक्षत्रमाला—अप्पयदीक्षितकृता

Palm-leaf. 33 Foll. 17 × 1¾ inches. 10 lines in a page. Grantha script. Old. Much injured. Good writing.

Wants the beginning of the 2nd Vāda and breaks off in the 9th Vāda with gaps in the 7th Vāda.

275 21. O. 6.

पूर्वोत्तरमीमांसावादनक्षत्रमाला—अप्पयदीक्षितकृता

Palm-leaf. 88 Foll. 15½ × 1¼ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 20th Vāda.

Adds the following stanza in the beginning :

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥

276 27. H. 19.

पूर्वोत्तरमीमांसावादनक्षत्रमाला—अप्पयदीक्षितकृता

Palm-leaf. 18 Foll. 8 × 2¼ inches. 12 lines in a page. Grantha script. Old. Good. Good writing.

Foll are marked with the numbers 1 to 19. No. 2 is missing.

Contains the first vāda complete.

277 25. C. 20.

पूर्वोत्तरमीमांसावादनक्षत्रमाला—अप्पयदीक्षितकृता

Palm-leaf. 13 Foll. 15 × 1½ inches. 10 lines in a page. Telugu script. Old. Injured. Good writing.

Wants the beginning and end of the 2nd Vāda.

The fly leaf reads the following stanza.

चण्डालो जायते यज्ञकारणाच्छूद्रभिक्षणात् ।
यज्ञार्थं लब्धमददद्वासः काको . . . . . ॥

278 27. N. 40.

पूर्वोत्तरमीमांसावादनक्षत्रमाला—अप्पयदीक्षितकृता

Palm-leaf. 120 Foll. 14 × 1⅛ inches.

9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete in 27 Vādas. The last leaf contains the contents of the work.

Reads the following colophon :

इति श्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षित.

279 29. K. 40.

पूर्वोत्तरमीमांसावादनक्षत्रमाला—अप्पयदीक्षितकृता

Palm-leaf. 110 Foll. 19½ × 1¼ inches. 8 lines in a page. Grantha and Telugu scripts. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete in 27 Vādas.

The last leaf contains the contents of the work.

Reads the following stanzas in the beginning :

यस्याहुरागमविदः परिपूर्णशक्ते-
रंशे कियत्यभिनिविष्टममुं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय
नारायणीसहचराय नमः शिवाय ॥
यत्सिद्धवद्वयवहृतं ध्वनितं च भाष्ये
तन्त्रान्तरेष्वनुपपादितमर्थजातम् ।
तस्य प्रसाधनमिह क्रियते नयोक्त्या
बालप्रियेण मृदुवादकथापथेन ॥

Colophon :

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतिर्वादनक्षत्रमालिका संपूर्णा ।

The scribe adds :

श्रीमत्प्रतिवसन्तयाजिविद्वज्जनरत्नायमानश्रीविश्वनाथाध्वरिवरसूनुश्रीगौरीकान्ताध्वरिलिखितेयं वादनक्षत्रमालिका संपूर्णा ।

280 22. O. 24.

पूर्वमीमांसावादमाला

Palm-leaf. 8 Foll. 15½ × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

A controversial discussion on certain topics relating to the Pūrvamīmāṁsā. The author's name is not known. These portions are not included in the Vādas of of Appayadīkṣita mentioned in previous numbers.

Deals with the following adhikaraṇas— साम्नः समापनाधिकरणम्, शिष्टाकोपाधिकरणम्, विरोधाधिकरणम् ।

Incomplete.

Beginning :

तृचे स्याच्छुतिसंयोगादिति सूत्रविषयीभूते एकं साम तृचे क्रियते स्तोत्रियमिति वाक्ये साम्नो व्यासज्य गानं नास्ति, किंत्वव्यासज्य गानमिति सिद्धयनुकूलतद्वाक्यश्रुतं त्रित्वं सामाङ्गमिति निर्णयार्थं वादकथा प्रस्तूयते । तत्रोदाहृतवाक्ये श्रुतं त्रित्वं सामाङ्गं तदितरानङ्गत्वे सत्यङ्गत्वात् ।

End :

अथाष्टमी कक्ष्या—यदि श्रुत्यनुमानसंभावना तदैव वरं श्रुतिमूलकत्वं पक्षे वर्तत इति निरुपाधिकमनुमानं भवेत् । श्रुत्यनुमानमेव दुर्लभतरम् । तथाहि—स्मृतिर्वेदमूला महाजनपरिगृहीतत्वात् आचारवदित्यनुमानसंभावना कदाचिदप्यनुमीयमानस्योच्चारणाभावेनाननुभावकतया मूलत्वासंभावितत्वेन साध्यबाधात् ।

281 20. F. 36.

विधिरसायनम्, सुखोपजीवनीव्याख्यासहितम्— अप्पयदीक्षितकृतम्

Palm-leaf. 67 Foll. 16 × 1½ inches. 9 lines in a page. Telugu script. Old. Injured. Good writing.

The Vidhirasāyana is a dissertation on the nature and scope of the three Vidhis, namely Apūrva, Niyama and Parisaṁkhyā. In discussing the characteristics of these Vidhis as given by Kumārila, the author points out some defects on them and gives his own characteristics as based on old ones. In this connection he quotes Bhavadeva, Pārthasārathimiśra etc. as authority. Though his exposition was of an advanced nature, his view met severe criticisms from many younger writers like Śaṁkarabhaṭṭa etc. The work so far as available contains 43 verses. The author himself has added his commentary to the work. The commentary is called Sukhopajīvanī.

Breaks off in the last stanza.

Beginning :

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥
जन्मस्थेमलयं समस्तजगतां यस्यैव लीलायितं
यस्मिन्नायतते भवस्थिरमहापाशक्षयः प्राणिनाम् ।
तद् ब्रह्मादिभिरप्यगम्यविभवं विश्वाधिकं शाश्वतं
साम्बं ब्रह्म रसालमूलरसिकं पश्येयमन्तर्दृशा ॥
यत्कुमारिलमतानुसारिणा निर्मितं विधिरसायनं मया ।
पद्यरूपमनतिस्फुटाशयं तत्सुखावगतये विविच्यते ॥

प्रारिप्सितप्रकरणाविघ्नसमाप्तये सूत्रकारस्य महर्षेरनुस्मरणरूपं मङ्गलमाचरन्नेष प्रकरणारम्भं तावदाक्षिप्य समाधत्ते—

विख्याता मुनिवर्यसूक्तिषु विधास्तिस्रो विधिस्रोतसामाचार्यैर्विशदं विविक्तविषयास्ताश्च व्यवस्थापिताः ।
किं तत्रास्ति विचार्यमार्यमथिते मार्गे निसर्गोज्ज्वले
नानोदाहरणैस्तु ताः प्रविशदीकर्तुं प्रवर्तामहे ॥

मुनिवर्यस्य भगवतो जैमिनेः सूत्रेषु—विधिर्वा स्यादपूर्वत्वात्, नियमार्था वा पुनः श्रुतिरुच्यते, परिसंख्येत्येवमादिषु त्रयो विधिप्रकाराः प्रसिद्धाः । अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति । ते च भट्टपादैः परस्परासंकीर्णविषयतया स्पष्टमेवोपपादिताः ।

End :

न हि यस्य किंचिद्विषयप्राप्तित्वावच्छिन्नमुक्तरूपनिवृत्तिनियतं तस्य यत्र क्वचित्प्राप्तिकारित्वं नियमविधिलक्षणमुक्तम् । किंतु यस्य यद्विषयप्राप्ति.

282 20. F. 37.

विधिरसायनम्, सुखोपजीवनीव्याख्यासहितम्— अप्पयदीक्षितकृतम्

Palm-leaf. 24 Foll. 15¾ × 1⅜ inches. 7 lines in a page. Telugu script. Old. Injured. Clear writing.

Breaks off in the 9th stanza.

283 20. F. 45.

विधिरसायनम्, सुखोपजीवनीव्याख्यासहितम्— अप्पयदीक्षितकृतम्

Palm-leaf. 85 Foll. 16½ × 1¼ inches.

8 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the last stanza.

284 20. F. 60.

विधिरसायनम्, सुखोपजीवनीव्याख्यासहितम्—अप्पयदीक्षितकृतम्

Palm-leaf. 105 Foll. 16½ × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Foll. 1 to 5 read the verses only of the text and the rest both the verses and commentary there on.

Breaks off in the last stanza.

285 22. D. 89.

विधिरसायनम्, सुखोपजीवनीव्याख्यासहितम्—अप्पयदीक्षितकृतम्

Palm-leaf. 60 Foll. 15½ × 2 inches. 12 lines in a page. Grantha script. Old. Much injured. Good writing.

Wants the beginning and end.

The last three folios are much injured.

286 23. A. 43.

विधिरसायनम्, सुखोपजीवनीव्याख्यासहितम्—अप्पयदीक्षितकृतम्

Palm-leaf. 82 Foll. 17½ × 1¾ inches. 9 lines in a page. Grantha script. Old. Much injured. Clear writing.

Breaks off in the 42nd stanza.

The owner's name—Dharmasīva.

287 30. K. 36.

विधिरसायनम्, सुखोपजीवनीव्याख्यासहितम्—अप्पयदीक्षितकृतम्

Palm-leaf. 95 Foll. 16¼ × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Fol. 79 (b) is left blank.

Breaks off in the 41st stanza.

288 34. L. 31.

विधिरसायनम्, सुखोपजीवनीव्याख्यासहितम्—अप्पयदीक्षितकृतम्

Palm-leaf. 47 Foll. 17 × 1½ inches. 9 lines in a page. Grantha script. Old. Fair. Good writing.

Wooden boards are added to both sides.

Complete.

2 extra leaves added at the end contain certain agreement made by the residents of the village Vīrarāghavasamudra in the year Vikāri.

289 26. N. 13.

विधिरसायनपत्रम्

Palm-leaf. 11 Foll. 14¼ × 2 inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Contains some critical notes on the Vidhirasāyana and Sukhopajīvanī of Appayadikṣita described above.

The name of the author of the notes is not known.

Incomplete.

Beginning :

पश्चाद्यथो हीत्येकत्रिंशादिश्लोकैर्यदव्याप्त्यसंभवप्रदर्शनं कृतं तत्र कैश्चिद्विचार्यते। यत्तावत्काम्यतया विहितानेराश्रयार्पकत्वमग्निष्टोमादिवाक्येषूक्तम्, तत्र पशुकामश्चिन्वीतेत्यादिवाक्यैर्भावार्थाधिकरणन्यायेन स्थलनिर्माणात्मकचयनरूपक्रियाया एव फलोद्देशेन विधानात् कस्याश्रयापेक्षेत्यालोचनीयम्।

End :

एवमप्यनारभ्याधीतविधेरभ्युदयशिरस्कत्वपरिहारे बहूनां वैकृतवाक्यानां द्वारसंबन्धापूर्वसंबन्धात्मककार्यद्वयपरत्वनिमित्तगौरवपरिहाराय वैकृतविधिभिरुपसंहारस्यैवोचितत्वात् तस्माद्युक्तो दृष्टान्तः।

290 41. B. 4.

विधिरसायनदूषणम्—शंकरभट्टकृतम्

Paper. 11 Foll. 9 × 4 inches. 12 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is an unfavourable criticism on the Vidhirasāyana of the famous Appayadīkṣita.

The author S'aṁkarabhaṭṭa was the son of Nārāyaṇabhaṭṭa of Benares. For the genealogy of S'aṁkarabhaṭṭa and the works written by the members of his family see the MSS. Notes by Pandit V. Krishnamacharya, published in the Adyar Library Bulletin, Vol. XI Part. 4—1947. The work has not been printed. The Durūhasikṣā of Appayadīkṣita III (No. 307 of this volume) is a refutation of this work.

Incomplete.

Beginning :

विध्यादित्रयलक्षणानि रचितान्याचार्यवर्यैर्निरा-
कुर्वन्तोऽप्पयदीक्षिता व्यरचयन्सिद्धान्तजातेक्वचित्।
आक्षेपं त्विह कुर्वते बहुमतिं ये तन्निरासाक्षमा-
स्तेषामेष कृते तु शंकरबुधस्यारम्भ उज्जृम्भते ॥

प्रकृतिविधेर्यदुद्देश्यतावच्छेदकमपूर्वीयत्वान्यत्तेन रूपेणोद्देश्ये यत्प्रकृतविध्यभावेऽतिदेशान्यप्रकृतविधिसमानशाखीयविधितोऽसंभवत्प्राप्तिकं विधेयं तद्विषयो विधिरपूर्वविधिः। एवं च सर्वा विधिरसायनोक्ता अव्याप्तयोऽतिव्याप्तयश्च निरस्ता भवन्ति। तथाहि अप्राप्ते इति सति सप्तम्यनङ्गीकृतेस्तत्पक्षे तावत् द्वितीयश्लोकाद्युक्तास्ताः सर्वा अनवकाशाः। विषयसप्तमीपक्षमात्रे तूभयपक्षसाधारण्यं वा यासां संभवति ताः प्रथमश्लोकाद्युक्ता अवशिष्टा अपि न प्रसज्यन्ते।

End :

यत्तु द्वादशश्लोकोत्तरार्धे त्रैकालिकत्वमप्राप्तेरात्यन्तिकमित्याशङ्क्यापवादापवादरूपेऽपूर्वविधौ कृष्णलचरौ घृते श्रपयतीत्यत्र पूषा प्रपिष्टभाग इत्यत्रापूर्वे चावभृथे बर्हिषः प्रयाजान् यजतीति प्रयाजविधावव्याप्तिरित्युक्तम्, तत्र त्रैकालिकत्वरूपात्यन्तिकत्वानभ्युपगमात्।

291 54. A. 51.

विधिरसायनदूषणम्—शंकरभट्टकृतम्

Paper. 81 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Complete :

अन्यथा अवघातप्राप्तेरवघाताङ्गनिवृत्तिर्नियता न भवतीति तत्र तल्लक्षणं वर्तत इति।

इति चतुश्चत्वारिंशत्तमश्लोकदूषणम्।

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणमीमांसाशास्त्रसाम्राज्यधुरंधरश्रीभट्टनारायणात्मजभट्टशंकरकृतं विधिरसायनदूषणं समाप्तम् ।

According to this work the Vidhirasāyana must contain 44 verses, while the printed edition contains only 43 verses.

292 36. D. 5.

उपसंहारविजयः—विजयीन्द्रभिक्षुकृतः

Paper. 78 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

A dissertation on the Pūrvamīmāṁsā trying to establish that the Upasaṁhāra or the assertion of the latter portion is stronger than that of the former portion of the text. The work refutes the view of Appayadīkṣita as explained in his Upakramaparākrama. The author Vijayīndrabhikṣu also called Vijayīndratīrtha was a pupil of Surendratīrtha and a contemporary of Appayadīkṣita under the patronage of the King S'evappa of Tanjore. He was also a donee of the village called Achyutappasamudra from the king Raṅgarāya II of Vijayanagaram in 1574 A.D. Incomplete.

Beginning :

रक्षोनाथस्य वक्षोभुवि विपुलनखैर्वज्रकल्पैः कृतायां
रक्तस्रोत सरस्यां प्रतिफलितमिदं स्वं वपुर्वीक्षमाणः ।
स्मृत्वा तं स्वर्गपालं रघुवरमपि तं रावणं तत्प्रसक्त्या
चैद्यं रुष्टः प्रहृष्टः प्रदिशतु हृदि शं श्रीनृसिंहोऽनिशं नः ॥
सर्वदोषातिदूराय कल्याणगुणशालिने ।
श्रीमध्वदेशिकेन्द्राय श्रीनृसिंहाय ते नमः ॥
उर्व्यां सत्कर्णतां यान्ति यद्गुणाकर्णने रताः ।
अर्णवं गुणरत्नानां पूर्णबोधं तमाश्रये ॥
ब्रह्मविन्मुखरङ्गस्थां मध्व ते वाङ्नटीं नरान् ।
विचित्रपदविन्यासैर्मोदयन्तीं भजेऽन्वहम् ॥
यस्य वाक्कामधेनुर्नो वाञ्छितार्थान् प्रयच्छति ।
सेवे तं जययोगीन्द्रमक्षोभ्यतपसः फलम् ॥
यो व्यासमुनिदावाग्निः सच्छास्त्रमरुता सह ।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये ॥
मूकोऽपि वावदूकेन्द्रो जायते यदनुग्रहात् ।
श्रीसुरेन्द्रगुरोस्तस्य पादौ स्मृत्वा भवेत्सुखम् ॥
ये नित्यं पदवाक्यमानसरणौ संशीलनालंकृता-
स्तेषामेव करोति या प्रतिपदं संतोषमाकर्णनात् ।
या चानेकविनेयषट्पदतपःसंफुल्लमल्लीलता
सैषा वाग्विजयीन्द्रसंयमिमणेर्ज्ञानार्थिभिःसेव्यताम् ॥
गुरुपादोक्तसन्न्यायैरुपक्रमपराक्रमम् ।
निराकृत्योपसंहारविजयोऽसौ प्रकाश्यते ॥

उपक्रमोपसंहारयोर्यत्र भाति विरुद्धता, तत्र मीमांसकैः पूर्वतन्त्रे प्राप्ताप्राप्तबाधविवेकाय श्रुत्यादिभिर्लिङ्गादीनां प्रत्यक्षेणोत्तरेषां, प्रमाणैः प्रमाणाभासानां, श्रुत्या स्मृतेः, आप्तस्मृत्या अनाप्तस्मृतेः, अविगीतया विगीतायाः ।

End :

अन्यथोपक्रमस्याप्युपसंहारबाधकत्वं न स्यात् । उपसंहारस्याप्युपक्रमैकवाक्यत्वनिर्वाहाय स्वमुख्यार्थत्यागस्य तदनुगुणस्वामुख्यार्थनिष्ठत्वस्य चोपेक्षणीयत्वापातात् ।

The scribe adds :

इतः परमयं ग्रन्थो नोपलब्धः ।

तोरवीवामनशामण्णाचार्येण लिखितं तदीयं पुस्तकं दृष्ट्वेदं लिखितम् ।

उपसंहारविजय उपक्रमपराक्रमम् ।
अतिक्रान्तो विजयते विजयीन्द्रगुरूदितः ॥

293 38. G. 7.

न्यायाध्वदीपिका—विजयीन्द्रभिक्षुकृता

Paper. 84 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

A brief treatise on the philosophy of Pūrvamīmāṁsa by Vijayīndrabhikṣu a saṁnyāsin pupil of Sumatīndratīrtha. It is traditionally known that he was called Viṭṭhalācārya in his former Āśrama. He was a donee of the village called Acyutappasamudra in Tanjore Dt. given by Raṅgarāya II in 1574. He was a contemporary of Appayadīkṣita and Tātācarya of Kumbakonam with whom he held frequently controversial disputes on śāstraīya subjects. He is said to have succeeded the Great Vyāsarāyatīrtha in the latter's Maṭha. He was also the author of Mīmāṁsānayakaumudi, Upasaṁhāravijaya and Paratattvaprakāśikā. He may be fixed in the second half of the 16th century A.D.

Complete.

Beginning :

रक्षोनाथस्य वक्षोभुवि विपुलनखैर्वज्रकल्पैः कृतायां
रक्तःस्रोतःसरस्यां प्रतिफलितमिदं स्वं वपुर्वीक्षमाणः ।
स्मृत्वांशं भार्गवाख्यं रघुवरमपि तं रावणं तत्प्रसक्त्या
चैद्यं रुष्टः प्रहृष्टः प्रदिशतु हृदि शं श्रीनृसिंहोऽनिशं नः ॥
उर्व्यां सत्कर्णतां यान्ति यद्गुणाकर्णने रताः ।
अर्णवं गुणरत्नानां पूर्णबोधं समाश्रये ॥
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्छति ।
सेवे तं जययोगीन्द्रं कामबाणच्छिदं सदा ॥
श्रीमन्मध्वमताब्धीन्दुं दुर्वादिफणिपक्षिपम् ।
ब्रह्मण्याख्यमुनेः शिष्यं व्यासदेशिकमाश्रये ॥
मूर्खोऽपि वावदूकेन्द्रो जायते यदनुग्रहात् ।
श्रीसुरेन्द्रगुरोस्तस्य पादौ नत्वा गिरं भजे ॥
न्यायाध्वगामिनामध्वदर्शनाद्गतिसिद्धये ।
तन्यते विजयीन्द्रेण तन्वी न्यायाध्वदीपिका ॥
ग्रन्थग्रन्थिविमोकस्य नेशते येऽल्पबुद्धयः ।
तेषां कृते जयीन्द्रस्य कृतिरेषा प्रवर्तते ॥
नित्यं ये पदवाक्यमानसरणीसंशीलनालंकृता-
स्तेषामेव करोति या प्रतिपदं संतोषमाकर्णनात् ।
या चानेकविनेयषट्पदततेः संफुल्लमल्ली सदा
सैषा वाग्विजयीन्द्रसंयमिमणेर्न्यायाध्वगैः सेव्यताम् ॥

यद्यपि शास्त्रदीपिकादिरूपा दीपिका न्यायाध्वगामिनां गतिसिद्धये तदध्वदर्शनसाधनरूपा पूर्वमेव प्रवृत्तास्ति, तथापि न तया बालाबालसाधारणं गतिसाधनदर्शनं सिध्यति, शास्त्रदीपिकादेः प्रौढप्रकाशत्वेन बालदृष्ट्यभिभावकत्वात् ।

End :

ततश्चाहवनीयसत्त्वे तत्र जुहुयात् । तदभावे यत्र कुत्रचिदीति वैरूप्यापातात् नोक्तगतिरिति । यदेव विद्यया करोति, सायं प्रातर्जुहोतीत्यादावपि अङ्गसंकोचो दुर्भण इति न शूद्रादीनामधिकारः । नाप्यकालेऽपि तत्कृतिः फलतीति दिक् ।

न्यायाध्वगामिनां पुंसां तदध्वेक्षणकारणात् ।
जयेन्द्रयतिनाकारि शुभा न्यायाध्वदीपिका ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीमत्सुरेन्द्रतीर्थपूज्यपादानां शिष्येण विजयीन्द्रभिक्षुणा विरचिता न्यायाध्वदीपिका समाप्ता ।

294 9. G. 59.

अङ्गत्वनिरुक्तिः—मुरारिकृता

Paper. 30 Foll. 13 × 8 inches. 20 lines in a page. Kannaḍa script. Old. Fair. Good writing.

An Original treatise on the definition of Aṅgatva, the relation of subsidiary and principal subjects by Murāri. As the author refers to Khaṇḍadeva's Bhāṭṭa-dīpikā, he must be later than the middle of the 17th century A.D. This author should not be confounded with the famous Murārimiśra the author of the Nītinayana, who is believed to have belonged to the close of the 12th century A.D. The Aṅgatvanirukti has been printed and published in the Ānandāśrama Series No. 97 in the year 1931. There is no evidence to call the author with the affix Miśra as the MS. reads only Murāri in the Colophon. (See R. 1793 of the Madras Govt. Oriental MSS. Library). The author himself mentions his name simply, as Murāri.

Incomplete.

Beginning :

नमामि कुलजां स्वीयकुलजाद्याधिदेवताम् ।
सर्वाभीष्टफलप्राप्त्यै ब्रह्मादिभिरभिष्टुताम् ॥
मुरारिसंसेवनलब्धबुद्धिः कुमारिलप्रोक्तमतानुसारी ।
मुरारिरङ्गत्वनिरुक्तिमेतां तनोति सद्युक्तिगुणैरुपेताम् ॥

तत्राङ्गत्वं नाम न तावज्जातिः, तत्साधकाभावात् क्रियात्वादिना सांकर्याच्च जात्यादिसाधारणाङ्गत्वस्य जातित्वायोगाच्च व्रीहिभिर्यजेतेत्यादौ व्रीहिपदवाच्य-जातेरेव द्रव्यपरिच्छेदद्वारा यागाङ्गत्वस्य सिद्धान्ति मतसंमतत्वाच्च ।

End :

अतिरिक्तपूर्वकर्मसंबन्धकप्रकृतहविषामेव देवतान्त-रसंबन्धात् ।

295 10. G. 28.

अङ्गत्वनिरुक्तिः—मुरारिकृता

Paper. 66 Foll. 8¼ × 6⅛ inches. 14 lines in a page. Devanāgari script. New. Good. Good writing.

This is a transcript of the original described in the last number.

Incomplete.

296 39. I. 20.

अङ्गत्वनिरुक्तिः—मुरारिकृता

Paper. 14 Foll. 8¼ × 6 inches. 30 lines in a page. Grantha script. Old. Good. Good writing.

Incomplete.

297 25. A. 20.

न्यायपद्मम्—वेंकटाध्वरिकृतम्

Palm-leaf. 40 Foll. 14¾ × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

A small treatise discussing some selected topics relating to the Pūrva-mīmāṁsā. The name of the author is mentioned in one of the introductory verses, as Veṅkaṭācāryayajvan. Yet, he seems to be identical with the author of

the Mīmāṁsāmakaranda, a similar but bigger work in Pūrvamīmāṁsā. Thus the two titles *i.e.* Nyāyapadma and Mīmāṁsāmakaranda have certain sensible significance the latter coming out from the former. An another MS. of the work which is available in the Madras Govt. Oriental MSS. Library (Des. No. 15480) reads the colophon connecting our author with the Ātreya family and thus strenghening our conjecture. Veṅkaṭādhvarin is held to have been in the middle of the 17th century A.D.

Incomplete.

Beginning :

सोमलतया प्रसिद्धो नित्यो ब्रह्मादिभावितशुभाङ्गः ।
वितरतु सर्वमभीष्टं ज्योतिष्टोम इव वेंकटाधीशः ॥
रमाकान्तं समानम्य वेंकटाचार्ययज्वना ।
सूर्यालोकात्तसौरभ्यं न्यायपद्मं वितन्यते ॥

सोमेन यजेतेति वाक्यं यागविधायकं यागोद्देशेन द्रव्यविधायकं वेति विचार्यते ।

तत्राधिकारवाक्येन यागस्य प्राप्तिसंभवात् ।
द्रव्यं तदनुवादेन सोमवाक्ये विधीयते ॥

End :

तस्मात् विद्वद्वाक्ययोः कर्मान्तरविधायकत्वायोगात् समुदायानुवादकत्वमेव साधीय इत्यलमतिवृष्ट्या । परेषां फलसंबन्धघट्टनं स्वप्रयोजनम् ।

298 64972.

न्यायपद्मम्— वेंकटाध्वरिकृतम्

Paper. 73 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanagari script. New. Good. Good writing.

Transcribed from the original MS. described in the last number.

Incomplete.

299 27. H. 16.

मीमांसामकरन्दः—वेंकटाध्वरिकृतः

Palm-leaf. 7 Foll. $15\frac{3}{4} \times 1\frac{1}{2}$ inches. 5 lines in a page. Telugu script. Old. Injured. Good writing.

This is an original treatise explaining the principles arrived at in various adhikaraṇas of Jaimini's Pūrvamīmāṁsā-sūtras. The author Veṅkaṭādhvarin was a native of the village Aras'āṇipālai near Kāncīpuram. He was the son of Raghunāthadīkṣita of Ātreya family and the grandson of Appayārya, the nephew of Tātācārya the royal guru of Veṅkaṭa II of Vijayanagaram dynasty. He speaks of himself as a descendant of Vādihaṁsāmbuda Rāmānujācārya, the maternal uncle and preceptor of S'rī Vedāntades'ika and the author of Nyāyakulis'a. Veṅkaṭādhvarin was also the author of many works including Vidhitrayaparitrāṇa, Nyāyapadma, Lakṣmīsahasra, Vis'vaguṇādarsa, Uttaracampū, Ācāryacampū, Hastigiricampū. Rāghavapāṇḍavīya, Pradyumnānanda, Ācāryapañcās'at and some miscellaneous works. It is said that he was a protage of a Muhammadan King at Delhi for some time. He may be fixed in the middle of the 17th century A.D. as a contemporary of Nīlakaṇṭhadīkṣita, the famous author of S'ivalīlārṇava etc. A MS. of the work containing the very

beginning is available in the Madras Govt. Oriental MSS. Library (D. No. 4461).

The MS. contains a fragment of the 2nd pāda of the 9th Adhyāya.

Beginning :

(सू०)—पार्वणहोमयोस्त्वप्रवृत्तिः समुदायार्थसंयोगादभीज्या हि । . . . . सिध्यर्थं कण्वरथंतरादीनामवान्तरकार्यनिरूपणं प्रसक्त . . . . किमदृष्टरूपमवान्तरकार्यं किं वा संस्काररूपमिति विचार्यत इति संगतिमाह पार्थसारथिः । वयं तु पूर्वाधिकरणे रथंतरधर्माः . . . ति व्यवस्थोक्तेति व्यवस्थाप्रसङ्गात् पार्वणहोमयोर्व्यवस्थां प्रतिपादयितुमारादुपकारकत्वं निरस्य सामुदायिकत्वमेवेह साध्यत इति संगतिरिति ब्रूमः ।

End :

समिदादीनां विकृतिष्वपि सत्त्वादुभयार्थत्वेऽप्युत्तमप्रयाजस्येव प्रयाजान्तरेण . . . वश्यंभावादित्यास्तां विस्तरः ।

300 27. H. 17.

मीमांसामकरन्दः—वेंकटाध्वरिकृतः

Palm-leaf. 89 Foll. 18½ × 1½ inches. 9 lines in a page. Grantha script. Old. Fair. Good writing.

The leaves are numbered 71 to 90 (76 missing) and 1 to 70.

Begins in the 1st pāda of the 8th adhyāya and breaks off in the 60th sūtra in the 4th pāda of the 9th adhyāya.

Beginning :

सर्वस्य प्रकृतिः कापि समर्थपरिकर्मिता ।
जयत्यद्भुता यस्या विकृतिर्नैव विद्यते ॥

(सू०)—अथ विशेषलक्षणम् ।

सामान्यतोऽतिदेशो हि सप्तमे प्रतिपादितः ।
विशेषेणातिदेशोऽसावष्टमे स्पष्टमीर्यते ॥

विध्यन्ताधिकरणे ह्यश्रुतेतिकर्तव्यताकेषु सौर्यादियागेषु वैदिकेतिकर्तव्यता प्राप्नोतीति सामान्यतः प्रतिपादिते कस्य विध्यन्तं क्व प्रवर्तत इति तद्विशेषोऽत्र निरूप्यत इति संगतिः । यद्यपि विशेषातिदेश एवाहत्य चिन्तयितुं शक्यत इति ततः प्राक् सामान्यातिदेशविचारो नारम्भणीय इति चोद्यमुन्मिषति, तथापि प्रथमश्रुतेतिकर्तव्यताकेषु सौर्यादिषु श्रुतेः कुतश्चिदितिकर्तव्यताप्राप्तिरस्तीति निश्चिते तत्प्राप्तिः किं तेन किं वा वैदिकादिति जिज्ञासायां वैदिकत्वसामान्यात् वैदिकस्यैवोपस्थितेस्तदितिकर्तव्यतैव प्राप्नोतीति निर्धारिते कस्य धर्मः क्व प्रवर्तत इति जिज्ञासा ज्यायसीति जिज्ञासानुसारात् सामान्यातिदेशनिरूपणानन्तरमेव विशेषातिदेशचिन्ता युक्तेत्याहुः ।

Colophon at the end of the 1st pāda of the 8th adhyāya :

इति श्रीमद्वादिहंसाम्बुदाचार्यवंशावतंसवाजपेयसर्वपृष्ठाप्तोर्यामादियाज्यप्पयाचार्यतनूभवश्लेषयमकचक्रवर्तिश्रीरघुनाथाचार्यदीक्षितसूनोः प्रतिदिनानेकप्रबन्धनिर्मातुरात्रेयवेंकटाचार्यस्य कृतिषु मीमांसामकरन्देऽष्टमस्याध्यायस्य प्रथमः पादः ।

End :

नचैवमपि स्विष्टकृदादिशेषकार्यार्थं प्रतिनिधिविधानम् । शेषकार्याणां प्रति . . . . त्वेन तत्प्रयोगार्थं प्रतिनिधिविधानायोगात् । त्वाष्ट्रवाक्ये यागविधिः । तदनुवादेन पर्यग्नीकृतवाक्ये पर्याग्नीकरणान्ताङ्गरूप ।

301 64973.

मीमांसामकरन्दः—वेंकटाध्वरिकृतः

Paper. 224 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from the Original MS. described in the last number.

Incomplete.

302 1. A. 25.

विधित्रयपरित्राणम्—वेंकटाध्वरिकृतम्

Paper. 120 Foll. 8¼ × 6½ inches. 14 lines in a page. Grantha script. New. Good. Clear writing.

The Vidhitrayaparitrāṇa is a critical survey on the Vidhirasāyana of Appayadīkṣita. The criticisms made by Appayadīkṣita on earlier Mīmāṁsā works such as the S'āstradīpikā, Nyāyaratnamālā etc. have been herein refuted and the views of earlier authors maintained. S'aṁkarabhaṭṭa, the son of Nārāyaṇabhaṭṭa of Benares also has written a work called Vidhirasāyanadūṣaṇa criticising the Vidhirasāyaṇa of Appayadīkṣita. The author Veṅkaṭādhvarin belonged to the family of Praṇatārtihara *alias* Kiḍāmbi Āccān, a direct desciple of S'rī Rāmānuja and was the son of Raghunāthadīkṣita and grandson of S'rīnivāsadīkṣita *alias* Appayācārya of Ātreyagotra. His native place was the village Aras'āṇipālai near Kāñcipuram. He is traditionally said to have been patronized by certain Muslim Ruler in Delhi. His literary activity was coeval with that of Nīlakaṇthadīkṣita in the middle of the 17th century A.D. He was the author of many works including the Vis'vaguṇādars'a, Lakṣmīsahasra, Yādavarāghavīya, Uttaracampū, Histigiricampū, Ācāryapañcās'at, S'ravaṇānanda, Subhāṣitakaustubha, Pradyumnānanda, Nyāyapadma, Mīmāṁs'āmakaranda and Yatiprativandanakhaṇḍana.

Complete in 3 chapters.

Beginning :

श्रुत्या ग्राह्ये जन्म यस्मिन्विधीनां
सर्वे वर्णाः सिद्धिमन्तो यतन्ते ।
भक्त्या ध्येये तत्र नित्ये परस्मिन्
देवे वेदेऽप्यायतन्ते धियो मे ॥
भद्रं तनोतु परमं परमेष्ठियज्ञे
क्लृप्तोदयं वरदनाम किमप्यपूर्वम् ।
आत्मन्यवस्थितमिदं निजकीर्तनेन
दत्ते स्थिरं फलमथापि यदव्यपायम् ॥
विदधानमनन्यलभ्यमर्थं
नियमं चाभ्युदयाय निर्वहन्तम् ।
परिक्लृप्तनिवृत्तिधर्मबोधं
प्रभुमाद्यं परिचिन्तये विधिं च ॥
जैमिनिमुनिः स भगवान् जयति प्रज्ञानिधिर्जगत्पूज्यः ।
अकृतकसरस्वतीनां मङ्गलसूत्राणि यस्य सूत्राणि ॥
प्रख्यातः प्रणतार्तिहृद्गुरुरिति श्रीभाष्यकर्तुर्मुने-
र्यो माहानसिकस्तदुक्तिरसिकः श्रीमान्स यत्राभवत् ।
वंशे तत्र हि वादिहंसजलदाचार्यादिभिर्भूषिते
यज्वाभूद्रघुनाथदेशिकमणिः श्रीश्रीनिवासेष्टिनः ॥
तनूभवः कवेस्तस्य तनोत्यत्रिकुलोद्भवः ।
विधित्रयपरित्राणं वेंकटाचार्यदीक्षितः ॥
विधित्रितयलक्ष्मणां विधिरसायने दूषणं
न्यगादि तदुदाहृतिष्वपि निरूपिता दुष्टयः ।

परीक्षकमुदे रमापतिदयेद्धबुद्धेर्बलात्
प्र मुत्तरं भारतीम् ॥
सत्कारं विरचय्य वेंकटकविः श्रद्धानिबद्धाञ्जलिः
साधून्वो विबुधाः समीहितमहं सप्रश्रयं प्रार्थये ।
हर्षोदग्रमनुग्रहं मयि जडेऽप्याधाय मेधाविनो
युक्तीस्त्र विमृश्य पश्यत ततो निन्देत नन्देत वा ॥
विस्तरो विधिरसायनेरितो
नानुभाष्यत इहाखिलो मया ।
तत्र क्लृप्तमुपपादनं बुधै-
र्वीक्ष्य दूषणसमाधिरीक्ष्यताम् ॥
अत्र यद्यपि पद्यानामभिप्रायो न दुर्ग्रहः ।
तथापि बालबोधाय तन्वे तद्विवृतिं स्वयम् ॥

इह खलु निखिलनिगमनिचयहृदयविशदविलोकन-साधननयनयनसहस्रप्रणयनसमुज्जीवितवैदिकलोकस्य भगवतो जैमिनिमुनिसत्तमस्य सूत्राण्यधीयानाः श्रोत्रिय-धूर्वहा अपूर्वविधिनियमविधिपरिसंख्याविध्यभिधानान् त्रिविधान् विधीनधीयते—विधिर्वा स्यादपूर्वत्वात्, नियमार्था वा पुनः श्रुतिः । परिसंख्येत्येवमादिभिः

अमीषां त्रिप्रकाराणां विधीनामवबुद्धये ।
विस्पष्टं भट्टचरणा लक्षणान्याचचक्षिरे ॥
विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥

इति । अस्यायमभिप्रायः—व्रीहीन् प्रोक्षतीत्यपूर्वविधिः । त . . . भावे दार्शपूर्णमासिकेषु व्रीहिषु प्रोक्षणस्य कुतोऽप्यप्राप्तेः ।

End :

तत्रोच्यते । तत्र चान्यत्र च प्राप्त्युपपादनेन न प्राप्तेः फलत्वम्, किं तु निवृत्तेरेवेति ज्ञापनेन निवृत्तिध . . . विधित्वमिति तत एव लाभात् तद्वैयर्थ्योक्त्ययोगात् । तस्मात् निरूपितं परिसंख्या-विधिलक्षणं निरवद्यमित्यास्तां विस्तरः ।

Colophon :

इति श्रीमद्वादिहंसाम्बुदाचार्यवंशावतंसवाजपेयसर्व-पृष्ठासोर्यामादियाजिश्रीनिवासाचार्यनन्दनश्लेषयमक-चक्रवर्तिरघुनाथाचार्यदीक्षितसूनोरात्रेयवेंकटाचार्य-यज्वनः कृतिषु विधित्रयपरित्राणे परिसंख्याविधि-लक्षणाक्षेपप्रतिक्षेपस्तृतीयः । समाप्तश्चायं ग्रन्थः ।

303 10. I. 7.

अरुणाधिकरणभङ्गः—लक्ष्मणपण्डितकृतः

Paper. 16 Foll. $8\frac{1}{4} \times 6\frac{1}{8}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from the original MS. available in the Tanjore Palace Library (D. No. 6980).

Deals with the Aruṇādhikaraṇa of the Pūrvamīmāṁsā (3-1-12) refuting the view of the Bhāṭṭa school. The author Lakṣmaṇapaṇḍita was the son of Timmārya and pupil of S'rīnivāsopādhyāya. The work is a portion of the Tantravilāsa described in the next number.

Complete.

Beginning :

(सू०)—द्रव्यगुणयोरैकैकर्म्यान्नियमः स्यात् ।

ज्योतिष्टोमे श्रूयते—अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणातीति । तत्र संशयः—किमरुणिमा क्रय-भावनायां निविशते, किं वा प्राकरणिकसर्वद्रव्ये-ष्विति । तत्र तृतीयया आरुण्यस्य करणत्वावगमेना-मूर्तस्य करणत्वासंभवेन क्रियासंबन्धाभावात् प्रा-करणिकसर्वद्रव्येष्वेव निवेशः ।

End :

तस्मात् सिद्धान्तोऽपि न सुमनोमनोरम इति ।

इहारुणाधिकरणभङ्गं लक्ष्मणपण्डितः ।
प्राणैषीदेष विदुषां भूयात्संतोषपोषकः ॥

304 8. E. 26.

तन्त्रविलासः—लक्ष्मणपण्डितकृतः

Paper. 73 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

A critical study on some selected Adhikaraṇas of the Pūrvamīmāṁsā refuting the views of some of the previous authors on relevant subjects. The author Lakṣmaṇapaṇḍita was the son of Timmārya and Giryambā and younger brother of S'rīnivāsa. One S'rīnivāsopādhyāya of Mādhvasampradāya was our author's preceptor. He refers to one Ayyaṇārya with the title of Mīmāṁsāvallabha, who must be identical with the author of the Matatrayaikyaprakāśikā.

Deals with the following adhikaraṇas :

१. गुणकामाधिकरणम्, २. अरुणाधिकरणम्, ३. वषट्काराधिकरणम्, ४. प्रयाजशेषाधिकरणम्, ५. सोमाधिकरणम्, ६. अभ्युदयेष्ट्यधिकरणम्.

Contains the 6 Adhikaraṇas mentioned above.

Beginning :

मीमांसासरणौ वादकामानां वादिनां मुदे ।
ग्रन्थस्तन्त्रविलासाख्यो लक्ष्मणार्येण तन्यते ॥
केषुचिदधिकरणेषु प्रागुत्तरपक्षभङ्गकलनेन ।
क्रियते तन्त्रविलासः सदया विलोकयन्तु मतिमन्तः॥

(सू०)—फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगित्वात् । अग्निहोत्रं प्रकृत्य श्रूयते—दध्नेन्द्रियकामस्य जुहुयादिति । तत्र संशयः—किमग्निहोत्रात् कर्मान्तरं दधिविशिष्टमिन्द्रियकामाय विधीयते, उत तत्रैव गुणमात्रं फलाय विधीयत इति। तदर्थमिदं विचार्यते—किं कर्मणः फलम्, उत गुणादिति ।

End and colophon of the 1st Adhikaraṇa:

गुणकामाधिकरणपक्षद्वितयभञ्जनम् ।
प्राणैषील्लक्ष्मणसुधीर्विदांकुर्वन्तु सूरयः ॥
श्रीमन्मध्वार्यशास्त्रामृतसरिदधिभूपारगश्रीनिवासोपाध्यायाचार्यशिष्यः सकलगुणगणोदारतिम्मार्यसूनुः ।
गिर्यम्बागर्भजातः सुजनसुरतरुश्रीनिवासानुजन्मा
तामेतां युक्त्युपेतामयमकृत कृतिं लक्ष्मणःपण्डितार्यः॥
इति श्रीलक्ष्मणपण्डितार्यकृते तन्त्रविलासे गुणकामाधिकरणभङ्गः ।

End :

किंच विभजेदिति कोऽर्थः । न तावन्मल्लुयोरिव द्रव्यदेवतयोर्विभागः संभवति । अथ ताभ्यो न दद्यादित्यर्थो विवक्ष्येत, ततः शास्त्रप्राप्तनिषेधे विकल्पापत्तिरित्यलमतिविस्तरेण । विशिष्टभावनान्तरविधिपक्षस्तु दध्नेन्द्रियकामाधिकरणेऽस्माभिर्निरस्त इति नेह प्रपञ्च्यत इति दिक् ।

अभ्युदयेष्ट्यधिकरणे सिद्धान्तः स्थापितः पुरा न्यायैः ।
भूयः स एव बहुलो विशकलितो लक्ष्मणार्यधीरेण ॥

Colophon :

तन्त्रविलासः समाप्तः । अधिकरणषट्कभङ्गः ।

The scribe of the original MS. from which this transcript was made, adds the following verse :

कौशिकान्वयसंभूतकृष्णेनाशु शुभात्मना ।
भङ्गोऽधिकरणषट्कस्यालेखि वादार्थमात्मनः ॥

305 10. I. 7.

वषट्काराधिकरणभङ्गः—लक्ष्मणपण्डितकृतः

Paper. 16 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed form a MS. of the Tanjore Palace Library (D. No. 6980.)

A treatise dealing with the Vaṣaṭkārādhikaraṇa of the Pūrvamīmāṁsā (3-5-31). The work is a portion of the Tantravilāsa described in the last number.

The work has been described in the Descripitive Catalogue (No. 6995) of the Tanjore Palace Library with the title **मीमांसाप्रकरणम्**.

Incomplete.

Beginning:

वषट्काराधिकरणे सिद्धान्तस्थापनक्रमम् ।
अद्य व्याकुलयिष्यामि विदाङ्कुर्वन्तु पण्डिताः ॥

(सू०)—वषट्काराच्च भक्षयेत् ।

ज्योतिष्टोमे श्रूयते । वषट्कर्तुः प्रथमभक्ष इति । तत्र विचार्यते । किं समाख्यादिप्राप्तभक्षानुवादेन प्राथम्यमात्रं विधीयते, किं वा भक्षान्तरमपीति । तत्र भक्षान्तरत्वे प्रमाणाभावात् प्राथम्यमात्रं विधीयते, न तु प्राथम्यविशिष्टभक्षविधिः गौरवात् । न च वषट्कर्तुर्भक्षप्राप्त्यभावात् न तत्र प्राथम्यविधिः संभवतीति वाच्यम्, वषट्कर्तृत्वेन भक्षप्राप्त्यभावेऽपि वस्तुतो वषट्कर्तुरेव होमादेः समाख्यया चमसेषु भक्षप्राप्तिसद्भावात् ।

End:

श्रौतस्य विधेस्तत्र व्यापाराभावात् न विधेयानेकत्वनिमित्तो वाक्यभेदः । प्रकृते तु विशेष्यभूतभावनाया विद्वद्वाक्यादेव प्राप्तेर्विधेस्तद्विधितात्पर्यकत्वायोगेन विशेषण एव . . . तत्र च विशेषणानेकत्वे तेषां परस्परविशेषणविशेष्यभावे नियामकाभा . . .

306 22. O. 24.

अतिदेशलक्षणविचारः—अप्पयदीक्षितकृतः

Palm-leaf. 32 Foll. $15\frac{1}{4} \times 1\frac{1}{4}$ inches. 10 lines in a page. Grantha script. Old. Fair. Good writing.

This is a tract discussing the soundness of the characteristics of the term Atidesa as given in the works such as the Śāstradīpikā and Bhāṭṭadīpikā. The author, who calls himself as Appayadīkṣita, salutes the well-known versatile author Appayadīkṣita I in the verse अप्पय्यदीक्षितेन्द्रान् etc. quoted below. The verse is identical with the Maṅgalaśloka of the work Tantrasiddhāntadīpikā (described in No. 161 of this volume) by Appayadīkṣita III, son of Appayayajvan *alias* Appayadīkṣita II, and grandson of Āccāndīkṣita who was the brother of the famous Appayadīkṣita I. Therefore our author Appayadīkṣita must be identical with Appayadīkṣita III, the author of the Tantrasiddhāntadīpikā. This author is also known to have written the following works: Durūhaśikṣā, Śabdasaṁskāra, Prākṛtamaṇidīpa and Vasumatīcitrasenīyanāṭaka. His Tantrasiddhāntadīpikā speaks of him as a protege of Cinna Bomma, a poligar under Chokkanātha Nāyaka of Madura (1659 to 82 A.D.). It is also said that our author was born as the second son of Nārāyaṇadīkṣita, the first son being the famous

Nīlakaṇṭhadīkṣita (1637 A.D.) and subsequently adopted as the son by Appayadīkṣita II, the younger brother of Nārāyaṇadīkṣita. In his Tantrasiddhāntadīpikā Appayadīkṣita III mentions Alaṁkāratilaka written by Appayadīkṣita II, the son of Āceāndīkṣita. His father Appayadīkṣita II, is also known to have written a drama called Rukmiṇīpariṇaya. In this connection it may be pointed out that the doubt held by Mr. V. A. Ramaswami Sastri as to whether the two authors of the Durūhasikṣā and the Mīmāṁsāviṣayasaṁgratadīpikā are different or identical is baseless as the latter work is only a portion of the Sivārkamaṇidīpika of Appayadīkṣita I (See the No. 3 in the Appendix I of the Tattvabindu, edited by V. A. Ramaswami Sastri, Annamalai University Sanskrit Series No. 3—1936 and R. No. 1321 of the Madras Govt. Oriental MSS. Library). Our author may be fixed in the period about 1650 A.D.

Complete.

Beginning :

अतिदेशो नाम यः पदार्थो यादृशोपकारद्वारा यदङ्गत्वेनावधारितस्तस्य पदार्थस्य तत्संबन्धित्वेन रूपेण तादृशोपकारद्वारैवान्याङ्गताबोधकं प्रमाणम्। भवति हि प्रकृतिवद्विकृतिः कर्तव्येत्यादि वाक्यम्। प्रयाजादिपदार्थानां यादृशोपकारद्वाराग्नेयाद्यङ्गत्वेनावधारितं तादृशोपकारद्वारा सौर्याद्यङ्गत्वबोधकम्।

Fol. 8*a* reads thus :

इति खण्डदेवकृतातिदेशलक्षणदूषणोद्धारः।
अप्पयदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे।
यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधी॥

यः पदार्थो यादृशोपकारद्वारा यदङ्गत्वेनावधारितस्तस्य पदार्थस्य तत्संबन्धित्वेन रूपेण तादृशोपकारद्वारान्याङ्गताबोधकं प्रमाणमतिदेश इत्यतिदेशलक्षणम्। पदकृत्यानि च भाट्टदीपिकायामुपपादितानि।

End :

यत्तूक्तम्—अस्मन्निर्वचनव्यतिरेकेण निर्वचनान्तरं कर्तुमशक्यमिति, तत्तथैव मादृशान् मन्दधियः प्रति। युष्मादृशैस्तु शतं लक्षणानि सुकराण्येव। सर्वेषामप्यशक्यत्वे चातिदेशस्यैवादेशकत्वापत्त्या तन्निर्वचनार्थप्रवृत्तेर्मुधात्वप्रसङ्गादिति दिक्।

Colophon :

इत्यप्पयदीक्षितस्य कृतावतिदेशलक्षणस्य पुनराक्षेपः।

307 21. M. 37.

दुरूहशिक्षा—अप्पयदीक्षितकृता

Palm-leaf. 115 Foll. $16\frac{1}{4} \times 1\frac{1}{8}$ inches. 5 lines in a page. Telugu script. Old. Injured. Good writing.

The Foll. are numbered 18 to 149; but the Foll. bearing the numbers 31 to 45 and 73 are missing in the middle.

Wants the beginning and end.

The Durūhasikṣā is an unfavourable criticism on the Vidhirasāyanadūṣaṇa of Saṁkarabhaṭṭa which itself is a criticism against the Vidhirasāyaṇa of Appayadīkṣita I. (For the Vidhirasāyaṇa see No. 281 of this volume.) Thus the Durūhasikṣā upholds the views of Appayadīkṣita I as explained in his Vidhirasāyana. The author of the work was Appaya-

dīkṣita III patronized by Cinna Bommabhūpāla who was the son of Cinnamāmbā and Nalla Bomma and the minister of Cokkanātha Nāyaka of Madura (1659—82 A.D.) The author in his other work Tantrasiddhāntadīpikā mentions himself as the son of Appayadīkṣita II and the grandson of Accāndīkṣita *alias* Ayyādīkṣita, the younger brother of the famous Appayadīkṣita I. Nīlakaṇṭhadīkṣita the author of the Nīlakaṇṭhavijayacampū, S'ivalīlārṇava etc. mentions himself as one of the five sons of Nārāyaṇadīkṣita and grandson of Āccāndīkṣita the brother of the famous Appayadīkṣita I. It is well-known that the famous Appayadīkṣita I was the son of Raṅgarājādhvarin and grandson of Ācāryadīkṣita. Thus it is clear that both Nīlakaṇṭhadīkṣita and our author Appayadīkṣita III belonged to the same family and their genealogy is this:



The New Catalogus Catalogorum prepared by Dr. V. Raghavan and published by the University of Madras (Vol. I, p. 200) states that our author Appayadīkṣita III was born as the son of Nārāyaṇadīkṣita and younger brother of Nīlakaṇṭhadīkṣita, but subsequently was adopted as the son by Appayadīkṣita II.

As regards the date of the author, we have the following clear evidences. Nīlakaṇṭhadīkṣita, our author's brother, wrote his Nīlakaṇṭhavijayacampū in 1637 A.D. The king Cokkanātha Nāyaka under whom Cinna Bomma Nāyaka was the minister, ruled over Madura and Tiruchirappalli between 1659 and 1682. A.D. (Vide page 154 of the History of Nāyaks of Madura, by Mr. R. Satyanarayaṇa Ayyar, M.A., L.T., Madras, 1924). Therefore our author must have belonged to the second half of the 17th century A.D. The author is known to have written the following other works:

1. Tantrasiddhāntadīpikā (No. 161 of this volume).
2. Atides'alakṣaṇavicāra (No. 306 of this volume).
3. S'abdàsaṁskāra (No. 611 of the Des. Cat. of Sanskrit MSS. in the Adyar Library. Vol. VI—1947.
4. Vasumatīcitrasenīya. (Bhandarkar Oriental Research Institute, Poona.)
5. Prākṛtamaṇidīpa (R. No. 2346. Govt. Oriental MSS. Library, Madras).

In the last work our author mentions one Saccidānandas'āstrin as his preceptor. R. No. 4282 of the Madras Govt. Oriental MSS. Library Catalogue ascribes the last work to Cinna Bommabhūpāla, our author's patron. No. 10783 of the Descriptive Catalogue of Sanskrit MSS. in the Tanjore Palace Library ascribes the Saṁgītarāghava to Cinna Bommabhūpāla.

Our author's patron Cinna Bomma should not be confounded with the namesake ruler of Vellore and patron of the famous Appayadīkṣita 1 as mentioned in the verses 12 and 13 of the Sivārkamaṇidīpikā.

As the Adyar Library MS. contains only a fragment of the work, I quote below the very beginning of the work from the Trivandrum MS. No. 429 of the Descriptive Catalogue of Sanskrit MSS. in the Curator's Office Library, Vol. III, Page 943.

अखण्डसच्चिदानन्दं खण्डचन्द्रशिखण्डकम् ।
उमया मिश्रितं . . . . . ॥

* * * *

तस्मादभूदखिलभूपतिमौलिमाला-
माणिक्यरश्मिमसृणीकृतहंसकश्रीः ।
विश्वत्रयं परिपुनन् यशसां वितानै-
र्धीरावनीपतिरपारकृपाम्बुराशिः ॥
तस्यात्मजो जयति वीरगणाग्रगण्यः
श्रीचोक्कनाथधरणीपतिसार्वभौमः ।
प्रत्यर्थिपार्थिववधूमुखमारुतोष्म-
विल्यापितग्लपनशक्तिमहाप्रतापः ॥
युद्धक्षोणिषु चोक्कनाथनृपतेर्यावत्समावर्जितं
क्रोधावेशमदोष्णदोर्विलसितज्याघोषघोरं धनुः ।
तावत्कान्तसमागमोत्कबलहच्छुद्धान्तसीमन्तिनी-
पाणिप्रेङ्खदभङ्गकङ्कणझणत्कारैर्नभः पूर्यते ॥
बिभ्रद्भुजौ मुद्दलकाद्रिभूप-
वीराच्युतक्ष्मापतिसार्वभौमौ ।
औत्पत्तिकाभ्यां सह यो भुजाभ्यां
चतुर्भुजत्वं . . . . . ॥
विद्वत्प्रभोः कृपायोगाच्छोक्कनाथमहीभुजः ।
दुरूहशिक्षां मन्दोऽपि निःशङ्कं कर्तुमारभे ॥
अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे ।
यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधी ॥
नाप्रबन्द्रास्ति नायष्टा येषां नाब्रह्मवित्कुले ।
आमूलोन्मूलितद्वैतान् कुलवृद्धानमामि तान् ॥
यद्रसायनसमीरितं विधौ
क्षुद्रधीः परिजहार दूषणम् ।
तन्निराकरणकौतुकी जनः
संनिधापयतु मामिकां कृतिम् ॥
यद्यपि न विधिरसायनमास्कन्दति दूषणं गुरूक्तमपि ।
तदपि तदाधुनिकानां मन्दविषन्यायतो निराकुर्मः ॥

A complete MS. of the work is available in the Madras Govt. Oriental MSS. Library (R. No. 3934*a*) from which it is understood that the work contains the following 7 chapters:

१. उदाहरणोद्धारभङ्गः ।
२. त्रैदोष्यव्यवस्थाभङ्गः ।
३. अग्निविध्याक्षेपपरिहारभङ्गः ।
४. अपूर्वविधिखण्डनम् ।
५. अपूर्वविधिलक्षणसमर्थनभङ्गः ।
६. नियमविधिसमर्थनभङ्गः ।
७. परिसंख्याविधिसमर्थनभङ्गः ।

Wants beginning and end.

Beginning of the Adyar Library MS:

न चैवं परिसंख्यापेक्षया प्रोक्षणविधेरैन्द्राग्नप्रोक्षणविषयतया अपूर्वविधित्वमेवास्त्विति वाच्यम् । शाखान्तरमन्त्रप्राप्तार्थत्वेन तत्र विध्यसंभवस्योक्तत्वात् ततोऽपि लाघवायाध्वर्युकर्तृनियमविधिरेवाङ्गीकृतत्वाच्च ।

Colophon as found on Fol. bearing the No. 130*b*:

इति श्रीमन्नल्लबोम्मकुलार्णवपूर्णचन्द्रचिन्नबोम्मागर्भशुक्तिमुक्ताफलब्रह्मण्यविरुदाङ्कचोक्कनाथभूपालप्रियसचिवचिन्नबोम्मभूपहृदयकुहरविहरमाणसम्बशिवप्रेरितेनाप्पयदीक्षितेन विरचितायां दुरूहशिक्षायामपूर्वविधिसमर्थनभङ्गः ।

End :

अथ प्रकृतविधिफलीभवन्निवृत्तिबोधकत्वाभिमतोपदेशत्वावच्छिन्नोपदेशाप्रवृत्तौ तर्क्यमाणायां नि . . . फलत्वेनासंभवन्निवृत्तिकत्वं विवक्षितं चेत् पञ्च पञ्चनखा इत्यादावव्याप्तिः । तत्र तद्विधेरेव तादृशतया तदप्रवृत्तौ विरागत एव कदाचिद्वानरादिभक्षणनिवृत्तिसंभवेनासंभवन्निवृत्तिकत्वाभावात् ।

308 33. G. 19.

दुरूहशिक्षा—अप्पयदीक्षितकृतः

Palm-leaf. 37 Foll. 15½ × 1½ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides. The leaves bear the Nos. 3 to 70; the Foll. Nos. 5 to 33, 42 and 43 are missing.

Wants the beginning and end.

309 22. E. 14.

मीमांसान्यायप्रकाशः—आपदेवकृतः

Palm-leaf. 30 Foll. 16¼ × 1⅜ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

This is a very popular work on Pūrvamīmāṁsā elucidating the contents of the 12 adhyāyas of the Mīmāṁsā sūtras. As the style of the work is very simple and clear, the students of the Mīmāṁsāsāstra generally begin to study this work at first as a Prakaraṇa grantha. The work has a commentary written by Anantadeva, the son of Āpadeva the author of the text. In his Smṛtikaustubha, Anantadeva, the son of Āpadeva gives the following pedigree: Ekanātha was one of his ancestors. His son was Āpadeva I. His son was Anantadeva I. His son was Āpadeva II (the author of the present work). His son was Anantadeva II the author of tho Smṛtikaustubha and the commentary on the present work. The Mīmāṁsānyāyaprakāsa is generally called as Āpadevīyam. The author may be roughly fixed to the end of the 16th century and the beginning of the 17th century A.D. Āpadeva salutes his father Anantadeva in the beginning of the work.

Complete.

Beginning :

यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयम् ।
प्राप्यते तमहं वन्दे गोविन्दं भक्तवत्सलम् ॥
अनन्तगुणसंपन्नमनन्तभजनप्रियम् ।
अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणम् ॥

इह खलु परमकारुणिकेन भगवता जैमिनिऋषिणा अथातो धर्मजिज्ञासेत्यादिद्वादशस्वध्यायेषु धर्मो विचारितः । तत्र वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः । यथा यागादिः । स हि यजेत स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य विधीयते ।

End :

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥

इति स्मृतेः । अस्याश्चाष्टकादिस्मृतिवत्प्रामाण्यादि-त्यन्यत्र विस्तरः ।

काहं मन्दमतिः केयं प्रक्रिया भट्टसंमता ।
तस्माद्भक्तेर्विलासोऽयं गोविन्दगुरुपादयोः ॥
ग्रन्थरूपो मदीयोयो व्यापारस्तु सुशोभनः ।
अनेन प्रीयतां देवो गोविन्दो भक्तवत्सलः ॥

Colophon :

इति श्रीअनन्तदेवसूनुना आपदेवेन कृतं मीमांसान्यायप्रकाशसंज्ञकं मीमांसाप्रकरणं संपूर्णम् ॥

310 19. N. 17.

मीमांसान्यायप्रकाशः—आपदेवकृतः

Palm-leaf. 31 Foll. $13\frac{1}{2} \times 1\frac{3}{4}$ inches. 13 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

311 22. E. 15.

मीमांसान्यायप्रकाशः—आपदेवकृतः

Palm-leaf. 63 Foll. $13\frac{3}{4} \times 1$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves bear the serial Nos. 1 to 68. Foll. 63 to 67 missing.

Incomplete.

The fly-leaf reads a few miscellaneous stanzas in praise of Viṣṇu.

312 24. E. 47.

मीमांसान्यायप्रकाशः—आपदेवकृतः

Palm-leaf. 25 Foll. $15 \times 1\frac{3}{8}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

The first five leaves are much injured.

Incomplete.

313 25. B. 22.

मीमांसान्यायप्रकाशः—आपदेवकृतः

Palm-leaf. 39 Foll. $11\frac{1}{8} \times 1\frac{3}{4}$ inches. 13 lines in a page. Grantha script. Old. Injured. Clear writing.

Complete.

Reads the following stanza at the end after the colophon :

श्रीगोपालपदाम्भोजनिष्यन्दिमधुतुन्दिलम् ।
मोदतां मामकं स्वान्तमन्तस्त्यक्तान्यचङ्क्रमम् ॥

314 26. M. 17.

मीमांसान्यायप्रकाशः—आपदेवकृतः

Palm-leaf. 33 Foll. $18\frac{1}{2} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Clear writing.

The Foll. bear the serial Nos. 46 to 78. Wooden boards are added to both sides.

Incomplete.

315 29. F. 25.

मीमांसान्यायप्रकाशः—आपदेवकृतः

Palm-leaf. 61 Foll. $15 \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Bamboo boards are added to both sides.

Complete; but wants the introductory verses in the beginning.

A fly-leaf at the beginning reads the Vedic passage प्रजापतिर्वरुणायाश्वमनयत् etc.

relating to the Upakramādhikaraṇa. Six blank leaves are added at the end.

316 29. L. 23.

मीमांसान्यायप्रकाशः—आपदेवकृतः

Palm-leaf. 41 Foll. 17 × 1½ inches. 8 lines in a page. Telugu script. Old. Fair. Good writing.

Complete.

The scribe adds that the MS. was copied by Ammaṇṇa on Wednesday, the 6th of Māgha month in the year Āṅgirasa and it was presented to Vādhūla Narasiṁhasāstrulu.

The following line is added after the last colophon:

नवनवत्यधिकसप्तदशशतीमीमांसान्तर्गत.

Three extra leaves added at the end contain certain notes on the work.

317 29. N. 23.

मीमांसान्यायप्रकाशः—आपदेवकृतः

Palm-leaf. 18 Foll. 17 × 1½ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wants the beginning.

Reads the following stanza at the end.

निर्मृष्टं कुचसीम्नि पत्रमखिलं प्रेम्णा हठालिङ्गना-
द्रोषो मास्तु पुनर्लिखाम्यहमिति स्मेरे रघूणां वरे ।
रोषेणारुणितत्रपातरलितः प्रेम्णा च विस्तारितो
दत्तो मैथिलकन्यया दिशतु नः क्षेमं कटाक्षाङ्कुरः॥

318 34. K. 7.

मीमांसान्यायप्रकाशः—आपदेवकृतः

Palm-leaf. 59 Foll. 17¼ × 1¼ inches. 6 lines in a page. Grantha script. Old. Much injured. Good writing.

Wants the beginning; otherwise complete.

319 41. A. 77.

मीमांसान्यायप्रकाशः—आपदेवकृतः

Paper. 50 Foll. 12 × 4 inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Complete.

The name of the copyist: Visvanātha.

320 40. B. 56.

फलसांकर्यखण्डनम्—अनन्तदेवकृतम्

Paper. 11 Foll. 9½ × 3½ inches. 12 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Fol. 2 is missing.

This is a criticism on the Characteristics on Vidhis as explained in the Vidhirasāyana of Appayadīkṣita and other Mīmāṁsa works. The author Anantadeva belongs to the Deva family of Benares.

Complete with gap in the middle caused by the loss of Fol. 2.

Beginning:

असंकीर्णे विधौ कार्यमसंकीर्णं प्रकुर्वते ।
स्वापराधोत्थसांकर्यं योजयन्ति कथं बुधाः ॥

यत्तावदुपांशु पौर्णमास्यां यजन्नित्यत्रापूर्वविधिपरिसंख्याविधिलक्षणसांकर्यमुक्तं कैश्चित्; तदयुक्तम् । तन्त्ररत्ने षष्ठेऽध्याये मिश्रोदाहृतेन बह्वृचब्राह्मणगतवचनेन अमावास्यायां स्पष्टामुपांशुयाजप्राप्तिं कुर्वता

अस्मिन् वचने अपूर्वविधित्वेन चरितार्थे परिसंख्यापरत्वकल्पनाप्रतिबन्धात् तद्वचनाभावे यद्यप्यमावास्यानिवृत्तिः सिध्येत् तथापि विधेयगामिप्राप्तिफलेन निराकाङ्क्ष विधिं प्रति नैव फलं स्यात्, विधेयान्यगमित्वात्।

End :

यत्तु नैमित्तिकप्रयोगस्यापि विकृतित्वात् न तत्कृतविशेषेण प्रकृतौ प्रवृत्तिविशेषकरत्वमिति केनाप्युक्तं, तत्प्रयोगयोः प्रकृतिविकृतिभावस्य न्यायविरुद्धत्वादाकरविरुद्धत्वात्समाधेयग्रन्थेऽपि उपांशु पौर्णमास्यामित्यस्य प्रधानविस्मरणप्रायश्चित्तेन प्रवृत्तिविशेषकरत्वोपन्यासादुक्थ्यादिप्रयोगगतज्योतिष्टोमस्य प्रकृतित्वसमर्थनाच्चोपेक्ष्यमेवेत्यलं बहुना।

त्वरयेत्थं द्विजप्रीत्यै कृतं सांकर्यखण्डनम्।
प्रीतस्तत्प्रीतितः कुर्याच्छ्रीशस्तद्वाट्टमण्डनम्॥

Colophon :

इति श्रीअनन्तदेवकृतं फलसांकर्यखण्डनं समाप्तम्।

The scribe adds :

सिद्धान्तशेखरे—

लक्षार्धे त्रिकरं कुण्डं लक्षहोमे चतुःकरम्।
कुण्डं पञ्चकरं प्रोक्तं दशलक्षाहुतौ क्रमात्॥
षड्ढस्तं लक्षविंशत्या कोट्यर्धे सप्तलक्षकमिति।

321 64974.

फलसांकर्यखण्डनम्—अनन्तदेवकृतम्

Paper. 25 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from the original MS. described in the last number.

Complete with a small gap in the middle.

322 9. C. 100.

अग्न्याधेयादिविचारः

Paper. 9 Foll. $8\frac{1}{4} \times 4$ inches. 12 lines in a page. Telugu script. Old. Fair. Illegible writing.

The leaves are bound in disorder.

Deals with some miscellaneous topics connected with Ādhana etc. in sacrificial rites. The topics dealt with are such as whether the daily homa should be performed on the Ekādasī day also and whether the word Pasu should be taken to mean the Piṣṭapasu *i.e.* images of animals made of rice-flour

Incomplete.

Beginning :

वसन्ते ब्राह्मणोऽग्नीनादधीत। ग्रीष्मे राजन्यः। शरदि वैश्यः। वर्षासु रथकारः। अत्र ब्राह्मणानां वसन्तकाले पर्वणि देवनक्षत्रे आधानम्। तत्र सर्वेषु संकल्प इत्थम्—अग्नीनाधास्ये सर्वक्रत्वर्थमिति, आधाननिष्पन्नाग्नेः सर्वेषां क्रतूनां ज्योतिष्टोमादीनां कारणत्वात्। तत्रायं विचारः—किं लौकिकाग्नेः सर्वक्रतुकारणत्वम्, उत वैदिकाग्नेः।

End :

अन्वेनं माता मन्यताम्। अनु पिता। अनु भ्राता सगर्भ्यः। अनु सखा सयूथ्यः। उदीचीनाँ अस्य पदो निधत्तात्। सूर्यं चक्षुर्गमयतात्। वातं प्राणमन्ववसृजतात्। दिशः श्रोत्रम्। अन्तरिक्षमसुम्। पृथिवीꣳ शरीरम्। एकधास्य त्वचमाच्छ्यतात्।

323 9. C. 100.

अग्न्याधेयादिविचारः

Paper. 5 Foll. (10—14). $8\frac{1}{4} \times 4$ inches.

12 lines in a page. Telugu script. Old. Fair. Illegible writing.

This is another copy of the work described in the last number but with different end.

Incomplete.

Beginning is the same as found in the last number.

End :

दीक्षावस्त्रग्रहणं मन्त्रतः पत्न्या अपि । तदुभयं खलु बन्धनं मन्त्रतः ।

324 42. B. 112.

अधिकरणकौमुदी—रामकृष्णकृता

Paper. 3 Foll. 16 × 3 inches. 7 lines in a page. Bengāli script. Old. Fair. Good writing.

This is a short tract dealing with various Adhikaraṇas of the Pūrvamīmāṁsā, by Rāmakṛṣṇa who seems to be different from the author of the Yuktisnehaprapūraṇī. The work is available in print. (See Pūrvamīmāṁsādhikaraṇakaumudī, Chowkhamba Sanskrit Series No. 229—year 1916). The work has been mentioned in the Catalogues of the Adyar Library with the title Adhikaraṇanirūpaṇa.

Incomplete.

Beginning :

नन्दसूनुं नमस्कृत्य सर्वलोकेश्वरेश्वरम् ।
निरूप्यतेऽधिकरणं रामकृष्णेन विश्रुतम् ॥

अधिकृत्य क्रियतेऽर्थविचारो यस्मिंस्तदधिकरणं मीमांसासिद्धान्तः । तस्याङ्गानि पञ्च । यथाह भट्टः—

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ॥

End :

तथाच ज्ञानं विना इच्छाया असंभवात् स्वर्गस्योपस्थितिरस्त्येवेति फलं स्वर्ग एव । ननु विश्वजयिनो नित्य एवास्तु ।

325 10. I. 13.

अधिकरणमाला—रामचन्द्ररायकृता

Paper. 5 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from a MS. available in the Tanjore Palace Library. (Burnell No. 2109. Descriptive Catalogue No. 6973.)

This is a treatise elucidating the principles taught in some selected adikaraṇas of the Pūrvamīmāṁsāsūtrās, by Rāmacandrarāya son of Veṅkaṭeśa of Karaṇiṇdi famiy of Kolhapur. Incidentally he criticises the views of some previous authors on the subject.

Contains the Saṁkhyāmuṣṭyadhikaraṇa only (10-2-65).

Beginning :

(सू०)—मुष्टिलोपात्तु । वाजपेये श्रूयते—बार्हस्पत्यो नैवारः सप्तदश शरावः क्षीरे चरुर्भवतीति । दर्शपूर्णमासयोश्चतुरो मुष्टीन्निर्वपतीति चतुर्मुष्टिपरिमितहविर्निर्वापो विहितः । तस्मिंश्चेहातिदेशतः प्राप्यमाणे चतुर्मुष्टिपरिमितैर्नीवारैः सप्तदशशरावश्चरुः संपादयितुं न शक्यत इति बाधेऽवश्यंभाविनि किं शरावद्रव्येण मुष्टिद्रव्यं सप्तदशसंख्यया चतुःसंख्येत्युभयं बाध्यते ।

End :

अववातादेर्दृष्टार्थत्वेन विधानात् दृष्टस्य चावृत्तिं विना असिद्धेः यावत्प्रयोजननिष्पत्ति अभ्यसनीयमुद्यमननिपतनमिति क्रियाणामर्थशेषत्वात्प्रत्येकं सादरं परिशीलनीयमिति दिक्। अधिकमस्माभिरिन्द्रपीताधिकरणपरिष्कारे प्रपञ्चितमिति नात्र तत्प्रस्तावः ।

Colophon :

इति श्रीमत्कोल्हापुरकरणिंडयुपाख्यवैदिकविद्याप्रतिष्ठापनधुरंधरश्रीमद्वेंकटेशसूरिसूनुना रामचन्द्रायेणोन्नीतायामधिकरणमालायां संख्यामुष्टयधिकरणाक्षेपसंक्षेपः ।

326 40. A. 88.

अधिकरणादर्शः— बाबादेवकृता

Paper. 142 Foll. 11 × 5 inches. 13 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

The MS. contains two parts. The first part consists of 30 Foll. and the second 112.

This is a treatise on Pūrvamīmāṁsā dealing with the subjects relating to various Adhikaraṇas. The author Bābādeva was the son of Bāladeva and grandson of Anantadeva of Deva family. This Anantadeva may be identified with the father of Āpadeva, the famous author of the Mīmāṁsānyāyaprakāśa. Bābādeva in his other work called Arpaṇamīmāṁsā (No. 330) quotes two verses from his grandfather Anantadeva. These verse are seen in the Manorañjananāṭaka (published in the Sarasvatī Bhavan Texts No. 76.) which was written by Anantadeva I who also was the son of Āpadeva (different from the author of Nyāyaprakāsa). Thus the genealogy of Bābādeva is known thus : Āpadeva I—(son) Anantadeva I—(sons) Āpadeva II and Bāladeva —(sons) Āpadeva II's son was Anantadeva II, Bāladeva's son was Bābādeva. As Bābādeva mentions Khaṇḍadeva's Bhāṭṭadīpika, he may be fixed in 1650 A.D. approximately. (See for further details about the author, the MSS. Notes by Pandit V. Krishnamacharya, published in the Adyar Library Bulletin Vol. XIV, part 1, 1950.)

Contains 2 Paricchedas.

Beginning :

स पातु भक्तवत्सलो निरन्तरं जनाश्रयः ।
स्वकीयचित्तरञ्जको गुणेश्वरो गणेश्वरः ॥
श्रीनन्दनन्दन भवच्चरणारविन्दं
वन्दे वनस्थलविहारि मनोऽपहारि ।
चाञ्चल्यतो बहुतरश्रममेदुराया
विश्रान्तिमन्दिरमिदं ध्रुवमिन्दिरायाः ॥
पितामहचरणानामयम् ।
स कोऽपि गोपिकामनोऽनुरञ्जनो निरञ्जनः ।
करोतु नन्दनन्दनो मुदा मुदास्पदं हरिः ॥
आरभेऽधिकरणैकगुम्भनं
छेत्तुमेषु विततैकविस्तृतिम् ।
कौतुकाय विदुषां च सांप्रतं
बालदेवतनयोऽल्पयत्नतः ॥
पाठार्थक्रमयोः परोऽत्र बलवानेवं विलोच्याधुना
भट्टाचार्यमुखान्प्रणम्य विनयैस्त्यक्त्वेह सौत्रक्रमम् ।
आधानाहुतियज्ञगाधिकरणादर्शं विशेषार्थदं
बाबादेवसुधीस्तनोति कुरुतान्निर्विघ्नमेनं हरिः ॥

परोक्तकथनं क्वचिल्लिखितलेखनं कुत्रचि-
त्स्वबद्धपरिभाषणं क्वचन दुष्टसंतर्जनम् ।
अबुद्धमतखण्डनं गुणिनि दोषसंजल्पनं
तिरोदधत साधवः परहितैकसद्धेतवः ॥

यजुर्वेदे श्रूयते—वसन्ते ब्राह्मणोऽग्नीनादधीतेति । अत्र संदिह्यते—यथाकथंचित्प्राप्ताधानभावनाया ब्राह्मणकर्तृकत्वे निमित्ते वसन्तकालोऽङ्गत्वेन नियम्यते, उत कर्तृकालविशिष्टाधानभावना विधीयत इति । तत्र

ब्राह्मणश्चेदादधीत वसन्त इति तर्ह्ययम् ।
नैमित्तिकविधिर्ज्यायान् दोषः क्वापि न विद्यते ॥

End of the first Paricceda :

एषाधिकरणादर्शे यथामति कृता मया ।
व्याख्याधानाग्निविषया कलनीया मनीषिभिः ॥
अग्निसाध्यानग्निहोत्रप्रयोगान् विकृतिं तथा ।
अतः परं प्रवक्ष्यामि काम्यान्दध्यादिकान् गुणान् ॥

Colophon :

इति श्रीमत्पूर्वोत्तरमीमांसापारंगतबालदेवसुतबाबादेवनिबद्धाधिकरणादर्शे आधानपरिच्छेदः प्रथमः ।

Date of copying—संवत् 1795 लिखितम् ।

Beginning of the 2nd Paricceda :

स कोऽपि गोपिकामनोऽनुरञ्जनो निरञ्जनः ।
करोतु नन्दनन्दनो मुदा मुदास्पदं हरिः ॥

स एष यज्ञः पञ्चविधः—अग्निहोत्रं, दर्शपूर्णमासौ, चातुर्मास्यानि, पशुः, सोमश्चेति । पञ्चविधयज्ञवाक्ये चत्वारो महायज्ञाः—अग्निहोत्रं, दर्शपूर्णमासौ, ज्योतिष्टोमः, पिण्डपितृयज्ञ इति । चतुर्महायज्ञवाक्ये च अग्निहोत्रानन्तरं दर्शपूर्णमासानुकीर्तनात् तद्विषयचिन्ताप्रसक्तौ तदारम्भाङ्गतयान्वारम्भणीयेष्टिर्निरूप्यते ।

End of the 2nd Paricceda :

अन्या इष्टयस्तु राजसूयज्योतिष्टोमप्रकरणगता अवेष्टिदीक्षणीयादिपशुप्रभृतयस्तत्र तत्र वक्ष्यमाणत्वादिह नोच्यन्त इति क्रमः ।

अम्बूनि संगृह्य यथाम्बुराशेः
सिञ्चन्ति पृथ्वीं जलदाः समन्तात् ।
एते च धर्मान्प्रतिगृह्य दर्शात्
कामप्रदत्वं दधते जगत्याम् ॥
लब्धात्मकामा विधिताः स्वधर्मै-
रनन्यदृष्टैः प्रकृतिं स्वदर्शम् ।
नद्योऽम्बुराशिं प्रसरन्ति वेगै-
स्तारा सुधांशुं मुनयः स्वधर्मम् ॥
अन्तर्वणं गोपवधूसमेतो
ननन्द नन्दात्मजवासुदेवः ।
अन्तः श्रुतिप्राणभृदर्थकामो
दर्शश्च नानाविकृतिः स्वनिष्ठः ॥
अयं पूर्णमासः स्वयं सर्वकामः
श्रुतो धर्मराजः श्रितः पूर्णमासैः ।
विकारैश्च नानाविधाकारकामैः
स्वधर्मा . . . . . हरिः पुण्यवद्भिः ॥

भट्टाचार्यान्प्रणम्याधिकरणरचनामानसार्थक्रमार्था
. . . . . प्रकटितविषमा तत्प्रसादैकलभ्या ।
आधानादग्निहोत्रं तदनु च विकृतिः सर्वशास्त्रार्थयुक्ता
दर्शास्ते पूर्णमासाः सकलविकृतयः सत्रपञ्चाविरेजुः ॥

Colophon :

इति श्रीमत्पूर्वोत्तरमीमांसापारंगतानन्तदेवात्मजबालदेवतनयबाबादेवकृताधिकरणादर्शे विकृतिनिरूपणं समाप्तम् । दर्शपूर्णमासपरिच्छेदश्च समाप्तिमगमत् ।

327 39. H. 6.

अमृतबिन्दुः—चन्द्रकृतः

Paper. 93 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed in 1930 from a MS. obtained from the Royal Asiatic Society of Bengal.

This is a short Prakaraṇa work on the Pūrvamīmāṁsā according to Prābhākaras' school. The author's name is mentioned as Candra in the colophon. He quotes the Prakaraṇapañcikā, Vivaraṇa and Nibandha in support of his view regarding import of the Niyoga or Kāryatva.

Beginning :

वेदप्रामाण्याधीना हि पुरुषार्थसिद्धिः । तच्चापूर्वस्य कार्यस्य वाक्यार्थत्वे । तदपि कृतिप्रधानस्य विधित्वे सिध्यतीति तदादौ निर्णीयते । तत्र कृतिप्रधानं प्रवर्तककृत्युद्देश्यं कृतिसाध्यं कृतिप्रधानम् । यथा ज्ञानविशेष एव ज्ञानविषयत्वं तथा तच्चिकीर्षायोनिस्तदुद्देशप्रवृत्तो वा कृतिविशेष एव कृत्युद्देश्यत्वम् । स च मानसः । अतः कृत्युद्देश्यत्वं मानसम् ।

End :

अत्रापि विवरणेनैवमिति विशिष्टपुरुषविशेषणत्वात् । स्वर्गकामना हि पुरुषं विशिनष्टि । अवशिष्टं कृतदर्शपूर्णमासः स्वर्गकामनावान् फले भिन्ने जुहोतीत्यादिषु मन्तव्यम् ।

Colophon :

इति श्रीमहामहोपाध्यायश्रीचन्द्रकृतौ अमृतबिन्दुर्नाम प्राकरणं समाप्तम् ।

328 26. E. 3.

अरुणाधिकरणसरणिविवरणी—श्रीनिवासाचार्यकृता

Palm-leaf. 66 Foll. $18\frac{1}{2} \times 1\frac{1}{4}$ inches. 6 lines in a page. Telugu and Grantha scripts. Old. Injured. Good writing.

Foll. 1 and 27 are broken into two pieces.

This is a treatise explaining the principles taught in the Aruṇādhikaraṇa (3-1-12) of the Pūrvamīmāṁsāsūtras according to the view of S'ri Rāmānuja as held in the Ānandamayādhikaraṇa (2-1-15) of his S'rī-Bhāṣya. The work is also called Aruṇādhikaraṇamañjarī or Aruṇādhikaraṇas'ikṣaṇa. A complete MS. of the work is available in the Madras Govt. Oriental MSS. Library (D. No. 4866) wherein see for the introductory verses and end. The author is mentioned there as S'rinivāsācārya, son of Srinivāsatātācārya of S'aṭhamarṣaṇagotra and disciple of Kauṇḍinya S'rīnivāsadīkṣita and Aṇṇayācārya (the author's elder brother). For the detailed accounts of the author, see Dr. V. Raghavan's contribution " The Surapuram Chiefs and some Sanskrit writers patronized by them" published in the Journal of the Āndhra Historical Research Society, Vol. XIII, 1940, and the Introduction to the Vedāntakārikāvalī of Bucci Veṅkaṭācārya, edited by Pandit V. Krishnamacarya and published in the Adyar Library Series in 1950. The author belonged to the period about 1770 A.D.

Wants the beginning and end.

Beginning :

इह तावदरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणातीत्यत्रारुणापदस्याकृत्यधिकरणन्यायेन गुणमात्रवाचित्वमङ्गीकुर्वन्तो यौगिकैकहायनीपदाद्यवगतगोद्रव्यवदारुण्यमपि क्रयभावनायां करणत्वेनान्वेतीति पूर्वमीमांसका मन्यन्ते । शैवास्तु गुणवाचकतां प्रसाध्यापि तद्विशेषण एव तृतीयाश्रुतिबोधितप्रकृतक्रयभावनाकरणत्वं कल्पयन्ति । भगवद्भाष्यकारास्तु आनन्दमयाधिकरणे समानाधिकरणपदानां विशिष्टैकार्थवृत्तित्वमुपपादयन्तोऽरुणापदमपि समभिव्याहृतस्वसमानाधिकरणैकहायनीशब्दबोध्यद्रव्यपरमनुमन्यमाना आरुण्यादिविशिष्टद्रव्यमेव क्रयभावनायां करणमनुगृह्णन्ति । तस्मिं सैद्धान्तिकं पक्षं व्यवस्थापयितुं प्रकरणमिदमारभ्यते ।

End :

तथाहि—तद्धि एकहायन्यवरुद्धायां क्रयभावनायां स्वातन्त्र्येण निवेशमसहमानं तद्विशेषणे द्रव्येऽन्वेतीति वक्तव्यम् । तत्र किं सामानाधिकरण्येनान्वेति, वैयधिकरण्येन वा ? आद्ये कारकविभक्तिविरोधः ; तस्याः कारकत्वप्रत्यायनोपक्षीणायाः सामानाधिकरण्येन बोधनसामर्थ्याभावात्, कारकाणां क्रियान्वयनियमेन द्रव्यान्वयासहिष्णुत्वाच्च । अतो द्वितीयपक्षः समाश्रयणीयः ।

The fly-leaf at the end reads the following lines :

यथार्थवक्तृत्वं किं नाम । प्रकृतार्थविषयकयथार्थज्ञानवत्त्वमाप्तत्वम् । अर्थे प्रकृतत्वं किं नामेत्याकाङ्क्षायां श्रोत्रिच्छाविषयत्वमेव । तथाच श्रोत्रिच्छाविषयकयथार्थज्ञानवत्त्वमाप्तस्य लक्षणम् ।

329 38. H. 3.

अर्थवादादिविचारः—क्षीरसमुद्रवासिमिश्रकृतः

Paper. 54 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New Good. Good writing.

This is a Kroḍapatra conducting discussion on some selected topics relating to the Pūrvamīmāṁsāśāstra. The author mentions his name as Kṣīrasamudranivāsimiśra in the colophon. He has written another work on the Pūrvamīmāṁsā *viz.* Bhāṣyadīpa a commentary on Śabara's Bhāṣya on the Pūrvamīmāṁsāsūtras in accordance to the Prābhākara school of Mīmāṁsā. (Vide No. 42 of this volume).

This transcript was copied from the original MS. available in the Trivandrum Library as described in No. 403, p. 897, Vol III of the Descriptive Catalogue of Sanskrit MSS in the office of the curator for Publication of MSS.

The work contains the topics on the Arthavāda, Smṛtiprāmāṇya, Nāmadheya and Jātiśakti.

Beginning :

अर्थवादादीनां स्तुत्यापि विधिपदेनैकवाक्यत्वं संभवति, न वेति विचार्यते । न संभवतीति पूर्वः पक्षः । एकवाक्यत्वं हि नाम यत्प्रयोजनं तदन्वय्यर्थानामितरेषां च तदन्वयप्रतिपत्तिनिमित्तता येषां तदेकप्रयोजनत्वमर्थवादानां तेषामेकवाक्यत्वं यथा लङ्पदकरणेतिकर्तव्यतानियोज्यपदानाम् ।

End :

नन्वसौ यजिनैव सिद्धः । सत्यम् । सिद्धेऽपि तस्मिन् अनुवादरूपबोधो नाम्ना जायते । न चासावनुष्ठानानुपयोगी । किं तु साभ्यासानुभवसंस्काराधानद्वारेण स्मृतिहेतुत्वादनुष्ठानोपयोगीति विधिप्रयो-

जनबोधजनकतया विध्येकवाक्यत्वं वेद्यमित्यखिलमनवद्यम् ।

Colophon :

इति क्षीरसमुद्रवासिमिश्रविरचितं नामधेयनिरूपणं समाप्तम् ।

The following two verses ascribing the authorship to Kṣīrasamudravāsin and mentioning the topics dealt with, are found on pages 56 and 93 of the MS. respectively.

नित्यानुमेयश्रुतिमूलतेयं
मन्वाद्युपज्ञस्मृतिभारतीनाम् ।
प्रसाधिता क्षीरसमुद्रवासि-
मिश्रेण वादीन्द्रविजित्वरेण ॥
सामान्यवाचिशब्दानां व्यक्तिवाचित्वदूषणम् ।
सुबोधं क्षीरसमुद्रवासिमिश्रेण वर्णितम् ॥

330 40. C. 5.

अर्पणमीमांसा—बाबादेवकृता

Paper. 14 Foll. 11 × 3 inches. 9 lines in a page. Devanāgari script. Old. Fair. Small and illegible writing.

This is a treatise dealing with the interpretation of the word Arpaṇa occurring in the verse यत्करोषि यदश्नासि etc. of the Bhagavadgīta. The author criticises various meanings given by others and gives his own interpretation following the views of Mimāṁsakas. The author Bābādeva was the son of Bāladeva. He is also known to have written another work called Adhikaraṇādarśa (Vide No. 326 of this volume) wherein he mentions himself as the grandson of Anantadeva I the author of the Manorañjananāṭaka, Siddhāntaratna and Haribhaktiviveka. As Bābādeva's son Jagannāthadeva is known to have transcribed the Haribhaktiviveka in 1673 A.D., the author may be fixed at 1650 A.D. approximately. He mentions also Vidhisṛṣṭi as his other work, copy of which is not avalable in any Public Library and not mentioned in any Catalogue. (See for further details about the author, the Adhikaraṇādarśa No. 326 of this volume).

Contains the following chapters :

१. कृतिपरिच्छेदः ।
२. प्रयोगपरिच्छेदः ।
३. तिङन्तपरिच्छदः ।
४. . . . . ।

Incomplete.

Beginning :

श्रीरामो जयति जगत्त्रयैकहेतुः ।
कालिन्दीपुलिने सुगन्धिपवने मन्दारमूले लस-
न्नीलेन्दीवरसुन्दरः कटितटप्रद्योतिपीताम्बरः ।
कोऽपि श्रीमुखमारुतेन मुरलीमालापयन्मञ्जुलं
लोलाक्षीरभिरञ्जयन्विजयते कंजस्फुरल्लोचनः ॥
यस्यामी विधिवासवादिविबुधावासेषु विस्फूर्जिताः
संतोषाश्चलवीचयो नृपसुखान्येतान्यथो बुद्बुदाः ।
अन्ये पुत्रकलत्रमित्रविषयाः सौख्योदया बिन्दवः
सोऽयं पूर्णसुखावहो विजयते नीलाम्बुदश्यामलः ।
पितमहचरणानामेतौ ।
कमपि तं शिशुमेव निरन्तरं ललितपङ्कजलोचनमाश्रये ।
श्रुतिवचोविषयोयुवतीदृशामनुदिनंसपदि प्रतिभाति या ॥

वैधी कर्मतति: स्वपौरुषविधामालोक्य मायोपमा-
मानन्दाधिकमिन्द्रनीलवपुषं यात्युक्तिमालम्ब्य याम् ।
ज्ञातुं तां प्रकटीकरोमि कृपया श्रीकृष्णनाथप्रभु-
र्मह्यं संवितनोतु निर्मलधियं कामस्य कल्पद्रुम: ॥

इह खलु जैमिनिमहर्षिणा अथातो धर्मजिज्ञासेत्यादि प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यादित्यन्ताधिकरणै: द्वादशलक्षणपूर्वमीमांसायां प्रमाणभेदशेषप्रयुक्तिक्रमाधिकारातिदेशोहबाधतन्त्रप्रसङ्गा विचारिता: । तत्र चैवं विचारितैरपि धर्मैरनुष्ठितैर्मनसि स्वर्गादिभोगोत्तरकालिकमर्त्यलोकप्रवेशादिरूपदु:खातिशयदर्शनात् तदसहिष्णुर्भगवान् करुणामूर्तिरर्जुनोपदेशकैतवेन मुक्त्युपायं कथयामास । यत्करोषि यदश्नासि+मदर्पणमिति । अत्र मदर्पणमिति अहमर्थ्ये येनेति करणल्युडन्तम् ।

(Foll 7*a*)

नियोजयामास कृती: समस्ता
गीतोपदेष्टा स्वकृतौ कृती य: ।
करोतिरर्थेष्विव सर्वधातूं-
स्तदङ्घ्रियुग्मे हृदयं ममास्ताम् ॥
उच्चावचं दातुमभीप्सितानि
कर्माणि सत्यं विविधानि सन्ति ।
संसारवारांनिधिपारगत्यै
हरिं विना नैव तरिं प्रतीम: ॥

मीमांसन्तां फलानि प्रतिपदमधुना मुख्यतां वा भजन्तां किं वा कामान्लभन्तां सपदि हृदयगान्किं तु तै: सर्वभावै: ।
सेव्या वेदान्तवाचामिव परमपदं वासुदेवोक्तिगम्या
तद्भाव्या भावनेत्थं कलयतु विदुषां बृन्दमुक्तिकृतीनाम् ॥

Colophon :

इति श्रीमत्पूर्वोत्तरमीमांसापारंगतबालदेवसुतबाबादेवविरचितायामर्पणमीमांसायां कृतिपरिच्छेद: प्रथम: ।

End :

अथ यावद्देहमैहिकयावद्दृष्टादृष्टद्वारकफलमोचनस्य मुक्त्युपायत्वाभावेन वैयर्थ्यादेवामुष्मिकशुभाशुभफलमोचनस्य वाक्यशेषत्वाङ्गीकारात् न यावत्फलानुत्पत्तिरभिमता इति चेत् अर्जुनीययातनानुभवस्मरणालीकत्वापत्ति: । किंचैवं शुभान्यशुभानि फलान्येभ्य: तै: कर्मभि: बन्धनै: क्षीणे पुण्ये मर्त्य .

The scribe adds in the front page :

खेरडे दशपुत्रस्य

331 64976.

अर्पणमीमांसा—बाबादेवकृता

Paper. 33 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page Devanagarī script. New. Good. Good writing.

Transcribed from the Original MS. described in the last number.

Incomplete.

332 29. H. 15.

नित्यकाम्यविवेक:--वेंकटरामकृत:

Palm-leaf. 14 Foll. $14 \times 1\frac{1}{2}$ inches. 10 lines in a page. Grantha script. Old. Much injured. Good writing.

This is a short treatise dealing with the characteristics of the rituals known as *nitya* and *kāmya*. This particular subject has been a controversial one among the followers of Kumārila and Prabhākara and dealt with fully by S'ālikanātha and Pārthasārathi Misra in their works Prakaraṇapañcikā and Nyāyaratnamālā with different views. The author herein maintains the Prabhākara's view and refutes Kumārila's. In this connection he refers to

Khaṇḍadeva and Dinakara. Nothing is known about the author's date etc. The work seems to be very recent.

Wants the first line in the beginning and breaks off abruptly in the middle.

Beginning:

. . . . . गौरीमनोहरम् ।
विद्वान् वेंकटरामाख्यः . . . संज्ञकान् ।
गुरुन् प्रणम्य तनुते नित्यकाम्यविवेचनम् ॥
पार्थसारथिमिश्रोक्तदूषणोद्धारपूर्वकम् ।
गुरुणां मतमत्रादौ संगृह्णामि यथामति ॥

इह खलु यस्मिन् कर्मण्युपदेशातिदेशाभ्यां योऽङ्गकलापः प्रतीतः, काम्ये तस्मिन् कात्स्न्र्येन तदुपसंहारशक्तिमानधिकारी । नित्ये तु यथाशक्त्यनुष्ठानसमर्थ एवेति गुरवो भाट्टाश्च मन्यन्ते । अत्र केचिदुभयत्रापि सर्वाङ्गोपसंहारसमर्थ एवेति वदन्ति ।

End:

एवमपि निमित्तफलयोर्द्वयोरुद्देश्यत्वे विधेयत्वानुष्ठेयत्वाभ्यां प्रकाराभ्यां निमित्तफलयोरन्वयाद . . . .

333 23. H. 26.

पक्षपञ्चकनिरूपणम्—रामानुजाचार्यकृतम्

Palm-leaf. 6 Foll. 15½ × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

This is a short treatise in the form of a controversial discussion on certain passages found in the Śāstradīpikā of Pārthasārathimiśra (1-2-1) beginning with the words सिद्धप्रमाणभावं चोदनांशे वेदं त्रेधा विभज्य etc. The discussion relates to the dispute whether the alternatives of interpretation meant in these passages are five in number or six. It is understood that the controversy took place between the father and son. The father first opined that the number of alternatives meant was only five. The son opined it was six and wrote the work called Pakṣaṣaṭkanirūpaṇa (Vide the next number) in reply to his father. The present work (Pakṣapañcakanirūpaṇa) was written again by the father refuting the son's view and maintaining his own view that the number in question was only five. The name of the author is not mentioned in this work. However in the next work his son mentions the same as Rāmānujācārya. The author salutes Cakravartyācarya and Vedāntācārya as his preceptors. In this connection the references mentioned above help in identifying this author with that of the Tantranītilaharī (R. No. 2337 of the Madras Govt. Oriental MSS. Library) which also was written by Rāmānujācāryā a desciple of Cakravarti Raghunāthācarya and Vedāntācārya who were his father and elder brother respectively.

Complete.

Beginning:

श्रीमद्वेदकिरीटसूरिचरणाम्भोजद्वयीरेणवो
मीमांसायुगलैकशास्त्र्यघटनं श्रीभाष्यकारेरितम् ।
प्रख्यातं सदसि स्मृताः प्रकटयन्तोऽद्वैतिमुख्यानरीन्
धिक्कृत्य स्वयमादिशन्तु धिषणां सूक्ष्मार्थसिद्धिप्रदाम् ॥
चक्रवर्तिगुरुर्जीयाज्जीयाद्वेदान्तदेशिकः ।
ययोः प्रसादादद्राक्षं मीमांसासारमञ्जसा ॥

यद्यप्यत्र न वक्तव्या प्रत्युक्तिरिति तूचितम् ।
पुत्रादिच्छेदिति न्यायात्तथापीहाभिधीयते ॥
यद्भवन्तः स्वयं प्राहुस्तन्मन्ये मत्परीक्षणम् ।
इति तत्तु तथा तावद्भवतां यशसः कृते ॥

यत्तु अस्वरसविषयावतारितुव्याख्ययोः कथमेकव्याख्यात्वमिति, तन्न; व्याख्याभेदकलिङ्गानुपलम्भात् । अवतारिकाभेदोपपाद्यार्थभेदावेव लिङ्गं स्यातामिति चेत्, अत्र समाधिरयम्—अवतारिकाभेदमात्रस्य पक्षभेदलिङ्गत्वाभावात्, अन्यथातिप्रसङ्गात् । उपपाद्यभेदाभावस्तूपरिष्टात् वक्ष्यते ।

End :

अत एव पञ्चमपक्षमात्रस्यास्मन्मतरीत्या विधिवन्निगदनये विध्युपयोग इत्यादिनिर्देशः संगच्छते । भवन्मतरीत्या पूर्वपूर्वपक्षसापेक्षत्वे पूर्वपूर्वपक्षोपन्यासं विना ग्रन्थान्तरे तत्पक्षमात्रोपन्यासो न स्यात् । अस्मिन्नेव ग्रन्थे पूर्वपूर्वसापेक्षतोत्तरोत्तरस्य, न तु ग्रन्थान्तर इति चेन्न, तदसंभवस्याप्युपपादितत्वात् । इत्थं च षट्पक्षीपक्षो व्याख्येयव्याख्यानोभयग्रन्थशैलीविरोधादुपेक्ष्यः । एतेन 'प्रादुःष्यन्त्यत एवेह पक्षाः षडपि संगताः' इति निरस्तम् । एतेन 'भ्रान्तश्चेद्बोध्यतामयम्' इति विनयोक्तिरपि न भागवतैस्तथा वक्तुमुचितमिति परिहृतं वेदितव्यम् । परं त्वस्मदुक्तेषु रहसि बोधयेदिति न्यायेन यत्र वक्तव्यमस्ति तत्र सम्यगुच्यतामिति निगमः । अतः सिद्धं पञ्चैव पक्षा इति शास्त्रदीपिकातद्व्याख्ययोः सर्वदेशव्यापित्वात् तत्प्रवचनाधिकृता विद्वांसोऽत्र सन्तीति सुलभतटस्थः पक्षपञ्चकपक्ष इत्यलं विस्तरेण ।

334 64977.

पक्षपञ्चकनिरूपणम्—रामानुजाचार्यकृतम्

Paper. 13 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from the original MS. described in the last number.

Complete.

335 23. H. 26.

पक्षषट्कनिरूपणम्

Palm-leaf. 2 Foll. $15\frac{1}{2} \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

As said in the last number, this work was written by the son of the author of the Pakṣapañcakanirūpaṇa. It refutes the view of the father that the number of alternatives meant in the passages of the S'āstradīpikā (1-2-1) was five and tries to prove that it was six. The author whose name is not known mentions himself as the son of Rāmānujācārya, the author of the Pakṣapañcakanirūpaṇa described in the last number.

Complete.

Beginning :

श्रीमद्रामानुजाचार्यगुरुपादाब्जभावना ।
सिद्धाञ्जनति शास्त्रार्थवीक्षणे तत्सुतस्य मे ॥
यद्यप्याचार्यपादानामुक्तिः शेषापटी मम ।
तथापि तेषां संतोषोन्मेषायैषा कृतिर्भवेत् ॥
तच्चिन्त्यमिति षट्पक्षपक्षः प्रामाणिकोऽपि यत् ।
निराकार्यार्यचारणैस्तन्मन्ये मत्परीक्षणम् ॥
अवतारणिकाभेदादुपपाद्यार्थभेदतः ।
पक्षषट्कमिह स्पष्टं निश्चिन्वन्ति यतो बुधाः ॥
इत्थं सत्यपि पञ्चैव पक्षा इत्यभ्यधुः कथम् ।
आचार्या इति चेत्तेषामेवं भावोऽनुमीयते ॥

तथाहि यद्वा चोदनार्थमपीत्युक्तेनापौरुषेयत्वेनेत्यारभ्य प्रतिपाद्यत इत्यन्तं नामधेयाभिप्रायं वा इत्यतः प्राक् एकग्रन्थो द्वितीयव्याख्येत्याचार्याभिप्रायः। कथमन्यथा तृतीपपक्षे चतुर्थपक्ष इति वक्तव्ये द्वितीयपक्षे आदिग्रहणेन तृतीयपक्षे विधिपदेन नामधेयस्य ग्रहणे सति वाचो युक्तिः। अत्रेदं प्रष्टव्यम्—ननु विधिग्रहणं व्यर्थम्। तदुपयोगस्य प्रथमपाद एव प्रतिपाद्यत्वादित्यत आह—विध्यर्थवादेतीति। पूर्वत्रास्वरससूचकावतारणिकाभेदेऽपि कथमस्वरसविषयावतारितव्याख्ययोरेकव्याख्यात्वमिति।

End:

तत्र शिष्याकाङ्क्षास्थले वृत्ताः पक्षास्त्रय एवेति त्रिष्विति निर्देशः। अयं मार्गो विधिशब्दस्य नामधेयपरत्वाभावाविशेषात् पञ्चमषष्ठयोरपि समान इति भाव इति।

युक्त्या युक्ता वियुक्ता वा पत्रिकेयं समीक्ष्यताम्।
दोषो यद्यपि तत्र स्यात्सतामेतदगर्हितम्॥
प्रणम्य श्रीमदाचार्यचरणाम्भोजसंनिधौ।
शिष्यविज्ञापनमिदं प्रह्वीभूय समर्पयम्॥

336 64975.

पक्षषट्कनिरूपणम्

Paper. 5 Foll. 8¼ × 6⅓ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Transcribed from the original MS. described in the last number.

Complete.

337 39. I. 7.

मीमांसान्यायकोशः

Paper. 381 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in two volumes. This is a transcript made from a MS. available in the Govt. Oriental MSS. Library, Madras.

This is an original treatise explaining the principles of the school on Pūrvamīmāṁsā in accordance with Prabhākara's view. For this purpose the author takes some selected topics for discussion and establishes the views of Prābhākaras after criticizing those of Bhāṭṭas. The author's name is not known. He refers to the following works: Gurumatāmṛta (of unknown author), two Ṭīkās of Prabhākara (evidently the Bṛhatī and Laghvī), two Pañcikās of S'ālikanātha (Ṛjuvimalā and Prakaranapañcika), Bhāvanāviveka of Bhavanātha, Tattvāloka, Dramiḍabhāṣya, Kalyāṇamañjarī-Tattvaratna or Tarkaratna, and the Bhāṣyapariśiṣṭa of S'ālikanātha. He also mentions an author named Sunetra-Nandanācārya. In dealing with the Bhāgavata school of S'rī-Vaiṣṇavism he divides the Pāñcarātratantra into two kinds one being Ekāyanapāñcarātra and the other Purāṇapāñcarātra. The work seems to be one of the old works on the Prābhākara school of Mīmāṁsā. From the author's statement the work seems to have extended up to whole of the Tarkapāda. But the present MS. contains only the following topics in the Tarkapāda:

१. जिज्ञासासूत्रार्थविचारः, २. चोदनासूत्रार्थविचारः, ३. निमित्तसूत्रार्थविचारः, ४. सत्सं-

प्रयोगसूत्रार्थविचारः, ९. प्रत्यक्षलक्षणविचारः, ६. औत्पत्तिकसूत्रार्थविचारः, ७. ख्यातिविचारः, ८. निरालम्बनवादः, ९. शून्यवादः, १०. अनुमानलक्षणम्, ११. शक्तिवादः, १२. शब्दविचारः, १३. उपमानविचारः, १४. अर्थापत्तिनिरूपणम्, १५. स्फोटवादः, १६. आत्मवादः, १७. शैवमतनिरूपणम्, १८. भागवतमतनिरूपणम्।

Beginning :

प्रवरगुणैकास्पदाय स्थिरत्रसकुलबीजकुम्भभूताय।
भुवनकोशस्य गोप्त्रे ब्रह्मणे . . . ॥
नित्योदारगुणैश्वर्यरूपभोगादिसंपदे।
विविधाङ्गाय वेदान्तवेद्याय ब्रह्मणे नमः ॥

नमो जैमिनये वेदसंपुटनिगूढविस्फारयित्रे न्यायप्रज्वलिततेजसे नमोऽस्त्वाचार्येभ्यः।

नानान्यायमहारत्ननिधिर्भाष्यमहोदधिः।
कल्पितो येन नमस्तस्मै शबरस्वामिवेधसे ॥
सृष्टाविद्यानिशाध्वंसिनिबन्धमयवासरम्।
उज्जासितजगज्जाड्यं नमस्यामः प्रभाकरम् ॥
नमः शालिकनाथाय पुंसे टीकाद्वयार्णवे।
पञ्चिकामृतनौर्येन कृता तस्मै महीयसे ॥
ध्वस्तान्यदृष्टिसंसिद्धप्रक्रियापञ्चिकाद्वयम्।
भवनाथगुरुं वन्दे न्यायोपादानविग्रहम् ॥
गुरुक्रमागतज्ञानप्रवाहैकप्रयोजनः।
नाथद्वयमतोद्धारो न्यायकोशो निबध्यते ॥

अथातो धर्मजिज्ञासा। मीमांसाशास्त्रारम्भसमर्थनमिदमधिकरणम्। मीमांसाशब्देन च वेदेतिकर्तव्यतात्मतया पूजितस्तर्क उच्यते। तथाहि—मान पूजायामित्यस्माद्धातोः मानेर्जिज्ञासायामित्युपसंख्यानोपगृहीतेन मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्येत्यनेन सूत्रेण सनि कृते मीमांसेति रूपं संपद्यते। ततश्च पूजिता जिज्ञासा मीमांसाशब्दस्यार्थः। जिज्ञासापदं च गुरुमतामृतकारेण व्याख्यातम्।

ज्ञानप्रयोजना चेच्छा विचारोपक्रमात्मिका।
विचारपर्वरूपत्वात् जिज्ञासेत्यभिधीयते ॥

इति। अयमर्थः—संशयिते विषये तत्त्वज्ञानप्रयोजना तावदिच्छा जायते। तदनन्तरं विचारः। विचारो नाम विविधं बुद्धिप्रवर्तनम्। नानाविधयुक्तिसाध्योपकारविशेषात्मकः पुरुषप्रयत्नविशेष इति यावत्।

* * * *

सूत्रभाष्ययोरन्यथाव्याख्यानप्रवृत्त्या भग्नं दर्शनमिति मत्वा प्रभाकरेण गुरुणा सम्यग्व्याख्यानेन दर्शनान्तरं कृतम्। तत्र परमतदूषणेनैव स्वमतप्रतिष्ठापनमिति मत्वा नाथाभ्यां भाट्टस्य दर्शनस्य दूषणं प्रकटितम्।

End :

यत्तु ज्ञानस्य क्षणिकत्वं बौद्धाभिमतं, मायावादिभिश्च ज्ञानात्मनो नित्यत्वमिति तदपि निरूपणासहम्। न हि क्षणिकनित्यत्वे नाम द्वौ पारमार्थिकौ धर्मौ स्तः। क्षणिकत्वं नित्यत्वं च भ्रान्तमेवेति ज्ञानात्मकमेव तत्त्वमवशिष्यते। तथा संप्रति सत्यत्वमपि नामान्तरेणानिर्वचनीयत्वमेव। तदेवमादिबहुबौद्धसाम्यात् प्रपञ्चमिथ्यात्ववादस्य तथान्यान्यपि बहूनि दूषणानि। प्रथमं तावदीश्वरस्य सर्वज्ञस्याज्ञानाभ्युपगमदोषः। बद्धमुक्तव्यवस्थाभावश्च। एकस्मिन्नेव शरीरे जीवः, निर्जीवानीतराणीति सर्वलोकविरुद्धकल्पना। न च जीववतः शरीरविशेषस्य निर्गमः शक्यः। इतः पुनः कश्चिन्मुक्त इति सर्वशास्त्रविरोध इत्यादयो बहवो दोषाः। कथं च प्रत्यक्षसिद्धस्य भेदस्य भ्रान्तित्वम्। यत्तु प्रत्यक्षमपि विधिमात्रमुपक्षीणव्यापारम्, अपरिस्पृष्टान्योन्यभेदं तदेकमेव तत्त्वं साक्षात्करोतीति सत्यं विधायकमेव प्रत्यक्षम्। तत्तु विदधदरूपं रूपतया रसं . . . .

338 10. E. 32.

मीमांसापरिभाषा—कृष्णयज्वकृता

Paper. 18 Foll. 9½ × 4½ inches. 16 lines in a page. Devanāgarī script. Old. Good. Clear writing.

This is a small work explaining some of the principles of Mīmāṁsā according to the view of the Bhāṭṭa school. This is of immense use for the beginners of Mīmāṁsā study. The style is simple and lucid. The author Kṛṣṇayajvan may be fixed in the middle of the 18th century A.D.

Complete.

Beginning:

सूर्यनारायणं वन्दे देवीं त्रिपुरसुन्दरीम् ।
गुरूनधिगतार्थांश्च निरन्तरमहं भजे ॥
बालानां शास्त्रसिद्धार्थलेशबोधाय धीमताम् ।
मीमांसापरिभाषेयं क्रियते कृष्णयज्वना ॥

इह खलु महर्षिणा जैमिनिना द्वादशलक्षण्यां पूर्वमीमांसायां धर्माधर्मावेवानुष्ठानोपयोगितया विचारितौ । तत्र वेदबोधितेष्टसाधनताको धर्मः । यथा यागादिः ।

End:

इत्येवं श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिक्रमैरेव कर्मानुष्ठानम् । अन्यथानुष्ठाने वैगुण्यमित्यलम् ।

Colophon:

इति श्रीकृष्णयज्वकृता मीमांसापरिभाषा समाप्ता ।

339 24. F. 25.

मीमांसापरिभाषा—कृष्णयज्वकृता

Palm-leaf. 17 Foll. 15 × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

Reads the following beginning:

सूर्यं नारायणं देवं शिवं त्रिपुरसुन्दरीम् ।
धातारं गणनाथं च निरन्तरमहं भजे ॥

340 25. C. 38.

मीमांसापरिभाषा—कृष्णयज्वकृता

Palm-leaf. 27 Foll. 17 × 1½ inches. 7 lines in a page. Grantha and Telugu scripts. Old. Much injured. Good writing.

Foll. 1 to 15 and 22 to 27 are written in Grantha script and Foll. 16 to 21 in Telugu script. Foll. are numbered 1 to 28; but No. 22 is missing.

Complete with a small gap in the middle.

341 9. J. 32.

वाक्यार्थरत्नम्, सव्याख्यानम्—अहोबालार्यकृतम्

Paper. 96 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgari script. New. Good. Good writing.

This is a treatise in verses on Prabhākara's school of Pūrvamīmāṁsā dealing with the meaning of Vidhivākyas. The author herein tries to prove that the import of Vidhi is only Niyoga otherwise known as Kārya. The work contains four chapters or Paricchedas *viz.* Upodghāta, Kriyāsthāyitva, Liṅādyartha, and Niyojyaparatva. The author calls himself as Ahobala son of Mārayārya of Durvāsa family of Srī-Vatsagotra. The

author has written a commentary called Suvarṇamudrā on the text. The MS. contains both the text and commentary. The author is also called colloquially as Aubalārya.

This is a transcript made from a MS. available at Belur in Mysore State. The work has been printed and published by the University of Mysore in the Mysore Oriental Library Publications, Sanskrit Series No. 83 in the year 1943.

Complete in four Paricchedas.

Beginning :

इह खलु मङ्गलारम्भा ग्रन्थाः प्रचीयन्ते परिसमाप्यन्ते चेति वचनेन प्रचिक्रमिषितस्य निरन्तरायपरिसमाप्तिप्रचयादिकं प्रयोजनमाशासानोऽभिमतदेवतोपासनात्मकं मङ्गलमाचरति—

उपास्महे महो रामनामकं यन्नियोगतः ।
नियुक्तोऽधिकृतः कर्मकर्तेष्टफलमश्नुते ॥

मह उपास्महे इत्यन्वयः । तन्मह इत्युपासीत, महान् भवति इति श्रुतौ महस्त्वेन महःशब्दगम्यत्वेनोपासनायां महत्त्वरूपस्यैव प्राप्तेरभिधानात् अत्रापि महत्त्वापेक्षायां ज्योत्स्नापरपर्यायं महः सेवामह इत्यर्थः ।

End :

तं त्वौपनिषदमिति श्रुत्यनुसारेण शास्त्रयोनित्वादित्यत्र ब्रह्मणो वेदान्तवेद्यत्वस्यावधृतत्वात् तेन धर्मसमाख्यया ब्रह्मसमाख्यया च यो रामो वेदशिरःप्रतिपाद्यः स रामो वाक्यार्थरत्नसमर्पणेन प्रीतो भवत्वित्यर्थः ।

Colophon :

इत्यौबलार्येण विरचितायां वाक्यार्थरत्नतात्पर्यप्रकाशिकायां सुवर्णमुद्रायां चतुर्थः परिच्छेदः । समाप्तश्च ग्रन्थः ।

342 38. C. 12.

मीमांसासर्वस्वम्—नारायणशास्त्रिकृतम्

Paper. 176 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a treatise on the Pūrvamīmāṁsāsūtras explaining the various adhikaraṇas thereof according to the views of Kumārilabhaṭṭa. The author Kollūri Nārāyaṇas'āstrin was the son of Kollūri Somayājin and Accamāmbā and the pupil of Niṭṭala Somanāthadīkṣita, the author of the S'āstradīpikāvyākhya Mayūkhamālikā. From the Sāhityakalpadrāma (Madras Govt. Library R. No. 2126) written by Rājas'ekhara *alias* Somas'ekhara who was the 6th descendant of our author, the following genealogy of the Kollūri family is known.



The author Nārāyaṇas'āstrin is known to have written the following works also in Mīmāṁsā : 1. Vidhiviveka (No. 349

of this volume), 2. Vidhidarpaṇa (D. No. 4471 of the Madras Government Oriental MSS. Library), 3. Sāstradīpikāvyākhyā Nyāyamañjarī (No. 96 of this volume). In the Vidhidarpaṇa the name of our author's mother is mentioned as Lakṣmāmbā of which the form Accamāmbā may be a corrupt one. As he was the pupil of Somanāthadīkṣita, the author may be fixed in the period about 1630 A.D. This MS. seems to be a copy of the MS. available in the Government Oriental MSS. Library Madras (R. No. 3408).

Wants the beginning in the fourth pāda of the second adhyāya and goes on up to the end of the third pāda of the third adhyāya.

Beginning :

श्रीरामचन्द्रः श्रितपारिजातः
समस्तकल्याणगुणाभिरामः ।
सीतामुखाम्भोरुहचञ्चरीको
निरन्तरं मङ्गलमातनोतु ॥

विधिरिति चेन्न, प्रकरणाद्यनुपस्थितस्याप्यनुवादो नाम्ना संभवति । अनुवादे प्राप्तिमात्रमपेक्षितम्, न तु प्रकरणादिना । तथाच शास्त्रान्तरप्राप्तनित्याग्निहोत्रानुवादेन मानसलक्षणगुणविधिर्नानुपपन्नः ।

Colophon found on page 49 :

इति श्रीनिट्टलकुलतिलकसोमनाथदीक्षितमहोपाध्यायचरणपरिचरणसमुदितमनोनैर्मल्यविशदीकृतसकलशास्त्रतत्त्वस्य कोल्लूरि-सोमयाजितनूभवस्य अच्चमाम्बागर्भसंभवस्य नारायणशास्त्रिणः कृतौ मीमांसासर्वस्वाख्यायां द्वितीयस्याध्याये चतुर्थः पादः ।

End :

यद्यपि चात्र तद्धितसमासान्तर्गतत्वात्पूष्णो न वृत्त्यसामर्थ्यं, तथापि भागशब्दस्य यागलक्षकत्वात् यागेन च योग्यतया देवतात्वेन संबन्धे संभवत्यनिर्धारितसंबन्धग्रहणासंभवात् देवतात्वेनैव पूष्णो भागान्वयात् एकदेवत्यस्यैव ग्रहणमिति सर्वमवदातम् ।

Colophon :

इति श्रीकोल्लूरि-नारायणशास्त्रिणा विरचितायां मीमांसासर्वस्वसमाख्यायां तृतीयाध्याये तृतीयः पादः ।

श्रीरामभद्रः श्रितपारिजातः + मङ्गलमातनोतु ॥

The stanza श्रीरामचन्द्रः etc. found in the beginning and end was added apparently by the scribe.

343 26. E. 42.

रथकाराधिकरणविचारः—शठकोपाचार्यकृतः

Palm-leaf. 6 Foll. $16\frac{1}{2} \times 1\frac{1}{4}$ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

This is a controversial discussion as to whether the term 'rathakāra' used in the passages relating to the sacrificial rites, denotes the particular caste or any one who is engaged in the construction of a chariot as dealt with in the Pūrvamīmāṁsāsūtras (6-1-12 adh). It is stated that the discussion was held between one S'aṭhakopācārya the son of S'rī-Rāmācārya and some of the followers of Madhva at Triplicane, Madras.

Complete.

श्रीकैरविण्यभिधपुष्करिणीप्रतीरे
श्रीरामदेशिकसुतः शठकोपसूरिः ।

माध्वैः प्रसज्य रथकारपदस्य रूढि-
ज्यैष्ठ्यं न्यतिष्ठिपदिदं विमृशन्तु सन्तः ॥

योगरूढयोर्मध्ये रूढेरेव प्राबल्यमिति वस्तुगतिः। तच्च रूढेः क्लृप्तत्वे। अक्लृप्ताया रूढेरलब्धात्मकतया तत्प्राबल्यस्याभित्तिचित्रलेपत्वात् यथा प्रोक्षण्यादिशब्दे। रथकारादिशब्दे तु जातिविशेषावच्छिन्नरूढेर्वचनबलक्लृप्ततया तत्प्राबल्यं निरपवादम्।

End :

रथकारशब्दस्य योगवृत्त्या त्रैवर्णिकपरत्वे तदलाभात् तल्लाभानुरोधेन रथकारशब्दस्य रूढ्युपस्थितार्थपरत्वस्यैव वक्तव्यत्वादिति रूढिप्राबल्ये रथकारशब्द उदाहरणमित्यस्य नासंगतिरित्यास्तां तावदिति पञ्चमी कक्ष्या।

इत्थमुक्तासु कक्ष्यासु युग्मकक्ष्याः परोदिताः।
अयुग्मकक्ष्या उदिताः शठकोपाख्यसूरिणा ॥
सारासारविवेकज्ञा गरीयांसो विमत्सराः।
भवन्तो विमृशन्त्वेतदित्येवं लिखितं मया ॥

344 20. E. 31.

वादकुतूहलम्—स्वामिशास्त्रिभास्कररायकृतम्

Palm-leaf. 45 Foll. 16¼ × 1½ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

The name of the work is mentioned in the fly-leaf of the MS. as Vādakutūhala. The work is in the form of controversial discussion advocated by one Svāmisāstrin and Bhāskararāya on the selected subject relating to the Pūrvamīmāṁsā, regarding मत्वर्थलक्षणा. Both Svāmisāstrin and Bhāskararāya were the pupils of Nṛsiṁhabhāratī and Svāmisāstrin was his son also. It is stated that the discussion took place in the court of the King Mallikārjuṇa. The date of the work may be fixed in the beginning of the 18th century A.D. [For the details on Bhāskararāya, see No. 774 of the Descriptive Catalogue of Sanskrit MSS. in the Adyar Library. Vol. VI—1947.]

Breaks off in the 15th Vāda of S'āstrin.

Beginning :

वादकुतूहलम्।

प्रह्लादाभीष्टदाने विबुधसमुदयस्तूयमानापदाने
शेषक्षोणीभृदन्तःप्रतिलसितपदाहोबलक्षेत्रगर्भात्।
प्रादुर्भूते हिरण्यद्विरदवरमदध्वान्ततन्त्रं निहन्तुं
धीरे सर्वास्त्रयोनौ मम भवतु गुरावस्तु भक्तिर्नृसिंहे ॥
कल्पक्षोणिरुहाश्च कल्पलतिकाश्चिन्तामणिः कामधुक्
सर्वे संमिलिता यदीयतुलनां नैवाधिरोढुं क्षमाः।
ते याता अत एव लाघववशादूर्ध्वं दिवं गौरवा-
देष क्षोणिपतिस्त्वधो भुवमिति स्पष्टं घटे धीमताम्॥
मल्लिकार्जुनमहीमहेश्वरो
दानवारिनिवहोल्लसत्करः।
सार्वभौम इति कुम्भितामगात्
कुम्भिनी कथमियं भवेन्न भूः ॥
मल्लक्षोणिभुजो मितिं च समितिं तस्यामसंख्यावतः
संख्यावन्निवहान्वनीपकगणान्वीक्ष्यावनीपानपि।
राज्यं वश्यमवश्यमप्यतितरां रुद्धान्विरुद्धान्नृपान्
नानालोककसंमिता अपि जनाः सर्वे भृशं विस्मिताः॥
विद्वद्वल्लभमल्लिकार्जुनमहीपालं तदीयामलं-
कुर्वाणं समितिं निजं गुरुसुतं द्रष्टुं चिरादागते।
श्रीमद्भास्कररायनामविबुधे राज्ञा सुविज्ञापितौ
कुर्वाते कुतुकेन कामपि कथां तौ स्पर्धमानाविव॥
श्रीनृसिंहगुरुणानुगृहीतौ
स्वामियज्वबुधभास्कररायौ।

यां कथां रचयतः कृतिनस्तां
दोषदृष्टिविधुराः कलयन्तु ॥
मिथः प्रसङ्गरूपत्वात्प्रसङ्गानुप्रसङ्गतः ।
अत्र प्रदर्शयिष्यावः स्वस्वोपस्थितिकल्पनाः ॥
आ प्राचः कामरूपाद् द्रुहिणसुतनदप्लाविताद्रा प्रतीचो
गान्धारात्सिन्धुसान्द्राद्रघुवररचिताद्रा च
सेतोरवाचः ।
आ केदाराद्रुदीचस्तुहिनगहनतः सन्ति विद्वत्समाजा
ये वै तानेष यत्नः सुखयतु समजान्कश्चमत्कर्तुमीष्टे ॥

तत्रेयं मध्यस्थैः प्रदर्शिता विप्रतिपत्तिः—पशुना यजेत, सोमेन यजेतेत्यादिविशिष्टविधौ पशुसोमादिपदानां मत्वर्थे लक्षणास्ति, न वा । अत्र विधिकोटिः शास्त्रिणाम् । निषेधकोटिस्तु रायाणाम् । तत्रायं समयबन्धः—

सिद्धान्तवादिनैषा साध्या मत्वर्थलक्षणा युक्त्या ।
प्रतिवादिना तु धर्माद्यविरोधेनैव सा दूष्या ॥

एवं बद्धे समये वादिनोरयं पत्रिकामुखेनोपन्यासः ।

End :

अत्रापि द्वैतीयीकबोधस्य मानसत्वाङ्गीकारेणैवोपपत्तौ गङ्गापदस्य किंनिमित्ता लक्षणा ? यदि प्राथमिकबोधस्याप्रामाण्यशङ्काकलङ्कितत्वेनापर्यवसितत्वात् पर्यवसितत्वबोधजनकत्वस्य शब्दवाच्यत्वात्

345 64927.

वादकुतूहलम्—स्वामिशास्त्रिभास्कररायकृतम्

Paper. 72 Foll. $8\frac{1}{2} \times 6\frac{3}{4}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from the original MS. described in the last number.

Incomplete.

346 10. I. 6.

वादकुतूहलम्—स्वामिशास्त्रिभास्कररायकृतम्

Paper. 29 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

The name Vādakutūhala is mentioned in the fly-leaf. This is a transcript copied form the original MS. available in the Tanjore Palace Library, and described in No. 6991 of the Descriptive Catalogue of the Sanskrit MSS. of that Library.

Breaks off in the 8th Vāda.

347 33. F. 9.

विधिभूषणम्—वेंकटनारायणकृतम्

Palm-leaf. 130 Foll. 17×2 inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

This is an original treatise dealing with the characteristics of the three-fold Vidhi *namely* Apūrva, Niyama and Parisaṁkhyā. The author Veṅkaṭanārāyaṇa was the son of Rāmacandra, the grandson of Mīnākṣīvallabha and great grandson of Rāmacandra who was the son of Rāmabhaṭṭa of Bhāradvājagotra. This Rāmabhaṭṭa is said to have been the family preceptor of the Pāṇḍya Kings and have subdued a Paṇḍit called Kāmadeva in a controversial dispute. The author Veṅkaṭanārāyaṇa mentions himself as a performer of many Yāgas such as Agniṣṭoma, Atirātra and Vājapeya and as a disciple of Lakṣmaṇa who may be probably identical with the author of the Aruṇādhikaraṇabhaṅga, Tantravilāsa

and the Vaṣaṭkārādhikaraṇabhaṅga described in Nos. 303 to 305 respectively in this volume. The last stanza gives the date of the work as Prājyajīva=4812 of the Kali year corresponding to 1711 A.D.

Complete in three chapters.

Beginning :

सर्वेशं शंकरं नत्वा जौमिनिं यमिनां वरम् ।
भाष्यकृद्भट्टपादौ च क्रियते विधिभूषणम् ॥
अल्पश्रुतेनापि मया श्रद्धामात्राद्यथामति ।
योऽयं विचारः क्रियते साधूकुर्वन्तु तं बुधाः ॥

अथ तत्रभवन्तो भट्टपादाः 'विधिर्वा स्यादपूर्वत्वाद्, नियमार्था वा पुनः श्रुतिः, परिसंख्या वा' इत्यादिसूत्रेषु प्रसिद्धानामपूर्वनियमपरिसंख्यानां लक्षणानि बालव्युत्पिपादयिषयैकस्यां कारिकायां संचिक्षिपुः ।

End :

न च तवैव वा कथं तत्र तत्परिहार इति वाच्यम्, सार्थवादस्यैव विधेर्लक्ष्यत्वस्वीकारेण परिहारात्; निरर्थवादस्थले च निरर्थवादस्यैव लक्ष्यत्वात् । न चैवमनुगमः, सार्थवादं निरर्थवादं वा यावदेवाम्नानात्स्वविषयप्रवर्तनाक्षमं तावल्लक्ष्यमित्यनुगमसंभवात् । तत्परोक्तमपूर्वविधिलक्षणमसमञ्जसमेव । एवं नियमपरिसंख्यालक्षणयोरपि परोक्तयोर्दोषा ऊह्याः । अस्मदुक्तयोश्च सन्ति तत्समाधानप्रकारा इति निरवद्यान्येवाचार्योक्तानि त्रीणि लक्ष्यतावच्छेदकानि लक्षणानि चेति सिद्धम् ।

Colophon :

इति श्रीमदद्वैतब्रह्मविद्याचार्यकसर्वधुरीणनिजाज्ञाघाटप्रतिष्ठापितनिखिलपाण्ड्यभूपालकुलगुरुभारद्वाजाभिजनाम्भोधिपारिजातकामदेवादिमदोद्दामवदावदद्विरदवृन्दविरुदसर्वलुण्टाकसकलदर्शनघण्टापथायमानवाङ्मुखश्रीरामभट्टाचार्यप्रनप्तुः सकलकलाकलापमहिमसर्वस्वसर्वंकषशेमुषीविशेषसुषमोपभूषितश्रीराचन्द्रबुधनप्तुर्विविधविद्वज्जनसंरक्षणबद्धकङ्कणश्रीमीनाक्षीवल्लभविचक्षणाग्रगण्यपौत्रस्यानन्यसाधारणसौजन्यशेवधिश्रीराचन्द्रसुधीवृन्दारकतनूभवस्याग्निष्टोमातिरात्रवाजपेयादिमहाध्वरावभृथनदीष्णमूकीकृतानेकवावदूकानेककथानिर्वाहकृतलक्षणलक्ष्मणगुरुचरणप्रसादलब्धविद्यस्य श्रीसुन्दरेश्वरपादाम्भोजसौरभलोलुपलोलम्बायमानमानसस्य श्रीवेंकटनारायणस्य कृतौ विधिभूषणे तृतीयं प्रसाधनम् ।

प्राज्यजीवे कलेरब्दे खराब्दे सिंहभास्करे ।
गुरौ भाद्रस्य पूर्णायां संपूर्णं विधिभूषणम् ॥

348 10. J. 14.

विधिरत्नावली—श्रीनिवासाचार्यकृता

Paper. 152 Foll. $8\frac{1}{4} \times 6\frac{1}{8}$ inches. 14 lines in a page. Grantha script. New. Good. Good writing.

This is an unfavourable criticism on the Vidhidarpaṇa of Kolluri Nārāyaṇasāstrīn which work itself is a criticism on the Vidhirasāyana and Sukhopajīvani of Appayadīkṣita. See for the Vidhidarpaṇa D. No. 4471 of the Des. Cat. of Sanskrit MSS. in the Madras Govt. Oriental MSS. Library, Vol. IX. The author Srinivāsācārya was the son of Nṛsiṁhācārya and the disciple of his paternal uncle Vādhūla Lakṣmaṇācārya of Tirumalisai village, near Madras. In this work the author supports Appayadīkṣita's view after criticising the view of the Vidhidarpaṇa, mentioned above.

Incomplete.

Beginning :

यस्याभूद्भवने जगज्जनिभुवः स्तम्भः स्वयं जन्मभू-
र्यस्यासीन्नरसिंहयोरघटितं रूपं वपुस्तादृशम् ।
यस्यासन्नखराणि तस्य विजये शस्त्राणि रक्षोविभो-
स्तं देवं मदभीष्टदैवतमहं वन्दे सदाभीष्टदम् ॥
सूक्तिर्यस्य कथाजयोत्सुकजुषां वादाङ्गणान्तर्जुषां
वादारम्भजुषां विचारकलनावाचालभावं जुषाम् ।
दुर्वादिद्विपदुष्टचेष्टितदुरुत्पाटोद्भटानां त्रयी-
सिद्धान्तार्थविशेषसिद्धिविदुषां सिद्धद्रुशाखायते ॥
अस्मदार्यसुधाधामा लक्ष्मणार्यगुरूत्तमः ।
कल्याणगुणभूमासौ कारुण्यं मयि कल्पताम् ॥
विधिरसायनविस्तृतयुक्तिभि-
र्विविधतर्कविकर्कशवर्त्मभिः ।
त्रिविधलक्षणलक्ष्यविधास्वसौ
वितनुते विधिदर्पणदूषणम् ॥
विधिरत्नावली सेयं विबुधानन्ददायिनी ।
सुखोपजीविनीकण्ठे भासतां भावुकार्पिता ॥
भूसारपुरवाधूलवंशवारिधिसंभवः ।
श्रीनिवासोऽधुनानन्दं कर्तुमारभते सताम् ॥

इह किल भगवान् परमकारुणिको जैमिनिः कुमतिकृतकुकृतिशतदोषदूषितानखिलानापि वेदान् व्याचिकीर्षुः तदर्थविचारात्मकं कर्ममीमांसाख्यं शास्त्रमवतारयामास । तत्र च वेदार्थभूतं सर्वमपि कर्मजातं विहितनिषिद्धात्मकं विध्येकसमधिगम्यमिति तत्त्वैविध्यमपि विधिर्वा स्यादपूर्वत्वात् नियमार्था वा पुनः श्रुतिः परिसंख्या वेत्येवमादिष्वसूत्रयत् । तदिदं विधित्रैविध्यमाचार्यपादैर्लक्षणोदाहरणाभ्यां सम्यगुपपादितम् ।

Colophon on Folio 73 :

इति श्रीभूसारपुरवास्तव्यवाधूलकुलतिलकश्रीलक्ष्मणार्यगुरुचरणनलिनसमधिगतसकलविद्याविशारदस्य तदनन्यदैवतस्य तल्लब्धात्मतत्त्वयाथात्म्यस्य तदनुजश्रीनृसिंहार्यसूरिसूनोः श्रीनिवासदासस्य कृतौ विधिरत्नावल्यामुदाहरणनिरासः संपूर्णः ।

End :

न च व्रीह्यादिश्रुत्या द्रव्यसामान्योद्देशप्रतीतिदशायां विलम्बितप्रकरणेनापूर्वार्थत्वानवगमात् नात्राधानन्यायावतार इति वाच्यम् । मन्त्राणां दृष्टादृष्टद्वारविशेषौदासीन्येन लिङ्गविनियोगात्पूर्वं प्रकरणादपूर्वार्थत्वसिद्धिवद्गुणप्रधान.

349 54. A. 43.

विधिविवेकः—नारायणशास्त्रिकृतः

Paper. 152 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from the original palm-leaf MS. described in the next number.

This is an original treatise on the characteristics and scopes of various Vidhis as accepted by the followers of Kumārila's school of Pūrvamīmāṁsā. In this connection he deals with the various subjects explained in different adhyāyas of the Pūrvamīmāṁsāsūtras. The author Nārāyaṇasāstrin belongs to the Kollūri family of Āndhradesa and was the son of Kollūri Somayājin and Accamāmbā. (See for further particulars about the author, No. 342 of this volume.)

The MS. contains Pariccheda 1 to 6 complete and the 7th incomplete as given below :

Pariccheda—१. शास्त्रारम्भसमर्थनम् ।
२. नित्यकाम्यविवेकः ।

३. श्रुतिविनियोगः ।
४. लिङ्गादिविनियोगः ।
५. प्रयुक्तिविचारः ।
६. अधिकारनिर्णयः ।
७. अतिदेशविचारः ।

Beginning:

. . . . . हृद्वयोमगं दारयन्
प्रज्ञावारिधिमुन्नतिं च गमयन् सोमः सदोदेति यः ।
तं संसारसहस्ररश्मिजनित . . . . . .
. . . . . चिन्त्यचरणाम्भोजं भजे शंकरम् ॥

वन्दे श्रीदक्षिणामूर्तिं वन्दकाभीष्टदायकम् ।
अज्ञानदारकं मोक्षदायकं परमेश्वरम् ॥

स्वाध्यायोऽध्येतव्य इति विधि . . . . परत . . . विधिप्रयुक्तं न त्वध्यापनविधिप्रयुक्तमित्याचार्यमतानुसारिणो वर्णयन्ति । गुरुमतानुसारिणस्तु सेतिकर्तव्यताकमध्ययनमध्यापनविधिप्रयुक्तमिति प्रतिपादयन्ति । आचार्यककामस्याध्यापनविषयकं कार्यमिति अध्यापनविधितः प्रतीयते । तच्चाध्यापनमध्ययनमन्तरा नोपपद्यत इति अध्ययनं प्रयोजयति ।

Colophon on Fol. 37(*a*):

इति श्रीकोल्लूरिकुलतिलकसोमयाजितनयस्य अच्चमाम्बागर्भसंभूतस्य कोल्लूरि-नारायणशास्त्रिणः कृतौ विधिविवेकसमाख्यायां प्रथमः परिच्छेदः ।

End:

भाष्यकारेण क्वचित्फलस्य भाव्यतामाश्रित्य तत्प्रयुक्तता धर्माणां . . . . पूर्वस्य प्रयोजकतामाश्रित्य धर्माणां . . . . तस्यैव भाव्यतयान्वयेन प्रत्यवाय . . . . मतेः फलता तदर्थः ।

350 28. E. 25.

विधिविवेकः—नारायणशास्त्रिकृतः

Palm-leaf. 74 Foll. $16\frac{1}{4} \times 1\frac{1}{2}$ inches. 7 lines in a page. Telugu script. Old. Much injured. Good writing.

This is the Original MS. from which the transcript described in the last number was made.

Breaks off in the 7th Pariccheda.

351 41. A. 79.

भाट्टसारः—कृष्णतातार्यकृतः

Paper. 107 Foll. $8\frac{1}{2} \times 6\frac{1}{2}$ inches. 25 lines in a page. Grantha script. Old. Good. Good writing. Written on one side of paper.

This is a short treatise on the Pūrvamīmāṁsāsūtras of Jaimini, explaining the principles as laid down in various adhikaraṇas thereof. As the work strictly follows the view of the Bhāṭṭa School of Mīmāṁsā, it is named Bhāṭṭasāra appropriately. The author Kṛṣṇatātācārya was a native of the village Tirupputkuzhi. He lived at Kāncīpuram recently about 60 years ago. He bore the title of Mahāmahopādhyāya confirmed on him by the Government. He was a great scholar renowned in Nyāya, Mīmāṁsā and Viśiṣṭādvaitavedānta. He led through out a pious and orthodox life and gained great respect in South India. He was the author of many works including the Avacchedakatāsara, Durarthadūrīkaraṇa, Śatakoṭikhaṇḍana and Commentaries on the Nyāyapariśuddhi and Nyāyasiddhañjana.

The work was printed and published in the journal Sahṛdayā at Madras.

Complete in four adhyāyas.

Beginning :

रघुवरचरणद्वन्द्वध्यानसुधास्वादनित्यतृप्तेन ।
श्रीकृष्णतातसुधिया क्रियते कुतुकेन भाट्टसारोऽयम् ॥

प्रमाणाधीनसिद्धिकतया प्रमेयस्य प्रमाणमादौ निरूप्यते। तत्र प्रमाकरणं प्रमाणम् । अनधिगताबाधितार्थज्ञानं प्रमा । स्मृतिव्यावृत्तये अनधिगतेति । भ्रमव्यावृत्तये अबाधितेति । धारावाहिकबुद्धिस्थलेऽप्युत्तरोत्तर-ज्ञानानां पूर्वपूर्वज्ञानाविषयतत्तत्क्षणविशेषविषयकतया नाव्याप्तिः । नीरूपस्यापि कालस्य रूपस्येवानुभवानु-रोधेन प्रत्यक्षवेद्यत्वाभ्युपगमात् । अत एव हि किमत्र घटोऽवस्थित इति पृष्टः प्रतिब्रूते—अस्मिन् क्षणे वर्तमानतया मयोपलब्ध इति । प्रकृष्टं कारणं करणम् । अनन्यथासिद्धनियतपूर्ववृत्ति कारणम् ।

End :

एवं यत्र समसंख्याकानां धर्मविप्रतिषेधः, तत्र प्राथमिकस्यैव धर्मानुग्रहः, असंजातविरोधित्वात् । यत्र चाङ्गप्रधानयोर्धर्मविप्रतिषेधः, तत्र प्रधानानुग्रहस्य न्याय्यतयाङ्गस्य धर्मबाध इति । अत एवाग्नीषो-मीयपशोर्न पौर्णमास्यमावास्याकालिकत्वम्, किं तु प्रधानभूतसोमस्येति ।

Colophon :

इति द्वादशे द्वितीयः ।
तृतीयचतुर्थयोः पादयोः समुच्चयविकल्पचिन्ताप्रवृत्ति-रिति संक्षेपः । विस्तरस्तु भाट्टदीपिकादौ द्रष्टव्यः ।

Colophon :

अवगाह्य तन्त्रवारिधिमनघोऽभ्युदहारि भाट्टसारोऽयम् ।
श्रीकृष्णतातसुधिया रघुवरचरणद्वयैकसक्तधिया ॥

352 23. H. 26.

भाट्टसारः—कृष्णतातार्यकृतः

Palm-leaf. 7 Foll. $17\frac{1}{2} \times 1\frac{1}{2}$ inches. 9 lines in a page. Grantha script. Old. Fair. Good writing.

Begins in the fifth adhyāya and breaks off in the third pāda of the sixth adhyāya.

353 64970.

भाट्टसारः—कृष्णतातार्यकृतः

Paper. 16 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Incomplete.

II. VEDĀNTA

(*a*) ADVAITA-VEDĀNTA

354 9. E. 53.

ब्रह्मसूत्राणि—बादरायणकृतानि

Paper. 10 Foll. 10½ × 4 inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This work is a collection of the original Sūtras of Bādarāyaṇa on the Vedānta philosophy. The Brahmasūtras are one of the three basic texts (Prasthānatraya) of the Vedānta philosophy the other two being the Upaniṣads and the Bhagavadgītā and common, like the other two, to the different systems of the Vedānta known as Advaita, Viśiṣṭādvaita, Dvaita etc. The author Bādarāyaṇa is generally held as identical with the famous Vyāsa or Kṛṣṇadvaipāyana the author of the Mahābhārata etc. But some modern critics opine that Bādarāyaṇa and Vyāsa were two distinct authors. The traditional Ācāryas and authors like Padmapāda, Vācaspati, Bhāskara, Rāmānuja, Sudarśana, Vedāntadeśika etc. are in favour of the identity of these two authors. The work is divided into four adhyāyas with four pādas in each. The number of the adhikaraṇas and the Sūtras of the entire work differs according to the Commentators. According to Śrī Saṁkarācārya the total number of adhikaraṇas is 192 and of Sūtras 555.

Complete.

Beginning :

नमः श्रुतिशिरःपद्मषण्डमार्ताण्डमूर्तये ।
बादरायणसंज्ञाय मुनये शमवेश्मने ॥
ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे ।
ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥

अथातो ब्रह्मजिज्ञासा । १ । जन्माद्यस्य यतः । २ । शास्त्रयोनित्वात् । ३ । तत्तु समन्वयात् । ४ ।

End :

दर्शयतश्चैवं प्रत्यक्षानुमाने । २० । भोगमात्रसाम्यलिङ्गाच्च । २१ । अनावृत्तिः शब्दादनावृत्तिः शब्दात् । २२ ।

Colophon :

इति चतुर्थाध्यायस्य चतुर्थः पादः ।

355 9. F. 60.

ब्रह्मसूत्राणि—बादरायणकृतानि

Paper. 6 Foll. 8¼ × 6½ inches. 45

lines in a page. Grantha script. Old. Injured. Clear writing.

Complete.

The colophon mentions the work as Brahmamīmāṁsā.

Reads the verse नमः श्रुतिशिरःपद्म etc. at the end.

356 20. L. 13.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 3 Foll. $15\frac{3}{4} \times 1\frac{3}{4}$ inches. 9 lines in a page. Telugu script. Old. Injured. Good writing.

Breaks off in the 2nd pāda of the 2nd adhyāya.

Begins with the following passages:

शं नो मित्रः शं वरुणः + ओं शान्तिः शान्तिः शान्तिः ।

357 23. G. 36.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 30 Foll. $11\frac{1}{2} \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Begins with the following verses:

श्रीभाष्यतनियन् ।

श्रीमच्छ्रीरङ्गराजाह्वयगुरुकरुणापूरसिद्धाञ्जनाप्ति-
स्वच्छस्वान्तप्रवृत्तिस्फुटतरविदिताशेषक . . . ।
हेतोस्तद्धर्मयोगादनुपधिमह . . . श्लाघनीयं
श्रीशैलार्याभिधानं गुरु . . . तिलकं संश्रयेमद्यनन्याः ॥
सेवे श्रीरङ्गराजार्यं श्रीपराङ्कुशलक्ष्मणम् ।
वीरराघववेदान्तमुनिं वेंकटदेशिकम् ॥
श्रीमद्वेंकटदेशिकं शठजितं नारायणं योगिनं
पद्मावास . . . पराङ्कुशमुनीन् श्रीवण्शठद्वेषिणम् ।
वन्दे श्री . . . नृसिंहवरदौ वात्स्यौ गुरू विश्रुतौ
नाथं हस्ति . . . स्वतन्त्रमनघं तन्त्रे मुनिं ब्रह्मणः ॥
वेदान्ताचार्यरामानुजवरदगुरून् भावये भक्तिनम्रः
सत्कारं विष्णुचित्ते शठजिति विदधे संयमीन्द्रं भजामि।
पूर्णार्यं यामुनेयं मुनिवरमथ तौ रामराजीवनेत्रौ
वन्दे नाथं मुनीन्द्रं वकुलधरचमूनाथलक्ष्मीमुकुन्दान् ॥
व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥
व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥

The total number of adhikaraṇas and Sūtras in the entire work is given as 161 and 543 respectively.

The last page reads the following stanza taken from the Yādhavābhyudaya:

अथ जगन्ति बभूवुरनाविला-
न्यतिमिरा हरितः प्रचकाशिरे ।
अभजदेव निशा दिवसश्रियं
जननभागिनि देवदिवाकरे ॥

358 23. H. 20.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 4 Foll. $17 \times 1\frac{1}{4}$ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 4th pāda of the 1st adhyaya.

Reads the following stanza in the beginning:

सम्यङ्न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥

359 24. F. 18.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 22 Foll. $11\frac{1}{2} \times 1\frac{1}{8}$ inches. 6 lines in a page. Grantha script. Old. Injured. Illegible writing.

Complete.

The total number of adhikaraṇas and sūtras is given as 192 and 555 respectively.

The following date of certain private account of the owner of the MS. is given.

4th day of the Mārgali month of the year Vijaya.

360 24. G. 11.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 17 Foll. $9\frac{1}{2} \times 1$ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

361 24. L. 16.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 13 Foll. $7 \times 1\frac{3}{4}$ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Begins with the following stanza :

सम्यङ्न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥

362 25. C. 17.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 22 Foll. 12×1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writting.

Complete.

The colophon mentions the work as S'ārīrakamīmāṁsā.

The total number of Sūtras is mentioned as 545.

The scribe adds :

मङ्गले शुभकृद्वर्षे सिंहमासे भृगोर्दिने ।
द्वादश्यामदितेस्तारे वात्स्यः श्रीवासराघवः ।
व्यलिखद्ब्रह्मसूत्रं तत्प्रीयतां रङ्गराड् गुरुः ॥

363 25. I. 1.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 8 Foll. $17 \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Illegible writing.

Complete.

The total No. of adhikaraṇas is 192, and of Sūtras 555.

364 25. I. 24.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 18 Foll. $11\frac{1}{4} \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

365 25. M. 6.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 4 Foll. $16 \times 1\frac{1}{2}$ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden Boards are added to both sides.

Complete.

Begins and ends with the passage of S'āntipātha according to S'aṁkara's school.

The total number of adhikaraṇas and sūtras is given as 192 and 555 respectively.

366 25. O. 9.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 14 Foll. 13 × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Adds the following verse at the end:

समन्वयाविरोधौ च साधनं च फलं तथा ।
अर्थानेतान् विजानीयादध्यायानां यथाक्रमम् ॥

The scribe adds:

भास्करे कटकं प्राप्ते दुर्मुख्यब्दे च दक्षिणे ।
बालगोपालतीर्थेन लिखिता सूत्रमालिका ॥
बादरायणसूत्राणां संख्यामेवं विदुर्बुधाः ।
सहस्रार्धं शतार्धं च षडर्धं चैव संख्यया ॥

The total number of sutras is said 553.

367 26. O. 11.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 8 Foll. 13½ × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Clear writing.

Complete.

Adds the following stanzas at the end:

नमः श्रुतिशिरःपद्मषण्डमार्ताण्डमूर्तये ।
बादरायणसंज्ञाय मुनये शमवेश्मने ॥
ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे ।
ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥
वेदान्तार्थविभासकाय गुरवे शान्ताय संन्यासिने
नानावादिनगेन्द्रसंघपवये योगीन्द्रवन्द्याय च ।
मोहध्वान्तदिवाकराय भगवत्पादाभिधां बिभ्रते
तस्मै भाष्यकृते नमोऽस्तु सततं पूर्णाय बोधात्मने ॥

368 28. K. 39.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 17 Foll. 12 × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Reads the following stanzas in the beginning:

नमः श्रुतिशिरःपद्म + नमो भगवतो हरेः ।
शंकरं शंकराचार्यं + भगवन्तौ पुनः पुनः ॥

Reads the following stanzas at the end:

अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥
शंकरं शंकराचार्यं + भगवन्तौ पुनः पुनः ॥
सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥

369 28. K. 40.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 30 Foll. 16 × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wants the first 2 pādas of the 1st adhyāya; otherwise complete.

The total number of adhikaraṇas and sūtras is given as 192 and 555 respectively.

370 29. B. 7.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 10 Foll. 14 × 1⅛ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

The last fol. gives the total number of the Sūtras of each pāda of each adhyāya.

371 29. C. 13.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 7 Foll. 11 × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Begins in the middle of the 1st pāda of the 3rd adhyāya and goes on upto the end of the 4th adhyāya.

Reads the following colophon :

इति श्रीकृष्णद्वैपायनविरचिते ब्रह्मसूत्रे चतुर्थोऽध्यायः।

372 34. G. 16.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 6 Foll. 16½ × 1½ inches. 8 lines in a page. Grantha script. Old. Fair. Good writing.

Complete.

Adds the following stanzas at the end.

श्रीशारीरकमीमांसाशास्त्रे व्यासमुनीरिते।
अध्याया इह चत्वारस्तथा पादाश्च षोडश॥
वेदान्तस्थाधिकरणं द्विनवत्युत्तरं शतम्।
सूत्राणि पञ्चपञ्चाशदधिकं शतपञ्चकम्॥
अथातो ब्रह्म सर्वत्र युष्मद्वाद्यप्यानुमानिकम्।
चतुस्त्रिंशच्छतं सूत्राण्याह सूत्रकृदन्वये॥
स्मृत्यनवकाशदोषरचना न वियत्तथा।
अविरोधे मुनिः सप्तपञ्चाशच्छतसूत्रकृत्॥
तत्संध्ये सर्ववेदान्तपुरुषार्थोऽत इत्यपि।
षडशीतिशतं सूत्राण्यब्रवीत्साधने मुनिः॥
आवृत्तिर्वाङ्मनस्यर्चिःसंपद्याविरिति क्रमात्।
. . . . . ॥
नमः श्रुतिशिरःपद्मषण्डमार्ताण्डमूर्तये।
बादरायणसंज्ञाय मुनये शमवेश्मने॥
ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे।
ज्ञानशक्त्यवताराय नमो भगवतो हरेः॥
ईश्वरो गुरुरात्मेति मूर्तिभेदाद्विभागिने।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः॥

373 34. O. 27.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 11 Foll. 10 × 1⅞ inches. 12 lines in a page. Grantha script. New. Good. Good writing.

Complete with Sāntipāṭha in the beginning.

The total number of Adhikaraṇas is given as 192, and of Sūtrās 555.

374 40. A. 38.

ब्रह्मसूत्राणि—बादरायणकृतानि

Paper. 14 Foll. 9 × 5 inches. 11 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Complete.

375 40. D. 24.

ब्रह्मसूत्राणि—बादरायणकृतानि

Paper. 25 Foll. $9\frac{1}{2} \times 4$ inches. 8 lines in a page Devanāgarī script. Old. Good. Good writing.

Complete.

The colophons specify the various adhyāyas and pādas with the following terms :

१—१ इति श्रीब्रह्मसूत्रे बादरायणीये समन्वयाख्यस्य प्रथमाध्यायस्य स्पष्टब्रह्मलिङ्गाख्यः प्रथमः पादः ।
२ उपास्यब्रह्मलिङ्गाख्यो द्वितीयः पादः ।
३ ज्ञेयब्रह्मलिङ्गाख्यस्तृतीयः पादः ।
४ पदमात्रसमन्वयाख्यश्चतुर्थः पादः ।
२—१ द्वितीयस्याविरोधाख्यस्य स्मृतितर्काविरोधो नाम प्रथमः पादः ।
२—२ परमतदुष्टताबोधको द्वितीयः पादः ।
२—३ भूतश्रुत्यविरोधो नाम तृतीयः पादः ।
२—४ लिङ्गशरीरश्रुत्यविरोधाख्यश्चतुर्थः पादः ।
३—१ साधनाख्यस्य वैराग्यपादः प्रथमः ।
३—२ त्वंपदार्थादिपरिशोधनो नाम द्वितीयः पादः ।
३—३ गुणोपसंहारो नाम तृतीयः पादः ।
३—४ ज्ञानबहिरङ्गसाधनो नाम चतुर्थश्चरणः ।
४—१ जीवन्मुक्तिनिरूपणं नाम प्रथमः पादः ।
४—२ उत्क्रान्तिपादो द्वितीयः ।
४—३ उत्तरगतिनिरूपणो नाम तृतीयः पादः ।
४—४ ब्रह्मप्राप्तिब्रह्मलोको नाम चतुर्थः पादः ।

संपूर्णोऽयं फलाख्यश्चतुर्थोऽध्यायः ॥

Then reads the S'āntipāṭha as पूर्णमदः etc, सूत्रसंख्या 555, अधिकरणसंख्या 192.

The scribe adds : १७६२ शके शार्वरि पौष शु २ भृगुवासरे श्रीगोदाया उत्तरतटे श्रीपञ्चवटिकाक्षेत्रे श्रीसीतारामचरणसंनिधाने संपूर्णमस्तु । श्रीसद्गुरुरामदाससिद्धपदाम्बुजाय नमः ।

376 42. A. 15.

ब्रह्मसूत्राणि—बादरायणकृतानि

Paper. 13 Foll. $13\frac{1}{4} \times 2\frac{3}{4}$ inches. 6 lines in a page. Bengāli script. Old. Injured. Good writing.

Complete in 4 adhyāyas.

377 8. H. 27.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Paper. 105 Foll. 17 × 7 inches. 29 lines in a page. Grantha script. Old. Good. Good writing.

This is the well-known Bhāṣya on Bādarāyaṇa's Brahmasūtras by the Great S'aṁkarācārya, disciple of Govindabhagavatpāda, who is said to have been the disciple of Gauḍapādācārya. Numerous works have been indiscriminately mentioned under the authorship of S'rī S'aṁkarācārya. It is difficult to say exactly how many of them were actually written by him. However his commentaries on the ten principal Upaniṣads and Brahmasūtras can be definitely said as to have been his genuine works. The date generally accepted for S'aṁkara is 788 to 820 A.D. But recently some modern scholars like MM. S. Kuppuswami S'āstri have opined that S'rī S'aṁkara's date should be 632 to 664 A.D. In this

connection they have also fixed the dates of some important authors thus: Gauḍapāda 520 to 620 A.D. Govindabhagavatpāda 560 to 650 A.D. Dharmakīrti 600 to 650 A.D. Bhartṛhari 591 to 651 A.D. Padmapāda 625 to 705 A.D. Sures'vara 620 to 700 A.D. Kumārila 600 to 660 A.D. Prabhākara 610 to 690 A.D. Maṇḍana 615 to 695 A.D. Umbeka 640 to 725 A.D. S'alikanātha 650 to 730 A.D. (Vide the page 58 of the Introduction to the Brahmasiddhi, published in the MSS. Series No. 4, Madras Govt. Oriental in the year 1937).

Complete in 4 adhyāyas.

The following stanzas are added by the scribe in the beginning.

मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥
स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥
भूमा नः पातु भगवान् परागगणनायकः ।
विघ्नानुत्सारयंस्तूलानिव कर्णमहानिलैः ॥
विघ्नेश्वरं विघ्नशान्त्यै वाणीं वाचः प्रवृत्तये ।
गुरून् गूढार्थभानाय प्रणमामि निरन्तरम् ॥
नमः श्रुतिशिरःपद्मषण्डमार्ताण्डमूर्तये ।
बादरायणसंज्ञाय मुनये शमवेश्मने ॥
ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे ।
ज्ञानशक्त्यवताराय नमो भगवते हरेः ॥

Beginning:

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमः-प्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासस्तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तम् । तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेनात्यन्तविविक्तयोर्धर्म - धर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः ।

End:

अन्तवत्त्वेऽपित्वैश्वर्यस्य यथानावृत्तिस्तथा वर्णितम्—कार्यात्यये तदध्यक्षेण सहातः परमित्यत्र । सम्यग्दर्शनविध्वस्ततमसां तु नित्यसिद्धनिर्वाणपरायणानां सिद्धैवानावृत्तिः । तदाश्रयणेनैव हि सगुणशरणानामप्यनावृत्तिसिद्धिरिति । अनावृत्तिः शब्दादनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिद्योतक इति ।

संपद्य सप्त द्वाविंशतिः ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीमच्छारीरकमीमांसाभाष्ये चतुर्थस्याध्यायस्य चतुर्थः पादः ।

The scribe adds:

यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥

378 8. F. 59.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Paper. 11 Foll. 12 × 8½ inches. 50

lines in a page. Telugu script. Old. Injured. Illegible writing.

The leaves have been pasted with thin paper and hence the letters are not legible.

Contains a small fragment beginning with 14th Sūtra and ending with 18th Sūtra of the 3rd pāda of the 2nd adhyāya.

379 19. M. 65.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 151 Foll. 18 × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

380 20. L. 9.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 154 Foll. 15 × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wants beginning in the 2nd pāda of the 2nd adhyāya and breaks off in the 1st pāda of the 3rd adhyāya and then contains a fragment of the 3rd pāda of the 3rd adhyāya.

The last page contains a few Cāṭu verses.

381 20. L. 11.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 84 Foll. 17½ × 2 inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Begins in the 24th Sūtra of the 2nd pāda of the 1st adhyāya and breaks off in the 7th Sūtra of the 2nd pāda of the 2nd adhyāya.

382 20. L. 12.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 26 Foll. 15¾ × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the first 7 Sūtras of the 1st pāda of the 1st adhyāya.

The fly-leaf at the end reads the S'āntipāṭha शं नो मित्रः शं वरुणः etc.

383 20. L. 13.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 16 Foll. 15½ × 2 inches. 10 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the first 4 sūtras of the 1st pāda of the 1st adhyāya; 5th adhikaraṇa of the 2nd pāda of the 2nd adhyāya and the 2nd adhikaraṇa of the 1st pāda of the 4th adhyāya.

Begins with S'āntipāṭha and the following verse :

या परा या च पश्यन्ती मध्यमा वैखरी च या ।
तस्यै नमो नमो वाचे विश्वव्यञ्जनहेतवे ॥

384 20. L. 15.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 119 Foll. 18½ × 2¼ inches.

20 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden board is added at the end.

Wants beginning in the 3rd pāda of the 1st adhyāya and breaks off in the 4th pāda of the 4th adhyāya.

385 20. L. 18.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 100 Foll. 16 × 1½ inches. 13 lines in a page. Grantha script. Old. Injured. Legible writing.

Wooden boards are added to both sides.

Wants beginning in the 1st pāda of the 2nd adhyāya and breaks off in the 3rd pāda of the 4th adhyāya.

386 20. N. 3.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 155 Foll. 15¾ × 2 inches. 13 lines in a page. Malayālam script. Old. Injured. Good writing.

Wooden boards are added to both sides.

The first 4 leaves are partly broken.

Begins in the 2nd adhyāya and breaks off in the 1st pāda of the 4th adhyāya.

387 22. Q. 9.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 44 Foll. 10¾ × 1¼ inches. 11 lines in a page. Grantha script. Old. Injured. Legible writing.

Contains a fragment of the 1st pāda of the 1st adhyāya.

388 22. R. 17.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 49 Foll. 19 × 2¼ inches. 14 lines in a page. Telugu script. Old. Injured. Clear writing.

Contains the adhyāya 2 only.

389 23. C. 29.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 273 Foll. 16¾ × 1¼ inches. 10 lines in a page. Grantha script. Old. Fair. Good writing.

The leaves are arranged in 3 groups. The first group contains 112 Foll. the second 93 and the third 68.

Complete in 4 adhyāyas.

Fol. 89*b* contains the following stanza apparently added by the scribe:

उद्यद्भास्वत्समाभां विजितनवजपामिन्दुखण्डावनद्ध-
ज्योतिर्मौलिं त्रिनेत्रां विविधमणिलसत्कुण्डलां पद्मगां च।
स्फारग्रैवेयकाञ्चीगुणमणिवलयाद्यैर्विचित्राम्बराढ्या-
मम्बां पाशाङ्कुशेष्टाभयवरदकरामम्बिकां तां नमामि॥

The former owner of the MS. was सुब्रह्मण्यदीक्षितः।

390 23. O. 12.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 96 Foll. 15½ × 1½ inches. 10 lines in a page. Grantha script. Old. Injured. Legible writing.

Wants beginning in the 2nd pāda of the 3rd adhyāya and goes on upto the end of the 4th adhyāya.

391 24. D. 17.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 216 Foll. $15\frac{1}{2} \times 1\frac{1}{2}$ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 3rd pāda of the 3rd adhyāya.

The fly-leaf added in the beginning contains a few Sūtras of the Brahmasūtra text.

392 27. N. 36.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 209 Foll. $17\frac{3}{4} \times 1\frac{3}{4}$ inches. 10 lines in a page. Grantha script. Old. Much injured. Good writing.

Wants beginning in the 1st pāda of the 1st adhyāya and breaks off in the 1st pāda of the 4th adhyāya.

393 27. N. 37.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 255 Foll. $14\frac{3}{4} \times 1$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides. Almost complete.

394 29. L. 30.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 131 Foll. 18×2 inches. 13 lines in a page. Telugu script. Old. Fair. Good and small writing.

Wooden boards are added to both sides. Complete in 4 adhyāyas.

395 36. E. 7.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Paper. 542 Foll. 15×8 inches. 13 lines in a page. Devanāgarī script. Old. Good. Good writing.

The folios are arranged in four sets. The first set contains 221 Foll. the second 153, the third 124 and the fourth 44. Total 542.

Each page contains the text copied in the centre and the commentary Bhāṣya-ratnaprabhā copied up and down the text.

Complete.

The date of copying Saṁ. 1885, S'aka 1750 = 1828 A.D.

396 40. A. 48.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Paper. 41 Foll. $8 \times 4\frac{1}{8}$ inches. 11 lines in a page. Devanāgari script. New. Good. Good writing.

Breaks off in the आकाशाधिकरण.

397 9. J. 16.

ब्रह्मसूत्रभाष्यव्याख्या पञ्चपादिका—पद्मपादाचार्यकृता

Paper. 131 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches, 20 lines in a page. Grantha script. Old. Much injured. Illegible writing.

The Pañcapādikā is one of the oldest commentaries on S'rī S'aṁkarācārya's Brahmasūtrabhāṣya. As the title indi-

cates the work must have contained the commentary for the first 5 pādas *i.e.*, the whole of 1st adhyāya and the first pāda of the 2nd adhyāya. But as a matter of fact all the MSS. and printed editions of the work contain only the portion of Catussūtrī *i.e.*, the first four sūtras of the 1st pāda of the 1st adhyāya. However the break has been accounted for by Mādhava in his S'aṁkaravijaya by alluding certain incidents which took place between Padmapāda, and his preceptor S'rī S'aṁkarācārya. Padmapāda is said to have been one of the four direct disciples of S'rī S'aṁkarācārya the other three being Sures'vara, Toṭaka and Hastāmalaka. Hence, he may be fixed in the 7th century A.D. as held by MM. S. Kuppuswami Sastri in his Introduction to the Brahmasiddhi, published in the Madras Govt. Oriental MSS. Series No. 4. The work so far as available is divided into 9 chapters called Varṇakas. The first sūtra contains four Varṇakas, the second one, the third two and the fourth two.

Contains the Catussūtrī portion complete.

Beginning :

अनाद्यानन्दकूटस्थज्ञानानन्तसदात्मने ।
अभूतद्वैतजालाय साक्षिणे ब्रह्मणे नमः ॥
नमः श्रुतिशिरःपद्मषण्डमार्ताण्डमूर्तये ।
बादरायणसंज्ञाय मुनये शमवेश्मने ॥
नमाम्यभोगीट्परिवारसंपदं
निरस्तभूतिं त्वनुमार्धविग्रहम् ।
अनुग्रमुन्मर्दितकाललाञ्छनं
विना पिनाकं तमपूर्वशंकरम् ॥
यद्वक्त्रमानससरःप्रतिलब्धजन्म-
भाष्यारविन्दमकरन्दरसं पिबन्ति ।
प्रत्याशमुन्मुखविनीतविनेयभृङ्गा-
स्तान्भाष्यवित्तकगुरून्प्रणमामि मूर्ध्ना ॥
पदादिवृन्तभारेण गरिमाणं बिभर्ति यत् ।
भाष्यं प्रसन्नगम्भीरं तद्व्याख्यां श्रद्धयारभे ॥

युष्मदस्मत्प्रत्ययगोचरयोरित्यादि अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहार इत्यन्तं भाष्यम् । अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इत्यनेन भाष्येण पर्यवस्यच्छास्त्रस्य विषयं प्रयोजनं चार्थात् प्रथमसूत्रेण सूत्रिते इति प्रतिपादयति । एतच्च तस्मात् ब्रह्म जिज्ञासितव्यमित्यादिभाष्ये स्पष्टतरं प्रतिपादयिष्यामः ।

End :

यथा देहे विशिष्टजातीये तद्व्यतिरिक्तस्याहंकर्तुरहंमानसंबन्धः कल्पितोऽपि स्वनिबन्धनलोकशास्त्रव्यवहारे यथावगतितत्त्वहेतुः, तथायं कल्पितोऽप्यलौकिकात्मस्वरूपप्रतिपत्तेः प्राक् प्रमाणं निश्चितप्रत्ययोत्पादनाद्बाधानुपलब्धेश्चेति ।

इति नवमं वर्णकम् ।

Colophon :

इति श्रीपद्मपादाचार्यविरचितायां पञ्चपादिकायां चतुःसूत्री समाप्ता ।

परिसमाप्तश्चायमुपलभ्यमानो ग्रन्थः ।

The scribe adds :

श्रीमत्सकललोकलोचनरञ्जनतञ्जापुरसंस्थानमण्डनायमाने श्रीमदखिलजनमाननीयपण्डितमण्डलीमण्डिते श्रीमति वटारण्यक्षेत्रे लोकोपकाराय श्रीसुब्बाशास्त्रि-

कुमारैः यस् वेंकटरामार्यैः प्रतिष्ठापितायां वेदवेदान्तादिवर्धिन्याख्यायां श्रीमत्पुस्तकशालायामेतच्छालासंरक्षकैः श्रीमद्वासुदेवशास्त्रिकुमारैः श्रीनिवासशास्त्रिभिः लेखकप्रमादादिदोषैर्विना सम्यक् परिशोध्य विलिखितसमापितेयं पञ्चपादिका ।

398 10. E. 4.

ब्रह्मसूत्रभाष्यव्याख्या पञ्चपादिका—पद्मपादाचार्यकृता

Paper. 101 Foll. 10 × 4½ inches. 16 lines in a page. Devanagārī script. Old. Good. Good writing.

The folios are marked with numbers 1 to 103. Folio numbers 2 and 4 are missing.

Total number of Granthas is mentioned 1854.

The date of copying:

संवत् 1751 वर्षे शके 7611 प्रवर्तमाने कार्तिकमासे शुक्लपक्षे ४ चरशुक्रे ले.

The third stanza in the beginning is read thus:

नमाम्यभोगिपरिवारसंपदं
निरस्तभूतिमनुमार्धविग्रहम् ।
अनुग्रमुन्मृदितकाललाञ्छनं
विना विनायकमपूर्वशंकरम् ॥

Contains upto the end of the Catussūtrī.

399 25. N. 29.

ब्रह्मसूत्रभाष्यव्याख्या पञ्चपादिका—पद्मपादाचार्यकृता

Palm-leaf. 49 Foll. 17½ × 1¾ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Foll. 29 to 49 are short in size with 16 × 1¾ inches.

Breaks off in the 4th sūtra.

400 26. G. 11.

ब्रह्मसूत्रभाष्यव्याख्या पञ्चपादिका—पद्मपादाचार्यकृता

Palm-leaf. 104 Foll. 16½ × 1½ inches. 5 lines in a page. Telugu, Grantha and Malayalam scripts. Old. Injured. Good writing.

Contains the Catussūtrī in duplicate.

401 26. M. 27.

ब्रह्मसूत्रभाष्यव्याख्या पञ्चपादिका—पद्मपादाचार्यकृता

Palm-leaf. 37 Foll. 13½ × 1½ inches. 12 lines in a page. Grantha script. Old. Injured. Clear writing.

Breaks off in the 1st Sūtra.

402 28. F. 37.

ब्रह्मसूत्रभाष्यव्याख्या पञ्चपादिका—पद्मपादाचार्यकृता

Palm-leaf. 24 Foll. 16 × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Illegible and small writing.

Wooden boards are added to both sides.

Wants the first leaf for the beginning; otherwise Catussūtrī portion complete.

403 33. M. 9.

ब्रह्मसूत्रभाष्यव्याख्या पञ्चपादिका—पद्मपादाचार्यकृता

Palm-leaf. 26 Foll. 19 × 1⅞ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 3rd Varṇaka of the 1st sūtra.

404 28. E. 15.

पञ्चपादिकाव्याख्या विवरणम्—प्रकाशात्मकृतम्

Palm-leaf. 124 Foll. 18 × 1½ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

This is the famous commentary on the Pañcapādikā of Padmapādācārya. The commentary is called Vivaraṇa. The author Prakāśātman was the disciple of Ananyānubhava. As Śrī Rāmānuja (1017-1137 A.D.) has criticised in his Śrī-Bhāṣya the views of the Pañcapādikā-vivaraṇa, Prakaśātman must have flourished earlier than the 11th century A.D. and most probably about 950 A.D. The work is known to have had a great reputation among the writers on Vedānta. There are two systems or Prasthānas of Śrī Saṁkara's school of Vedānta known as Vivaraṇaprasthāna and Bhāmatīprasthāna with slight variations in certain principles like Ekajīvavāda, Avidyāśrayavāda etc. The former Prasthāna has been based on the Pañcapādikavivaraṇa of Prakāśātman and the latter on the Bhāmatī of Vācaspatimiśra (850 A.D). The work has the following commentaries—Tattvadīpana by Akhaṇḍānandanuni, Rjuvivaraṇa by Viṣṇubhaṭṭa and Bhāvaprakāsikā by Nṛsiṁhāśrama. The first two of these commentaries have been printed and published in the Calcutta Sanskrit Series No. I.

Contains the catussūtrī portion complete.

Beginning :

पालने विमलसत्त्ववृत्तये जन्मकर्मणि रजोजुषे लये।
तामसाय जगतः पराकृतद्वैतजालवपुषे नमः सते॥
यस्याः प्रसादमवलम्ब्य जगद्गुरूणा-
मप्यस्खलद्बहुगुणाः प्रसरन्ति वाचः।
सा वेदशास्त्रपरिनिर्मितवन्द्यदेहा
भूयात्समग्रवरदैव सरस्वती नः॥
विघ्नाभितापमभिहत्य मदीयकृत्य-
बीजं प्रवृद्धिमदनुग्रहवर्षपातैः।
संप्रार्थितः सिततरोऽपि गणेशमेघः
सिञ्चन्नभीष्टफलमङ्कुरयत्वमोघम्॥
श्यामोऽपि श्रुतिकमलावबोधरागः
शान्तः सन्नयति तमो विनाशमन्तः।
नीरूपं प्रथयति योऽपि गोसहस्रै-
स्तं व्यासं नमत जगत्यपूर्वभानुम्॥
उद्धृत्य वेदपयसः कमलामिवाब्धे-
रालिङ्गिताखिलजगत्प्रभवैकमूर्तिम्।
विद्यामशेषजगतां सुखदामदाद्य-
स्तं शंकरं विमलभाष्यकृतं नमामि॥
वन्दे तमात्मसंबुद्धस्फुरद्ब्रह्मावबोधतः।
अर्थतोऽपि न नाम्नैव योऽनन्यानुभवो गुरुः॥
प्रकाशात्मा यतिः सम्यक् प्राप्तविद्याशुश्रुत्सया।
यथाश्रुति यथाशक्ति व्याख्यास्ये पञ्चपादिकाम्॥
विदितसकलवेदैर्न प्रशंसन्ति लोके
ग्रथितमपि महद्भिः किं पुनर्मादृशेन।

इति विफलसमेऽस्मिन् वाग्व्ययेऽहं प्रवृत्तः
स्वमतिविमलतायै क्षन्तुमर्हन्ति सन्तः ॥

प्रारिप्सितग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय चाभिलषितदेवतापूजानमस्कारः कर्तव्यः, शास्त्रार्थस्य तत्त्वंपदार्थविवेकोपायलभ्यः प्रत्यग्ब्रह्मणोरैकत्वलक्षणः संक्षेपतो दर्शनीयः कृत्स्नस्य भाष्यस्य तत्र तात्पर्यकथनायेति तदुभयं श्रुत्यर्थाभ्यां संक्षेपतो दर्शयति—अनादीति ।

End:

तृतीयश्लोकं व्याचष्टे । अद्वितीयनिरतिशयानन्द-चैतन्यैकतानसर्वज्ञसर्वेश्वरसर्वशक्तिनिरवयवस्वच्छासङ्ग-प्रत्यग्भूतब्रह्मात्मन्यपरोक्षानुभवात्प्राक् देहात्मप्रत्ययवत् सर्वो व्यवहारो यथादर्शनमुपपद्यते । तस्मिंश्चापरोक्षे-ऽवभासमाने प्रमातृत्वादिबाधात् सर्वो व्यवहारो निवर्तत इति श्लोकार्थः ।

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यानन्यानुभवपूज्य-पादशिष्यस्य प्रकाशात्मभगवतः कृतौ पञ्चपादिका-विवरणे समन्वयसूत्रं नवमवर्णकं समाप्तम् ।

405 23. M. 5.

पञ्चपादिकाव्याख्या विवरणम्—प्रकाशात्मकृतम्

Palm-leaf. 133 Foll. 15 × 1¼ inches. 10 lines in a page. Grantha script. Old. Injured. Clear writing.

Wooden boards are added to both sides.

Two leaves in the beginning are much broken.

Incomplete.

406 28. F. 5.

पञ्चपादिकाव्याख्या विवरणम्—प्रकाशात्मकृतम्

Palm-leaf. 137 Foll. 17 × 1¾ inches. 10 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

407 28. F. 37.

पञ्चपादिकाव्याख्या विवरणम्—प्रकाशात्मकृतम्

Palm-leaf. 126 Foll. 16 × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Illegible and small writing.

Wooden boards are added to both sides.

Breaks off in the 9th Varṇaka.

408 26. K. 4.

पञ्चपादिकाव्याख्या विवरणम्—प्रकाशात्मकृतम्

Palm-leaf. 156 Foll. 17¾ × 1 inches. 11 lines in a page. Grantha and Telugu scripts. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete Catussūtrī portion.

409 34. A. 8.

पञ्चपादिकाव्याख्या विवरणम्—प्रकाशात्मकृतम्

Palm-leaf. 133 Foll. 19 × 2 inches. 12 lines in a page. Grantha script. Old. Good writing.

Complete Catussūtrī portion.

410 21. G. 12.

पञ्चपादिकाविवरणव्याख्या तत्त्वदीपनम्—अखण्डानन्दमुनिकृतम्

Palm-leaf. 296 Foll. 17½ × 1⅛ inches 6 lines in a page. Telugu script. Old. Injured. Good writing.

The Tattvadīpana is a commentary on Prakāśātman's Pañcapādikāvivaraṇa, by Akhaṇḍānandamuni, the pupil of Akhaṇḍānubhūti according to the colophon. In the introductory verses 4 and 5, he salutes Bodhapṛthvīdhara and Ānandaśaila respectively evidently as his preceptos. As the words Pṛthvīdhara and Śaila are synonymous to Giri, the two names mentioned above may be taken to refer to Ānandajñānagiri which is another name of Ānandagiri. Therefore it is presumed that our author Akhaṇḍānandamuni must be pupil of both Akaṇḍānubhūti and Ānandagiri the famous commentator on Śrī Śaṁkara's Bhāṣyas. As Ānandagiri is said to have belonged to the last part of the 13th Century, our author Akhaṇḍānandamuni may be placed in the beginning of the 14th Century A.D. as a contemporary of Viṣṇubhaṭṭa the author of another Commentary on Pañcapādikāvivaraṇa described in the No. 423 of this volume. (See for the date and works of Ānandagiri, the introduction to the Tarkasaṁgraha of Ānandajñāna, published in the Gaekwad's Oriental Series No. 3). The work has been printed and published in the Benares Sanskrit Series in 1902. and the Calcutta Sanskrit Series No. I.

Contains the first four Sūtras (Catussūtrī) of the 1st pāda of the 1st adhyāya.

Beginning:

ओं नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रसन्नाय दक्षिणामूर्तये नमः ॥ १ ॥
यदबोधसमुद्भूतं यद्बोधात्प्रविलीयते ।
नामरूपात्मकं विश्वं तस्मै पूर्णात्मते नमः ॥ २ ॥
जटाजूटं बिभ्रत् क्वचिदपरत्राद्भुतकच-
स्तथैकस्मिन् भागे भसितमपरत्रात्तघृणः ।
फणीन्द्रं चैकस्मिन्मणिगणधरोऽन्यत्र भगवान्
गिरीशः श्रेयो नः प्रदिशतु शिवाभिश्रितवपुः ॥३॥
दिक्कूलंकषकीर्तिफेनविशदप्रोद्दामविद्याजल-
भ्राम्यद्वाङ्मयतुङ्गभङ्गविलसत्तीर्थप्रमोदास्पदम् ।
वादिव्रातकथाप्रसङ्गविसरत्तर्काश्मसारोज्ज्वलं
वन्दे सर्वमुनीन्द्रसेव्यमनिशं श्रीबोधपृथ्वीधरम्॥४॥
वादिवारणसंदोहप्रभञ्जनविशारदम् ।
श्रीमदानन्दशैलाह्वपञ्चास्यं सततं भजे ॥ ५ ॥
विमलमदजलौघद्योतमानोरुगण्ड-
स्थलनिकटनिकुञ्जद्भ्राजमानालिमालः ।
जयति पृथुलकण्ठाबद्धमालेन्द्रनीला-
वलिरिव सुरसिद्धाराधितो विघ्नराजः ॥ ६ ॥
आधारपङ्केरुहमध्यसंस्था
मृणालसूत्राकृतिरप्रमेया ।
शीर्षादिभेदास्थितसर्ववर्णा
जिह्वाङ्गणे नृत्यतु वागजस्रम् ॥ ७ ॥
नानाविधनिबन्धाह्वप्रसूनरसमादरात् ।
निबन्धमधु संगृह्य क्रियते तत्त्वदीपनम् ॥ ८ ॥

पञ्चपादिकां व्याचिख्यासुर्ग्रन्थकरणयोग्यतार्थं परदेवतां प्रार्थयते आद्यश्लोकेन । यमेवैष वृणुते तेन लभ्य इतीश्वराधीनत्वं विद्याया लक्ष्यते । विदुषश्च ग्रन्थकरणाधिकारात्परदेवताप्रार्थनमुचितम् । अथैषाक्षरयोजना— सते नम इति संबन्धः ।

End:

ब्रह्मज्ञानोत्तरकालमपि प्रमातृत्वादिकं किं न स्यादित्याशङ्क्यान्तःकरणैक्याध्यासनिबन्धनं हि प्रमातृत्वं तस्मिन् सत्येव भवेत्, नान्यदेत्यभिसंधायाह—तदेवेति । ज्ञाने सत्यपि प्रमातृत्वादिकं दृष्टमित्याशङ्क्य तात्पर्यमाह—अद्वितीयेति । सकल-

शास्त्रव्यवस्थासिध्यर्थं सोपाधिकं निरुपाधिकं च रूपमनूदितमिति द्रष्टव्यम्।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्याखण्डानुभूति-पूज्यपादशिष्येणाखण्डानन्दमुनिना विरचिते तत्त्व-दीपने चतुर्थसूत्रं नवमवर्णकं समाप्तम्।

411 8. J. 60.

पञ्चपादिकाविवरणव्याख्या तत्त्वदीपनम्— अखण्डानन्दमुनिकृतम्

Paper. 532 Foll. 8 × 6½ inches. 14 lines in a page. Devanāgari script. Old. Good. Good writing.

Breaks off in the 3rd Varṇaka of the 1st Sūtra.

412 20. F. 61.

पञ्चपादिकाविवरणव्याख्या तत्त्वदीपनम्— अखण्डानन्दमुनिकृतम्

Palm-leaf. 192 Foll. 16 × 1½ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Wants beginning in the 1st Varṇaka and breaks off in the 3rd Varṇaka.

413 21. G. 9.

पञ्चपादिकाविवरणव्याख्या तत्त्वदीपनम्— अखण्डानन्दमुनिकृतम्

Palm-leaf. 45 Foll. 16½ × 1 inches. 10 lines in a page. Grantha script. Old. Injured. Illegible writing.

Contains the 1st Varṇaka incomplete.

414 23. M. 9.

पञ्चपादिकाविवरणव्याख्या तत्त्वदीपनम्— अखण्डानन्दमुनिकृतम्

Palm-leaf. 94 Foll. 18½ × 2 inches. 15 lines in a page. Grantha script. Old. Injured. Good writing.

The first leaf is partly broken.

Contains the 1st Varṇaka incomplete.

415 24. M. 2.

पञ्चपादिकाविवरणव्याख्या तत्त्वदीपनम्— अखण्डानन्दमुनिकृतम्

Palm-leaf. 288 Foll. 13½ × 1 inches. 8 lines in a page. Grantha script. Old. Much injured. Legible writing.

Bamboo board is affixed in the beginning.

Breaks off towards the end of the 3rd Varṇaka.

416 28. F. 1.

पञ्चपादिकाविवरणव्याख्या तत्त्वदीपनम्— अखण्डानन्दमुनिकृतम्

Palm-leaf. 114 Foll. 18 × 1½ inches. 11 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the 1st Varṇaka only.

The name of the scribe—Alagar.

417 34. G. 24.

पञ्चपादिकाविवरणव्याख्या तत्त्वदीपनम्— अखण्डानन्दमुनिकृतम्

Palm-leaf. 29 Foll. 19½ × 2 inches.

10 lines in a page. Malayālam script. Old. Injured. Good writing.

Contains the 4th Sūtra in Catussūtrī without beginning.

418 34. H. 14.

पञ्चपादिकाविवरणव्याख्या तत्त्वदीपनम्— अखण्डानन्दमुनिकृतम्

Palm-leaf. 206 Foll. $10\frac{1}{4} \times 1\frac{3}{4}$ inches. 9 lines in a page. Malayālam script. Old. Good. Good writing.

Wooden boards are added to both sides.

Contains the 3rd Varṇaka complete.

419 27. N. 39.

पञ्चपादिकाविवरणव्याख्या भावप्रकाशिका— नृसिंहाश्रमकृता

Palm-leaf. 86 Foll. $13\frac{1}{4} \times 1\frac{3}{4}$ inches. 14 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

The Bhāvaprakāśikā is a Commentary on Prakāśātman's Pañcapādikāvivaraṇa by Nṛsiṁhāśrama, pupil of Jagannāthāśrama and Gīrvāṇendrasarasvatī. Nṛsiṁhāśrama is known to have written the following other works: Advaitadīpikā, Tattvaviveka, Tattvavivekadīpana also called Advaitaratnakośa, Saṁkṣepaśārīrakavyākhyā Tattvabodhinī, Pañcapādikāvyākhyā Vedāntaratnakośa and Bhedadhikkāra. Besides these a small work called Nṛsiṁhavijñāpana also has been ascribed to him. A MS. of the Tattvaviveka which has been described in the India Office Library Catalogue Nos. 2379 and 2380 in Part IV reads the following verse at the end of the 2nd Pariccheda :

"अङ्घ्रिद्वन्द्वसमाश्रयः कृतिजगन्नाथाश्रमश्रीगुरो-
र्नाम्ना तत्त्वविवेकमात्मन इति श्रीमन्नृसिंहाश्रमः ।
अब्दे वेदवियद्रसेन्दुगुणिते पौषासितश्रीदिने
रक्षोनामनि पूरुषोत्तमपुरे ग्रन्थं मुदाचीकरत् ॥"

From this verse it is evident that the work was completed at Puruṣottamakṣetra in Saṁ. 1604=1547 A.D. It is also known that he was a contemporary of the famous Appayadīkṣita, Tātācārya, Vijayīndratīrtha, and Doḍḍayācārya. His pupil Nārāyaṇāśrama wrote the works called Nigamāntārthacandrikā, Advaitasiddhāntasārasaṁgraha and commentaries on the Advaitadīpikā and the Bhedadhikkāra. Nṛsiṁhāśrama may be fixed in the middle of the 16th century.

Breaks off in the 2nd Varṇaka of the 1st sūtra.

Incomplete.

Beginning :

यत्सत्यचैतन्यसुखानुलिप्तं
विश्वं हि तत्स्फारमतीव भाति ।
स मां निरस्ताखिलभेद आत्मा
पायादबोधाद्विपदो नृसिंहः ॥
श्रीमद्गुरुपदद्वन्द्वमद्वैतात्मप्रसिद्धये ।
हृदये सदयं भायान्निगूढात्माञ्जनं परम् ॥
श्रीमद्गुरुकृपालेशादद्वैतब्रह्मगोचरे ।
क्वचित्क्वचिद्विवरणे गूढो भावः प्रकाश्यते ॥

निर्विशेषब्रह्मप्रतिपादकग्रन्थकरणस्य तत्प्रतिपत्तिं विना-

योगात् तस्याश्च यमेवैष वृणुते तेन लभ्य इत्यादि-शास्त्रात् परमात्मप्रसादाधीनत्वप्रतीतेर्विषयप्रयोजने दर्शयन् परमात्मनं नमस्करोति—पालन इति ।

End :

अन्तःकरणविशिष्टस्यैव कर्तृत्वात् नाप्यर्थकर्म-विधया ज्ञानविधौ वैरूप्यम् । तदा त्वात्मना ज्ञानं कर्तव्यमिति वचनव्यक्तिः । तत्र चात्मा गुणभूत एव न प्रधानम् । ननु मोक्षफलाय ज्ञानं विधीयत इति.

420 64949.

पञ्चपादिकाविवरणव्याख्या भावप्रकाशिका—नृसिंहाश्रमकृता.

Paper. 263 Foll. $6\frac{1}{4} \times 8\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from the MS. described in the last number.

Incomplete.

421 28. F. 2.

पञ्चपादिकाविवरणव्याख्या भावप्रकाशिका—नृसिंहाश्रमकृता.

Palm-leaf. 102 Foll. $19 \times 1\frac{3}{4}$ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the Catassūtrī portion complete.

The scribe adds the following lines after the colophon :

सोमास्कन्दं परानन्दं कर्पूरधवलं शिवम् ।
रत्नसिंहासनासीनं त्यागराजमहं भजे ॥

सोमास्कन्दं शिवं नत्वा . . . . शङ्खकपालभूषित-करौ मुक्ता . . . .

श्रीकृष्णभूसुरेण लिखिता ग्रन्थराशयः ।

The former owner of the MS. was Veṅkaṭeśa.

422 34. J. 3.

पञ्चपादिकाविवरणव्याख्या भावप्रकाशिका—नृसिंहाश्रमकृता

Palm-leaf. 95 Foll. $15 \times 1\frac{1}{4}$ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wants beginning in the 1st Sūtra and breaks off in the 4th Sūtra of the Catussūtrī.

423 21. T. 2.

पञ्चपादिकाविवरणव्याख्या ऋजुविवरणम्—विष्णुभट्टोपाध्यायकृतम्

Palm-leaf. 340 Foll. 13×2 inches. 10 lines in a page. Malayālam script. Old. Fair. Good writing.

Wooden boards are added to both sides.

This is another Commentary on the Pañcapādikāvivaraṇa of Prakāśātman. The commentary is called Ṛjuvivaraṇa. The commentator Sarvajña Viṣṇubhaṭṭo-pādhyāya was the son of Janārdana, Grand son of Trinetra and pupil of Indrapūrṇa. Janārdana is said to be identical with Ānandagiri, the famous commentator on Śrī Śaṁkara's works. (See the introduction to the Tarkasaṁ-graha of Ānandajñāna, published in the Gaekward's Oriental Series No 3 in the

year 1917.) As Ānandagiri is believed to have lived in the last part of the 13th century A. D. our commentator Viṣṇubhaṭṭa may be fixd in the beginning of the 14th century A.D. According to the Tattvadīpana, its author Akhaṇḍānanda also must have been the pupil of Ānandagiri. Therefore Viṣṇubhaṭṭopādhyāya and Akhaṇḍānanda must have been contemporaries as the pupils of Ānandagiri in the beginning of the 14th century A.D.

It is also understood that Cennubhaṭṭa the commentator on the Tarkabhāṣā was our author's son and protege of Harihara II in the last part of the 14th century.

Complete.

Beginning :

असितजलदरूपं सच्चिदानन्दरूपं
निजभुजजितराज्यं निर्जरेशेड्यपूज्यम् ।
नतजनहितरामं संश्रये स्वात्मरामं
जगदवनकृतं तं भासयन्तं नितान्तम् ॥
जगन्निर्माणनिपुणमोहनिर्वाहहेतवे ।
नमोऽनन्तसुखप्रत्यग्बोधरूपाय विष्णवे ॥
यत्प्रसादसमावाप्तधीविकाससमन्वितः ।
समर्थो वदितुं सम्यक् तां नमामि सरस्वतीम् ॥
अप्रबोधान्यथाबोधविघ्नसंघनिपीडितः ।
मनः करोमि विघ्नेश त्वत्पदद्वन्द्ववन्दने ॥
शमादिसेनां निजरूपजैत्रीं
संगृह्य मोहं परिपन्थिदैत्यम् ।
यो मुक्तिसीतां समवाप जित्वा
तमिन्द्रपूर्णं प्रणतोऽस्मि रामम् ॥
ज्ञानाम्बुजं धर्मपयोनिधिं यो
विकासयन्नेकगवानिशं तम् ।
ब्रह्मेन्दुरूपं कृपया विधत्ते
तमोनिरासं प्रणतोऽस्मि विष्णुम् ॥
गुरुवरकरुणाप्तं भावबोधं समीक्ष्य
ग्रहणकृतिरूपं संप्रदायानुरूपम् ।
ऋजुविवरणसंज्ञं ख्यापनार्थं परेषां
विवरणगतभावं बोद्धुमेतत्करोमि ॥
यथास्थितव्याकृतिरन्यथा च
सोपस्करा भावविवेचनी च ।
मेयोपसंहारभिदैकतादौ
भावाभिधानाय तथोपपत्तेः ॥
संदंशेन च नील्या वा व्याख्यानेन विनापि यत् ।
ज्ञायते विस्तराद्भीतो विवृणोमि विहाय तत् ॥

शास्त्रारम्भेऽभिमतप्रयोजनसिद्ध्यर्थं परदेवतात्वेन प्रतिपाद्यमानं ब्रह्मादौ नमस्करोति—पालने विमलसत्त्ववृत्तय इति ।

End :

ननु ब्रह्मात्मज्ञानात् सर्वव्यवहारनिवृत्तौ संवादो न दर्शनीयः । अत्र कार्याभावप्रामाण्यं च लौकिकस्योक्तम्, न तु व्यवहारनिवृत्तिः । यद्वा प्रकाशत एव सर्वदा ब्रह्म, सर्वेषामात्मत्वात् । अतः कथं तज्ज्ञानाभावात् कृत्याभाव इत्याशङ्क्योक्तमप्यर्थं श्लोकारूढं करोति—अद्वितीयेत्यादिना ।

व्याख्यातो यस्त्रिनेत्रो विदितनिखिलगीस्तत्सुतोयस्य नाम
मीमांसापारगन्तुर्जनरणनयुतो योऽर्दनस्तत्सुतेन ।
बीजं यन्नाम सिद्धं तदिह वननिधेरद्वितोयेन युक्तं
वायोः षष्ठं विधातुर्युतमिह दशमात्पञ्चमेनेशयुक्तः ॥
मेये सुसूक्ष्मे मतिराविरासीद्
गुरोः प्रसादेन कृता हि तेन ।
वेदान्तसिद्धान्तविवेचनाय
टीका च सैवैः परिभावनीया ॥

यदिह गुणविरूपं मन्मनीषानुरूपं
कृतमपि तदवद्यं सद्भिरेवापनोद्यम् ।
श्रुतिपथि विचरन्तं मन्वते न स्खलन्तं
न हि जगति विदोषं विद्यते तद्विशेषम् ॥
मद्देहगेहं समुपेहि राम
हृत्कञ्जपीठेन युतं निरीह ।
आराधये तत्र भवन्तमीशं
भावोपचारैरखिलात्मरूपम् ॥
आराधये राम कथंचिदात्मन्
निःसाधनोऽहं सकलं त्वमेव ।
क्रियापि नो या विषयीकरोति
कर्तापि चाहं न हि भिन्नरूपः ॥

Colophon :

इति स्वामीन्द्रपूर्णपूज्यपादशिष्यस्य सर्वशास्त्रविशारदजनार्दनात्मजगुरुकुमारिलनयपारावारपारगसर्वज्ञविष्णुभट्टोपाध्यायस्य कृतौ ऋजुविवरणे समन्वयसूत्रं समाप्तम् ।

The name of the scribe etc :

Govindan Nambiar's son copied the work in the Dhanus month in the year 1020.

424 34. C. 22.

पञ्चपादिकाविवरणव्याख्या ऋजुविवरणम्—विष्णुभट्टोपाध्यायकृतम्

Palm-leaf. 148 Foll. 19 × 1¾ inches. 11 lines in a page. Malayālam script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete up to the end of the Catussūtrī portion.

425 34. F. 11.

ब्रह्मसूत्रभाष्यव्याख्या भामती—वाचस्पतिमिश्रकृता

Palm-leaf. 94 Foll. 20 × 2¼ inches. 20 lines in a page. Grantha script. Old. Good. Good writing.

Wooden boards are added to both sides.

This is the famous commentary by the celebrated and versatile author Vācaspatimiśra on Śrī Śaṁkarācārya's Brahmasūtrabhāṣya. The Commentary is called Bhāmatī. It is the basic work from which the school called Bhāmatīprasthāna arose as distinct from the other school called Vivaraṇaprasthāna in Śrī Śaṁkarācārya's Advaita system of the Vedanta. The Commentator Vācaspatimiśra mentiones himself as the disciple of Trilocana elsewhere (p. 87 of the Nyāyavārttikatātparyaṭīkā, Vijayanagaram Sanskrit Series) and this fact is confirmed by Udayana and Vardhamāna in their Tātparyaṭīkāparisuddhi and its commentary (p. 9 of the edition of the B. I. S. Calcutta). It is stated that the Bhāmatī was written after writing Nyāyakaṇikā, Tattvasamīkṣā, Tattvabindu, Nyāyavārttikatātparyaṭīkā, Sāṁkhyatattvakaumudī, Nyāyasūcīnibandha and Pātañjalayogasūtrabhāṣyavyākhyā. He himself gives the date of composition of the work Nyāyasūcīnibandha as Saṁ. 898 corresponding to 841 A.D. Udayanācārya (984 A.D.) has commented on the Tātparyaṭīka. Our author mentions a king Nṛga as his contemporary. It is also well known that

Vācaspati was the follower of Maṇḍana-miśra's view on the Vedānta system.

Complete.

Beginning :

अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो
विवर्ता यस्यैते वियदनिलतेजोऽबवनयः ।
यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं
नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतम् ॥
निश्वसितमस्य वेदा वीक्षितमेतस्य पञ्च भूतानि ।
स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलयः ॥
षड्भिरङ्गैरुपेताय विविधैरव्ययैरपि ।
शाश्वताय नमस्कुर्मो वेदाय च भवाय च ॥
मार्तण्डतिलकस्वामिमहागणपतीन्वयम् ।
विश्ववन्द्यान्नमस्यामः सर्वसिद्धिविधायिनः ॥
ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे ।
ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥
नत्वा विशुद्धविज्ञानं शंकरं करुणाकरम् ।
भाष्यं प्रसन्नगम्भीरं तत्प्रणीतं विभज्यते ॥
आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम् ।
रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति ॥

अथ यदसंदिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागोचरः । यथा समनस्केन्द्रियसंनिकृष्टः स्फीतालोकमध्यवर्ती घटः करटदन्ता वा । तथा चेदं ब्रह्मेति व्यापकविरुद्धोपलब्धिः ।

End :

भङ्क्त्वा वाद्यसुरेन्द्रबृन्दमखिलाविद्योपधानातिगं
येनाम्नायपयोनिधेर्नयमथा ब्रह्मामृतं प्राप्यते ।
सोऽयं शांकरभाष्यजातविषयो वाचस्पतेः सादरं
संदर्भः परिभाव्यतां सुमतयः सार्थेषु को मत्सरः ॥
अज्ञानसागरं तीर्त्वा ब्रह्मतत्त्वमभीप्सताम् ।
नीतिनौकर्णधारेण मयापूरि मनोरथः ॥
यन्न्यायकणिकातत्त्वसमीक्षातत्त्वबिन्दुभिः ।
यन्न्यायसांख्ययोगानां वेदान्तानां निबन्धनैः ॥
समचैषं महत्पुण्यं तत्फलं पुष्कलं मया ।
समर्पितमथैतेन प्रीयतां परमेश्वरः ॥
नृपान्तराणां मनसाप्यगम्यां
भ्रूक्षेपमात्रेण चकार कीर्तिम् ।
कार्तस्वरासारसुपूरितार्थि-
सार्थः स्वयं शास्त्रविचक्षणश्च ॥
नरेश्वरा यच्चरितानुकार-
मिच्छन्ति कर्तुं न च पारयन्ति ।
तस्मिन्महीपे महनीयकीर्तौ
श्रीमन्नृगेऽकारि मया निबन्धः ॥

Colophon :

इति श्रीमद्वाचस्पतिमिश्रविरचिते श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छंकरपूज्यभगवत्पादभाष्यविभागे भामत्यां चतुर्थस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

The scribe adds :

बिन्दुदुर्लिपिविसर्गवीथिकावर्णशृङ्गपदभेददूषणम् ।
हस्तवेगजमबुद्धिपूर्वकं क्षन्तुमर्हथ समीक्ष्य सज्जनाः ॥
संन्यासो मे सुलब्धो बहुजनिसुकृतात्सद्गुरोः संनिधानाद्विद्या चापि प्रलब्धा श्रुतिवरजनिता स्वानुभूतिश्च जाता ।
दृष्टा देशा विभिन्ना बहुलनदनदीतीर्थदेवादियुक्ता
मीनाक्षी मे हृदब्जे सुनिवसतु सदा जीर्णदेहस्य देवी ॥

426 21. P. 19.

ब्रह्मसूत्रभाष्यव्याख्या भामती—वाचस्पतिमिश्रकृता

Palm-leaf. 39 Foll. 20½ × 1½ inches. 9 lines in a page. Malayālam script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains up to the end of the 20th sūtra of the 1st pāda of the 1st adhyāya.

427 25. N. 12.

ब्रह्मसूत्रभाष्यव्याख्या भामती—वाचस्पतिमिश्र-कृता

Palm-leaf. 135 Foll. 17 × 1⅜ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Contains up to the end of the 1st pāda of the 2nd adhyāya.

428 25. N. 13.

ब्रह्मसूत्रभाष्यव्याख्या भामती—वाचस्पतिमिश्र-कृता

Palm-leaf. 129 Foll. 17 × 1⅜ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves bear the serial numbers 128 to 255 with an additional leaf without number in the middle. From the hand-writing and size, this MS. seems to be the 2nd part of the MS. described in the last number.

Begins in the 2nd pāda of the 2nd adhyāya and goes on up to end of the 4th adhyāya.

429 25. N. 35.

ब्रह्मसूत्रभाष्यव्याख्या भामती—वाचस्पतिमिश्र-कृता

Palm-leaf. 126 Foll. 16 × 1¼ inches. 11 lines in a page. Grantha script. Old. Much injured. Good writing.

Breaks off in the 18th Sūtra of the 2nd pāda of the 2nd adhyāya.

430 26. K. 6.

ब्रह्मसूत्रभाष्यव्याख्या भामती—वाचस्पतिमिश्र-कृता

Palm-leaf. 192 Foll. 16¾ × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the adhyāyas 2 to 4.

The scribe adds: Copied in the year Vyaya, in the month of Makara.

431 27. B. 9.

ब्रह्मसूत्रभाष्यव्याख्या भामती—वाचस्पतिमिश्र-कृता

Palm-leaf. 62 Foll. 22 × 2 inches. 19 lines in a page. Telugu script. Old. Injured. Clear and small writing.

Wooden board is added at the end.

Complete; but wants 2 lines in the beginning.

432 27. B. 10.

ब्रह्मसूत्रभाष्यव्याख्या भामती—वाचस्पतिमिश्र-कृता

Palm-leaf. 142 Foll. 15 × 1¾ inches. 7 lines in a page. Telugu script. Old. Much injured. Illigible writing.

Wants beginning in the 1st pāda of the 3rd adhyāya and breaks off in the 3rd pāda of the 4th adhyāya.

433 27. E. 49.

ब्रह्मसूत्रभाष्यव्याख्या भामती—वाचस्पतिमिश्र-कृता

Palm-leaf. 170 Foll. 16 × 1¼ inches. 7 lines in a page. Telugu script. Old. Much injured. Clear writing.

Wooden boards are added to both sides. Contains the 1st adhyāya complete without a few pages in the beginning.

434 33. K. 34.

ब्रह्मसूत्रभाष्यव्याख्या भामती—वाचस्पतिमिश्र-कृता

Palm-leaf. 2 Foll. 19¼ × 2 inches. 14 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Ānandamayādhikaraṇa only (1-1-12 to 19).

435 33. L. 22.

ब्रह्मसूत्रभाष्यव्याख्या भामती—वाचस्पतिमिश्र-कृता

Palm-leaf. 17 Foll. 19¼ × 2 inches. 12 lines in a page. Grantha script. Old. Fair. Good writing.

Contains a small portion of the 1st Sūtra of the 1st pāda in the 1st adhyāya.

Wooden board is added in the beginning.

436 34. F. 11.

भामतीव्याख्या वेदान्तकल्पतरुः—अमलानन्द-कृतः

Palm-leaf. 86 Foll. 20 × 2¼ inches. 20 lines in a page. Grantha script. Old. Good. Good writing.

Wooden boards are added to both sides.

The leaves bear the serial Nos. 95 to 180.

The Vedāntakalpataru called also simply Kalpataru, is the famous commentary on the Bhāmatī of Vācaspatimiśra. The commentator Amalānanda who was also called Vyāsāśrama mentions himself as the pupil of Anubhavānanda and grandpupil of Ānandātman. He mentions also his another preceptor by the name Sukhaprakāśa. This Sukhaprakāśa has written a commentary called Bhāvadyotanikā on Citsukha's Tattvapradīpikā (Madras Govt. MSS. Library R. 5203) and another one called Vivecanī on Ānandānubhava's Nyāyamakaranda (Tanjore Library D. 7465). In these two works he mentions himself as the disciple of Citsukha (1200 A.D.) Therefore our author Amalānanda must have been the grandpupil of Citsukha also as well as of Ānandatman. We know that Ānandātman had another pupil called Śaṁkarānanda, the preceptor of Vidyāraṇya (1350 A.D.) Amalānanda states that the Kalpataru was written at the time of the Kings Kṛṣṇa and his brother Mahādeva of Devagiri. The late Paṇḍit Tailinga Rāmaśāstrin has fixed the date of Amalānanda as 1247 A.D. in his introduction to the Vedāntakalpataru, published in the Vijayanagaram Sanskrit Series. In commenting this Kalpataru, Appayadīkṣita states in his Parimala that the work Kalpataru was written at Nasik on the bank of Godāvari (p. 147 of the Parimala, Vijaya-

nagaram Sanskrit Series). Our Author's preceptor Anubhavānanda should not be confounded with another Anubhavānanda, the commentator on Nṛsiṁhāśrama's Advaitaratnakośa (Tanjore Library D. 7502) and Pārthasārathimiśra's Śāstra-dīpikā (No. 100 of this volume) and the pupil of Kṛṣṇānanda Yati (1650 A.D.). Amalānanda was also the author of the Śāstradarpaṇa (Sri Vāni Vilas Series, Srirangam).

Complete.

Beginning :

यदज्ञातं जीवैर्बहुविधजगद्विभ्रमधरं
वियद्वद्वालैस्तलमलिनतायोगि कलितम् ।
तदुन्मुद्रज्ञानप्रततसुखसद्ब्रह्म परमं
नमस्यामः प्रत्यक्श्रुतिशतशिरोभिः प्रकटितम् ॥
बोधाभीशुशतैरबोधतिमिरं हृद्व्योमगं दारयन्
प्रज्ञावारिधिमुन्नतिं च गमयन्सोमः सदोदेति यः ।
तं संसारसहस्ररश्मिजनितक्लेशापहं दक्षिणा-
मूर्तिं निर्मलयोगिचिन्त्यचरणाम्भोजं भजे शंकरम् ॥
माद्यन्मोहमहेभकुम्भदलनप्रोद्भूतसन्मौक्तिक-
द्योतालंकृतसत्सुखाद्वयवपुः श्रीमान्नृकण्ठीखः ।
प्रह्लादोक्तगिरः प्रमाणनविधौ दिव्याकृतिः स्तम्भतो
निर्यातः प्रकटीभवेत्स हृदयाम्भोजे ममाखण्डितम् ॥
ललितैः पदविन्यासैर्या नृत्यति विबुधवदनरङ्गेषु ।
सच्छास्त्रवेदवाद्यैः सरस्वतीं तां नमस्यामः ॥

* * * *

स्वयंप्रभसुखं ब्रह्म दयारचितविग्रहम् ।
यथार्थानुभवानन्दपदगीतं गुरुं नुमः ॥
विद्याप्रश्रयसंयमाः शुभफला यत्संनिधिस्थानतः
पुंसां हस्तगता भवन्ति सहसा कारुण्यवीक्षावशात् ।
आनन्दात्मयतीश्वरं तमनिशं वन्दे गुरूणां गुरुं
लब्धं यत्पदपद्मयुग्ममनघं पुण्यैरनन्तैर्मया ॥
ग्रन्थग्रन्थ्यभिधाः स्फुटन्ति मुकुला यस्योदये कौमुदा
व्याकुर्वत्यपि यत्र मोहतिमिरं लोकस्य संशाम्यति ।
प्रोद्यत्तारकदिव्यदीप्ति परमं व्योमापि नीराज्यते
गोभिर्यस्य सुखप्रकाशमनिशं तं नौमि विद्यागुरुम् ॥
वैदिकमार्गवाचस्पतिरपि सम्यक्सुरक्षितं चक्रे ।
नयविजितवादिदैत्यः स जयति विबुधेश्वराचार्यः ॥
रूढोऽयं वेदकाण्डान्नयमयविटपो भूरिशाखाविचारः
सद्वर्णानन्तपर्णः समुदितपरमब्रह्मबोधप्रसूनः ।
साक्षाद्वस्तावचेयं ददमृतफलं जीवविश्वेशवीन्द्रः
संसारार्कोत्थतापप्रमथननिपुणस्तन्यते कल्पवृक्षः ॥

श्रीमच्छारीरकव्याख्यायाः प्रारिप्सितायाः अविघ्न-समाप्त्यादिसिद्धये शास्त्रप्रतिपाद्यां परां देवतां प्रणमन् शास्त्रीयविषयादि दर्शयति—अनिर्वाच्येति ।

End :

कार्तस्वरं सुवर्णम् । तस्यासारोऽनवरतवर्षणम् । तेन सुपूरितोऽर्थः काङ्क्षितो यस्य सार्थस्य जनसमूहस्य स तथेत्येको बहुव्रीहिः । तथाविधः सार्थो यस्य प्रकृतत्वेन वर्तते स नृगस्तथेत्यपरः । नृग इति राज्ञ आख्या ।

स्वज्योतिःसुखसदभेदमात्मभूतं
यन्मायाविरचितविश्वदृश्यनीडम् ।
तद्ब्रह्म प्रणतभवान्धकारभानुं
वन्देऽहं हरिहरविग्रहं दधानम् ॥
अमृतममृतैरप्यायासादतीव सुदुर्लभं
प्रवरगुणवच्छिष्यैर्यत्र स्थितं सुखमाप्यत ।
अजनि कमला यस्माद्विद्यावपुर्निखिलार्तिहा
गुरुमनुभवानन्दं तं नौम्यपारकृपाम्बुधिम् ॥

* * * *

शास्त्राम्बुधेः पारगता द्विजेन्द्रा
यद्दत्तचामीकरवारिराशेः ।

ज्ञातुं न पारं प्रभवन्ति तस्मिन्
कृष्णक्षितीशे भुवनैकवीरे ॥
भ्रात्रा महादेवनृपेण साकं
पाति क्षितिं प्रागिव धर्मसूनौ ।
कृतो मयायं प्रवरः प्रबन्धः
प्रगल्भवाचस्पतिभावभेदी ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमदनुभवानन्द-पूज्यपादशिष्यभगवदमलानन्दस्य व्यासाश्रमापरनामधेयस्य कृतौ वेदान्तकल्पतरौ चतुर्थाध्यायस्य चतुर्थः पादः ।

The scribe adds :

मीनाक्षीसहितं देवं सुन्दरेशं चिदात्मकम् ।
हृदि स्थितमहं नित्यं कलयामि दयानिधिम् ॥

437 8. I. 13.

भामतीव्याख्या वेदान्तकल्पतरुः—अमलानन्द-कृतः

Paper. 24 Foll. $9\frac{3}{4} \times 7\frac{1}{2}$ inches. 18 lines in a page. Grantha script. Old. Injured. Good writing.

Contains a small portion of the 1st Sūtra of the 1st pāda of the 1st adhyāya.

438 20. H. 12.

भामतीव्याख्या वेदान्तकल्पतरुः—अमलानन्द-कृतः

Palm-leaf. 125 Foll. $14\frac{1}{2} \times 2$ inches. 14 lines in a page. Grantha script. Old. Good. Good writing.

Wooden boards are added to both sides.

Wants beginning in the 1st sūtra of the 1st pāda of the 2nd adhyāya and goes on up the end of the 4th adhyāya.

The leaves bear the serial numbers 88 to 212.

439 20. H. 14.

भामतीव्याख्या वेदान्तकल्पतरुः—अमलानन्द-कृतः

Palm-leaf. 81 Foll. $21 \times 1\frac{1}{2}$ inches. 15 lines in a page. Telugu script. Old. Injured. Good and small writing.

Wooden board is added at the back side.

Complete.

Reads the following additional stanza at the end of the introductory verses :

कीर्त्या यादववंशमुन्नमयति श्रीजैत्रदेवात्मजे
कृष्णे क्ष्माभृति भूतलं सह महादेवेन संबिभ्रति ।
भोगीन्द्रे परिमुञ्चति क्षितिभरप्रोद्भूतदीर्घश्रमं
वेदान्तोपवनस्य मण्डनकरं प्रस्तौमि कल्पद्रुमम् ॥

440 20. H. 17.

भामतीव्याख्या वेदान्तकल्पतरुः—अमलानन्द-कृतः

Palm-leaf. 130 Foll. $16\frac{3}{4} \times 1\frac{1}{2}$ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the adhyāyas 3 and 4 complete.

An additional leaf added at the end contains a small portion of the beginning of the Śivakarṇāmṛtavyākhyā.

441 20. H. 18.

भामतीव्याख्या वेदान्तकल्पतरुः—अमलानन्द-कृतः

Palm-leaf. 224 Foll. 1 3 × 1½ inches. 7 lines in a page. Telugu script. Old. Injured. Clear writing.

Begins in the 13th sūtra of the 1st pāda of the 2nd adhyāya and goes on up to the end of the 4th adhyāya.

442 20. H. 19.

भामतीव्याख्या वेदान्तकल्पतरुः—अमलानन्द-कृतः

Palm-leaf. 296 Foll. 17 × 1½ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

The date of copying etc : जयसंवत्सरकार्तिक १२ कुन्दवटनृसिंहशास्त्रिणे पालगुन्नि वेंगप्पलिखितम्.

443 20. H. 40.

भामतीव्याख्या वेदान्तकल्पतरुः—अमलानन्द-कृतः

Palm-leaf. 158 Foll. 14½ × 1½ inches. 10 lines in a page. Grantha and Telugu scripts. Old. Much injured. Good writing.

Wants beginning in the 3rd pāda of the 1st adhyāya and goes on up to the end of the 4th adhyāya.

444 20. H. 42.

भामतीव्याख्या वेदान्तकल्पतरुः—अमलानन्द-कृतः

Palm-leaf. 272 Foll. 15½ × 1½ inches. 6 lines in a page. Telugu script. Old. Much injured. Clear writing.

Wants beginning in the 1st sūtra of the 1st pāda of the 1st adhyāya and breaks off in the 1st pāda of the 4th adhyāya.

445 25. N. 12.

भामतीव्याख्या वेदान्तकल्पतरुः—अमलानन्द-कृतः

Palm-leaf. 10 Foll. 17 × 1⅜ inches. 10 lines in a page. Grantha script. Old. Injured. Illegible writing.

Contains the 4th pāda of the 1st adhyāya only incomplete.

446 26. M. 30.

भामतीव्याख्या वेदान्तकल्पतरुः—अमलानन्द-कृतः

Palm-leaf. 34 Foll. 20½ × 1¼ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wants beginning in the 16th Sūtra of the 4th pāda of the 1st adhyāya and breaks off in the 22nd Sūtra of the 2nd pāda of the 2nd adhyāya.

447 28. F. 37.

भामतीव्याख्या वेदान्तकल्पतरुः—अमलानन्द-कृतः

Palm-leaf. 10 Foll. 16 × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Illegible writing.

Contains the 1st sūtra of the 1st pāda of the 1st adhyāya incomplete.

448 33. K. 34.

भामतीव्याख्या वेदान्तकल्पतरुः—अमलानन्द-कृतः

Palm-leaf. 2 Foll. 19¼ × 2 inches. 14 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Ānandamayādhikaraṇa only (1-1-12 to 19).

449 40. E. 49.

वेदान्तकल्पतरुव्याख्या परिमलः—अप्पयदीक्षित-कृतः

Paper. 263 Foll. 13 × 4 inches. 9 lines in a page. Telugu script. Old. Good. Good writing.

This is a commentary on Amalānanda's Vedāntakalpataru which itself is a commentary on Vācaspatimiśra's Bhāmatī. The commentator Appayadīkṣita was the reputed author of many works in different subjects. In Mīmāṁsā he is known to have written, the Vidhirasāyana, Upakramaparākrama, Vādanakṣatramālā, Citrapaṭa and Mayūkhāvalī. In Alaṁkāra he has written the Citramīmāṁsā, Kuvalayānanda and Vṛttivārttika. In Vedānta he has written besides this work (Parimala), the Nyāyarakṣāmaṇi, Śivārkamaṇidīpikā, Sivādvaitanirṇaya, Caturmatasārasaṁgraha and Siddhāntalesasaṁgraha. He has written also many stotra works. He is said to have belonged to the village Aḍaipālam near Kāñcipuram. He was patronised by the famous Kings of Vijayanagaram—Kṛṣṇadevarāya, Rāmarāya, Cinna Timma, and Venkaṭa I, between 1520 to 1573 A.D. He mentions in this work one Vaikuṇṭhācārya as the head of the family in which his father was born. From this reference some scholars presume that Appayadikṣita's grandmother came from an orthodox S'rī Vaiṣṇava family of Vaikuṇṭhācārya. But this conjecture seems to be unfounded because the name Vaikuṇṭhācārya need not be necessarily a name of S'rī Vaiṣṇava alone. Moreover Appayadīṣita's father Raṅgarājādhvarin is mentioned to have born in the family of Vaikuṇṭhācārya. This would naturally mean that Vaikunthārya was his father's ancestor in paternal side and not in maternal side.

Breaks off in 1-3-26.

Beginning:

गुरुभिरुपदिष्टमर्थं विस्मृतमपि तत्र बोधितं प्राज्ञैः ।
अवलम्ब्य शिवमधीयन्यथामति व्याकरोमि कल्पतरुम्॥
कल्पकतरुमुपकुर्यां कथमधिकमाकाङ्क्षितार्थमुपहृत्य ।
तदृत्तैरेवार्थैर्मम मतिमीहे परिष्कर्तुम् ॥
यावन्तो निविशन्ते विदुषां व्याख्यानचातुरीभेदाः ।
सर्वेषामपि तेषामयमवकाशं ददाति पुष्पकवत् ॥
इत्थमिहातिगभीरे कियदाशयवर्णनं मया क्रियते ।
तुष्यन्ति ततोऽपि बुधाः कतिपयरत्नग्रहादिवाम्बुनिधेः ॥

यदिति । अत्र प्रत्यगिति ब्रह्मविशेषणेन शास्त्रस्य विषयं प्रदर्श्य तत्र सर्वेषां वेदान्तानां समन्वयः प्रथमाध्यायार्थः श्रुतिशतेत्यादिविशेषणेन दर्शितः ।

End:

"प्लवा ह्येते अदृढा यज्ञरूपाः, जायस्व म्रियस्वे-

त्येतत् तृतीयं स्थानमित्यादिवाक्यश्रवणेन विवेक-वैराग्यादिसिद्धिरित्यादिकमपि देवता.

450 20. P. 1.

वेदान्तकल्पतरुव्याख्या परिमलः—अप्पयदीक्षित-कृतः

Palm-leaf. 304 Foll. 17½ × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 1st pāda of the 3rd adhyayā.

451 28. G. 2.

वेदान्तकल्पतरुव्याख्या परिमलः—अप्पयदीक्षित-कृतः

Palm-leaf. 199 Foll. 17 × 1½ inches. 9 lines in a page. Telugu script. Old. Injured. Good writing.

Breaks off in the 4th pāda of the 1st adhyayā.

Reads the following additional stanza in the beginning:

नमस्तुरगतुण्डाय छन्द . . . . . दायिने ।
खण्डितारातये तुभ्यं पुण्डरीकामलत्विषे ॥

Adds the following lines in the beginning of the 4th pāda:

उपेन्द्ररूपेणावतीर्णस्य महाविष्णोरुपनेताध्यापयिता भरद्वाजो मुनिस्तदाचार्यः । उक्तं च वामनपुराणे—

ततश्चकार देवस्य जातकर्मादिकाः क्रियाः ।
भरद्वाजो महातेजा बार्हस्पत्यस्तपोधनः ॥
व्रतबन्धं तथेशस्य कृतवान्सर्वशास्त्रवित् ।
एवं कृतोपनयनो भगवान्भूतभावनः ॥
दशभिर्दिवसैर्ब्रह्मन् साङ्गवेदमधीतवान् ।
भरद्वाजात्साङ्गिरसात्सामवेदं महाध्वनिम् ॥
महदाख्यानसंयुक्तं गान्धर्वसहितं मुने ।
मासेनैकेन भगवान् ज्ञानश्रुतिमहानिधिः ॥
लोकाचारप्रवृत्त्यर्थमभूच्छ्रुतिविशारदः ।
सर्वशास्त्रार्थनैपुण्यं गत्वा देवोऽक्षयोऽव्ययः ॥
प्रोवाच ब्राह्मणश्रेष्ठं भरद्वाजमिदं वचः ।
ब्रह्मन् व्रजामि देह्याज्ञां कुरुक्षेत्रं महोदयम् ।
तत्र दैत्यपतेः पुण्यो ह्यमेधः प्रवर्तते ॥

इति ।

These verses are found in the 89th adhyāya of the Vāmanapurāṇa.

452 33. K. 34.

वेदान्तकल्पतरुव्याख्या परिमलः—अप्पयदीक्षित-कृतः

Palm-leaf. 4 Foll. 19½ × 2 inches. 13 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Ānandamayādhikaraṇa only (1-1-12 to 19).

453 34. F. 11.

वेदान्तकल्पतरुव्याख्या परिमलः—अप्पयदीक्षित-कृतः

Palm-leaf. 74 Foll. 20 × 1¼ inches. 20 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides. Breaks off in 3-3-25.

454 39. G. 16.

वेदान्तकल्पतरुव्याख्या आभोगः—लक्ष्मीनृसिंहकृतः

Paper. 656 Foll. 8¼ × 6½ inches. 14

lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in three volumes.

Like the Parimala, the Ābhoga also is a commentary on Amalānanda's Vedāntakalpataru. The author Lakṣmīnṛsiṁha mentions himself as the son of Mahopādhyāya Koṇḍubhaṭṭa of the Mahīdhara family and the pupil of Nārāyaṇendra. This Lakṣmīnṛsiṁha is identical with the author of the Siddhāntakaumudīvyākhyā Vilāsa (No. 353 of the Descriptive Catalogue of Sanskrit MSS. in the Adyar Library, Vol. VI). His father Koṇḍubhaṭṭa was the nephew of the famous Bhaṭṭojidīkṣita. The date of the work may be fixed as the 17th century A.D. The work has been printed and published in the Sri Vani Vilas Press, Srirangam, up to the end of first 4 Sūtras of the 1st pāda of the 1st adhyāya.

Contains the adhyāyas 1 and 2 complete.

Beginning :

दैत्येन्द्रं वरदर्पितं सरभसं भित्त्वाट्टहासे कृते
दृष्ट्वा यं कमलालया कुशलिनं जैत्रश्रियालंकृतम् ।
संहृष्टा परिषस्वजे सुरगणैः संस्तूयमानं विभुं
तं लक्ष्मीकुचकुङ्कुमाङ्कितततनुं लक्ष्मीनृसिंहं नुमः ॥
महीधरकुलोत्तंसो रामाम्बागर्भसंभवः ।
लक्ष्मीनृसिंहस्तनुते कल्पवृक्षप्रदीपिकाम् ॥
क्व कल्पकतरुर्दिव्यो दुरालोको दुरासदः ।
मादृशैश्चर्मचक्षुर्भिर्मन्दप्रज्ञैस्तथापि तु ॥
आसाद्य कल्पकतरुं दिशा परिमलोक्तया ।
आलोक्य भक्तिचक्षुर्भ्यामाभोगोऽयं प्रकाश्यते ॥

आचार्यश्चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तये शिष्टाचारपरिपालनाय कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन्नस्य शास्त्रस्य विषयादिकं दर्शयति— यदज्ञातमिति । तत्परमं ब्रह्म प्रत्यग्रूपेण वर्तमानं नमस्याम इत्यन्वयः । ननु सकलप्रपञ्चाश्रयस्य ब्रह्मणः कथं तद्विरुद्धकर्तृभोक्तृजीवरूपतेत्याशङ्क्य विरुद्धधर्माणां मिथ्यात्वं बहुधेत्यादिना दर्शितम् ।

End :

तत्तेजोमयीत्यत्र तदित्यव्ययं तस्मादर्थे । वाङ्मनस इत्येवं वक्तव्यत्वे नियामकं दर्शयन्नवतारयति— तेजसः सूक्ष्मो भाग इति । तेजःकार्यं मज्जा । अप्कार्यं लोहितमिति विवेकः । तच्चेति । अर्थाधिक्यं त्रिवृत्करणप्रदर्शनेन दर्शितमित्यर्थः ।

Colophon :

इति श्रीमन्महीधरकुलजलधिकौस्तुभकोण्डुभट्टमहोपाध्यायतनूभवेन श्रीमन्नारायणेन्द्रगुरुचरणकटाक्षनिक्षेपकोशगृहायमाणेन लक्ष्मीनृसिंहचरणारविन्दचञ्चरीकेण लक्ष्मीनृसिंहेन विरचितायां कल्पवृक्षप्रदीपिकायामाभोगाख्यायां द्वितीयस्याध्यायस्य चतुर्थः पादः समाप्तः । समाप्तश्चाध्यायः ।

455 40. A. 19.

भामतीव्याख्या ऋजुप्रकाशिका—अखण्डानन्दसरस्वतीकृता

Paper. 71 Foll. 9½ × 6 inches. 50 lines in a page. Grantha script. Old. Good. Small and good writing. Copied with pencil.

This is a rare commentary on Vācaspatimiśra's Bhāmatī by Akhaṇḍānandasarasvatī, pupil of Svayaṁprakāśānandasarasvatī. The commentary is called Ṛjuprakāśikā. The author in his pre-Saṁnyāsa

life was called Raṅganātha and was the son of Yajñāmbā and Kālahastīśayajvan of the Nalagantu family. He was the protege of Immiḍi Jagadekarāya who was the brother of Māṇḍabhūpati and the son of Aṅkuśarāya the younger brother of Senior Jagadekarāya or Pedda Jagadekarāya of Rāṇa family. From the works Jāmbavatīpariṇaya and the Satyāpariṇaya of Ekāmranātha (Madras Government O.MSS. Library D. Nos. 11535 and 11816 respectively) the following genealogy of Jagadekarāya is known :



But according to the colophon of this work Pedda Jagadekarāya must have had a brother called Aṅkuśarāya whose sons were Māṇḍabhūpati and Immiḍi Jagadekarāya or Jagadekarāya II the patron of our author. In Kannaḍa the word Immiḍi means 'the second'. According to the sources of Vijayanagar History by Dr. S. K. Ayyangar, the King Immiḍi Jagadekarāya must have ruled in the 16th and 17th centuries A.D. In his Epigraphia Carnatica of Mysore, part I, (page 28 of the Introduction) B. Lewis Rice states that Jagadekarāya was ruling Chennepaṭṭana and defeated Muhammadans and drove them from Penukoṇḍa in 1577 A.D. He also mentions an inscription on the grant by Pedda Jagadekarāya of Rāṇa family dated 1633 A.D. (page 27, Intro.). Therefore our author Akhaṇḍānandasarasvatī must have belonged to the middle of the 17th century A.D. which date corroborates also the date of his teacher Svayaṁprakāsānandasarasvatī (1630 A.D.). Our author must be different from the namesake author of the Pañcapādikāvivaraṇavyākhyā Tattvadīpana (No. 410 of this volume) who was the pupil of Akhaṇḍānubhūti and Ānandagiri in the latter part of the 13th century A.D. Our author is known to have written the following other works : 1. Advaitaratnakośaprakāśa which is mentioned in this work (Page 944 Brahmasūtraśaṁkarabhāṣya with commentaries, Vol. I, part II, Calcutta Sanskrit Series No. I), 2. Tarkabhāṣāprakāśa (Madras Govt. O. MSS. Library D. 4121). Besides these works, the Mysore Library Catalogue mentions two more works under the authorship of Akhaṇḍānandasarasvatī *namely* Tarkabhāṣātattvaprabodhinīvyākhyā and Nyāyasiddhāntadīpavyākhyā (pages 205 and 207 of the Vol. I printed in 1900). The Ṛjuprakāśikā is printed and published incompletely in the Calcutta Sanskrit Series, No 1, Calcutta.

The MS. contains the Catussūtrī portion complete.

Beginning :

विश्वं यदज्ञानविलासजातं
विज्ञानतो यद्विषयान्निवृत्तम् ।

आनन्दरूपं हरिमद्वयं तं
वेदान्तवेद्यं विधितो भजामः ॥
वयं विमूढा इति ये स्थितास्ते
स्मयं विना यत्सविधे बुधाः स्युः ।
न यं श्रितो बन्धमितो जनस्तं
स्वयंप्रकाशं गुरुमानतोऽस्मि ॥
वाणीविश्वेश्वरौ वन्दे माणिक्यगणभूषितौ ।
वाणीप्रसिद्धये विघ्नश्रेणीनां च निवृत्तये ॥
श्रीमान् श्रीनलगान्तुवंशजनितः श्रीकालहस्त्यध्वरी
यज्ञाम्बा च यमात्मजं प्रसुषुवे श्रीरङ्गनाथाभिधम् ।
सोऽयं संप्रति साधनोज्ज्वलमनाः प्राग्जन्मपुण्योदयात्
प्राप्याखण्डयतीशतामनुभवत्यार्यादखण्डां मुदम् ॥
सोऽयमखण्डो यतिराडिस्मिडिजगदेकरायभूपेन ।
संप्रार्थितोऽस्ति सम्यग्वाचस्पत्यस्य कुर्विति व्याख्याम् ॥
स कल्पकतरोरर्थमभिधाय क्वचित्क्वचित् ।
करोत्यखण्डयतिराड् व्याख्यां वाचस्पतेः कृतेः ॥
इह खलु कश्चिद्विपश्चिदग्रगण्यो वाचस्पतिः श्रीमच्छंकरभगवत्पादकृतं शारीरकभाष्यं व्याचिकीर्षुः स्वचिकीर्षितस्याविघ्नपरिसमाप्त्यादिसिद्धये विषयप्रयोजनप्रदर्शनपूर्वकं शास्त्रप्रतिपाद्यं परं ब्रह्म नमस्करोति—अनिर्वाच्येत्यादिना । केवलस्य ब्रह्मणोऽसङ्गस्य वियदादिप्रपञ्चनिर्मातृत्वायोगात् अनिर्वाच्याविद्याद्वितयसचिवस्येत्युक्तम् ।

End:

ब्रह्मणि सर्वेषां वेदान्तानां समन्वयमुक्तं निगमयति—एवं कार्यान्वयं विनेत्यादिना प्रसाधितेत्यन्तेन । स्वयमित्येत् पुरुषार्थ इत्यनेन संबध्यते । तथाच स्वयं पुरुषार्थे इत्यर्थः ।

Colophon:

इति श्रीमद्राणावंशपयोधिचन्द्रेण वृद्धजगदेकानुजश्रीमदंकुशरायतनूजेन मांडरार्यानुजेन श्रीमदिम्मिडिजगदेकरायभूपेन संप्रार्थितस्य श्रीमत्स्वयंप्रकाशसरस्वतीपूज्यपादशिष्यस्याखण्डानन्दसरस्वत्याख्यस्य यतीन्द्रस्य कृतौ वाचस्पत्यव्याख्यायामृजुप्रकाशिकायां चतुःसूत्री संपूर्णा ।

456 1. A. 2.

भामतीव्याख्या ऋजुप्रकाशिका—अखण्डानन्दसरस्वतीकृता

Paper. 327 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Breaks off in the 4th sūtra of the Catussūtrī portion.

457 34. H. 12.

भामतीव्याख्या ऋजुप्रकाशिका—अखण्डानन्दसरस्वतीकृता

Palm-leaf. 196 Foll. $18 \times 1\frac{1}{4}$ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Some leaves in the middle have been broken and the pieces are tied together and kept.

Breaks off in the 4th Sūtra of the Catussūtrī portion.

458 39. E. 9.

भामतीव्याख्या भावदीपिका—अच्युतकृष्णानन्दतीर्थकृता

Paper. 243 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is an transcript made from a

original MS. obtained on loan from Dr. T. R. Chintamani of the Madras University.

This also is a commentary on the Bhāmatī of Vācaspatimiśra. The commentary is called Bhāvadīpikā. It is said that the work summarizes the ideas contained in the Parimala and Kalpataru. The author Acyutakṛṣṇānandatīrtha was the disciple of Svayaṁprakāśānandasarasvatī. Our author is known to have written the following other works: 1. Siddhāntalesasaṁgrahavyākhyā Kṛṣṇālaṁkāra, 2. Taittirīyopaniṣadbhaṣyaṭīkā Vanamālā, 3. Bhāṣyaratnaprabhāvyākhyā and Mānamālā. From these works his preceptor Svayaṁprakāśānandasarasvatī is known as the pupil of Advaitānanda. Therefore this Svayaṁprakāśānanda must be identical with the author of the Paribhaṣārthasaṁgrahavyākhyā Candrikā (No. 490 vol. VI of this Catalogue), Svayaṁprakāśānandasarasvatī had another disciple called Vedānti Mahādeva who wrote the Sāṁkhyavṛttisāra and Viṣṇusahasranāmavyākhyā. In the latter work he mentions the date of composition as Saṁ. 1750= 1694 A.D. (page 197 of the Catalogue of Sanskrit MSS. in Jammu, by M. A. Stein). Therefore our author's date may be fixed towards the middle of the 17th century A.D.

Contains the first Sūtra of the Catussūtrī portion incomplete.

Beginning:

नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः ।

आचा . . . . . भामतीभावदीपिकाम् ॥

श्रीमच्छारीरकमीमांसाव्याख्याया: प्रारिप्सिताया अविघ्नपरिसमाप्त्यादिसि . . . . . विषयादि दर्शयति—अनिर्वाच्येति । एका ह्यविद्या अनादिभावरूपा । अन्या पूर्वपूर्वभ्रमसंस्काररूपा । तदविद्याद्वितयसाचिव्ये ब्रह्मणो . . . . सचिवं सहकारि यस्य तत् तथा । तत्साचिव्यं ब्रह्मणस्तद्विषयता । तदाश्रयास्तु जीवा एवेति वक्ष्यते । न चाविद्यासाचिव्ये ब्रह्मणो . . . . स्वातन्त्र्याविवातकत्वादित्याह—प्रभवत इति । रज्जोः सर्पवत् अतात्त्विको विकारो विवर्तशब्दार्थः । भूतसृष्टिवत् भौतिकसृष्टि . . . ब्रह्मैव कर्त्रित्याह—यतश्चेति ।

End:

भ्रान्तेरपि करणदोषादिबहुनिमित्तापेक्षित्वात् अकस्मादित्ययुक्तमित्याशङ्क्याह—शुक्लभास्वरस्येति ।

459 30. A. 12.

भामतीव्याख्या भावदीपिका—अच्युतकृष्णानन्दतीर्थकृता

Palm-leaf. 230 Foll. 18 × 1¾ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides. Contains the adhyāyas 2 to 4 complete.

Beginning:

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्न ।

चेतनजगदुपादानत्वसमन्वयः सांख्यस्मृत्या बाध्यतां न वेति सर्वज्ञभाषितत्वसाम्येन बलाबलाविनिगमनात् संदेहे पूर्वपक्षमाह—न खल्विति । विरोधे त्विति । औदुम्बरीं स्पृष्ट्वोद्गायेदिति प्रत्यक्षश्रुतिविरुद्धा सर्वा वेष्टयितव्येति स्मृतिर्मानं न वेति संदेहे, वेदार्थानु-

ष्टातृणां स्मृतिभिर्मूलश्रुत्यनुमानात् प्रत्यक्षानुमितश्रुतिविरोधे स्वपराधीतश्रुतिवत् समबलत्वात् उदितानुदितहोमवद्विकल्पसंभवान्मानमिति प्राप्ते राद्धान्तः ।

End :

यन्न्यायेति । न्यायकणिका विधिविवेकटीका । तत्त्वसमीक्षा ब्रह्मसिद्धिटीका । तत्त्वबिन्दुरिति भाट्टमताश्रयं स्वकृतं प्रकरणम् । न्यायस्य निबन्धनं न्यायवार्तिकतात्पर्यटीका । तत्त्वकौमुदी सांख्यनिबन्धनम् । योगनिबन्धनं पातञ्जलभाष्यटीका । वेदान्तानां सर्वोपनिषदां निबन्धनमियमेव भामती । इत्येतैर्निबन्धनैर्यन्महत्पुण्यं समचैषं संचितवानस्मि, तत्फलं पुष्कलं परमेश्वरे मया समर्पितम् । अथ समर्पणानन्तरमनेनोपहारेण परमेश्वरः प्रीयतामित्यर्थः । कार्तस्वरं स्वर्णं तस्यासारोऽनवरतवर्षणं तेन सुपूरितोऽर्थ आकाङ्क्षितो यस्य सार्थस्य जनसमूहस्य तथा । इदमन्तो बहुव्रीहिः । तथाविधः सार्थो यस्य स्वीयत्वेन वर्तते स नृगस्तथेत्यपरः । नृग इति राज्ञ आख्या ।

Colophon :

इति श्रीमत्कल्पतरुपरिमलयोः संग्रहरूपायां भामतीभावदीपिकायां श्रीमत्स्वयंप्रकाशानन्दसरस्वतीचरणपरिचरणलब्धविद्यश्रीमदच्युतकृष्णानन्दतीर्थविरचितायां चतुर्थस्याध्यायस्य चतुर्थः पादः ।

कृत्यानया वासुदेवः सर्वज्ञो भगवान् हरिः ।
अशेषजगतः कर्ता प्रीयतां मे प्रभुः सदा ॥

460 39. E. 10.

भामतीव्याख्या भावदीपिका—अच्युतकृष्णानन्दतीर्थकृता

Paper. 580 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 2 volumes.

This is the transcript made from the original palm-leaf MS. described in the last number.

Contains the adhyāyas 2 and 3 only.

461 39. C. 14.

भामतीव्याख्या भामतीतिलकम्—अल्लालसूरिकृतम्

Paper. 958 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in three volumes.

This is another commentary on Vācaspatimiśra's Bhāmatī. The commentary is called Bhāmatītilaka. The author reads the following verses at the end of various Pādas of the work.

इति त्रिविक्रमाचार्यसूनुनाल्लालसूरिणा ।
आद्येऽध्यायेऽग्रिमः पादो भामत्या विवृतः स्फुटम् ॥
व्याचष्टाल्लालनामैवं नागमाम्बासुतः सुधीः ।
भामत्याः प्रथमेऽध्याये द्वितीयं पादमादरात् ॥
इति श्रीमदनन्तार्यशिष्येणाल्लालसूरिणा ।
तृतीयो विवृतः पादो भामत्या लक्षणेऽग्रिमे ॥
इति कोटिकलाग्रामवासिनाल्लालसूरिणा ।
व्यभाजि . . . . . ॥

From these references it is understood that our author was the son of Trivikramācārya and Nāgamāmbā. His teacher was one Anantārya and his native place was Koṭikalā. He also salutes one Prajñānāraṇya in the beginning of the 3rd pāda of the 1st adhyāya. As he

quotes Citsukha's Bhāṣyabhāvaprakāśikā and Amalānanda's Kalpataru he must have been later than 1300 A.D.

Contains upto the end of the 1st pāda of the 3rd adhyāya.

Beginning:

वन्दामहे चिदानन्दवपुषं रघुनन्दनम् ।
अद्वितीयस्य यस्यामी विवर्ता वियदादयः ॥
महो मुहुर्नमस्यामो महादेवपदास्पदम् ।
महीयो मोहनीहारपरिहारविशारदम् ॥ २ ॥
चरणस्मरणाद्यस्य कर्तुमल्पोऽपि कल्पते ।
कार्यं पुरुषधुर्याणां नमामस्तं विनायकम् ॥
यत्कृपालोकलेशाप्तिलुप्ताज्ञप्तितमोगुणः ।
मन्दोऽपि गुरुतां याति भारतीं तां भजामहे ॥४॥
विष्णवे व्यासरूपाय ब्रह्मसूत्रकृते नमः ।
महेशाय च तद्भाष्यकृते शंकररूपिणे ॥ ५ ॥
यद्ग्रन्थकवचयोगात्पक्षो व्यासस्य विजयते जगति ।
विद्रुतविरोधिवर्गो वाचस्पतये नमस्तस्मै ॥ ६ ॥
अक्षुण्णायामरण्यान्यां भामत्यां वर्त्म यो व्यधात् ।
सुगमं प्रणमामस्तं व्यासाश्रममुनीश्वरम् ॥ ७ ॥
व्यक्तः सद्वृत्तकृतः शुद्धः प्रथितार्जवः समर्यादः ।
भामत्यास्तिलकोऽयं विशेषवित्प्रेक्षणीयोऽस्तु ॥८॥
नैव पदानां पदवीं विद्मो नैव प्रमेयपरिपाटीम् ।
सन्तः क्षान्तिविभूषाः साहसमेतत्क्षमन्तां नः ॥९॥

श्रीमच्छारीरकभाष्यव्याख्यानस्याभिमतस्यान्तराय . . . . . प्रायं च शासनशिष्टैरिष्टं शास्त्रप्रतिपाद्यदेवताप्रणामरूपं मङ्गलमाचरन् विषयप्रयोजने शास्त्रस्य सूचयति—अनिर्वाच्येति । तत् ब्रह्म नमाम इति संबन्धः । तस्यासंभवमाशङ्क्य कार्यद्वारेण संभावयति । यद्वा सर्वतोऽनवच्छिन्नस्य ब्रह्मशब्दार्थत्वात् तस्य वस्त्ववच्छेदपरिहाराय वियदादेस्तद्विवर्तताम् आह—विवर्ता यस्येति । यस्यैते विवर्ता इत्यन्वयः ।

End:

परिहारतात्पर्यं सुबोधमित्याह—सुगममिति ।
अल्लालसूरिरप्राप्तवैराग्यो . . . . . ॥

Colophon.

इति श्रीमदल्लालसूरिविरचिते भामतीतिलके तृतीयस्याध्यायस्य प्रथमः पादः समाप्तः ।

462 10. D. 3.

ब्रह्मसूत्रभाष्यव्याख्या न्यायनिर्णयः—आनन्दज्ञानकृतः

Paper. 677 Foll. $11\frac{1}{2} \times 5$ inches 10 lines in a page. Devanāgarī script. Old. Good. Good writing.

The leaves are arranged in 4 sets each set containing the leaves with separate serial numbers as 1 to 245, 1 to 190 1 to 184 and 1 to 58 respectively.

This is the well-known commentary on S'rī S'aṁkarācārya's Brahmasūtrabhāṣya by Ānandajñāna *alias* Ānandagiri. It is understood that he was called Janārdana in his pre-Saṁnyāsāśrama. He has written commentaries on S'rī S'aṁkarācārya's Upaniṣadbhāṣyas also. He mentions himself as the pupil of S'uddhānandayati. Mr. Tripathi says in his introduction to the Tarkasaṁgraha of Ānandajnāna (Gaekwad's Oriental Series, No. 3.) that the author had two teachers *namely* Anubhūtisvarūpācārya and S'uddhānanda and identifies this Anubhūtisvarūpa with the author of the

Sārasvataprakriyā, Nyāyamakarandaṭīka, Māṇḍūkyakārikābhāṣyaṭīkā, Nyāyadīpāvalīvyākhyā and Pramāṇamālāvyākhyā. Nothing is known about his other teacher S'uddhānanda who must be different from the namesake mentioned by Svayamprakāsayati of the 17th century A.D. in his Rasābhivyañjikā the commentary on the Advaitamakaranda. It has been already said that Akhaṇḍānanda, the author of the Pañcapādikāvivaraṇavyākhyā Tattvadīpaṇa was the pupil of Ānandagiri (No. 410 of this volume). It is said that Ānandagiri was a native of Gūrjaradesa and lived in the latter half of the 13th century A.D. The Nyāyanirṇaya has been printed and published in the Nirṇayasagar Press, Bombay.

Complete in four adhyāyas.

अध्यस्तान्ध्यमपूर्वमर्थविषणैर्ग्राह्यं पुमर्थास्पदं
लक्ष्यं लक्षणभेदतः श्रुतिगतं निर्धूतसाध्यार्थकम् ।
आम्नायान्तविभातविश्वविभवं सर्वाविरुद्धं परं
सत्यं ज्ञानमनर्थसार्थविधुरं ब्रह्म प्रपद्ये सदा ॥
यो लोकं सकलं पुनाति निगमा यं प्राहुरेकान्ततो
व्याप्तं येन जगज्जगन्ति सततं यस्मै नमस्कुर्वते ।
यस्मादाविरभूदशेषममरा यस्य प्रसादार्थिनो
यस्मिन् पर्यवसास्यति स्फुरदिदं तस्मै नमो विष्णवे ।
योऽनुग्रानुग्रतेजा जनयति सकलानालयं यं लभन्ते
सर्वे निर्वान्ति येन श्रुतिपथपथिका वौषडातन्वते च ।
यस्मै यस्मादकस्मात्परिभवचकिता यस्य संरोचयन्ते
चिन्ता यस्मिन्प्रवृत्ता भृशविशदधियः संश्रये तं
गिरीशम् ॥
भिन्दानमेनांसि दुरासदानि प्रत्यूहवर्गप्रभवानि तानि ।
राजानमाघातपरंपराणामाराद्युपासे गिरिजाभिजातम् ॥
श्रीमद्व्यासपयोनिधिर्निधिरसौ सत्सूक्तिपङ्क्तिस्फुर-
न्मुक्तानामनवद्यविपुलप्रद्योतिविद्यामणिः ।
क्षान्तिः शान्तिधृती दयेति सरितामेकान्तविश्रान्तिभू-
र्भूयान्नः सततं मुनीन्द्रमकरश्रेणीश्रयः श्रेयसे ॥
यद्वाष्याम्बुजजातजातमधुरप्रेयोमधुप्रार्थना-
सार्थव्यप्रधियः समग्रमरुतः स्वर्गेऽपि निर्वेदिनः ।
यस्मिन्मुक्तिपथो मुमुक्षुमुनिभिः संप्रार्थितः संबभौ
तस्मै भाष्यकृते नमोऽस्तु भगवत्पादाभिधां बिभ्रते ॥
यत्पादाम्बुजचञ्चरीकधिषणा निर्वाणमार्गाधिगा
पङ्क्तिर्मुक्तनिसर्गदुर्गदुरिता वाचंयमानामियम् ।
यस्मिन्नित्यमिदं शमादि समभूद्बोधाङ्कुरो मे यतः
शुद्धानन्दमुनीश्वराय गुरवे तस्मै परस्मै नमः ॥
मातर्नतोऽस्मि भवतीमथ चार्थये त्वां
चेतः सरस्वति परात्म्यपराञ्चमर्थम् ।
शारीरके महदनुग्रहसंप्रसन्न-
मेकाग्रमस्तु वचसा सह सम्यगर्थे ॥
श्रद्धाभक्ती पुरोधाय विधायागमभावनाम् ।
श्रीमच्छारीरके भाष्ये करिष्ये न्यायनिर्णयम् ॥

नित्याध्ययनविध्युपादापितवेदान्तवचोभिरापातत: प्रतिपन्नं शास्त्रारम्भौपयिकमनुबन्धजातं न्यायतो निर्णेतुं भगवान्बादरायणः सूत्रितवान्—अथातो ब्रह्मजिज्ञासेति ।

End:

यत्राध्यायपरिसमाप्तिरेव तत्र पदस्यैवाभ्यासो दृष्टः । प्रकृते सूत्रस्यैवाभ्यासात् चतुर्लक्षणस्य वेदान्तमीमांसाशास्त्रस्य समन्वयाविरोधसाधनफलानां साकल्येनोक्तत्वात् वक्तव्यानवशेषात् परिसमापनमुचितमिति भावः ।
व्याख्यासंख्याततर्ककचचयरयस्रस्तदुस्तर्कशङ्का
शङ्काव्याजप्रकारप्रसरणसमतावस्तुतत्त्वं श्रयन्ती ।
शुद्धानन्दाङ्घ्रियुग्मस्मृतिभरनिभृतप्रौढगाढोक्तिरूढा-
नन्दज्ञानप्रणीता जगति मुदमियं सद्धियां संविधत्ताम् ॥

सन्त्येव बहुलानीह व्याख्यानानि महाधियाम् ।
व्याख्या तथापि सौख्येन व्याख्यानाय मया कृता ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्द-पूज्यपादशिष्यभगवदानन्दज्ञानकृते श्रीमच्छारीरक-मीमांसाभाष्यविभागे न्यायनिर्णये चतुर्थस्याध्यायस्य चतुर्थः पादः । समाप्तोऽयं न्यायनिर्णयः ॥

463 24. B. 21.

ब्रह्मसूत्रभाष्यव्याख्या न्यायनिर्णयः—आनन्द-ज्ञानकृतः

Palm-leaf. 98 Foll. 14¼ × 2 inches. 13 lines in a page. Grantha script. Old. Injured. Good writing.

The Fol. No. 12 is broken into two pieces. The Fol. 64 is marked as 63 by mistake and the mistake has been conti nued in further leaves also.

Wooden boards are added to both sides.

Contains the Catussūtrī portion incomplete.

Seven blank leaves have been added at the end.

464 25. O. 14.

ब्रह्मसूत्रभाष्यव्याख्या न्यायनिर्णयः—आनन्द-ज्ञानकृतः

Palm-leaf. 240 Foll. 18¾ × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Bamboo boards are added to both sides.

Begins in 2-1-1 and breaks off in 3-4-32.

465 26. K. 26.

ब्रह्मसूत्रभाष्यव्याख्या न्यायनिर्णयः—आनन्द-ज्ञानकृतः

Palm-leaf. 138 Foll. 15½ × 1 inches. 11 lines in a page. Grantha script. Old. Injured. Good writing.

Wants beginning in the 1st pāda of the 1st adhyāya and goes on up to the 2nd pāda of the 2nd adhyāya; but many leaves are missing in the middle.

466 26. L. 24.

ब्रह्मसूत्रभाष्यव्याख्या न्यायनिर्णयः—आनन्द-ज्ञानकृतः

Palm-leaf. 69 Foll. 18 × 1½ inches. 9 lines in a page. Grantha script. Old. Very much injured. Good writing.

Contains a fragment of the 1st adhyāya with many leaves missing in the middle.

467 28. N. 1.

ब्रह्मसूत्रभाष्यव्याख्या न्यायनिर्णयः—आनन्द-ज्ञानकृतः

Palm-leaf. 210 Foll. 15 × 1¼ inches. 11 lines in a page. Grantha script. Old. Injured. Illegible writing.

Wooden boards are added to both sides.

Contains the 1st adhyāya complete.

468 28. N. 12.

ब्रह्मसूत्रभाष्यव्याख्या न्यायनिर्णयः—आनन्द-ज्ञानकृतः

Palm-leaf. 220 Foll. 18 × 1½ inches.

10 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the adhyāyas 2 to 4 complete.

Two blank leaves are added at the end.

469 37. B. 3.

ब्रह्मसूत्रभाष्यव्याख्या प्रकटार्थविवरणम्—अनुभूतिस्वरूपाचार्यकृतम्

Paper. 903 Foll. 13 × 8 inches. 18 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 2 volumes. Written on one side of paper.

This is a commentary on the Brahmasūtrabhāṣya of S'rī S'aṁkarācārya. The commentary is called Prakaṭārthavivaraṇa or simply Prakaṭārtha. The author's name is not mentioned in the colophons. The commentary follows the views of the Vivaraṇaprasthāna as against those of the Bhāmatīprasthāna. It criticizes the views of one Amṛtānanda and a work Brahmaprakāsʻikā. This Amṛtānanda should not be confounded with Amṛtānandamuni the commentator on Ānandabodha's. Nyāyadīpāvali (Tanjore D. No. 7461) wherein he salutes Ānandagiri. This fact suggests that Ānandagiri must be earlier to Amṛtānandamuni. It is also to be noted that Ānandagiri mentions the work Prakaṭārthavivaraṇa in his Muṇḍakopaniṣadbhāṣyaṭīkā (p. 32. Anandasʻrama Sanskrit Series No. 9). Therefore, it may be presumed that these three authors *namely* Prakaṭārthakāra, Ānandagiri, and Amṛtānandamuni belonged to the same period about the 13th century A.D. The work was printed and published in the Madras University Sanskrit Series No. 9, in 1935 without the author's name.

As regards the author's name attention may be drawn to the following fact: Prajñānānanda in his Tattvālokaṭīkā quotes a passage from the text *viz.* "Prakaṭārthanibandhābdheḥ" etc. (P. 16. Tattvalokaṭīkā No. 39. I. 19 of the Adyar Library). From this reference it may be presumed that the Prakaṭārtha was written by one who preceded Janārdana, *alias* Ānandagiri, the author of the text Tattvāloka. Now we have got a note written by Dr. V. Raghavan of the Madras University, wherein Anubhūtisvarūpācārya is proved as the author of the Prakaṭārthavivaraṇa (pages 352 to 368, Silver Jubilee volume of the Annals of the Bhandarkar Oriental Research Institute, Poona).

Complete.

Beginning:

सत्यं ज्ञानमनन्तं यत्कूटस्थं सुखविग्रहम् ।
नित्यमुक्तं परं ब्रह्म भवामि तदहं सदा ॥
ज्ञात्वापि यस्य बहुकालमचिन्तनेन
व्याख्यातुमक्षमतया परितापि चेतः ।
तस्योपतापहरणाय मयेह भाष्ये
प्रारभ्यते विवरणं प्रकटार्थमेतत् ॥

श्रीमच्छारीरकं व्याचिख्यासुर्भगवान् भाष्यकारो विषयाद्यसंभवेनाव्याख्येयत्वमाशङ्क्य बन्धमिथ्यात्वाङ्गीकारेण विषयादिकं संभावयन् व्याख्येयत्वं प्रतिजज्ञे—युष्मदस्मदित्यादिना । तत्प्रत्याचिख्यासू च अमृतानन्दब्रह्मप्रकाशिकाकारौ आचख्यतुः—व्यर्थमिदमन-

र्थानृतत्ववर्णनम्, शास्त्रप्रामाण्यात् ज्ञानेन सत्यबन्ध-ध्वंससंभवात्। अथ लोके ज्ञानात्सत्यस्य ध्वंसो न दृष्टः, तत्किमिदानीमामुष्मिकफलं कर्मशास्त्रं नोपेयते।

End:

न ह्यविद्यावतामपि तात्त्विकी पुनरावृत्तिः। जीवाविद्यानां च ब्रह्मसंस्पर्शित्वाभ्युपगमादविद्याया अपि पुनरावृत्तिप्रसङ्गः। तस्मादविद्यानास्पदब्रह्मप्राप्त्यैवानावृत्तिः सिद्धा। सूत्राभ्यासस्यार्थमाह—अनावृत्तिरिति।

शुद्धं ब्रह्मास्म्यहं नित्यमक्षरं परमं पदम्।
तिष्ठामि क्व क्व गच्छामि जगदापूरितं मया॥

Colophon:

इति श्रीमच्छारीरकमीमांसाभाष्यविवरणे प्रकटार्थे चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः। अध्यायश्च समाप्तः।

सर्वेषु भूतेषु चतुर्विधेषु
स्थितो हरिस्तत्र हरौ च तानि।
सोऽहं हरिः सर्वमिदं स एवे-
त्युत्पद्यते यस्य मतिः स मुक्तः॥

470 38. D. 6.

ब्रह्मसूत्रभाष्यव्याख्या भाष्यभावप्रकाशिका—चित्सुखमुनिकृता

Paper. 752 Foll. 8½ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in three volumes each volume containing 264, 238 and 250 Foll. respectively.

This is a good commentary on the Brahmasūtrabhāṣya of S'rī S'aṁkarācārya. The commentary is called Bhāṣyabhāvaprakāsikā. The author Citsukha was the pupil of Jñānottama. In addition to this, Citsukha is known to have written the following works: 1. Brahmasiddhivyākhyā, Abhiprāyaprakāsikā, 2. Nyāyamakarandavyākhyā, 3. Tattvapradīpikā, 4. Pramāṇamālāvyākhyā, 5. Khaṇḍanakhaṇḍakhādyavyākhyā, 6. Vivaraṇatātparyadīpikā, 7. Adhikaraṇamañjarī, 8. Viṣṇupurāṇavyākhyā, 9. Adhikaraṇasaṁgati and 10. Naiṣkarmyasiddhiṭīkā: As S'rī Vedāntades'ika (1268 to 1369 A.D.) criticizes him in his Sarvārthasiddhi, Citsukha may be placed in sufficiently early period about 1200 A.D. This commentary has been printed and published in the Calcutta Sanskrit Series No. I, Calcutta.

Wants a small portion in the beginning; otherwise complete in adhyāyas 1 to 4.

Beginning:

आत्मधर्मत्वाभिमतानामनुभवादीनां चिद्रूपत्वात्ततो भेदाभावान्न जडे बुद्ध्याभावाद्ध्यासोऽतुल्यत्वादित्यर्थः। अध्यासो नामान्यस्मिन्नन्यरूपताधीः। स मिथ्येत्यविद्यमानतोच्यते। अर्थाध्यासो ज्ञानाध्यासादन्य इत्यध्यासयोर्नास्तित्वं वक्तुं धीद्वैरध्यासवचनम्। आक्षेपमुपसंहरति—इति भवितुमिति।

End:

सगुणब्रह्मविदामपि ब्रह्मलोकगतानां तत्रोत्पन्नसम्यग्दर्शनप्रसादादेव मुक्तेरभ्युपगमान् सम्यग्दर्शिनामनावृत्तिः सुतरां सिध्यतीत्याह—तदाश्रयणेनैव हीति। सूत्राभ्यासस्य प्रयोजनमाह—अनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयतीति।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपाद-

शिष्यश्रीचित्सुखमुनिविरचितायां भाष्यभावप्रकाशिकायां चतुर्थाध्याये तुरीयः पादः समाप्तः । समाप्तेयं भाष्यभावप्रकाशिका ।

It is stated that this is a transcript made from the original MS. available in the Madras Govt. Oriental MSS. Library.

471 8. H. 26.

ब्रह्मसूत्रभाष्यव्याख्या भाष्यरत्नप्रभा— गोविन्दानन्दसरस्वतीकृता

Paper. 157 Foll. 15 × 7 inches. 25 lines in a page. Grantha script. Old. Good. Good writing.

The Bhāṣyaratnaprabhā or simply called Ratnaprabhā is an extensive commentary on the Brahmasūtrabhāṣya of S'rī S'aṁkarācārya. It is written according to the view of the Vivaraṇaprasthāna. All the available manuscript copies and printed editions of the work invariably mention in the colophons the author's name as Govindānanda. According to these Colophons and the verse 4 found in the beginning, the author Govindānanda was the pupil of Gopālasarasvatī and grandpupil of S'ivarāmārya or S'ivarāmānandasarasvatī. The author is known to have had the following 3 pupils : 1 Nārāyaṇasarasvatī (who wrote his S'ārīrakabhāṣyavārttika in 1592 A.D. (Calcutta Sanskrit Series No. I), 2. Raghunāthasarasvatī (who was the teacher of Rāmacandrasarasvatī, the author of the Bālabodhinībhāvaprakāsinī, (No. 177 of the Notices of Sanskrit MSS. by Rajendralalamitra, Vol. I) and 3. Rāmānandasarasvatī (who wrote the Vivaraṇopanyāsa and Yogamaṇiprabhā, Nos. 55 and 75 respectively of the Benares Sanskrit Series). The author must have lived in the middle of the 16th century A.D. as one of his pupil is known to have written his work in 1592 A.D. as mentioned above.

As regards the authorship of this commentary still there is an utter confusion whether the author was Govindānandasarasvatī or his disciple Rāmānandasarasvatī. The verse 4 mentioned above is in praise of Govindānanda and hence it must have been written by one of his pupils most probably Rāmānanda who must be the real author of the work. T. Aufrecht mentions a few MSS. of the Ratnaprabhā attributing the authorship of Rāmānanda in his Catalogus Catalogorum. Some MSS. of the Ratnaprabhā read the remark "Rāmānandīyaṁ Saṃpūrṇam " after the Colophon. The anonymous commentary called Abhivyaktā (No.482 of this volume) on this work, mentions the author of the Ratnaprabhā as Rāmānanda. Dr. M. Krishnamachariar states in his History of Classical Sanskrit Literature (pages 798 and 799) that the names Govindānanda and Rāmānanda are synonymous. MM. Anantakrishnasastri states in his introduction to the S'ārīrakamīmāmsābhāṣyavārttika of Bālakṛṣṇānandasarasvatī, that the real author of the work Ratnaprabhā was Rāmānandasarasvatī, pupil of Govindānandasarasvatī and not the latter. (Pages 24 and 41 of

the Introduction of the Asutosh Sanskrit series No. 1, Calcutta, 1941).

Of these references, verse 4 cannot contradict the authorship of Govindānanda, as it has been the usual practice to read in the beginning of the work the verse in praise of its author. T. Aufrecht himself has reconciled to the contradiction suggesting that the work must have had some connection with Rāmānanda who might have completed the work by adding some later portion. The remark as 'Rāmānandīyaṁ Sampūrṇam' may also be explained in the same way as suggested above. The other statements lack in strong and convincing proofs. Therefore we may hold that Govindānanda was the author till we get more evidences necessitating a change of this view.

Complete.

Beginning :

यस्मिह कारुणिकं शरणं गतो-
ऽप्यरिसहोदर आप महत्पदम् ।
तमहमाशु हरिं परमाश्रये
जनकजाङ्कमनन्तसुखाकृतिम् ॥
श्रीगौर्या सकलार्थदं निजपदाम्भोजेन मुक्तिप्रदं
प्रौढं विघ्नवनं हरन्तमनघं श्रीढुण्ढितुण्डासिना ।
वन्दे चर्मकपालिकोपकरणैर्वैराग्यसौख्यात्परं
नास्तीति प्रदिशन्तमन्तविधुरं श्रीकाशिकेशं शिवम् ॥
यत्कृपालवमात्रेण मूको भवति पण्डितः ।
वेदशास्त्रशरीरां तां वाणीं वीणाकरां भजे ॥
कामाक्षीदत्तदुग्धप्रचुरसुरनुतप्राज्यभोज्यातिपूज्य-
श्रीगौरीनायकाभित्प्रकटनशिवरामार्यलब्धात्मबोधैः ।
श्रीमद्गोपालगीर्भिः प्रकटितपरमाद्वैतभासास्मितास्य-
श्रीमद्गोविन्दवाणीचरणकमलगो निर्वृतोऽहं यथालिः ॥
श्रीशंकरं भाष्यकृतं प्रणम्य
व्यासं हरिं सूत्रकृतं च कुर्वे ।
श्रीभाष्यतीर्थं परहंसतुष्टयै
वाग्जालवन्ध्यच्छिदमभ्युपायम् ॥
विस्तृतग्रन्थवीक्षायामलसं यस्य मानसम् ।
व्याख्या तदर्थमारब्धा भाष्यरत्नप्रभाभिधा ॥
श्रीमच्छारीरकं भाष्यं प्राप्य वाक् शुद्धिमाप्नुयात् ।
इति श्रमो मे सफलो गङ्गां रथ्योदकं यथा ॥
यदज्ञानसमुद्भूतमिन्द्रजालमिदं जगत् ।
सत्यज्ञानसुखानन्तं तदहं ब्रह्म निर्भयम् ॥

इह स्वाध्यायोऽध्येतव्य इति नित्याध्ययनविधिनाधीतसाङ्गस्वाध्याये तद्विजिज्ञासस्व, सोऽन्वेष्टव्यः स विजिज्ञासितव्यः, आत्मा वा अरे द्रष्टव्यः श्रतव्य इति श्रवणविधिरुपलभ्यते ।

End :

तस्मात् विवेकादिसाधनसंपन्नस्य श्रवणाद्यावृत्तिनिरस्तप्रतिबन्धस्याखण्डात्मबोधात् समूलबन्धध्वंसे सति आविर्भूतनिष्कलङ्कानन्तस्वप्रकाशचिदानन्दात्मनावस्थानमिति सिद्धम् ।

नानाविधग्रन्थजातं वीक्ष्य साम्यग्यथाविधि ।
शारीरकस्य भाष्यस्य कृता व्याख्या सतां मुदे ॥
अन्तर्यामी जगत्साक्षी सर्वकर्ता रघूद्वहः ।
ततोऽत्र दोषोऽशङ्क्यः स्यादेष ह्येवेति शासनात् ॥
वक्षस्यक्ष्णोश्च पार्श्वे करतलयुगले कौस्तुभाभां दयां च
सीतां कोदण्डदीक्षामभयवरयुतां वीक्ष्य रामाङ्गसङ्गः ।
स्वस्याः क स्यादितीत्थं हृदि कृतमनना भाष्यरत्नप्रमेयं
स्वात्मानन्दैकलुब्धा रघुवरचरणाम्भोजयुग्मं प्रपन्ना ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दानन्दभगवत्कृतभाष्यरत्नप्रभायां चतुर्थस्याध्यायस्य, चतुर्थः पादः । समाप्तश्चाध्यायः । रामानन्दीयं संपूर्णम् ॥

The date of copying: Plavaṅga year, Āḍi month, Sukla 14th day, Monday.

472 20. I. 8.

ब्रह्मसूत्रभाष्यव्याख्या भाष्यरत्नप्रभा—गोविन्दानन्दसरस्वतीकृता

Palm-leaf. 3 Foll. $12\frac{1}{2} \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Good. Good writing.

Contains a fragment of the 4th adhikaraṇa of the 2nd pāda of the 2nd adhyāya.

The fly-leaf added at the end reads the following verse:

कौसल्याल्सदालवालजनितः सीतालतालिङ्गितः
सिक्तः पङ्क्तिरथेन सोदरमहाशाखाभिरभ्युन्नतः ।
रक्षस्तीव्रनिदाघपाटनपटुच्छायाश्रितानन्दकृ-
द्युष्मद्वाञ्छितसत्फलानि फलतु श्रीरामकल्पद्रुमः ॥

473 20. I. 9.

ब्रह्मसूत्रभाष्यव्याख्या भाष्यरत्नप्रभा—गोविन्दानन्दसरस्वतीकृता

Palm-leaf. 46 Foll. $16 \times 1\frac{1}{2}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

The leaves bear the serial numbers 21 to 66.

Contains a fragment of the Catussūtrī without beginning and end.

The fly-leaf added at the end reads the following lines:

. . . नि सूचनार्थानि स्वल्पाक्षरपदानि च ।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ॥

474 23. A. 22.

ब्रह्मसूत्रभाष्यव्याख्या भाष्यरत्नप्रभा—गोविन्दानन्दसरस्वतीकृता

Palm-leaf. 66 Foll. 19×2 inches. 16 lines in a page. Telugu script. Old. Injured. Small and good writing.

The leaves bear the serial Nos. 44 to 106 and then 102 to 104.

Wants beginning in the 1st pāda of the 2nd adhyāya and goes on upto the end of the 4th adhyāya.

The Colophon attributes the authorship to Govindānanda.

475 23. B. 30.

ब्रह्मसूत्रभाष्यव्याख्या भाष्यरत्नप्रभा—गोविन्दानन्दसरस्वतीकृता

Palm-leaf. 112 Foll. 15×1 inches. 8 lines in a page. Grantha script. Old. Injured. Illegible writing.

Wooden boards are added to both sides.

Breaks off in the 2nd pāda of the 1st adhyāya.

The Colophon attributes the authorship to Govindānanda.

476 23. O. 10.

ब्रह्मसूत्रभाष्यव्याख्या भाष्यरत्नप्रभा—गोविन्दानन्दसरस्वतीकृता

Palm-leaf. 33 Foll. $16 \times 1\frac{1}{8}$ inches. 12 lines in a page. Grantha script. Old. Much injured. Good writing.

Wants beginning in the 1st Sūtra and breaks off in the 4th Sūtra of the 1st pāda of the 1st adhyāya.

477 27. D. 19.

ब्रह्मसूत्रभाष्यव्याख्या भाष्यरत्नप्रभा—गोविन्दानन्दसरस्वतीकृता

Palm-leaf. 24 Foll. 16½ × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Begins in the 1st pāda and breaks off in the 3rd pāda of the 3rd adhyāya.

478 27. I. 89.

ब्रह्मसूत्रभाष्यव्याख्या भाष्यरत्नप्रभा—गोविन्दानन्दसरस्वतीकृता

Palm-leaf. 606 Foll. 14½ × 1½ inches. 10 lines in a page. Grantha script. Old. Fair. Good writing.

Wooden boards are added to both sides. Complete.

The Colopons mention the author as Govindānanda.

Reads the following line after the Colophon at the end.

रामानन्दीयं समाप्तम् ।

479 29. K. 22.

ब्रह्मसूत्रभाष्यव्याख्या भाष्यरत्नप्रभा—गोविन्दानन्दसरस्वतीकृता

Palm-leaf. 119 Foll. 16½ × 1 inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Begins 1-1-12 and ends in the 2nd pāda of the 2nd adhyāya.

The Colophons mention the author's name as Govindānanda.

480 34. J. 20.

ब्रह्मसूत्रभाष्यव्याख्या भाष्यरत्नप्रभा—गोविन्दानन्दसरस्वतीकृता

Palm-leaf. 66 Foll. 11¼ × 1 inches. 9 lines in a page. Grantha script. Old. Much injured. Good writing.

Wants beginning in the 1st Sūtra of the 1st pāda of the 1st adhyāya and goes on up to the end of the same pāda of the same adhyāya.

481 36. E. 7.

ब्रह्मसूत्रभाष्यव्याख्या भाष्यरत्नप्रभा—गोविन्दानन्दसरस्वतीकृता

Paper. 542 Foll. 15 × 8 inches. 13 lines in a page. Devanāgarī script. Old. Good. Good writing.

The leaves are arranged into four sets, each set containing separate adhyāya in Foll. 221, 153, 124 and 44 respectively.

The date of copying is given as Saṁ. 1885. S'aka 1750.

The MS. contains the text also copied in the middle of each page.

It reads the following Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोपालसरस्वतीपूज्यपादशिष्यश्रीगोविन्दानन्दभगवत्पादकृतौ चतुर्थस्याध्यायस्य चतुर्थः पादः ।

482 26. M. 20.

भाष्यरत्नप्रभाव्याख्या—अच्युतकृष्णानन्दतीर्थकृता

Palm-leaf. 126 Foll. 16 × 1½ inches.

8 lines in a page. Grantha script. Old. Injured. Good writing.

Bamboo planks are added to both sides.

This is a commentary on the Bhāṣyaratnaprabhā of Govindānandasarasvatī which work itself is a commentary on the Brahmasūtrabhāṣya of S'ri S'aṁkarācārya. The author Acyutakṛṣṇānandatīrtha was a disciple of Svayaṁprakāśānandasarasvatī, the pupil of Advaitānandasarasvatī. He is identical with the author of the Bhāmatīvyākhyā Bhāvadīpikā described in No. 458 of this volume. He is believed to have lived in the last part of the 17th century. The author states that the commentary is written only upto the end of the Īkṣatyadhikaraṇa in the 1st pāda of the 1st adhyāya.

Contains upto the end of the **ईक्षत्यधिकरण.**

Beginning :

ब्रह्मविष्णुमहेशाख्यमूर्तिभिर्यो गणाधिपः ।
जगत्सर्गादि तनुते तं वन्दे विघ्नशान्तये ॥
यं प्रपन्ना जगन्नाथं लेभे वस्त्रपरंपराम् ।
कृष्णा पार्थस्य महिषी तं प्रपद्ये हरिं सदा ॥
स्वरूपानन्दसाम्राज्ये विहरन्तं कृपानिधिम् ।
प्रणवस्य प्रवक्तारं सर्वेश्वरमहं भजे ॥
यो मे गुरुर्गुरुः साक्षाज्जगतामप्यशेषतः ।
माधवस्यापरा मूर्तिस्तं भजे स्वप्रभं सदा ॥
गुरोरपि गरीयान्मे यः कलाभिरलंकृतः ।
अद्वैतानन्दवाण्याख्यस्तं वन्दे शमवारिधिम् ॥
ओतप्रोतमिदं सर्वं यस्मिन् सच्चित्सुरवात्मके ।
पर्यवस्यन्ति वेदान्ता यत्र चाहं तदक्षरम् ॥
जिज्ञासासूत्रमारभ्य प्रागानन्दमयोक्तितः ।
भाष्यरत्नप्रभानाम्नीं व्याकुर्वे भक्तितः कृतिम् ॥
श्रीमत्स्वयंप्रकाशाख्यगुरोर्लब्धात्मबोधनम् ।
संशोधयितुमारब्धा व्याख्येयं नान्यहेतुतः ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यादिसिद्ध्यर्थं मङ्गलमाचरति-यमिह कारुणिकमिति । शास्त्रप्रतिपाद्यं विषयं शास्त्रप्रयोजनं च मुखतो निर्दिशन्नधिकार्यादिकमप्यर्थात् सूचयति—यदज्ञानेति । यस्य निर्विशेषचैतन्यस्याज्ञानं यदज्ञानम् । विषयविषयिभाव आश्रयाश्रयिभावश्च षष्ठ्यर्थः ।

End :

तथाचापवादिक्या संगत्यान्तस्तद्धर्माद्यधिकरणप्रवृत्तिरिति नासंगतिः । सगुणवाक्यविचारापवादसंगत्या चानन्दमयाद्यधिकरणेषु निर्गुणविचारप्रवृत्तिरिति निर्गुणविचारस्यापि करिष्यमाणस्यास्मिन्नध्याये नासंगतिरिति सर्वमनवद्यम् ।

भाष्यरत्नप्रभाभागो व्याख्यातो यो विवक्षितः ।
श्रीकृष्णचरणद्वन्द्वभूषणायास्त्वयं कृतिः ॥
प्रपन्नाभयदातृत्वं व्रतं यस्य हि तं वयम् ।
प्रपन्ना राममनिशं साम्बहृत्पद्मभूषणम् ॥
येनानन्तेन पौलस्त्यो रक्षितो ब्रह्मशक्तितः ।
द्वितीयमन्तरात्मानं रामचन्द्रस्य तं भजे ॥
राक्षसानां वधे यत्तं रामं रघुकुलोत्तमम् ।
रक्षणे दीक्षितं साधोरादरेण भजे सदा ॥
अहं ब्रह्मेति बुद्धिर्मे यत्प्रसादैकसंभवात् ।
तस्याचार्यवरिष्ठस्य चरणाभ्यां नमो नमः ॥

Colophon :

इति श्रीस्वयंप्रकाशानन्दसरस्वतीशिष्यस्याच्युतकृष्णानन्दतीर्थस्य कृतौ भाष्यरत्नप्रभाव्याख्यायामीक्षत्यधिकरणं समाप्तम् । रामानन्दीयस्याच्युतकृष्णानन्दतीर्थीयं व्याख्यानं समाप्तम् ।

483 34. G. 12.

भाष्यरत्नप्रभाव्याख्या—अच्युतकृष्णानन्दतीर्थ-कृता

Palm-leaf. 52 Foll. 19 × 2 inches. 14 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains upto the end of the ईक्षत्यधिकरण without colophon.

484 40. C. 48.

भाष्यरत्नप्रभाव्याख्या अभिव्यक्ता

Paper. 14 Foll. 8½ × 6½ inches. 17 lines in a page. Telugu script. Old. Injured. Good writing.

This is another commentary on the Bhāṣyaratnaprabhā of Govindānanda-sarasvatī. The commentary is called Abhivyaktā. The author's name is not known. The author salutes Advaitavāṇī or Advaitānandasarasvatī.

Incomplete.

Beginning:

यत्तत्त्वगोचरविचित्रतमःप्रभावात्
संसारबीजनितदुःखमभूज्जनस्य ।
यत्तत्त्वबीजनितसौख्यमभूच्च तस्य
तं रुक्मिणीसहितकृष्णमहं नमामि ॥
यत्पादपद्मभजनेष्वनुरक्तचित्ता
मोक्षं गता अतिदुरात्मजनाः किमस्य ।
यल्लीलया जगदभूद्विविधस्वरूपं
तं रुक्मिणीसहितकृष्णमहं नमामि ॥
काशिकाधीशविश्वेशं नमामि करुणानिधिम् ।
उमाङ्गसङ्गादनिशं पिशङ्गाङ्गप्रकाशकम् ॥
यस्य स्मृतेरपि च शिष्यजना भवन्ति
कामादिदोषरहिता ह्यतिशुद्धचित्ताः ।
यद्ध्यानतः परमकारणसुस्थिरास्ते
तं श्रीगुरुं परमहंसयतिं नमामि ॥
यो दृश्यतेऽयमिति सत्यचिदात्मकात्मा
शिष्यौघपुण्यपरिपाकवशादिदानीम् ।
चिद्योगधारिणमजस्रमजं स्मितास्यं
तं श्रीगुरुं परमहंसयतिं नमामि ॥
षट्शास्त्रपारीणधुरीणशिष्यै-
र्युक्तं सदा ब्रह्मविचारशीलैः ।
अद्वैतवाणीचरणाब्जयुग्मं
मुक्तिप्रदं तत्प्रणतोऽस्मि नित्यम् ॥
सूत्रभाष्यकृतौ नत्वा ह्यतिश्रेष्ठान् गुरूनपि ।
अभिव्यक्ताभिधा व्याख्या क्रियते बुद्धिशुद्धये ॥
रत्नप्रभां दुरूहां च व्याकरोमि यथामति ।
धीकृतानमितान् दोषान् क्षमध्वं विबुधा मम ॥

अत्र तावत्स्वरूपतटस्थलक्षणप्रमाणतत्साधनैस्तात्पर्यात् अद्वितीयब्रह्मबोधकं श्रीमच्छारीरकभाष्यं व्याचिख्यासुः श्रीरामानन्दाचार्यः प्रारिप्सितग्रन्थपरिसमाप्तये प्रचयगमनाय शिष्टाचारपरिपालनाय च समाप्तिकामो मङ्गलमाचरेदिति अनुमितकृतिबोधितकर्तव्यताकं शिष्टाचारपरिप्राप्तं मङ्गलं शास्त्रप्रतिपाद्यस्वेष्टदेवतानमस्कारलक्षणमाचरन् शिष्यशिक्षायै ग्रन्थतो निबध्नाति—यमिहेति ।

End:

इमे विदेहा इति । याज्ञवल्क्यं प्रति जनकस्योत्तरमिदम् । तथा च विदेहपदं विदेहाख्यदेशविशेषपरम् । इमे विदेहाः यथेष्टं भुज्यन्ताम् । अयमहं चास्मि दासभावे स्थितः; दासान्तर्गत इति यावत् । राज्यं च यथेष्टं प्रतिपद्यस्वेत्यर्थः । राज्यं भवदधीनम्, अहमपि भवदधीन इति भावः । इमे विदेहा इत्यंशस्य नात्रोपयोगः । किंतु.

485 26. M. 16.

ब्रह्मसूत्रभाष्यव्याख्या ब्रह्मविद्याभरणम्— अद्वैतानन्दसरस्वतीकृतम्

Palm-leaf. 103 Foll. $15\frac{1}{2} \times 1\frac{1}{8}$ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Bamboo boards are added to both sides.

This is one of the commentaries on the Brahmasūtrabhāṣya of S'rī S'aṁkarācārya. The commentary is called Brahmavidyābharaṇa. According to the colophons found in another MS. and the printed edition, Advaitānanda is known to have been the pupil of Bhūmānandasarasvatī and Rāmānandasarasvatī of whom the latter was the pupil of Govindānandasarasvatī and also the author of the Vivaraṇopanyāsa and Yogamaṇiprabhā. Govindānandasarasvatī's another pupil Nārāyaṇasarasvatī wrote his S'ārīrakabhāṣyavārttika in 1592 A.D. Acyutakṛṣṇānandatīrtha in his Bhāṣyaratnāprabhāvyākhyā (No. 482 of this volume) mentions his teacher Svayaṁprakāśānandasarasvatī as the pupil of Advaitānandasarasvatī. Therefore, our author must have lived in the first quarter of the 17th century A.D. The work has been printed and published in the Advaitamañjarī Series, Kumbakonam, wherein the editor gives the author's date as Kali year 4268 to 4301 corresponding to 1168 to 1201 A.D. on the basis of traditional account.

Breaks off in the 4th sūtra of the 1st pāda of the 1st adhyāya.

Beginning :

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
शंकराश्लेषविलसदानन्दामृतनिर्भराम् ।
विश्वोत्तंसितपादाब्जां ब्रह्मविद्यां विभावये ॥
वेदान्तनिकुरुम्बेण तात्पर्येण प्रकाशितः ।
स्वात्मानन्दैकरस्येन कल्याणाय शिवोऽस्तु नः ॥
स्वानन्दाम्बुधिमग्नचित्तमनिशं निर्धूतमायामलं
कारुण्यार्जवशान्तिसौरभमयं देव्या गिरां सेवितम् ।
रामानन्दमुनिं मुनीन्द्रनिकरैरासेवितं सर्वदा
चित्ते संकल्यामि वेदशिरसस्तत्त्वावबोधाप्तये ॥

अथातो ब्रह्मजिज्ञासा । अनेन सूत्रेण साधनचतुष्टयसंपत्त्यनन्तरं ब्रह्म जिज्ञासितव्यमिति प्रतिपाद्यते । एतत्सूत्रावतारिकारूपेण युष्मदस्मत्प्रत्ययगोचरयोरित्यादिना सर्वे वेदान्ता आरभ्यन्त इत्यन्तेन भाष्येण कर्तृत्वादिबन्धस्याक्षेपसमाधानाभ्यां मिथ्यात्वं प्रतिपाद्यते ।

End :

अपि च सिद्धस्य वस्तुनः प्रमाणान्तरयोग्यतया सापेक्षत्वं प्रसज्यते । क्रियायाश्च धर्मत्वेन प्रमाणान्तरायोग्यत्वात् न तत्परत्वे सापेक्षत्वं प्रसज्यत इति । वेदान्तानां च स्वार्थपरत्वे क्रियापरत्वासंभवात् क्रियामरत्वसिद्ध्यर्थं क्रियाशेषभूतदेवतादिस्तावकत्वं स्वीकर्तव्यम् । यदि तु कर्मप्रतिपादकविधिभ्यो दूरपठिततया तत्समभिव्याहाराभावात् ·

486 8. I. 13.

ब्रह्मसूत्रभाष्यव्याख्या ब्रह्मविद्याभरणम् — अद्वैतानन्दसरस्वतीकृतम्

Paper. 117 Foll. $10 \times 7\frac{3}{4}$ inches. 25 lines in a page. Grantha script. Old. Good. Good writing.

Contains the pādas 3 and 4 of the 1st adhyāya.

End :

तथाच श्रुतिष्वध्यायादिसमाप्तौ पदाभ्यासो दृश्यते —तद्वास्य विजिज्ञाविति विजिज्ञाविति । तं स्कन्द इत्याचक्षते तं स्कन्द इत्याचक्षते, ओंकार एवेदं सर्वमोंकार एवेदं सर्वमिति ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्भूमानन्दसरस्वतीश्रीचरणानुग्रहलब्धसारस्वतपदस्य निरतिशयौदासीन्यादिगुणरत्नखचितयतिकुलोत्तंसश्रीमद्रामानन्दतीर्थमुखारविन्दनिर्गतशारीरकसूत्रभाष्यार्थस्वर्धुनीप्रवाहनिमज्जनसुहितस्य श्रीमदद्वैतानन्दस्य कृतौ शारीरकभाष्यव्याख्यायां ब्रह्मविद्याभरणाख्यायां प्रथमस्याध्यायस्य चतुर्थः पादः । प्रथमाध्यायः समाप्तः ।

487 26. M. 15.

ब्रह्मसूत्रभाष्यव्याख्या ब्रह्मविद्याभरणम् — अद्वैतानन्दसरस्वतीकृतम्

Palm-leaf. 99 Foll. 15½ × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wants beginning in the 4th sūtra of the Catussūtrī portion and ends with the Ānandamayādhikaraṇa of the 1st pāda of the 1st adhyāya. This begins with the portion in continuation of that contained in 26 M. 16. described under No. 485 above.

488 26. M. 25.

ब्रह्मसूत्रभाष्यव्याख्या ब्रह्मविद्याभरणम् — अद्वैतानन्दसरस्वतीकृतम्

Palm-leaf. 152 Foll. 18 × 1¼ inches. 12 lines in a page. Grantha script. Old. Injured. Clear writing.

Wants beginning in 1-1-22 and breaks off in 1-4-23.

489 28. K. 43.

ब्रह्मसूत्रभाष्यव्याख्या ब्रह्मविद्याभरणम् — अद्वैतानन्दसरस्वतीकृतम्

Palm-leaf. 280 Foll. 19½ × 2 inches. 14 lines in a page. Telugu script. Old. Injured. Good writing.

Breaks off in the 19th sūtra of the 3rd pāda of the 1st adhyāya.

490 33. K. 34.

ब्रह्मसूत्रभाष्यव्याख्या ब्रह्मविद्याभरणम् — अद्वैतानन्दसरस्वतीकृतम्

Palm-leaf. 9 Foll. 19½ × 2 inches. 14 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Ānandamayādhikaraṇa (sūtras 12 to 19) of the 1st pāda of the 1st adhyāya.

491 33. G. 22.

ब्रह्मसूत्रभाष्यव्याख्या सुबोधिनी — शिवनारायणानन्दतीर्थकृता

Palm-leaf. 79 Foll. 19 × 2¼ inches. 28 lines in a page. Grantha script. Old. Injured. Very small and illegible writing.

The leaves bear the serial numbers 112 to 190.

The Subodhinī is a brief commentary on S'rī S'aṁkarācārya's Brahmasūtrabhāṣya

by S'ivanārāyaṇānandatīrtha, pupil of S'ivarāmānandatīrtha. The term Ānanda affixed to the name of the author's preceptor Sivarāma suggests the possibility of identification of this S'ivarāma with the preceptor of Gopālasarasvatī who was the preceptor ot Govindānandasarasvatī, the author of the Ratnaprabhā. If the suggestion is correct, the author's date must be the beginning of the 16th century A.D. One of the author's disciples, whose name is not known, has written the Pañcakos'amañjarī (No. 10960 of the Descriptive Catalogue of Sanskrit MSS. of the Tanjore Palace Library, Vol. XVI.)

Complete.

Beginning :

. . . . . विष्णुं प्रभविष्णुमुपास्महे ॥
वर्णानामुत्तमं वर्णं पदानामुत्तमं पदम् ।
आरुह्यानन्दयत्येकस्तमानन्दमहं भजे ॥
यस्मिन् पुंसि परे चिरंतनमहा मोहप्रभा . . .
. . . . . ।
तत्तद्बुद्धिविरुद्धदर्पणसमाभीष्टं सदेकं जग-
द्येनानन्तमिवानुभूतमसितं सर्वात्मकं तं भजे ॥
. . . . . .
तत्तद्बुद्धिविकल्पितः खलु पुमानेकोऽप्यनेकायते ।
नैकोऽप्येकविभागविश्वमपि यन्मायामयं दृश्यते
तं गोपालकबालकाकृतिमहं विद्यानिदानं भजे ॥
अद्वैतं शिवमित्यतः शिवपदं संशान्तभेदं तु य-
द्यस्मिन्नामपदे चिदात्मनि सुखे सिद्धा रमन्तेऽनिशम् ।
तत्ती . . . . रमहो . . . ग्रणीसेवितं
तं सेवे शिवरामतीर्थमतुलं कैवल्यमस्मद्गुरुम् ॥
साक्षाच्छंकरशंकरार्यकसुहृत्पद्मानन्दोदञ्चित-
श्रीमद्वक्त्रसरोरुहोद्गलितसद्भाष्यामृतं स्यन्दते ।
वेदव्यासवचःसरोजनिचयं वेदान्तसिन्धूदितं
. . . . . रज्याम मुक्त्यै वयम् ॥
सूत्रभाष्यकृतौ नत्वा सूत्रभाष्यसुबोधिनी ।
सुधियां सुखबोधाय क्रियते हि सुबोधिनी ॥

इह खलु धर्मार्थकाममोक्षेषु मोक्ष एव परमपुरुषार्थः समधिगतः श्रुत्यादिषु । तेषु च जन्यत्वात् त्रयाणामनित्यत्वात् कश्चित् कुतश्चिद्भाग्योदयात्परमपुरुषार्थमेवाभिलषति । तमधिकृत्य मोक्षसाधनब्रह्मज्ञानफलकविचारारम्भं सूत्रयामास भगवान् वेदव्यासः—अथातो ब्रह्मजिज्ञासेति । अस्य सूत्रस्य शास्त्रं विषयः । तदनारभ्यमारभ्यं वेति संदेहे विषयाद्यसंभवादनारभ्यमिति पूर्वपक्षं प्रापय्य परमार्थदृष्ट्या विषयाद्यसंभवेऽप्यनाद्यध्यासमहिम्ना तत्संभवति ।

End :

एतेनोपासनं विना ब्रह्मचर्यादिना साधनान्तरेण ब्रह्मलोकं गतानामावृत्तिरस्तीति गम्यते । कैमुतिकन्यायेन निर्विशेषब्रह्मविदामिहैव कैवल्यं प्राप्तानां पुनः संसारो नास्तीत्येतत्कृत्स्नशास्त्रपरमतात्पर्यमुपसंहरति—सम्यग्दर्शितेति । कैमुतिकन्यायमेव . . . तदाश्रयणे सूत्राभ्यासफलमाह—अनावृत्तिरिति ।

समस्तवेदान्तसमन्वयेन
निरस्य युक्त्या च समस्तभेदम् ।
विधाय तत्साधनजातमत्र
फलं च निर्णीतमिहैव मुक्तिः ॥
गुञ्जावतंसमनुबन्धमयूरचारु-
बर्हावचूडमसिताब्दसमानकायम् ।
मायां वितत्य महतीं जगदात्मना यः
सर्वात्मना विजयते तमहं स्मरामि ॥
यत्कृपानावमालम्ब्य यद्वीवरनियोजितः ।
सूत्रभाष्योदधिस्तीर्णस्तं वन्दे भवतारकम् ॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीशंकरभगवत्पादकृतशारीरकमीमांसाभाष्यमुद्बोधिन्यां श्रीशिवरामानन्दतीर्थपूज्यपादशिष्यश्रीशिवनारायणानन्दतीर्थविरचितायां चतुर्थस्याध्यायस्य चतुर्थः पादः ।

492 21. N. 15.

ब्रह्मसूत्रवृत्तिः शारीरकन्यायसंग्रहः—प्रकाशात्मयतिकृतः

Palm-leaf. 151 Foll. 7½ × 1½ inches. 11 lines in a page. Malayālam script. Old. Much injured. Illegible writing.

Wooden boards are added to both sides.

The S'ārīrakanyāyasaṁgraha, as the title indicates, is an epitome of the topics dealt with in each of the adhikaraṇas of the Brahmasūtras. Though it does not give the meaning of the sūtras word by word, it enables the readers to understand them correctly. The author, Prakās'ātmayati, was the pupil of Ananyānubhava. As his other work called Pañcapādikāvivaraṇa extends only upto the Catussūtrī of the 1st pāda of the 1st adhyāya, the present work is very useful in understanding the view of the Vivaraṇaprasthāna in respect of the further adhikaraṇas of the Brahmasūtras. It is interesting to note that the author gives an alternative interpretation of the Pāñcarātrādhikaraṇa of the 2nd adhyāya, in support of the entire soundness of the Pāñcarātrāgamas as accepted by Sri Rāmānuja in his S'rībhāṣya. The date of Prakās'ātmayati may be fixed about 950 A.D. The work has been reprinted from the Journal of Oriental Research, Madras and published as a separate book in 1939.

Wants the first leaf in the beginning; otherwise complete.

Beginning :

साधनचतुष्टयविशिष्टाधिकारिसमर्पकत्वोपपादनेन वेदान्तानां कर्तृस्तावकत्वे तत्प्रतिपादने वा कर्मप्रवृत्तिविरोधितया स्वातन्त्र्येण स्वार्थपराणां विचारं विधिविषयमन्यतोऽप्राप्तमुपवर्ण्य तत्साध्यं च फलानुबन्धं बन्धस्य मिथ्यात्वप्रदर्शनेनोपपाद्य साधनचतुष्टयसंपन्नस्याधिकारिणो बन्धविश्लेषायानुभवफलपर्यन्ते वेदान्तवाक्यविचारेऽनुबन्धत्रयविशिष्टविधिसमर्थनेन शास्त्रारम्भो दर्शितः ।

End :

न च वेदान्तैकदेशिनां द्वैतिनामेवंविधा मुक्तिः । न च तान् प्रति साधयितुं शक्यते । जगद्व्यापारवर्जनेऽपि सिद्धसाधनत्वात् । विद्यान्तरगोचरभोगसाम्यस्य मुक्तावप्राप्तेः । अत एव दूषयितुमशक्यम्, अदूषणत्वादप्राप्तेश्च । स्वरूपमङ्गीकृत्य धर्मान्तरदूषणसंभवेऽपि तथा । तस्मात् कार्यब्रह्मप्राप्तिलक्षणः सगुणविद्याविपाकोऽयमिति सिद्धम् ।

Colophon :

इति श्रीमदनन्यानुभवपूज्यपादशिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीमत्प्रकाशात्मभगवतः कृतौ श्रीमच्छारीरकमीमांसाभाष्यन्यायसंग्रहे चतुर्थोऽध्यायः ।

मुनिवरभृङ्गसमूहानतिबहुलन्यायपरंपरा . . ।
. . . . दला प्रणयति न्यायसंग्रहस्रगियम् ॥

The scribe adds :

सुब्रह्मण्यात्मजेनायं . . . ग्रामवासिना ।
सुब्रह्मण्याभिधानेन लिखितो न्यायसंग्रहः ॥

493 34. D. 12.

ब्रह्मसूत्रवृत्तिः शास्त्रदर्पणम्— अमलानन्दकृतम्

Palm-leaf. 73 Foll. $16\frac{1}{2} \times 1\frac{3}{4}$ inches. 13 lines in a page. Grantha script. Old. Injured. Good writing.

Three extra leaves added at the end contain the Kārikās alone of the Sāstra-darpaṇa.

This is a brief gloss on the Brahmasūtras of Bādarāyaṇa. The gloss is called S'āstra-darpaṇa. The author Amalānanda, also called Vyāsāsrama, was the pupil of Anubhavānanda. He wrote his other work called Vedāntakalpataru at the time of kings Kṛṣṇa and Mahādeva of Devagiri. (1248 to 1259 A.D.)

The work was printed and published in the Srī Vāṇi Vilas Sastra Series No. 7, S'rirangam.

Complete.

Beginning :

विद्यारत्नं मयावाप्तं यत्कृपापारवारिधेः ।
तं वन्देऽनुभवानन्दं गुणरत्नाकरं गुरुम् ॥
हरिहरलीलावपुषौ परमेशौ व्यासशंकरौ नत्वा ।
वाचस्पतिमतिबिम्बितमादर्शं प्रारभे विमलम् ॥

अथातो ब्रह्मजिज्ञासा ।

ब्रह्म विचार्यं न वेति संदेहः, तद्विचारस्य विषयप्रयोजनसंभवासंभवाभ्याम् । तत्र

अहंधियात्मनः सिद्धेस्तस्यैव ब्रह्मभावतः ।
तज्ज्ञानान्मुक्त्यभावाच्च जिज्ञासा नोपपद्यते ॥

यद्वि संदिग्धं सप्रयोजनं च तज्जिज्ञास्यम् । न चात्मा संदिग्धः, अहंप्रत्ययेनेदंधीगम्येभ्यो देहादिभ्यः पृथक्त्वेन सिद्धेः ।

End :

अतो यावन्मात्रं विदुषामैश्वर्यं श्रुतं तावदेव तेषां, न सर्वेश्वरवन्निरङ्कुशमिति सिद्धम् ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानुभवानन्द-पूज्यपादशिष्यस्य भगवदमलानन्दस्य कृतौ शास्त्रदर्पणे चतुर्थोऽध्यायः ।

494 40. C. 52.

ब्रह्मसूत्रवृत्तिः ब्रह्मसूत्रदीपिका—शंकरानन्दकृता

Paper. 184 Foll. 8 × 6 inches. 10 lines in a page. Telugu script. Old. Good. Good writing.

Bound in 2 volumes.

The Brahmasūtradīpikā is a brief gloss on the Brahmasūtras of Bādarāyaṇa. The author S'aṁkarānanda was the pupil of Ānandātman whose another pupil was Anubhavānanda, the preceptor of Amalānanda who wrote his Vedāntakalpataru in the middle of the 13th century A.D. Our author S'aṁkarānanda had the famous Vidyarāṇya as the disciple. Therefore S'aṁkarānanda's date must be fixed at the end of the 13th century A.D. The work was printed and published in the Benares Sanskrit Series No. 91.

Complete.

Beginning :

नमस्तुभ्यं महामाये वरदे कामरूपिणि ।

विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥
शंकरस्य नमस्कारं कृत्वा शंकरभाष्यगा ।
सूत्रव्याख्या हिरुक् श्रोतुः सुखार्थं क्रियते मया ॥

वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम्, अधीतस्वाध्यायेनाकर्तृत्वादिरूपस्यात्मनोऽवधारणं तदवधारणाच्चाविद्यानिवृत्तिरूपमोक्षस्य सिद्धिरित्यात्मनो ब्रह्मणो विचारस्य कर्तव्यतामाह—

अथातो ब्रह्मजिज्ञासेति ।

अथशब्दः साधनचतुष्टयसंपत्त्यानन्तर्यमाह । अतःशब्दो हेत्वर्थः । ज्ञातुमिच्छा जिज्ञासा । ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा । यस्मादग्निहोत्रादि कर्मानित्यफलं ब्रह्मज्ञानं चानन्तफलं, तस्मात् शमदमादिसाधनचतुष्टयसंपत्त्यनन्तरं ब्रह्मणो वक्ष्यमाणलक्षणस्य जिज्ञासा कर्तव्येति वाक्यशेषः ।

End :

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।

नन्वेवं सति सातिशयत्वादन्तवत्त्वमैश्वर्यस्य स्यात्; ततश्चैषामावृत्तिरिति चेत् तत्राह—अनावृत्तिरिति । नावृत्तिः, शब्दात् । सूत्राभ्यासः शास्त्रसमाप्तिं द्योतयति ।

सूत्राणि सूक्ष्माणि हि चर्मनेत्रै-
र्बोद्धुं न शक्यानि सुवर्णसंघात् ।
तेषां प्रबोधाय सुवर्णजालं
निःसारितं भूरि विधाय दीपम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्रीमच्छंकरानन्दभगवतः कृतौ ब्रह्मसूत्रदीपिकायां चतुर्थस्याध्यायस्य चतुर्थः पादः ।

The last page contains the addenda of the MS. supplying some lines omitted to be copied in the body of the work.

Date of copying :

विभव सं. अधिक श्रावण ब. ९. इन्दुवारं= 6-8-1928.

495 8. H. 54.

ब्रह्मसूत्रवृत्तिः न्यायरक्षामणिः—अप्पयदीक्षितकृतः

Paper. 51 Foll. 8 × 6 inches. 18 lines in a page. Telugu script. Old. Injured. Illegible writing.

The Nyāyarakṣāmaṇi is a gloss on the Brahmasūtras of Bādarāyaṇa. The author Appayadīkṣita was the versatile author of many works including Vedāntakalpataruparimala, S'ivārkamaṇidīpikā, S'āstradīpikāvyākhyā, Upakramaparākrama, Vādas in Mīmāṁsā and Vedānta, Kuvalayānanda, Citramīmāṁsā etc. He belonged to the 16th century A.D.

Breaks off in 1-1-20.

The following extra verse is added in the begining :

श्रीकैवल्ययतिं वन्दे भट्टतन्त्रस्वतन्त्रकम् ।
प्रभाकरस्य भावज्ञं भामत्यादिप्रसाधकम् ॥

Beginning :

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥
यस्याहुरागमविदः परिपूर्णशक्ते-
रंशे कियत्यपि निविष्टमुं प्रपञ्चम् ।
तस्मै तमालरुचिभास्वरकंधराय
नारायणीसहचराय नमः शिवाय ॥
आसेतुबन्धतटमा च तुषारशैला-
दाचार्यदीक्षित इति प्रथिताभिधानम् ।

अद्वैतचित्सुखमहाम्बुधिमग्नभाव-
मस्मत्पितामहमशेषगुरुं प्रपद्ये ॥
यं ब्रह्म निश्चितधियः प्रवदन्ति साक्षात्
तद्दर्शनादखिलदर्शनपारभाजम् ।
तं सर्ववेदसमशेषबुधाधिराजं
श्रीरङ्गराजमखिनं गुरुमानतोऽस्मि ॥
वेदविभागविधात्रे विमलाय ब्रह्मणे नमो विश्वदृशे ।
सकलधृतिहेतुसाधनसूत्रसृजे सत्यवत्यभिव्यक्तिमते ॥
यो नानाभाष्यशाखोदितफलवितितिप्रौढनानारसाढ्यो
यस्मिन्मूले निरूढं फलमधिकतरं स्वादुनारुह्य लभ्यम् ।
यस्य प्रेक्षैव देहद्वयतदनुगतप्रत्यगर्थौ विवेक्त्री
सूत्रात्मा पारिजातः सकलमभिमतं मह्यमर्थं स दद्यात् ॥
नानाभाष्यादृता सा सगुणफलगतिर्वैधविद्याविशेष-
स्तत्तद्देशाप्तिरम्या सरिदिव सकला यत्र यात्यंशभूयम् ।
तस्मिन्नानन्दसिन्धावतिमहति फले भावविश्रान्तिमुद्रा
शास्त्रस्योद्घाटिता यैः प्रणमत हृदि तान् नित्य-
माचार्यपादान् ॥
अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्रधा
सरिदिव महीभागन्संप्राप्य शौरिपदोद्गता ।
जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता
जननहरणी सूक्तिर्ब्रह्माद्वयैकपारायणा ॥
एनां पुराणपदवीमनुसृत्य सत्या-
मत्यादरेण महितैरनुपाल्यमानाम् ।
शारीरकाभरणभावजुषां नयानां
रक्षाकरं मणिमनाविलमुल्लिखामि ॥
अमुं शारीरकन्यायकलापपरिकर्मितम् ।
कुदृष्टिदोषहरणं कण्ठे कुरुत सन्मणिम् ॥

अथातो ब्रह्मजिज्ञासा । अत्र शास्त्रारम्भोपयोगि-ब्रह्मात्मैक्यलक्षणविषयप्रयोजनविरोधिनः कर्तृत्वादि-बन्धस्याध्यासात्मकत्वप्रदर्शनेन तदुभयोपपादनद्वारा शास्त्रारम्भः समर्थ्यते ।

End :

पाप्मशब्दस्यानिष्टफलत्वेन रूपेण क्वचिज्जहल्लक्षणया पुण्यसाधारण्येऽपि पापमात्रे गृहीतशक्तिकस्य तस्य मोक्षशास्त्रेऽपि सर्वत्र तत्साधारण्यनियमाभावात् ।

496 20. L. 10.

ब्रह्मसूत्रवृत्तिः न्यायरक्षामणिः—अप्पयदीक्षितकृतः

Palm-leaf. 185 Foll. $16\frac{3}{4} \times 1\frac{3}{4}$ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the pādas 2 to 4 in the 1st adhyāya.

Reads the following end and colophon :

End :

अत एव नास्ति निर्विकारत्वश्रुतिविरोधोऽपि, मायिकविकाराणां तात्त्विकनिर्विकारत्वाप्रतिक्षेपकत्वस्य गाधिवृत्तान्तलवणोपाख्यानेषु लोके च प्रसिद्धत्वात् । तस्मात्सिद्धं ब्रह्म जगतो निमित्तमुपादानं चेति युक्तं ब्रह्मणो लक्षणम् ।

Colophon :

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ शारीरकन्यायरक्षामणौ प्रथमस्याध्यायस्य प्रथमः पादः । अध्यायश्च समाप्तः ।

497 22. L. 40.

ब्रह्मसूत्रवृत्तिः न्यायरक्षामणिः—अप्पयदीक्षितकृतः

Palm-leaf. 23 Foll. $17\frac{1}{4} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in 1-1-14.

The fly-leaf added in the beginning reads the following verses :

श्रीनीलकण्ठ करुणाकर भूतनाथ
प्रद्युम्नदर्पदमनाखिललोकबन्धो ।
भक्तार्तिनाशन भवौषधिदिव्यगात्र
श्रीपार्वतीरमण पालय मां दयालो ॥
वेदान्तस्याधिकरणं द्विनवत्युत्तरं शतम् ।
सूत्राणि पञ्चपञ्चाशदुत्तरं शतपञ्चकम् ॥

The fly-leaf added at the end reads a few lines of the Āpastambagṛhyasūtras.

498 23. A. 15.

ब्रह्मसूत्रवृत्तिः न्यायरक्षामणिः—अप्पयदीक्षितकृतः

Palm-leaf. 100 Foll. 16 × 1¼ inches. 10 lines in a page. Grantha script. Old. Much injured. Good writing.

Bamboo boards are added to both sides.

Wants beginning in the 2nd Pāda and ends with the 4th Pāda of the 1st adhyāya.

499 23. B. 53.

ब्रह्मसूत्रवृत्तिः न्यायरक्षामणिः—अप्पयदीक्षितकृतः

Palm-leaf. 95 Foll. 16 × 1½ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in 1-3-34.

Three extra leaves added at the end contain a domestic agreement made between Kuppāsāstri and Sundarasāstri of Mosur, North Arcot Dt.

The fly-leaf at the beginning reads the following verses in praise of S'rī Kṛṣṇa :

श्रीमान् गोपवधूटीप्रेमावेशस्तनोतु कल्याणम् ।
कामापादनकल्पो जामाताब्धेर्नमज्जनानां वः ॥
वसुदेवगेहमध्ये बलभिद्भवौघमहितडोलायाम् ।
कलितनिवासं कलये कुहनाबालं कुतूहलोपेतम् ॥
अञ्चितमणिमयडोलं संचितवसुदेवसुकृतपरिपाकम् ।
कुञ्चितगात्रं कलये वञ्चितगोपीहृदम्बुजं देवम् ॥
पर्वनिशाकरसुषुमागर्वहरं सर्वलोकनयनानाम् ।
खर्वेतरप्रमोदं चर्वितरिपुगर्वमाश्रये बालम् ॥
लीला पुनातु मातुः स्तनकलशपरिपानसंप्रवृत्तस्य ।
क्लृप्ततदङ्कनिवेशनमस्मान् कुहनाकिशोरस्य ॥
जननीस्तन्यरसानां वैशेष्यं पादजातगङ्गायाः ।
वेदितुमिव तं कृष्णं स्वादितनैजपृ . . . दनमीडे ॥
संभ्रमसंभृतजननीकुचतटपरिचुम्बिमेदुरमुखाब्जम् ।
सीत्कृतिसामिनिमीलितलोचनमुग्धं समाश्रये कृष्णम् ॥
परिपीतमदकपोलान्यरसं न्यक्कृतामृतस्व . . . दम् ।
फूत्कृत्य मातुरास्ये प्रहसन्तं बालमाश्रये नीलम् ॥
कर्णे झंकृतिसंकुलमणिमयमञ्जीरमधुरनिनदाढ्यम् ।
करतलताडितडोलं कलयामि मुहुः किशोरलीलाढ्यम् ॥
स्तन्यास्वादनसमये फाले चित्रं शिरोरुहे वेणीम् ।
मात्रा प्रसाद्यमानं कृष्णकिशोरं कदा निरीक्षिष्ये ॥

Another fly-leaf added at the beginning contains some lines from the Āpastambagṛhyasūtras.

500 26. L. 21.

ब्रह्मसूत्रवृत्तिः न्यायरक्षामणिः—अप्पयदीक्षितकृतः

Palm-leaf. 53 Foll. 16 × 1½ inches. 9 lines in a page. Grantha script. Old. Much injured. Good writing.

Begins in 1-1-21 and breaks off in 1-2-11.

501 27. N. 10.

ब्रह्मसूत्रवृत्तिः न्यायरक्षामणिः—अप्पयदीक्षितकृतः

Palm-leaf. 148 Foll. 17 × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wants the first two leaves in the beginning of the 1st pāda and breaks off in the 3rd pāda of the 1st adhyāya.

502 40. E. 50.

ब्रह्मसूत्रवृत्तिः सूत्रमुक्तावलिः—ब्रह्मानन्दसरस्वती-कृता

Paper. 91 Foll. 12½ × 4 inches. 11 lines in a page. Telugu script. Old. Good. Good writing.

The Sūtramuktāvali is a gloss on the Brahmasūtras of Bādarāyaṇa. The work is printed and published in the Ānandāśrama Sanskrit Series, Poona, No. 77 in the year 1915. From the colophons found there, the author Brahmānandasarasvatī is known as the pupil of Paramānandasarasvatī and identical with the famous Gauḍa Brahmānanda, the author of the Laghucandrikā etc. He is also known to have been the pupil of Nārāyaṇānandasarasvatī also called Nārāyaṇatirtha who wrote the Śārīrakamīmāṁsābhāṣyavārttika (Asutosh Sanskrit Series, Calcutta, 1941) in the year Kali 4693 corresponding to 1592 A.D. Therefore our author must have been in the beginning of the 17th century A.D. His other works are Advaitasiddhivyākhyā Laghu and Guru Candrikās, Siddhāntabinduvyākhyā Nyāyaratnāvali, Advaitasiddhāntavidyotana. In the Laghucandrikā the author mentions his another teacher as Śivarāmānandasarasvatī.

He mentions a work called Nirṇayadarpaṇa.

Breaks off in the 3-4-42.

Beginning :

चरणौ शरणीकुर्मः श्रीमन्नारायणप्रभोः ।
अपि श्रीविश्वनाथस्य परमानन्दरूपिणः ॥
भाष्यार्थो निरणायि यः श्रुतिपथन्यायाम्बुधेःपारगै-
र्विज्ञैर्निर्णयदर्पणप्रभृतिषु ब्रह्मापरोक्षान्वितैः ।
तं बुद्ध्वा तनुते गुरुप्रभृतिभिस्तन्मात्रचेतोगति-
र्ब्रह्मानन्दसरस्वती श्रुतिशिरःसूत्रेषु मुक्तावलीम् ॥

अथेयं शारीरकमीमांसा नारभ्या ; कर्तृत्वादिबन्धस्य समूलस्य सत्यतया ज्ञानानिवर्त्यत्वात्, तन्निवृत्तेः फलस्य तत्कामस्याधिकारिणो जीवपरयोरैक्यस्य विषयस्य चासंभवात्, वेदान्तानामर्थवादत्वेन विचारविधिफलादिषु तात्पर्याभावात्, वेदार्थमात्रविचारस्य पूर्वमीमांसया कृतत्वाच्चेति । प्रत्याह—अथातो ब्रह्मजिज्ञासा । नित्यानित्यविवेकभोगमात्रारागशमदमोपरतितितिक्षासमाधानानन्तर्यमथशब्दार्थः ।

End :

तत्रैव च यतिः शान्तः कुर्यात्सांतपनव्रतम् ।
ततश्चरति निर्दोषः कृच्छ्रस्यान्ते समाहितः ।
पुनश्चाश्रममागत्य चरेद्भिक्षुरतन्द्रितः ॥

इत्यादिः प्रणवजपादिश्च बोध्यः । कृतप्रायश्चित्तेरपि कृतं प्राणायामादि विद्यार्थमिति प्रयोजनसंगती ।

503 33. F. 11.

ब्रह्मसूत्रवृत्तिः मिताक्षरा—अन्नंभट्टकृता

Palm-leaf. 109 Foll. 18 × 1½ inches. 7 lines in a page. Telugu script. Old. Good. Good writing.

The Mitākṣarā is a gloss on the Brahmasūtras of Bādarāyaṇa. The author Annambhaṭṭa was the son of Tirumalācārya belonging to the Rāghavasomayāji family of Kauśikagotra. He was

the younger brother of Sarvadeva who must be different from the namesake author of the Pramāṇamañjarī referred to by S'ri Vedāntades'ika (1268 to 1369 A.D.) in his Nyāyaparis'uddhi. Annambaṭṭa was the disciple of S'eṣa Vires'vara, son of S'eṣa Kṛṣṇa in Vyākaraṇa and of Brahmendrasarasvatī in Vedānta. His other works are: Tattvacintāmaṇidīdhitivyākhyā, Tattvacintāmaṇyālokavyākhyā, Tattvavivekadīpanavyākhyā, Tantravārttikaṭīkā, Tarkasaṁgraha, Tarkasaṅgrahadīpikā, Nyāyasudhāvyākhyā, Aṣṭādhyāyīvyākhyā Mitākṣarā, Mahābhāṣyapradīpoddyotana and Svaraviveka. His date may be fixed in the latter part of the 17th century A.D. The work has been printed and published in the Madras Govt. Oriental MSS. Series No. 18 in 1950.

Breaks off in 4-3-15.

Beginning:

विश्वेश्वरं नमस्कृत्य ब्रह्मसूत्रार्थबोधिकाम् ।
वृत्तिं मिताक्षरां कुर्वे भामत्यादिमतानुगाम् ॥

अथातो ब्रह्मजिज्ञासा । तत्र तावदात्मा वारे द्रष्टव्यः श्रोतव्य इति फलमनूद्य तत्साधनत्वेन श्रवणं विधीयते । श्रवणं नाम वेदान्तवाक्यानामद्वितीये ब्रह्मणि तात्पर्यनिर्णयानुकूलो न्यायविचारः । तादृशन्यायविचारात्मकं वेदान्तशास्त्रमारम्भणीयमनारम्भणीयं वेति संदेहः ।

End:

अप्रती . . . क्रतुश्च । गतिगन्तव्ये निरूप्य गन्तृविशेषो निरूप्यते । स एनान् ब्रह्म गमयति इत्यत्र किममानवः सर्वानुपासकान् गमयति, किं वा प्रतीकोपासकव्यतिरिक्तानिति संशये, अविशेषात् सर्वग्रहणप्राप्तौ, उच्यते ।

504 23. J. 12.

ब्रह्मसूत्रवृत्तिः मिताक्षरा—अन्नंभट्टकृता

Palm-leaf. 113 Foll. 10 × 1 inches. 8 lines in a page. Telugu script. Old. Much injured. Illegible writing.

Breaks off in 3-3-34.

505 8. H. 4.

ब्रह्मसूत्रवृत्तिः ब्रह्मतत्त्वप्रकाशिका—सदाशिवेन्द्रसरस्वतीकृता

Paper. 147 Foll. 13 × 8½ inches. 15 lines in a page. Grantha script. Old. Good. Good writing.

This is a gloss on the Brahmasūtras of Bādarāyaṇa. It is called Brahmatattvaprakās'ikā. The author Sadās'ivendrasarasvatī also called Sadās'ivabrahmendra was the pupil of Paramas'ivendrasarasvatī. The work was printed and published in the S'rī Vāṇī Vilas Series, Srirangam No. 6. In the introduction of this edition the editor gives a full sketch of the author's life placing him in the middle of the 18th century A.D. The author is said to have lived at Karur and died at Narur in Trichinopoly Dt. The author is known to have written the following other works: Ātmavidyāvilāsa, Siddhāntakalpavallī, Advaitarasamañjarī, Kaivalyopaniṣaddīpikā, Ātmānātmavivekaprakās'ikā, Gītiratnamālikā, Gururatnamālikā, Bodhāryā, S'ivamānasikapūjā, Saparyāparyāyastava, S'ivayogadīpikā, Yogasudhākara, Dakṣiṇāmūrtidhyāna, Pañcīkaraṇa, Mahāvākyārthas'odhana, Rāmakṛṣṇendrasarasvatyaṣṭaka,

Sarvavedāntasārasaṁgraha and Svānubhūtiprakāśa. Some of these works have been printed and published in a booklet called Vedāntapañcaprakaraṇī at Kumbakonam in the year 1895. The editor of this publication places our author in Kali year 4675 = 1570 A.D. Dr.M. Krishnamachari also places the author in the latter half of the 16th century A.D. (Vide his History of Classical Sanskrit Literature, Para No. 653).

Complete.

Beginning:

आम्नायान्तैकसंसिद्धमादिमध्यान्तवर्जितम् ।
आनन्दघनसंपूर्णं किंचिज्ज्योतिरुपास्महे ॥
नमस्त्रय्यन्तकान्तरविहारैकपटीयसे ।
वादिमत्तेभसंहर्त्रे व्यासकेसरिणे सते ॥
स्तुवन्मोहतमःस्तोमभानुभावमुपेयुषः ।
स्तुमस्तान् भगवत्पादान् भवरोगभिषग्वरान् ॥
यद्वाणीद्युमणिध्वस्ता मन्मोहध्वान्तसंततिः ।
श्रीगुरून् भावयामस्तांस्त्रय्यन्ताम्बुजभास्करान् ॥
श्रीमद्देशिकपादाब्जपरिचर्याबलादहम् ।
भाष्यानुगां ब्रह्मसूत्रवृत्तिं कुर्वे यथामति ॥

इह खलु भगवान् बादरायणः प्रेक्षावत्प्रवृत्त्यौपयिकमापाततस्त्रय्यन्तवचोभिः प्रतिपन्नमनुबन्धजातं न्यायतो निर्णेतुमिदमारचयांचकार—अथातो ब्रह्मजिज्ञासेति । अत्र अथशब्देन साधनचतुष्टयसंपत्त्यानन्तर्यमुच्यते । अतःशब्देन साधनचतुष्टयस्य संभावना, ब्रह्मजिज्ञासेत्यनेनाज्ञातत्वेन विषयत्वं, ज्ञातत्वेन प्रयोजनत्वं च ब्रह्मण उक्तं भवति ।

End:

तस्मात् ब्रह्मविदां निरस्तसमस्तप्रपञ्चस्वप्रकाशचिदेकरसनिरतिशयानन्दात्मनावस्थितिरित्यतिशोभनम् । अनावृत्तिः शब्दादिति सूत्रावृत्तिः शास्त्रसमाप्तिद्योतनार्था ।

यज्ज्ञानाज्जीवतो मुक्तिरुत्क्रान्तिर्गतिरुत्कटा ।
ब्रह्मप्राप्तिः प्रत्यपादि तदस्मि ब्रह्म चिद्घनम् ॥

अस्मिन् पादे सप्ताधिकरणानि । सूत्राणि द्वाविंशतिः । अस्मिन् फलाध्याये अष्टत्रिंशदधिकरणानि । सूत्राण्यष्टसप्ततिः । अस्यां शारीरकमीमांसायामधिकरणानि एकाधिकनवत्युत्तरशतं, सूत्राणि पञ्चपञ्चाशदधिकपञ्चशतम् ।

यस्यापाङ्गनिरीक्षणाद्ध्वरतिं भीतिप्रदामुज्जहत्
त्रय्यन्तार्थविमर्शनाद्गतमहामायोऽभवं संततम् ।
तं शुद्धाद्वयबुद्धमुक्तमनवं कारुण्यपूर्णं शिवं
पूर्णानन्दमहाप्रभावमतुलं वन्दे गुरुं शाश्वतम् ॥
जडः क्वाहं बालः क्व च गहनवेदान्तसरणिस्तथाप्यास्नायार्थं परमशिवयोगीन्द्रकृपया ।
विजानन् व्याख्यानं व्यरचयमहं वेदशिरसस्तदेतत्क्षन्तव्यं मयि सदयदृष्ट्या बुधजनैः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्रसरस्वतीपादाब्जसेवापरायणेन श्रीसदाशिवेन्द्रसरस्वत्या विरचितायां ब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्वप्रकाशिकायां चतुर्थाध्यायस्य चतुर्थः पादः । समाप्तश्च फलाध्यायः । समाप्ता च शारीरकमीमांसा ।

The scribe adds:

संगमक्षेत्रवास्तव्यरामस्वामिशास्त्रिणा लिखितम् ।

506 21. G. 6.

ब्रह्मसूत्रवृत्तिः ब्रह्मतत्त्वप्रकाशिका—सदाशिवेन्द्रसरस्वतीकृता

Palm-leaf. 4 Foll. 17½ × 1 inches. 9

lines in a page. Grantha script. Old. Injured. Good writing.

Contains the first 14 sūtras of the 1st pāda of the 4th adhyāya.

507 22. P. 21.

ब्रह्मसूत्रवृत्तिः ब्रह्मतत्त्वप्रकाशिका—सदाशिवेन्द्र-सरस्वतीकृता

Palm-leaf. 6 Foll. $13\frac{1}{2} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains a small portion of the 3rd pāda and the whole of the 4th pāda of the 4th adhyāya.

The scribe adds :

अब्दे श्रीभवनामके दिनकरे कन्यां गते श्यामले
पक्षैकादशसंख्यके तिथिवरे वारे रवेः पैत्रभे ।
. . . . . शः सुधीः
श्रीवत्सान्वयसंभवो लिखितवांस्त्र्यन्त्रवृत्तिं स्वयम् ॥

508 24. C. 11.

ब्रह्मसूत्रवृत्तिः ब्रह्मतत्त्वप्रकाशिका--सदाशिवेन्द्र-सरस्वतीकृता

Palm-leaf. 171 Foll. 12×2 inches. 9 lines in a page. Grantha script. Old. Injured. Clear writing.

Wooden boards are added to both sides.

Breaks off in the 3rd pāda of the 4th adhyāya.

509 26. G. 42.

ब्रह्मसूत्रवृत्तिः ब्रह्मतत्त्वप्रकाशिका--सदाशिवेन्द्र-सरस्वतीकृता

Palm-leaf. 53 Foll. $17\frac{1}{2} \times 1$ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Incomplete.

510 28. K. 35.

ब्रह्मसूत्रवृत्तिः ब्रह्मतत्त्वप्रकाशिका—सदाशिवेन्द्र-सरस्वतीकृता

Palm-leaf. 12 Foll. $18\frac{1}{2} \times 1\frac{1}{2}$ inches. 10 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the pādas 1 to 3 of the 1st adhyāya.

511 28. K. 42.

ब्रह्मसूत्रवृत्तिः ब्रह्मतत्त्वप्रकाशिका—सदाशिवेन्द्र-सरस्वतीकृता

Palm-leaf. 179 Foll. $12 \times 1\frac{3}{4}$ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

512 33. K. 10.

ब्रह्मसूत्रवृत्तिः ब्रह्मतत्त्वप्रकाशिका—सदाशिवेन्द्र-सरस्वतीकृता

Palm-leaf. 25 Foll. $16 \times 1\frac{1}{2}$ inches. 10 lines in a page. Grantha script. Old. Injured. Illegible writing.

Breaks off in the 3rd pāda of the 1st adhyāya.

513 34. B. 6.

ब्रह्मसूत्रवृत्तिः ब्रह्मतत्त्वप्रकाशिका—सदाशिवेन्द्र-सरस्वतीकृता

Palm-leaf. 141 Foll. $12\frac{1}{2} \times 1\frac{1}{4}$ inches.

10 lines in a page. Grantha script. Old, Injured. Good writing.

Complete.

514 24. B. 8.

ब्रह्मसूत्रवृत्तिः शारीरकमीमांसाशास्त्रसंग्रहः— कृष्णानुभूतियतिकृतः

Palm-leaf. 150. Foll. $11\frac{3}{4} \times 1\frac{3}{4}$ inches. 10 lines in a page. Malayālam script. Old. Injured. Good writing.

Wooden boards are added to both sides.

This is a gloss on the Brahmasūtras of Bādarāyaṇa. The gloss is called S'ārīrakamīmāṁsās'āstrasaṁgraha or simply Sāstrasaṁgraha. The author Kṛṣṇānubhūtiyati also called Vibudhendratīrtha was the pupil of Ānandānubhūtiyati. The author states that this work was composed at the time of the kings Rājarājavarman and Ravivarman. The Malabar poet Vāsudevakavi is said to have been in the court of the king Ravivarman in the middle of the 15th century A.D. (P. 252. Dr. M. Krishnamachariar's Classical Sanskrit Literature—1937). If Ravivarman mentioned by our author is taken to have been identical with Vāsudevakavi's patron, our author may be fixed in the middle of the 15th century A.D.

Complete.

Beginning :

हेरम्बं च सदाशिवं वटगतं वागीश्वरीं शाश्वतीं
व्यासं शंकरनामधेयगुरुमप्यस्मद्गुरुं षण्मुखम् ।
गोविन्दं च जगद्गुरुं शमनिधिं विद्यागुरुं गोपतिं
वन्दे सर्वनिदानमेकममलं ब्रह्मापि सच्चित्सुखम् ॥
कृष्णानुभूतियतिभिः क्रियते शास्त्रसंग्रहः ।
निर्मत्सरैर्जनैर्नित्यं क्रियतामस्य संग्रहः ॥
अस्पष्टसंगतिपदार्थमिदं हि सूत्रं
वैयासिकं तदहमद्य निरीक्ष्य भाष्यम् ।
विस्पष्टसंगतिपदार्थयुतं विधास्ये
पद्यत्रयानुगतगद्यमयैर्वचोभिः ॥
भाष्यार्थमात्रमिदमस्य न कोऽपि भेदः
संगृह्य किंचिदुदितं किमनेन पद्यैः ।
इत्येवमादि यदि दूषयतीह कश्चि-
द्धन्ताधुनाभिलषितं फलितं मदीयम् ॥
संबन्धोक्तिर्यत्र सूत्रस्य नार्थो
यत्राप्यर्थः संगतिर्नात्र भाति ।
सापेक्षत्वं नापि चैकस्य युक्तं
तस्माद्वक्ष्ये मेलने तूभयोर्मे ॥
सूत्रस्यावयवाः पञ्च संगतिर्विषयस्तथा ।
संदेहः पूर्वपक्षश्च सिद्धान्तश्च क्रमादिमे ॥
संगतिर्बहुधा तत्र शास्त्रादिर्विषयो मतः ।
अन्योन्यसंगतौ सत्यामूहनीया इहापराः ॥
आद्येन संगतिं वक्ष्ये परेणावयवत्रयम् ।
इतरेण च सिद्धान्तं पद्येनार्धं तु गद्यतः ॥
अधीतवेदस्य विशुद्धचेतसो
विना न तर्केण विशेषवेदनम् ।
अतोऽनुबन्धत्रयमत्र तर्कतो
विवेचयन्नाह विवेकधीर्मुनिः ॥
शास्त्रस्य प्रथमं सूत्रमथातो ब्रह्मजिज्ञासा ।
आत्मेत्यत्राविधेयं वा विधेयं श्रवणादिकम् ॥

End :

कृष्णानुभूतियतिभी रचिते शास्त्रसंग्रहे ।
चतुर्थपादः संपूर्णश्चतुर्थाध्याय एव च ॥
कृष्णस्वरूपगुरुपादपयोजपांसु-
सेवानिबन्धनपचेलिमपुण्यपूर्णा ।

कृष्णानुभूतियतिवर्यकृतिः कृतीनां
सूत्रार्थबोधजननी कृतिनां मुदेऽस्तु ॥
श्रीराजराजरविवर्ममहीश्वराभ्यां
राजवन्ती वसुमती सकलापि याभ्याम् ।
संशासतोरिह सतोऽस्तु तयोर्धरित्रीं
कृष्णानुभूतिभिरयं रचितो निबन्धः ॥

Colophon :

इति श्रीमदानन्दानुभूतिपूज्यपादशिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीमत्कृष्णानुभूतेर्विबुधेन्द्रतीर्थापरनामधेयस्य कृतौ श्रीमच्छारीरकमीमांसाशास्त्रसंग्रहे चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः ।

The scribe adds :

रामेण लिखितमिदं पुस्तकम् ।

The fly-leaf added in the beginning reads the following line :

कूडलूरुमनगतकृष्णानुभूतिकृतवेदान्तसूत्रवृत्तिः ।

A Palm-leaf MS. recently acquired in this Library adds the following verse :

गीर्वाणेन्द्रसरस्वत्याः पादाब्जं हृदि बिभ्रतः ।
श्रीधरस्य मुदे भूयात्सूत्रभाष्यार्थसंग्रहः ॥

515 34. C. 4.

ब्रह्मसूत्रवृत्तिः ब्रह्मामृतवर्षिणी—धर्मभट्टकृता

Palm-leaf. 207 Foll. 14½ × 1½ inches. 9 lines in a page. Grantha script. Old. Fair. Good writing.

The Brahmāmṛtavarsiṇī is a gloss on the Brahmasūtras of Bādarāyaṇa, following the views of S'ri S'aṁkarācārya. The Telugu Printed edition and all the MSS. in Telugu script read the author's name as Dharmabhaṭṭa and mention him as the son of Tirumalācārya and pupil of Mukundās'rama and Mantravādi Rāmacandrārya. But the Devanāgarī editions published in the Chowkhāmbā Samskrit Series and the Pandit Series of Benares, mention the author's name as Rāmānandasarasvatī pupil of Mukundagovinda. The edition published in the Ānandās'rama Sanskrit Series, Poona, mentions the author as Rāmakiṁkara Dharma pupil of Mukundagovinda. This MS. does not mention the author's name. The India Office Library Catalogue No. 2268 mentions a MS. of the work called Brāhmasūtrapadayojanā or Brahmāmṛtavarṣiṇi with the readings which are more or less the same as found in the MS. described now. But the India Office Library MS. mentioned above attributes the authorship to Sadās'ivānandasarasvatī pupil of Svayaṁprakās'ānandasarasvatī. Thus there is a long-standing confusion in regard to the authorship of the work.

Complete.

Beginning :

श्रीरामचरणद्वन्द्वमद्वैतानन्दसाधनम् ।
नमामि यद्रजोयोगात्पाषाणोऽपि सुखं गतः ॥

नित्याध्ययनविधिनाधीतस्वाध्यायमापाततः प्रतिपन्नपुरुषार्थकाममैहिकामुष्मिकफलेषु विरक्तमुपलभमानो भगवान् परमकारुणिको मुनिः सूत्रयामास—अथातो ब्रह्मजिज्ञासेति । अत्राथशब्देन साधनचतुष्टयसंपत्त्यानन्तर्यमुच्यते । तद्यथेह कर्मचितो लोकः क्षीयत इति कर्मफलानामनित्यत्वं परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेनेति वैराग्यं कर्मफलेषु सूचितम् ।

End :

तस्मात् ब्रह्मविदां निरस्तानर्थव्रातस्वप्रभनिरतिशयानन्दात्मनावस्थितिरिति सिद्धम् । सूत्रावृत्तिः शास्त्रसमाप्तिद्योतनार्था ।

यः सर्वश्रुतिवन्दिवन्दिततनुर्मायात्मनिद्रां गतः
सुप्तोऽस्मिन् भवपट्टणेऽपरिमिते कल्पान्ततल्पान्तरे ।
यः सर्वापरिपन्थिसाङ्गनयजप्रज्ञाप्रहाणान्तज-
प्रज्ञालभ्यसुखांकृतिः कृतिमिमां रामः स गृह्णातु नः ॥
अध्यायचतुष्टयार्थोऽनेन सूचितः ।
विदुषां कण्ठभूषेयं मया वृत्तिः कृता प्रभो ।
व्यासवाङ्मणिसंदृब्धा प्रीतये तेऽस्तु सर्वदा ॥

Colophon :

इति ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां चतुर्थोऽध्यायः ।

516 8. G. 14.

ब्रह्मसूत्रवृत्तिः ब्रह्मामृतवर्षिणी—धर्मभट्टकृता

Paper. 50 Foll. 12½ × 6 inches. 19 lines in a page. Telugu script. Old. Good. Good writing.

Bound volume.

Breaks off in 2-3-12.

517 8. H. 55.

ब्रह्मसूत्रवृत्तिः ब्रह्मामृतवर्षिणी—धर्मभट्टकृता

Paper. 55 Foll. 8½ × 7 inches. 22 lines in a page. Telugu script. Old. Injured. Good writing.

Breaks off in the 2nd pāda of the 1st adhyāya.

The colophon attributes the authership to Dharmabhaṭṭa son of Tirumalācarya and pupil of Mantravādi Ramacandrārya and Mukundāśrama.

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमुकुन्दाश्रमशिक्षितस्य महोपाध्यायमन्त्रवादिश्रीरामचन्द्रार्यशिष्यस्य तिरुमलाचार्यसूनोर्धर्मभट्टस्य कृतौ ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां प्रथमस्याध्यायस्य प्रथमः पादः ।

518 10. E. 41.

ब्रह्मसूत्रवृत्तिः ब्रह्मामृतवर्षिणी—धर्मभट्टकृता

Paper. 35 Foll. 10 × 5 inches. 12 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Wants beginning in the 3rd pāda of the 1st adhyāya and goes on up to the end of the 1st adhyāya.

The author is mentioned here as Rāmakiṁkara Dharma pupil of Mukundagovinda.

Reads the following colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमन्मुकुन्दगोविन्दश्रीचरणशिक्षितश्रीरामकिंकरधर्मकृतौ ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां प्रथमस्याध्यायस्य चतुर्थः पादः । समाप्तोऽयं समन्वयाध्यायः ।

519 28. K. 60.

ब्रह्मसूत्रवृत्तिः ब्रह्मामृतवर्षिणी—धर्मभट्टकृता

Palm-leaf. 103 Foll. 14 × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Clear writing.

Contains up to the end of the 3rd pāda of the 1st adhyāya.

Reads the following colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमुकुन्दाश्रमचरणशिक्षितस्य महोपाधायमन्त्रवादिश्रीरामचन्द्रार्य-

शिष्यस्य तिरुमलाचार्यसूनोर्धर्माख्यभट्टारकस्य कृतौ ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां प्रथमस्याध्यायस्य तृतीयः पादः ।

520 30. I. 8.

ब्रह्मसूत्रवृत्तिः ब्रह्मामृतवर्षिणी—धर्मभट्टकृता

Palm-leaf. 41 Foll. 16 × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Wants beginning in the 1st pāda and breaks off in the 3rd pāda of the 1st adhyāya.

The MS. does not mention the author's name.

521 33. F. 15.

ब्रह्मसूत्रवृत्तिः ब्रह्मामृतवर्षिणी—धर्मभट्टकृता

Palm-leaf. 128 Foll. 16 × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 22nd Sūtra of the 1st pāda of the 2nd adhyāya.

The colophons do not mention the author's name.

522 34. B. 5.

ब्रह्मसूत्रवृत्तिः ब्रह्मामृतवर्षिणी—धर्मभट्टकृता

Palm-leaf. 194 Foll. 16 × 1¼ inches. 9 lines in a page. Grantha script. Old. Good. Good writing.

The colophons do not mention the author's name.

Complete.

523 34. G. 12.

ब्रह्मसूत्रवृत्तिः ब्रह्मामृतवर्षिणी—धर्मभट्टकृता

Palm-leaf. 80 Foll. 18 × 2 inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Breaks off in the 20th Sūtra of the 2nd pāda of the 3rd adhyāya.

The colophons do not mention the author's name.

524 33. F. 12.

ब्रह्मसूत्रवृत्तिः वैयासिकसूत्रोपन्यासः—रामेश्वरभारतीकृतः

Palm-leaf. 122 Foll. 15 × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Bamboo boards are added to both sides.

This is a gloss on the Brahmasūtras of Bādarāyaṇa. The gloss is called Vaiyāsikasūtropanyāsa in colophons, but popularly it is known by the name Sūtropanyāsa or Brahmasūtropanyāsa. The author Rāmeśvarabhāratī mentions in the beginning, Vidyāśaṁkara and Śuddhajñānātmabhāratī, probably as his preceptors. Nothing more is known about the author.

Complete.

Beginning:

बोधानन्दगणाध्यक्षं कालमूषकवाहनम् ।
जन्मादिविघ्नहर्तारं भजे निजगुरुं सदा ॥
विद्याशंकरपादाब्जपरागाः पान्तु पावनाः ।
निस्तमस्कसदानन्दसाक्षात्करणहेतवः ॥
नमामि शुद्धविज्ञानमात्मभारतिसद्गुरुम् ।
यस्यावलोकनान्मूको वावदूकत्वमाप्नुयात् ॥

आचार्यभाष्यतट्टीकातन्निबन्धनसागरात् ।
तदर्थरत्नान्युद्धृत्य सूत्रेषु ग्रथयाम्यहम् ॥

अथातो ब्रह्मजिज्ञासा । इह खलु सूत्रे सर्वज्ञबादरायणप्रणीतत्वात् आनर्थक्यानुपपत्तेः निरर्थकसिद्धबोधकत्वानुपपत्तेश्च शास्त्रे पुरुषप्रवृत्त्युपयोगितया कर्तव्येति पदमध्याहर्तव्यम् । ननु कर्तव्यपदाध्याहारेऽप्यानर्थक्यं तदवस्थमेव, ज्ञानेच्छयोः कर्तव्यत्वानुपपत्तेरिति चेत् न, जिज्ञासापदेन विचारं लक्षयित्वा कर्तव्यतोच्यत इत्यङ्गीकारात् । विचारस्यैव लक्षणायां को हेतुरिति चेत्, तस्यानुष्ठानयोग्यत्वात् जिज्ञासापदवाच्यत्वसंभवाच्चेति वदामः ।

End :

अनावृत्तिः शब्दादनावृत्तिः शब्दात् । अर्चिरादिमार्गेण ब्रह्मलोकगतानामनावृत्तिः । न पुनश्चन्द्रलोकगतानामिव पुनरावृत्तिः । कुतः ? न स पुनरावर्तते, एतेन प्रपद्यमाना इमं मानवमावर्तं नावर्तन्त इत्यादिशब्दात् । अनुमानस्य तु क्रममुक्तिप्रतिपादकशब्दविरोधादनुत्थानमिति । सूत्राभ्यासः शास्त्रपरिसमाप्तौ ।

वैयासिकानां सूत्राणामुपन्यासः कृतो मया ।
अलसानां नृणामेतत्प्रतीतिर्जायतामिति ॥
टीका स्नेहविहीनापि व्याससूत्रार्थदीपिका ।
इयं रामेशभारत्याः कृतिर्विजयतां भुवि ॥

Colophon :

इति वैयासिकसूत्रोपन्यासे चतुर्थस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

इति परमहंसपरिव्राजकश्रीरामेश्वरभारतीविरचितो वैयासिकसूत्रोपन्यासः परिसमाप्तः ।

525 33. J. 20.

ब्रह्मसूत्रवृत्तिः वैयासिकसूत्रोपन्यासः—रामेश्वरभारतीकृतः

Palm-leaf. 61 Foll. 15 × 1½ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The fly-leaf added in the beginning reads some verses from the Devībhāgavata.

526 28. A. 82.

ब्रह्मसूत्रवृत्तिः वैयासिकसूत्रोपन्यासः—रामेश्वरभारतीकृतः

Palm-leaf. 56 Foll. 16 × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Clear writing.

Begins in 1-2-16 and breaks off in 2-4-9.

Two extra leaves added at the end of the MS. read some sūtras of Brahmasūtra.

527 27. D. 27.

ब्रह्मसूत्रवृत्तिः भाष्यसारसंग्रहः—रामब्रह्मेन्द्रसरस्वतीकृतः

Palm-leaf. 119 Foll. 18 × 1 inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

This is a gloss on Bādarāyaṇa's Brahmasūtras. The author Rāmabrahmendrasarasvatī was the disciple of Vāsudevendrasarasvatī.

Complete.

Beginning :

ज्ञानानन्दघनं नित्यं जगद्धेतुं जगन्मयम् ।
प्रणमामि परात्मानं रामं प्रत्यञ्चमद्वयम् ॥
नौमि सूत्रकृतं व्यासं नारायणमजं शिवम् ।
सर्ववेदार्थतत्त्वज्ञं भाष्यकारं सदार्तिहम् ॥

अथ भगवान् परमकृपालुर्बादरायणः प्रेक्षावत्प्रवृत्त्यङ्गमनुबन्धचतुष्टयं सूचयन् विधिवदधीतवेदवेदाङ्गस्यापि आपाततः प्रतिपन्नवेदार्थस्य मुमुक्षोः मोक्षसिद्धये श्रवणविध्युपात्तश्रवणसाधनं वेदान्तमीमांसाशास्त्रमारभते—अथातो ब्रह्मजिज्ञासेत्यादिना। अथ साधनचतुष्टयसंपत्त्यनन्तरम्। साधनचतुष्टयं नाम-नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिसाधनषट्कसंपत्तिः, मुमुक्षुत्वं च। नित्यानित्यवस्तुविवेको नाम ब्रह्मैव नित्यं वस्तु, ततोऽन्यदखिलमनित्यमिति विवेचनम्।

End :

अनावृत्तिः शब्दादनावृत्तिः शब्दात्। अर्चिरादिपर्वणा देवयानेन पथा ये ब्रह्मलोकं गच्छन्ति ते तं प्राप्य न निवर्तन्ते, तयोर्ध्वमायन्नमृतत्वमेतीत्यादिशब्देभ्यः। अन्तवत्त्वेऽपि चैश्वर्यस्य यथा अनावृत्तिस्तथा वर्ण्यते। सहाध्यक्षेणातः परमिति। . . .

* * *

एतदाश्रयेणैव सगुणशरणानामनावृत्तिरिति। अनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रसमाप्तिं द्योतयति।

Colophon :

इति परमहंसपरिव्राजकाचार्यश्रीमद्वासुदेवेन्द्रसरस्वतीपूज्यपादशिष्यश्रीमद्रामब्रह्मेन्द्रसरस्वतीकृतायां शारीरकमीमांसासूत्रवृत्तौ भाष्य(सारसंग्रहभूतायां) चतुर्थाध्यायस्य चतुर्थः पादः।

अविरलकृतवर्णश्रेषणं . . . .
जन . . . . लिखितदूषणं वा।
अनुचितमथवा यद्वर्ण्यते वक्राजः
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥

विभवनामसंवत्सरे दक्षिणायने हेमन्तऋतौ कृष्णपक्षे भौमवासरे एकादश्यां शुभदिने कोयंपुरी कुप्पाशास्त्रिणा भाष्यसारसंग्रहः समग्रो मया लिखितः।

The fly-leaf added in the beginning mentions the name of the work as Bhāṣyasārasaṁgraha.

528 33. L. 25.

ब्रह्मसूत्रवृत्तिः उत्तरमीमांसासारार्थसुधा—सीतारामशास्त्रिकृता

Palm-leaf. 73 Foll. 17½ × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

This gloss on the Brahmasūtra was written by one Sītārāmaśāstrin. The gloss is called in the colophon as Uttaramīmāṁsāsārārthasudhā. The fly-leaf attached in the beginning of the MS. calls the gloss as Advaitasudhā.

Beginning :

यत्साक्षादपरोक्षमस्ति निखिलद्वन्द्वं तुरीयं महत्प्रत्यग्भूतमलुप्तचित्सुखमबाह्याभ्यन्तरं निश्चलम्।
सत्यं सूक्ष्ममतन्वहेयमनुपादेयं विशुद्धं च तत्
सद्ब्रह्मात्मतया भजेऽहमखिलश्रुत्यन्तगीतं परम्॥
जगज्जन्मादिहेतुर्यः सच्चिदानन्दलक्षणः।
तमचिन्त्यानन्तशक्तिमखिलज्ञमहं भजे॥
यत्कृपालेशमासाद्य मूढोऽपि विबुधो भवेत्।
तन्नौम्युत्तरमायूरदक्षिणास्यं जगद्गुरुम्॥
श्रीमद्गुरुपदद्वन्द्वसरसीरुहमादरात्।
वचसां सिद्धये विघ्नध्वस्तये च नमाम्यहम्॥
श्रुत्यन्तदुग्धपाथोधिमथनादुद्धृतं पुरा।
ब्रह्मसूत्रामृतं येन तं वन्दे बादरायणम्॥
सर्वश्रुत्यन्तसारार्थतदन्यक्षीरनीरयोः।
विवेके यः परो हंसस्तं वन्दे शंकराभिधम्॥
श्रीमदुत्तरमीमांसादुग्धाब्धिमथनोद्भवाम्।
सुधां समर्पयाम्यद्य जगज्जन्मादिकारणे॥
अथातो ब्रह्मजिज्ञासा।

स्वाध्यायोऽध्येतव्य इति नित्याध्ययनविधिनाधीतस्वाध्याये तद्विजिज्ञासस्व, सोऽन्वेष्टव्यः स विजिज्ञासितव्यः, आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादिवाक्यैरात्मदर्शनरूपं फलमुद्दिश्य तत्साधनत्वेन श्रवणादिकं विधीयते। तत्र श्रवणं नाम सर्वेषां वेदान्तानां प्रत्यगभिन्नब्रह्मणि तात्पर्यनिश्चयानुकूलो न्यायविचारः।

Colophon on folio 36:

इति श्रीसज्जनबृन्दचरणारविन्दनिषेविवेदान्तिसीतारामशास्त्रिविरचितायां श्रीमदुत्तरमीमांसासारार्थसुधायां प्रथमाध्यायस्य प्रथमः पादः।

End:

तथाचानूद्य शारीरं तस्य यत्पारमार्थिकम्।
स्वरूपं तत्परं ब्रह्म श्रुत्यात्र प्रतिपाद्यते॥
तस्माद्याज्ञवल्क्यमहर्षिणा।
तस्मिन्प्रत्यगभिन्नेऽस्मिन् ब्रह्मण्यस्तु रतिर्मम॥

Colophon:

चतुर्दशाधिकरणं समाप्तम्।

इति प्रथमस्याध्यायस्य तृतीयः पादः।

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च।

The fly-leaf in the beginning reads the owner's name and the title of the work as Subrahmaṇyasāstri and Advaitasudhā respectively.

सुब्रह्मण्यशास्त्रिणः अद्वैतसुधा।

529 10. F. 19.

ब्रह्मसूत्रवृत्तिः पुरुषार्थसुधानिधिः—ज्ञानेन्द्रमुनिकृतः

Paper. 229 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

The Puruṣārthasudhānidhi is a gloss on the Brahmasūtras of Bādarāyaṇa. The author Jñānendramuni was the disciple of Vāsudevendramuni who probably may be identical with the author of the Vāsudevamanana and Tattvabodha on the Advaita Vedanta.

Complete.

Beginning:

अथातो ब्रह्मजिज्ञासा। अथ साधनचतुष्टयसंपत्त्यनन्तरम्। अतः नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमदमादिविशिष्टानां मुमुक्षूणां श्रवणादिष्वधिकारित्वप्रतिपादनाद्धेतोः। ब्रह्मजिज्ञासा कर्तव्येत्यर्थः। जन्माद्यस्य यतः। अस्य प्रपञ्चस्य जन्मादि जन्मस्थितिलयादिकं यतः कारणात् भवति तत् ब्रह्मेत्यर्थः।

End:

न च गङ्गाशन्तनुचक्रवर्तिप्रभृतीनां ब्रह्मलोकवासिनामपि हिरण्यगर्भशापवशात् भूलोकं प्रत्यावृत्तिः पुराणेषु प्रतिपाद्यत इति वाच्यम्। ब्रह्मलोकवासिभिः कैरपि रागद्वेषादिकं न कर्तव्यमिति ब्रह्मलोकवासिनां शिक्षार्थं हिरण्यगर्भेण शापे कृते सति तं शापं कंचित्कालं भूलोकेऽनुभूय पुनर्ब्रह्मलोकं गतानां शन्तनुचक्रवर्तिप्रभृतीनां ब्रह्मणा सह मुक्तेरेव पुराणेषु प्रतिपादितत्वेन विरोधाभावादिति भावः।

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमद्वासुदेवेन्द्रशिष्यश्रीमज्ज्ञानेन्द्रमुनिविरचिते वैयासिकब्रह्ममीमांसासूत्रसारसंग्रहे पुरुषार्थसुधानिधौ चतुर्थस्याध्यायस्य चतुर्थः पादः।

The scribe of the original MS. from which this transcript was copied, adds the following lines :

अध्यायानां चतुर्णां तु विद्यारण्यमुनीरिताम् ।
न्यायमालां सूत्रवृत्तिं ज्ञानेन्द्रेण विनिर्मिताम् ।
संयोज्य चैतदुभयं लिखितं त्वात्मबोधकम् ।
कौण्डिन्यगोत्रजनितरामनामकसूरिणा ॥

Copied on Friday the 25th day of Aippasi month in the year Rudhirodgāri.

530 8. J. 47.

ब्रह्मसूत्रवृत्तिः पुरुषार्थसुधानिधिः—ज्ञानेन्द्रमुनिकृतः

Paper. 43 Foll. 8 × 6½ inches. 16 lines in a page. Telugu script. Old. Injured. Clear writing.

Breaks off in the 2nd pāda of the 2nd adhyāya.

531 22. P. 21.

ब्रह्मसूत्रवृत्तिः पुरुषार्थसुधानिधिः—ज्ञानेन्द्रमुनिकृतः

Palm-leaf. 66 Foll. 13½ × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 3rd pāda of the 3rd adhyāya.

Begins with the following verse :

वासुदेवेन्द्रयोगीन्द्रचरणाम्बुरुहद्वयम् ।
प्रणम्य व्याससूत्राणां विवृतिः क्रियतेऽधुना ॥

532 30. H. 28.

ब्रह्मसूत्रवृत्तिः पुरुषार्थसुधानिधिः—ज्ञानेन्द्रमुनिकृतः

Palm-leaf. 75 Foll. 19¼ × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

533 40. C. 50.

ब्रह्मसूत्रवृत्तिः पुरुषार्थसुधानिधिः—ज्ञानेन्द्रमुनिकृतः

Paper. 68 Foll. 7½ × 6 inches. 32 lines in a page. Telugu script. Old. Injured. Illegible writing.

Complete.

The scribe adds :

मद्दूरिरामविदुषा दक्षिणामूर्तिशर्मणे ।
श्रीपद्मनाभदेवानां सविधावर्पितं स्वयम् ।

534 40. C. 54.

ब्रह्मसूत्रवृत्तिः पुरुषार्थसुधानिधिः—ज्ञानेन्द्रमुनिकृतः

Paper. 91 Foll. 8 × 6½ inches. 17 lines in a page. Telugu script. Old. Much injured. Illegible writing.

Complete.

Reads the following colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीवासुदेवेन्द्रमुनिवर्यचरणारविन्दमकरन्दमधुव्रतश्रीसाम्बसदाशिवप्रेरितश्रीज्ञानेन्द्रस्वामिविरचितवैयासिकब्रह्ममीमांसासूत्रसारसंग्रहे वैदिकोत्तमविद्वज्जनमहामन्दबुद्ध्यास्तिकभागधेये पुरुषार्थसुधानिधौ चतुर्थाध्यायस्य चतुर्थः पादः । अनावृत्तिपादः समाप्तः ।

आनन्दवत्सरे पौषे कृष्णपक्षे तृतीयायां स्थिरवासरे आत्वान्वयसंभवेन पापयाख्येन पुरुषेण श्रीसच्चिदानन्दपरब्रह्मबुद्ध्येयं वृत्तिर्लिखिता ।

535 10. G. 10.

ब्रह्मसूत्रवृत्तिः—चन्द्रिका

Paper. 135 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 16 lines in a page. Devanāgarī script. New. Good. Good writing.

The MS. is said to have been copied from the original MS. of Ganapati Sastri of Karathalur, Coimbatore Dt. in 1915.

An anonymous gloss on the Brahmasūtras written in accordance with the view of S'rī Saṁkarācārya's Advaita School of Vedānta. The gloss is called Candrikā. The author's name is not known.

Wants the last sūtra of the 4th adhyāya; otherwise complete.

Beginning:

प्रणम्य परमात्मानं सच्चिदानन्दविग्रहम् ।
कुर्वेऽहमतिसंक्षेपाद्ब्रह्मसूत्रस्य चन्द्रिकाम् ॥

अथातो ब्रह्मजिज्ञासा ।

अथ नित्यानित्यवस्तुविवेकैहिकामुष्मिकफलभोग-विरागशमदमादिसंपन्मुमुक्षात्मकसाधनचतुष्टयसंपत्त्य-नन्तरम् । अतः स्वर्गादिफलस्यानित्यताया मोक्ष-नित्यतायाश्च श्रुत्यादिसमधिगम्यत्वेन साधनचतुष्टय-संपत्तेः संभवात् । ब्रह्मजिज्ञासा ब्रह्मविचारः कर्तव्य इत्यर्थः ।

End:

भोगमात्रसाम्यलिङ्गाच्च ।

उपासकस्योपासनाफलतया भोगमात्रेण ब्रह्मणा सह साम्यं श्रुतम् । न जगद्व्यापारेण । आपो वा इति साम्यलिङ्गात् ।

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ।

536 8. I. 22.

ब्रह्मसूत्रवृत्तिः

Paper. 263 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 16 lines in a page. Devanāgarī script. New. Good. Good writing.

This is an anonymous gloss on the Brahmasūtras of Bādarāyaṇa written according to S'rī S'aṁkarācārya's view. The MS. reads the colophon attributing the authorship to the great S'rī Saṁkarācārya himself.

Complete.

Beginning:

श्रुतिस्मृतिपुराणानामालयं वरुणालयम् ।
नमामि भगवत्पादशंकरं लोकशंकरम् ॥
शंकरं शंकराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥
मन्नियोगाद्धरिः साक्षादतीव श्रद्धयान्वितः ।
कृष्णद्वैपायनो भूत्वा ब्रह्मचारी जितेन्द्रियः ॥
वेदान्तानां प्रतिष्ठार्थं मुने सूत्रं करिष्यति ।

इति शिवाज्ञयावतीर्णसूत्रकृत्सूत्रितप्रथमसूत्रस्थया जिज्ञासेति प्रकृत्या सूत्रितमार्थिकार्थं ज्ञाननिवर्त्यं

सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ।
यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते ॥

इति वचनादवश्यवक्तव्यत्वावगतप्रयोजनादिसिद्धिहेतुं कर्तृत्वाद्यनर्थात्मकबन्धस्यान्यत्रान्यधर्मावभासलक्षण-मध्यासं सदृष्टान्तं वदन्नादौ स्वरूपानुसंधानलक्षणं मङ्गलमाचरति—

पञ्चकोशाधिवासं यत्तित्तिरिश्रुतिबोधितम् ।
सत्यज्ञानसुखानन्दं परं ब्रह्म तदस्म्यहम् ॥

* * *

एवं वेदान्तवाक्यविचारात्मकशास्त्रारम्भहेतुप्रयो-

जनादिसिद्धिहेतुमात्मानात्मनोरितरेतराध्यासं प्रसाध्य तन्निवर्तकब्रह्मात्मैक्यज्ञानसिद्धये संक्षेपतो ब्रह्मसूत्राणि व्याचिख्यासुर्भगवान् भाष्यकार आदौ प्रथमसूत्रस्य श्रुत्यादिसंगतिं दर्शयति—अथातो ब्रह्मजिज्ञासेति। अस्य सूत्रस्य श्रोतव्य इति श्रवणविध्यपेक्षिताधिकार्यादिश्रुतिभिः स्वात्मनिर्णयायोत्थापितत्वात् हेतुहेतुमद्भावः श्रुतिसंगतिः।

End :

अनावृत्तिः शब्दादनावृत्तिः शब्दात्।

नाडीरश्मिसमन्वितेनार्चिरादिपर्वणा देवयानेन पथा ये शास्त्रोक्तविशेषणं ब्रह्मलोकं गच्छन्ति ते ब्रह्मलोकं प्राप्य चन्द्रलाकोदिवत् भुक्तभोगा नावर्तन्ते। कुतः। एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त इति ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तत इत्येवमादिभ्यः शब्देभ्योऽनावृत्तिरवगम्यते। अनावृत्तिः शब्दादनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पादकृतौ शारीरकमीमांसाविवृतौ चतुर्थाध्यायस्य चतुर्थः पादः।

समाप्तश्चाध्यायः।

Date of the copying of the original MS. from which this transcript was made.

स्वभानुसंवत्सरं अर्पशिमासं २२ तेदि भौमवासरे मुडिन्ददु।

537 40. C. 53.

ब्रह्मसूत्रवृत्तिः

Paper. 95 Foll. 8 × 6½ inches. 13 lines in a page. Telugu script. Old. Injured. Legible writing.

This also is an anonymous Vṛtti on the Brahmasūtras of Bādarāyaṇa.

Complete.

Beginning :

शंकरं शंकराचार्यं केशवं बादरायणम्।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः॥

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो महद्भ्यो नमो गुरुभ्यः।

अथातो ब्रह्मजिज्ञासा।

साधनचतुष्टयसंपन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्तव्यः। वाचस्पतिमिश्रमते तु साधनचतुष्टयसंपत्त्यनन्तरं ब्रह्मज्ञानेच्छा भवति कर्मफलस्यानित्यत्वात् ब्रह्मज्ञानात्पुरुषार्थश्रवणाच्च।

शास्त्रं ब्रह्म विचाराख्यमध्यायास्तु चतुर्विधाः।
समन्वयाविरोधौ द्वौ साधनं च फलं तथा॥

End :

अनावृत्तिः शब्दादनावृत्तिः शब्दात्।

ये अर्चिरादिमार्गेण ब्रह्मलोकं प्राप्तास्तेषामनावृत्तिरेव। तेषां न पुनरावृत्तिः, क्रममुक्त्यभिप्रायकशब्दात्। न स पुनरावर्तते न स पुनरावर्तत इति श्रुतिः शब्दः। निर्गुणब्रह्मविदां त्वावृत्तिशङ्कैव नास्तीत्यर्थः।

Colophon :

इति चतुर्थाध्यायस्य चतुर्थपादः समाप्तः।

Date of copying 27-4-1930.

538 29. B. 7.

ब्रह्मसूत्रवृत्तिः

Palm-leaf. 82 Foll. 14¾ × 1¼ inches.

7 lines in a page. Telugu script. Old. Fair. Good writing.

This anonymous Vṛtti on the Brahmasūtras of Bādarāyaṇa has been printed and published in the Advaitamañjarī series, Kumbakonam, in 1894. Therein the author is mentioned as शंकरभगत्पाद शिष्य.

Contains up to the 3rd pāda of the 3rd adhyāya.

Beginning :

अथातो ब्रह्मजिज्ञासा । शान्तो दान्त इत्यादिश्रुतेः आत्मा वारे द्रष्टव्य इत्यादिश्रुतेश्च अथ साधनचतुष्टयसंपत्त्यनन्तरम् अतः अधिकारस्य संपूर्णत्वात् ब्रह्मविचारः कर्तव्य इत्यर्थः ।

End :

अज्ञानुबद्धोपासनासहकृतकर्मानुष्ठानवतां बहुकालस्वर्गभोगस्य प्रदानवदेव तदुक्तमिति सूत्रे प्रतिपादितत्वादिति भावः ।

Colophon :

इति तृतीयस्याध्यायस्य तृतीयः पादः ।

539 10. C. 5.

ब्रह्मसूत्रवृत्तिः

Paper. 9 Foll. 9 × 5 inches. 15 lines in a page. Telugu script. Old. Good. Clear writing.

Same as that described in last number.

Contains fragments of the 2nd and 3rd pādas of the 2nd adhyāya.

Beginning :

नैयायिकमतं निराकरोति—महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् । कारणगुणा हि कार्यगुणानारभन्त इति न्यायात् ज्ञानानन्दात्मकब्रह्मजन्यस्य प्रपञ्चस्यापि ज्ञानानन्दरूपत्वं स्यादिति चेन्न, ह्रस्वपरिमण्डलाभ्यां ह्रस्वाभ्यां परिमण्डलाभ्यां परमाण्वपेक्षयाधिकपरिमाणविशिष्टं दीर्घं च द्व्यणुकं यथा जायते, एवं ज्ञानानन्दरूपात् ब्रह्मणो जडदुःखात्मकं जगदुत्पद्यत इत्यर्थः ।

End :

स्वमतं प्रसाध्य परमतं दूषयति—अदृष्टानियमात् । नैयायिकमते जीवानां विभुत्वेन सर्वेषां जीवानां सर्वशरीरेषु विद्यमानत्वात् अदृष्टानियमात् अदृष्टानां पुण्यपापानामनि.

540 20. M. 42.

ब्रह्मसूत्रवृत्तिः

Palm-leaf. 6 Foll. 19 × 1⅛ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

An anonymous gloss on the Brahmasūtras of Bādarāyaṇa.

Contains a fragment in the 2nd pāda of the 2nd adhyāya.

Beginning :

तस्मादितीरितमिति। अध्यासरूपबन्धादयः पुरुषस्य न सन्ति चेत् कस्तस्योपकारः । एवमन्योन्यविरुद्धाभाषणादसमञ्जसम् । महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् । संगतिविषयसंशयानाह—अणुकारणवादः किं युक्तिमूलो न संशय इति । किं काणादाभ्युपगतपरमाणुकारणवादः समीचीनयुक्तिमूलः, उत नेति संशयः ।

End :

करणवच्चेन्न भोगादिभ्यः ।

सशरीराद्यधिष्ठानं जीवस्य हि यथा भवेत् ।
न तथा सशरीरत्वं तत्स्वभावप्रसङ्गतः ॥

इति । क्षेत्रज्ञस्य स्वकरणकलेवरादधिष्ठानवत् उपपद्यत इति चेन्न । पुण्यापुण्यरूपकर्मनिमित्तत्वात् क्षेत्रज्ञाधिष्ठानस्योश्वरस्यापि तद्वत् तथा तत्फलभोगादिनिखिलतत्स्वभावप्रसक्तेरन्तवत्त्वमसर्वज्ञता वा । पुण्यादिम . . . .

541 8. H. 23.

ब्रह्मसूत्रभाष्यम्—भास्कराचार्यकृतम्

Paper. 82 Foll. 12 × 9 inches. 32 lines in a page. Grantha script. Old. Injured. Good writing.

Foll. 63 to 82 are much injured and the letters are not clear.

This is the well known Bhāṣya on Bādarāyaṇa's Brahmasūtras. This Bhāṣya represents the view of Bhedābheda (Identity with distinction) between the Brahman and the world. In the beginning of the work the author Bhāskarācārya openly states that his aim in writing this work is to give the correct meaning of the Brahmasūtras after refuting the views of Māyāvāda as held by S'rī S'aṁkarācārya. The views of Bhedābheda as held by Bhāskarācārya and Yādavaprakāśa have been criticized by S'rī Rāmānuja in his S'rī Bhāṣya and Vedārthasaṁgraha. Thus it is clear that Bhāskara wrote his Bhāṣya after S'rī S'aṁkara (632 to 664 A.D.). and before S'rī Rāmānuja (1017 to 1137 A.D.) It is also noted that Vācaspatimiśra has criticized in his Bhāmatī Bhāskara's Bhedābhedavāda without mentioning the name. Vācaspati's date has been decided as 841 A.D. Therefore the date of Bhāskarācārya must be somewhere in 8th century A.D. The work was printed and published in the Chowkhamba Sanskrit Series, Benares, in 1915.

Complete.

Beginning:

जन्मबन्धविनिवृत्तिकारणं
ब्रह्मसूत्रमिदमुद्बभौ यतः ।
श्रोतृचित्तकमलैकभास्करं
बादरायणमृषिं नमामि तम् ॥
सूत्राभिप्रायसंवृत्या स्वाभिप्रायप्रकाशनात् ।
व्याख्यातं यैरिदं शास्त्रं व्याख्येयं तन्निवृत्तये ॥

अथातो ब्रह्मजिज्ञासा । चतुर्ष्वर्थेष्वथशब्दप्रयोगो दृश्यते । यथा आनन्तर्ये भुक्त्वाथ व्रजति । यथा पूर्ववृत्तापेक्षायां पूर्वं किंचिदुक्त्वा विकल्पान्तरं कर्तुमिच्छन्नाह अथायमभिप्राय इति । यथा माङ्गल्ये,

ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

इति । यथाधिकारे अथ शब्दानुशासनमिति । तत्र नाधिकारार्थः, ब्रह्मजिज्ञासाया अनधिकार्यत्वात् । नापि मङ्गलार्थः, मङ्गलस्य वाक्यार्थेऽन्वयाभावात्, पटहध्वनिवत् श्रवणमात्रगम्यत्वात् । पूर्ववृत्तापेक्षायाश्चानन्तर्याव्यतिरेकादानन्तार्यार्थ इह गृह्यते । तत्र किमपि पूर्ववृत्तं वक्तव्यम् । तदुच्यते पूर्वं कर्मविचारो वृत्तः, अनन्तरं ब्रह्मजिज्ञासारभ्यते ।

End:

तथा हि मन्त्रवर्णे पञ्चारे चक्रे परिवर्तमाने तस्मिन् स्थिता भुवनानि विश्वेति तदन्तरात्मानं प्रथमं प्राप्य

ततः परमात्मानं प्रतिपद्य तेनैकीभूतास्तस्मिन् ब्रह्मणि मोदन्त इति ।

Colophon :

इति शारीरकमीमांसाभाष्ये भगवद्भास्कराचार्यप्रणीते चतुर्थस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ।

The extra leaf added in the beginning mentions the scribe's name as S'rinivāsasāstri son of Vāsudevasastri of Vaṭāraṇya, (Tiruvālaṅgāḍu) in Tanjore Dt.

542 33. K. 3.

अखण्डैकरसवाक्यार्थः

Palm-leaf. 3 Foll. $6\frac{1}{2}$-× $1\frac{3}{4}$ inches. 14 lines in a page. Grantha script. Old. Good. Good writing.

This is a short treatise on S'rī S'aṁkara's school of Advaita Vedanta explaining that the Upaniṣadic passages such as "Tattvamasi", "Satyaṁ jñanamanantam" indicate Brahman as mere entity and not endowed with any attribute or quality. The Advaitins of S'rī S'aṁkara's school had to resort to this sort of interpretation to maintain their principle that the Brahman is devoid of attributes (Nirviṣ'eṣa). The topic has been fully discussed by Madhusūdanasarasvatī in his Advaitasiddhi of which the present work is a summary.

Complete.

Beginning :

वाक्यार्थो नामाखण्डैकरसः । तद्विषयीकृतं ज्ञानमखण्डैकरसम् । ननु तर्कमीमांसाभ्यां वाक्यस्य संसर्गविशिष्टत्वाङ्गीकारात् कथमखण्डैकरसत्वमर्थ इति चेन्न, तयोः साकल्येन श्रुत्यर्थविचारजन्यज्ञानाभावात् । तथाहि—नात्र काचन भिदेत्यादिवाक्येन भेदमात्रस्य निषिद्धत्वात् पारमार्थिकव्यावहारिकप्रातिभासिकभेदत्रयनिषेध एव श्रुतेरर्थः । ननु न कदाचिदनीदृशं जगदित्यादिवाक्येन प्रपञ्चमात्रस्य प्रवाहरूपेण सत्यत्वात् कथं भेदमात्रस्य निषिद्धत्वमिति चेन्न, अतोऽन्यदार्तमित्यादिश्रुत्यात्मनः सकाशादन्यस्य सर्वस्य नश्वरत्वात् कथं प्रवाहरूपेण सत्यत्वम् ।

End :

यथा तच्छब्देदंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वादिपरित्यागेनाविरुद्धेन देवदत्तेन सह लक्ष्यलक्षणभावः, तथात्रैव तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः संबन्ध इति ।

Colophon :

इत्यखण्डैकरसवाक्यार्थप्रकरणं समाप्तम् ।

543 9. C. 1.

अज्ञानध्वान्तचण्डभास्करः—अमरेश्वरशास्त्रिकृतः

Paper. 71 Foll. 8 × 4 inches. 13 lines in a page. Telugu script. Old. Injured. Good writing.

This is a Prakaraṇa work on Advaita Vedānta according to S'rī S'aṁkara's view. The work mainly deals with the means for the removal of ignorance so that one can get the final release from Saṁsāra. The work is divided into the following 10 Chapters :

१. अनुबन्धविचारः, २. जीवेश्वरविचारः, ३. जीवेश्वरस्वरूपविचारः, ४. सृष्टिविचारः,

५. पञ्चकोशविचारः, ६. भावनाभेदविचारः, ७. ज्ञानस्वरूपविचारः, ८. वासनाक्षयविचारः, ९. जीवन्मुक्तिविचारः, and १०. मोक्षविचारः ।

The author Amares'varas'āstrin belonged to Kambhampāṭi family presumably of Āndhrades'a. He mentions his other work as Dakṣiṇāmūrtivīkṣāvilāsa. The Mysore Library Catalogue of Sanskrit MSS. mentions the following other works of this author :

1. Advaitaratnaprakās'a.
2. Avidyāpis'ācibhañjana.
3. Jīvarājavijaya.
4. Prauḍhānubhava.
5. Bimbadṛṣṭivicāra.
6. Vāsanāpratīkāradas'aka.

Complete in 10 chapters as mentioned above.

Beginning :

यत्तत्त्वं निखिलस्य यत्र निवसत्येतत्समस्तं जगद्यत्सत्त्वान्वयतोऽस्य सत्त्वमिह यद्भासाखिलस्यास्य धीः।
यत्साक्षात्कृतिरात्मतत्त्वविषयाज्ञानापहारक्षमा
तत्तेजो हृदि धारयेऽहमभयं श्रीदक्षिणास्याभिधम् ॥
देवस्तत्त्वमसीति बोधयतु मां मुद्रावता पाणिने-
त्येवं प्राञ्जलिना मया सविनयं स्वप्नेऽर्थितस्येशितुः ।
यस्य श्रीकरुणाकटाक्षविभवप्राप्तात्मविद्योऽस्म्यहं
तं वन्दे मुनिवन्दनीयचरणं श्रीदक्षिणास्यं गुरुम् ॥
यद्वक्त्राम्बुजनिःसृतं परमकं श्रीसूत्रभाष्यामृतं
पीत्वा मादृशजीवभृङ्गनिचया नन्दन्ति मोक्षाङ्गणे ।
नानावादिमदेभभञ्जनमहाव्यग्रोग्रकण्ठीरवान्
वन्दे व्यासमुनीन्द्रशंकरमुखान् सद्देशिकांस्तानहम् ॥
अद्वितीयापरिच्छिन्नसच्चिदानन्दमूर्तये ।
दक्षिणामूर्तिरूपाय मह्यमेव नमो नमः ॥
श्रीदक्षिणामूर्तिकटाक्षवीक्षण-
प्रध्वस्ततत्त्वावरणेन धीमता ।
अज्ञानविध्वान्तसुचण्डभास्करः
प्रकाश्यते मोहतमोनिवृत्तये ॥
करालमायाभिधरात्रिशायिभिः
कर्मातिदुःशीतविकम्पितात्मभिः ।
अज्ञानविध्वान्तसुचण्डभास्करो
मयोदितो विप्रवरैर्विलोक्यताम् ॥

इह जन्मनि जन्मान्तरे वा सम्यगनुष्ठितवेदोक्तनिष्कामकर्मोपासनाराधिताराध्यपादश्रीदक्षिणामूर्तीश्वरपरमानुग्रहपरिशुद्धहृदया दुश्चरितनित्यनिवृत्ता अनादिकालमारभ्याज्ञानध्वान्तदोषेण सन्मार्गमजानन्तः संसारसागरे मज्जनोन्मज्जनाभ्यामतिखिद्यमानाः ।

End :

करालमायाभिधरात्रिशायिभिः
कर्मातिदुःशीतविकम्पितात्मभिः ।
अज्ञानविध्वान्तसुचण्डभास्करो
मयोदितो विप्रवरैर्विलोक्यताम् ॥

Colophon :

इति श्रीसर्वदेवतासार्वभौममोक्षसाम्राज्याधीश्वरश्रीदक्षिणामूर्तीश्वरचरणप्रणिधानप्रभावपरिलब्धपरमभाग्यस - त्फलभूताद्वैतब्रह्मविद्यामहाधनेन कम्भंपाटिकुलजलधिपूर्णसुधाकरेणामरेश्वरशास्त्रिणा स्वानुभवानुरोधेन विरचितं विचारदशकरूपमज्ञानध्वान्तचण्डभास्कराख्यं वेदान्तप्रकरणं समाप्तम् ॥

544 22. D. 16.

अज्ञानध्वान्तचण्डभास्करः—अमरेश्वरशास्त्रिकृतः

Palm-leaf. 33 Foll. 17 × 1¼ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Contains chapters 5 to 10.

Beginning of the 5th chapter is slightly different.

545 23. A. 37.

अज्ञानध्वान्तचण्डभास्करः—अमरेश्वरशास्त्रिकृतः

Palm-leaf. 64 Foll. 15 × 1 inches. 6 lines in a page. Telugu script. Old. Much injured. Clear writing.

Complete.

Two extra leaves added at the end contain some verses from the Manīṣāpañcaka.

546 64995.

अज्ञानध्वान्तचण्डभास्करः—अमरेश्वरशास्त्रिकृतः

Paper. 133 Foll. 8½ × 6½ inches. 16 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript, made from the original MS. described above in No. 543.

Complete.

547 35. B. 17.

अज्ञानबोधिनी—शंकराचार्यकृता

Paper. 20 Foll. 10½ × 5 inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is a small treatise on Advaita Vedanta showing the nature and function of Ajñāna (ignorance). It is written in the form of question and answer between a pupil and teacher. The work is attributed to S'rī S'aṁkarācārya. The title of the work is also indicated in each page by the abbreviation अ-बो.

Wants the first leaf for the beginning.

Beginning :

वा नैमित्तिकं वा । यदीदृशः स्वभावः, तर्हि अवर्जनीयत्वात् मम मोक्षाशा नास्ति । नहि वत्स नैमित्तिकम् । तर्हि किं निमित्तम् । ततः सावधानमतिः शृणु । स्वविषया स्वाश्रया स्वानुभवगम्या स्वभासा अवस्तु अनिर्वाच्या अविद्यास्ति । सा तदा आश्रयत्व-विषयत्वबलेन चित्सदानन्दानन्ताद्वितीयस्वभावमा-वृणोति । यथा गर्भागारमन्धकारेणाच्छाद्यमिव तथा चिद्रूपं कूटस्थमात्मानं स्वस्वरूपमाच्छाद्य विक्षिपति ।

End :

श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं प्रदर्शयन्ति । किंच मध्ये कार्यान्तरं निवारयति श्रुतिः—ब्रह्मविदाप्नोति परमिति वेदानुशासनं वेदानुशासनमिति । अथ शठानां धूर्तानामश्रद्धधानानां नास्तिकानामुत्पथगामि-नामेतद्विद्यां न प्रकाशयेत् ।

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इति श्रुतेः ।

Colophon :

इति श्रीसंक्षिप्तवेदान्तशास्त्रप्रक्रिया श्रीमत्परमहंस-परिव्राजकाचार्यश्रीमच्छंकरकृता बहिर्मुखान्तःप्रवण-मज्ञानबोधिनी अध्यात्मोपदेशविधिः समाप्तः ।

Date of copying संवत् १८८१.

548 22. A. 47.

अद्वैतचूडामणिः

Palm-leaf. 30 Foll. 12 × 1¼ inches.

5 lines in a page. Grantha script. Old. Injured. Good writing.

This is a small Prakaraṇa work on the Advaita Vedanta explaining the non-difference between the world and the Brahman. The author, whose name is not mentioned salutes Bālayogin, S'ivānanda, Pūrṇānanda and Puruṣottamayogin. He quotes the Adhikaraṇaratnamāla of Bhāratītīrtha.

Complete.

Beginning :

शंकरं शशिकलाविभूषणं मञ्जु चन्दनवनावनीश्वरम् ।
पङ्कजाक्षविनताङ्घ्रिपङ्कजं वाञ्छयनाथमहमाश्रये सदा ॥

सत्कारुण्यसुधालेशादभयं प्राप्तवानहम् ।
तं श्रीमच्चिद्घनानन्दं गुरुवर्यं नमाम्यहम् ॥

श्रीबालयोगिवर्यं च शिवानन्दं च सर्वदा ।
पूर्णानन्दमहं वन्दे पुरुषोत्तमयोगिनम् ॥

इदानीं तावत् जगतो ब्रह्मकार्यत्वेन तन्मात्रत्वं वक्तुं तदुत्पत्तिलयप्रकारोऽत्रोच्यते । जगदुदयात्पूर्वमेक एव सत्यज्ञानानन्दलक्षणः परमात्मासीत् । तस्मिन्निर्विशेषे परमात्मनि काचिच्छक्तिरज्ञानमोहमायाविद्यातामसीत्यादिनामधेया सत्त्वरजस्तमोगुणसमुदायरूपा मूलप्रकृतिराकाशे तलमलिनिमादिवत् अनादिकालमारभ्याध्यस्ता भवति । अथ परिपक्वजीवकर्मवशात् सैव मूलप्रकृतिर्विशुद्धसत्त्वप्रधाना मायेति मलिनसत्त्वप्रधाना अविद्येति तमःप्रधाना तामसीति च त्रेधाभवत् ।

End :

पुनश्च तत्रैव,

चिदेव देहश्चिदिमे च लोका-
श्चिदेव भूतानि चिदिन्द्रियाणि ।
कर्ता चिदन्तःकरणं चिदेव
चिदेव सर्वं परमार्थरूपम् ॥
न हि प्रपञ्चो न हि भूतजातं
न चेन्द्रियं प्राणगणो न देहः ।
न बुद्धिचित्ते न मनो न कर्ता
न चैव सर्वं परमार्थरूपम् ॥

इत्याचार्यैः सर्वं जगच्चिदेव, चिन्मात्रादन्यत् किंचिदपि नास्ति, सर्वस्य परमार्थतो ब्रह्मरूपत्वादित्युक्तम् । तस्मात् श्रुतिस्मृतिपुराणयुक्त्यनुभवैरपि सर्वस्य ब्रह्ममात्रत्वं सिद्धमेवेति विद्धि ।

Colophon :

इत्यद्वैतचूडामणिप्रकरणम् ।

549 34. M. 5.

अद्वैतदीपिका—नृसिंहाश्रमकृता

Palm-leaf. 216 Foll. 18 × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

The Advaitadīpikā is an advanced treatise on Advaita Vedānta of S'rī S'aṁkara's school. The author Nṛsiṁhāśrama was a disciple of Jagannāthāśrama and salutes also Girvāṇendrasarasvatī, probably as his another teacher. The work consists of 4 chapters *namely* साक्षिविवेकः, विभागप्रक्रिया, औपनिषददीपिका and आनन्ददीपिका. As for the author's date, his Tattvaviveka gives the date of the composition as 1547 A.D. Therefore he may be fixed in the middle of the 16th century A.D. (Vide No. 419 of this volume). The work is incompletely printed in the Paṇḍit Series, Benares.

Beginning :

यस्मादभूद्भुवनानुभवात्सुखाब्धे-
विश्वं मरीचिमरुवारिरसं मुरारेः ।
तस्यालयो निखिललोकसुमङ्गलानां
पुण्यं वपुः प्रकटमस्तु ममार्धसिंहम् ॥
यस्याज्ञावशवर्तिनोऽनुदिवसं ब्रह्मादिलोकाधिपा
यस्यानन्दशतांशभागिन इमे शक्रादयो निर्वृताः।
तं सत्यानवधिप्रबोधवपुषं भूमानमाशास्महे
स्वान्ते श्रीनरसिंहमाग्रहवतां दूरं सतामन्तिकम् ॥
यत्पादरेणुकलिलं सलिलं निपीय
मूकोऽपि मूकयति पण्डितमण्डलानि ।
सद्भागधेयममितस्वपदप्रबोधं
निर्धूतमोहविभवं गुरुमानतोऽस्मि ॥
कल्याणगुणसंपूर्णं निर्वाणविभवालयम् ।
गीर्वाणेन्द्रसरस्वत्याश्चरणं शरणं भजे ॥
श्रीमद्गुरुपदद्वन्द्वध्याननिर्धूतकल्मषः ।
कुर्वे तदाज्ञयाद्वैतदीपिकां भेदभेदिनीम् ॥

तत्र—

श्रेयान् स्वधर्मो विगुणोऽपि यस्मा-
दित्यब्रवीत्पार्थसुहृत्सुरेशः ।
तस्मादहं साक्षिविवेकमादौ
गुरुप्रसादात्प्रकटीकरोमि ॥

अथाधीतसाङ्गस्वाध्यायस्य साधनचतुष्टयसंपन्नस्यापातप्रतिपन्नब्रह्मात्मैक्यजिज्ञासोस्तत्प्रतिपादकानि वाक्यानि दश्यन्ते—तत्त्वमसि, अहं ब्रह्मास्मीत्येवमादीनि ।

End :

तस्मादहमनुभवगोचरातिरिक्तमकर्तृभोक्तृस्वभावं स्वप्रकाशात्मकमविद्यया विभक्तमिव प्रतीयमानं त्वंपदलक्ष्यमुद्दिश्य औपनिषदस्य मायया जगदुपादाननिमित्तभूतस्य वस्तुतो निर्विशेषस्य सत्यज्ञानानन्तानन्दात्मनः तत्पदलक्ष्यस्य स्वरूपमात्राभेदो महावाक्येन प्रतिपाद्यत इति सिद्धम् ।

श्रुतिरयमिति वक्तुं यन्न शक्नोति यस्मिन्
वटतरुतलवासी मौनमास्ते महीयान् ।
अतुलनिजविभूतेस्तस्य देवस्य भूया-
न्नरमृगवपुषोऽयं प्रीतयेऽद्वैतदीपः ॥
कृतिरियममरेन्द्रोन्निद्रमौलिप्रभौघ-
प्रमुदितपदपीठश्रीपतेरेव विष्णोः ।
न मम निजनिमेषेऽप्यप्रभोरक्षतास्तु
स्फुटबहुविकृतिर्वा नात्र मे किंचिदेनः ॥
कियदपि परिपीतं यत्कदापि प्रसङ्गा-
द्विमलपदसरोजक्षालनाम्भो गुरोर्नः ।
शमयति हृदि तापं वर्धयत्यात्मविद्या-
जलनिधिमपि विष्णौ भक्तिमेतद्विधत्ते ॥
अहं कियानेष गुरुप्रसादः
क्व वामरेन्द्रैर्मनसाप्यलभ्यः ।
प्रसादिते देववरे मुरारौ
न किंचिदप्राप्यमिहेति मन्ये ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यभगवज्जगन्नाथाश्रमश्रीचरणशिष्यश्रीमन्नृसिंहाश्रमकृतावद्वैतदीपिकायामानन्ददीपिकाख्यश्चतुर्थः परिच्छेदः ।

550 22. R. 11.

अद्वैतदीपिका—नृसिंहाश्रमकृता

Palm-leaf. 170 Foll. 17 × 1 inches. 6 lines in a page. Telugu and Grantha scripts. Old. Injured. Good writing.

Breaks off in the 3rd Pariccheda wanting many leaves in the middle.

One extra leaf added in the beginning

contains a few verses from the Dakṣiṇā-mūrtivarṇamālāstotrā.

551 26. H. 24.

अद्वैतदीपिका—नृसिंहाश्रमकृता

Palm-leaf. 22 Foll. 15½ × 1½ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

The folios are marked with Nos. 63 to 84.

Contains the 4th Pariccheda only.

The scribe adds at the end:

मध्यमन्दिरदुग्धाम्बुनिधिराकासुधाकरः ।
अभ्यवारुरिति ख्यातो लिलेखाद्वैतदीपिकाम् ॥
ज्योतिर्विचिन्तयंश्चित्ते कामिनीपुरुषात्मकम् ।
पितरं मातरं चापि नत्वा विद्यागुरूनपि ॥

552 26. K. 13.

अद्वैतदीपिका—नृसिंहाश्रमकृता

Palm-leaf. 142 Foll. 18½ × 1½ inches. 13 lines in a page. Grantha script. Old. Much injured. Good and small writing.

Wooden boards are added to both sides.

Complete in 4 chapters wanting a few leaves in the middle.

553 30. I. 2.

अद्वैतदीपिका—नृसिंहाश्रमकृता

Palm-leaf. 107 Foll. 18¼ × 1¼ inches. 8 lines in a page. Telugu script. Old. Injured. Clear writing.

Contains the Paricchedas 3 (incomplete) and 4 (complete).

554 33. F. 24.

अद्वैतदीपिका—नृसिंहाश्रमकृता

Palm-leaf. 143 Foll. 9¼ × 1½ inches. 11 lines in a page. Grantha script. Old. Fair. Good writing.

Wooden boards are added to both sides.

Many leaves are written on one side only.

Contains the Paricchedas 3 (without beginning) and 4 (complete).

555 38. F. 23.

अद्वैतदीपिका—नृसिंहाश्रमकृता

Paper. 51 Foll. 8¼ × 6¼ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from the Original MS. described above in No. 551.

Contains the 4th Pariccheda only.

556 30. A. 14.

अद्वैतदीपिकाव्याख्या विवरणम्—नारायणाश्रमकृतम्

Palm-leaf. 208 Foll. 20 × 2 inches. 14 lines in a page. Grantha script. Old. Injured. Good and small writing.

Wooden boards are added to both sides.

This is a commentary on Nṛsiṁhāśrama's Advaitadīpikā. The commentary is called Vivaraṇa or Advaitadīpikāvivaraṇa. The commentator Nārāyaṇāśrama was the pupil of Nṛsiṁhāśrama, the author of the text. He is known to have written the following other works : Bheda-

dhikkārasatkriyā, Advaitasiddhāntasaṁgraha and Nigamāntārthacandrikā. As Nṛsiṁhāśrama's date has been fixed as the middle of the 16th century A.D. his pupil Nārāyaṇāśrama must have belonged to the latter part of the same century.

Complete in 4 Paricchedas.

Beginning :

यज्जिज्ञासा यज्ञदानादिभिः स्या-
च्छ्रुत्या मत्या चिन्तया यत्प्रबोधः ।
यस्मिन् बुद्धे बाध्यतेऽनर्थमूलं
तं भूमानं भावये स्वस्वरूपम् ॥
चेतश्चापलमिन्द्रियार्थविषयं त्यक्त्वा भजस्वाभयं
संसारार्णवतारकं नरहरेः पादाब्जरेणुप्लवम् ।
यो ध्यातो दितिजेन्द्रबालकमघः सिन्धोर्गतं पर्वतै-
राक्रान्तं सितमुग्रभोगिभिरनायासेन पारेऽकरोत् ॥
यत्पादसेवा वितनोति पापं
पुण्यं रिपुं मित्रमनेकमेकम् ।
अणुं महान्तं तमचिन्त्यवृत्तं
श्रीनारसिंहं गुरुमानतोऽस्मि ॥
अबोधवार्तापि न यद्विनेये-
ष्वथाप्यबुद्धं जगदेव येन ।
शुद्धस्वरूपामलबोधरूपं
प्रबोधपूर्णाख्यगुरुं नुमस्तम् ॥
गणेशान प्रणौमि त्वां गुणान् भणितुमक्षमः ।
यत्ते प्रसादाद्वागीशशर्वाद्याः सफलक्रियाः ॥
मातर्नमामि तव वाणि पदारविन्दं
तीर्थप्रभेदपरिलब्धनिजानुभावम् ।
गीर्वाणदारकबरीभ्रमरीकुलाढ्यं
विद्यामयामलमनोज्ञपरागपात्रम् ॥
अद्वैतदीपमनवद्यपरात्मबोध-
भासा भवप्रमुखमूलतमःप्रमोषम् ।
संप्राप्य दुर्लभदृशोऽपि हि मामकीनाः
श्रेयो भजन्त्विति समुल्लसति प्रयत्नः ॥

प्रारिप्सितस्य प्रकरणस्याविघ्नपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च प्रकरणप्रतिपाद्याद्वितीयात्मतत्त्वस्य चेतनस्याविर्भावप्रार्थनालक्षणं मङ्गलं कुर्वन्नर्थात्प्रकरणस्याधिकारिविषयप्रयोजनानि निर्दिशति—यस्मादिति ।

End :

यदपीति । ईषदपीत्यर्थः । तदपि न श्रद्धया । किंतु निमित्तान्तरादित्याह—प्रसङ्गादिति । यदम्भः परिपीतं तापं शमयतीत्यन्वयः । अन्येषां किमित्येतादृशगुर्वनुग्रहो नेति शङ्कां निराकुर्वन् तस्येश्वरप्रसादलभ्यतयातिदुर्लभतामाह—अहमिति ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यभगवन्नृसिंहाश्रमपूज्यपादशिष्यनारायणाश्रमविरचिते अद्वैतदीपिकाविवरणे आनन्ददीपिकाख्यश्चतुर्थः परिच्छेदः ।

557 22. A. 49.

अद्वैतदीपिकाव्याख्या विवरणम्—नारायणाश्रमकृतम्

Palm-leaf. 178 Foll. 16 × 1⅛ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Paricchedas 3 and 4.

558 22. A. 50.

अद्वैतदीपिकाव्याख्या विवरणम्—नारायणाश्रमकृतम्

Palm-leaf. 291 Foll. 16 × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Paricchedas 1 and 2 complete.

The leaves are arranged into two sets, the first containing 129 leaves and the second 162.

559 26. H. 31.

अद्वैतदीपिकाव्याख्या विवरणम्—नारायणाश्रम-कृतम्

Palm-leaf. 60 Foll. 16 × 1¼ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Bamboo boards are added to both sides.

Contains the Paricchedas 2 (incomplete) and 4 (complete).

560 26. L. 33.

अद्वैतदीपिकाव्याख्या विवरणम्—नारायणाश्रम-कृतम्

Palm-leaf. 127 Foll. 17 × 1¼ inches. 8 lines in a page. Grantha script. Old. Much injured. Good writing.

Wants beginning in the 1st Pariccheda and breaks off in the 2nd Pariccheda.

561 28. B. 53.

अद्वैतदीपिकाव्याख्या विवरणम्—नारायणाश्रम-कृतम्

Palm-leaf. 117 Foll. 17½ × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

The Adhikaraṇamañjarī is a short metrical work briefly indicating the subject dealt with in each of the adhikaraṇas of the Brahmasūtras according to the interpretation given by S'rī S'aṁkarācārya. The author Citsukhamuni was the pupil of Jñānottamamuni who was the pupil of Jñānaghana, probably the author of the Tattvas'uddhi published by the Madras University in the year 1941. Citsukha is known to have written the following other works : Bhāṣyabhāvaprakās'ikā (No. 470 of this volume). Tattvapradīpikā, Nyāyamakarandavyākhyā,

Brahmasiddhivyākhyā Abhiprāyaprakāśikā, Khaṇḍanakhaṇḍakhādyavyākhyā, Pramāṇamālāvyākhyā, Viṣṇupurāṇaṭīkā and Adhikaraṇasaṁgati. He had a pupil called Sukhaprakāśa, the teacher of Amalānanda (1247 A.D.). As Śrī Vedāntadeśika (1268 to 1369 A.D.) criticized Citsukha and as Jñānaghana's work Tattvaśuddhi was mentioned by Sudarśanabhaṭṭa in his Śrutaprakāśikā (1250 A.D.) Citsukha must have flourished about 1200 A.D. The Adhikaraṇamañjarī was partly printed and published in the Calcutta Sanskrit Series No. I in 1941. There is also a complete MS. of this work in the Madras Govt. Oriental MSS. Library (R. No. 3305*e*)

Almost complete.

प्रणम्य नरकारातिचरणाम्बुरुहद्वयम् ।
मुनिना चित्सुखाख्येन मञ्जरी चारु रच्यते ॥
बन्धाध्यासो गतार्थत्वं संभवोऽन्याधिकारिणः ।
विषयादेश्च सद्भावः शास्त्रारम्भाय दर्शितः ॥
लक्षणद्वयमीशस्य सार्वज्ञ्यागममानते ।
सिद्धे वेदान्तमानत्वं विध्यस्पृष्टे परात्मनि ॥

End :

आविर्भावः स्वेन मुक्तौ तस्य ब्रह्मावकल्पता ।
तत्र मायामयैश्वर्यं संकल्पादेव तत्कृतिः ॥
विकल्पोऽस्य शरीरादेस्तत्प्रवेशः प्रदीपवत् ।
सृष्ट्यादिवर्जमैश्वर्यं . . . . . ॥

635 22. G. 10.

अधिकरणरत्नमाला—भारतीतीर्थकृता

Palm-leaf. 18 Foll. 17 × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The Adhikaraṇaratnamālā also called Vaiyāsikanyāyamālā is a metrical work summarizing the topics dealt with in the various Adhikaraṇas of the Brahmasūtrabhāṣya of Śri Śaṁkarācārya. The author Bhāratītīrtha was the disciple of Vidyātīrtha whom late S. Sūryanārāyaṇaśāstri of the Madras University identified with Vidyāśaṁkaratīrtha *alias* Śaṁkarānanda (about 1280 A.D.). The work was commented upon by the author himself. Some MSS. contain the text only calling the same as Adhikaraṇaratnamālā, while others contain the text and commentary calling both as Adhikaraṇaratnamālā. The text and commentary were printed and published in the Ānandāśrama Sanskrit Series, Poona with the title Vaiyāsikanyāyamālā probably on par with the Jaiminīyanyāyamālā of Mādhava. The author is known to have written the following other works : Vivaraṇaprameyasaṁgraha, Pañcadaśī and Vākyasudhā *alias* Dṛgdṛśyaviveka though the former two works are generally ascribed to Vidyāraṇya and the last one to Śri Śaṁkarācārya. This MS. contains the text only.

Complete.

Beginning :

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
वैयासिकी न्यायमाला श्लोकैः संगृह्यते स्फुटम् ॥
एको विषयसंदेहपूर्वपक्षावभासकः ।
श्लोकोऽपरस्तु सिद्धान्तवादी संगतयः स्फुटाः ॥
शास्त्रेऽध्याये तथा पादे न्यायसंगतयस्त्रिधा ।
शास्त्रादिविषये ज्ञाते तत्तत्संगतिरूह्यताम् ॥

End :

जगत्स्रष्टृत्वमस्त्येषां योगिनामथ नास्ति वा ।
अस्ति स्वाराज्यमाप्नोतीत्युक्तैश्वर्यानवग्रहात् ॥
सृष्टावप्रकृतत्वेन स्रष्टृता नास्ति योगिनाम् ।
स्वाराज्यमीशो भोगाय ददौ मुक्तिं च विद्यया ॥

Colophon :

इत्यधिकरणरत्नमालायां चतुर्थाध्यायस्य चतुर्थः पादः ।

The name of the former owner of the MS. is mentioned as Vāsudevan of Brahmadesam village.

636 20. I. 44.

अधिकरणरत्नमाला—भारतीतीर्थकृता

Palm-leaf. 11 Foll. 14½ × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the text only.

Breaks off in the 3rd pāda of the 2nd adhyāya.

637 10. F. 11.

अधिकरणरत्नमाला सव्याख्या—भारतीतीर्थकृता

Paper. 224 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This MS. contains both the text and commentary of Bhāratītīrtha. The title Adhikaraṇaratnamālā is used as common to both the text and commentary. The colophon found in one of the MSS. mentions the author's name as Bhāratītīrtha-Vidyāraṇya. Late S. Suryanarayaṇasastri of the Madras University in his introduction to the Vivaraṇaprameyasaṁgraha suggested that the famous Mādhavācārya was called Bhāratītīrtha in his Saṁnyāsa life. It is well known that Mādhavācārya was called Vidyāraṇya in his Saṁnyāsa life. Therefore S. S. Sastri's suggestion seems to be opposed to the statements of Brahmānandabhāratī made in his Vākyasudhāṭikā and of Rāmakṛṣṇa in his Pañcadasīvyākhyā, Viz. नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ in dual number. Thus the point—whether the names Bhāratītīrtha and Vidyāraṇya refer to one and the same person or two different persons—is not yet free from doubt. But it is certain that Vidyātirtha was his or their teacher. However the marginal note found in one of the MSS. mentioning the work as 'Mādhavīyam' supports the view of the identity of Mādhava *alias* Vidyāraṇya with Bhāratītīrtha.

Complete.

Beginning :

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये प्रचयगमनाय शिष्टाचारपरिपालनाय च विशिष्टेष्टदेवतातत्त्वं गुरुमूर्त्युपाधियुक्तं नमस्कृत्य ग्रन्थं प्रतिजानीते —प्रणम्येति । व्यासेन प्रोक्ता वैयासिकी । वेदान्तवाक्यार्थनिर्णायकान्यधिकरणानि न्यायाः । तेषामनुक्रमेण ग्रथनं माला । यद्यप्येषा सूत्रभाष्यकारादिभिः प्रपञ्चिता, तथापि सूत्रादीनामतिप्राज्ञविषयत्वात् मन्दमत्यनुग्रहाय श्लोकैरेषा माला स्फुटं संगृह्यते ।

End :

ईश्वरो हि उपासनया तोषितस्तेषां भोगमात्रसिद्धये स्वाराज्यं ददौ। मुक्तिं च तत्त्वविद्योत्पादनेन दत्तवान्। तस्माज्जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगमोक्षयोस्तेषां स्वातन्त्र्यमस्तीत्यशेषमतिमङ्गलम्।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिविरचितायामधिकरणरत्नमालायां सव्याख्यायां चतुर्थस्याध्यायस्य चतुर्थः पादः।

The scribe adds :

अधि. १९२. सूत्र. ९९९.

638 20. I. 17.

अधिकरणरत्नमाला सव्याख्या—भारतीतीर्थकृता

Palm-leaf. 44 Foll. 16 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Contains both the text and commentary.

Contains the adhyāyas 1 and 2.

639 23. O. 11.

अधिकरणरत्नमाला सव्याख्या—भारतीतीर्थकृता

Palm-leaf. 125 Foll. 13 × 1¼ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains both the text and commentary.

Reads the following additional verse in the beginning :

ओं नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये।
निर्मलाय प्रसन्नाय दक्षिणामूर्तये नमः॥

Reads the following colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिप्रणीतायामधिकरणरत्नमालायां चतुर्थाध्यायस्य चतुर्थः पादः। समाप्तश्चाध्यायः। समाप्तं चशास्त्रम्।

The scribe adds :

एतानि सर्वाण्युत्तरमीमांसाधिकरणानि द्व्यधिकनवत्युत्तरशतसंख्याकानि।

The first page contains the marginal note as Mādhavīyam.

640 24. A. 4.

अधिकरणरत्नमाला सव्याख्या—भारतीतीर्थकृता

Palm-leaf. 3 Foll. 9 × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Contains both the text and commentary.

Contains a small portion in the beginning.

641 29. G. 15.

अधिकरणरत्नमाला सव्याख्या—भारतीतीर्थकृता

Palm-leaf. 14 Foll. 16½ × 1¼ inches. 10 lines in a page. Grantha script. Old. Injured. Good and small writing.

Contains both the text and commentary.

Breaks off in the 3rd pāda of the 1st adhyāya.

642 30. H. 10.

अधिकरणरत्नमाला सव्याख्या—भारतीतीर्थकृता

Palm-leaf. 74 Foll. 16¾ × 1⅛ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Contains both the text and commentary. Complete.

Name of the former owner of the MS. is mentioned as Vaidyanātha.

643 33. I. 4.

अधिकरणरत्नमाला सव्याख्या—भारतीतीर्थकृता

Palm-leaf. 55 Foll. 19 × 1½ inches. 10 lines in a page. Telugu script. Old. Injured. Good writing.

Contains both the text and commentary. Complete.

Reads the following colophon which calls the commentary as Nyāyavṛtti:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थ-मुनिप्रणीतायामधिकरणरत्नमालाव्याख्यायां न्यायवृत्त्यां चतुर्थाध्यायस्य चतुर्थः पादः। अध्यायश्च समाप्तः। समाप्तं च शास्त्रम्।

The scribe adds:

एतानि सर्वाण्युत्तरमीमांसाधिकरणानि द्व्यधिकनवत्युत्तरशतसंख्याकानि, १९२।

रक्ताक्षिवत्सरे ज्येष्ठे कृष्णपक्षे हरेस्तिथौ।
सौम्यवारे तिरुमलः पराशरकुलोद्भवः॥
सव्याख्यानाधिकरणरत्नमालां समालिखत्।
प्रीयतां दक्षिणामूर्तिरनेन करुणानिधिः॥
अहं तु दक्षिणामूर्तिपारतन्त्रीनियन्त्रितः।
देवतासार्वभौमं तं विना नान्यो गुरुर्मम।
सुकृतं दुष्कृतं वापि कुर्यो तस्यैव शासनात्॥

644 34. C. 7.

अधिकरणरत्नमाला सव्याख्या—भारतीतीर्थकृता

Palm-leaf. 151 Foll. 14½ × 1¼ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains both the text and commentary. Complete.

One extra leaf added at the end contains a few verses taken from various Dharmaśāstras dealing with Pradoṣakāla.

645 34. J. 4.

अधिकरणरत्नमाला सव्याख्या—भारतीतीर्थकृता

Palm-leaf. 102 Foll. 14½ × 1¼ inches. 7 lines in a page. Grantha script. Old. Much injured. Good writing.

Contains both the text and commentary. Complete.

646 20. I. 8.

अधिकणरसंख्याश्लोकाः

Palm-leaf. 5 Foll. 14 × 1¼ inches. 11 lines in a page. Grantha script. Old. Good. Good writing.

This is a short metrical work enumerating the number of sūtras contained in each adhikaraṇa, pāda and adhyāya of the Brahmasūtras according to the Bhāṣya of S'rī S'aṁkarācārya. It is said that the total number of adhikaraṇas is 192 and that of sūtras 555. The author's name is not known. The work is different from that bearing the same title published in the Calcutta Sanskrit Series No. 1 which work was composed by Kṛṣṇānubhūtiyati.

Complete.

Beginning :

शास्त्राधिकरणानेकसंकेतज्ञा वदन्ति हि ।
महान्तः सन्तमास्तेषां पादरेणुं स्पृशाम्यहम् ॥
शास्त्रादावाद्यपादेऽस्मिन्नाचार्येणैकसूत्रकम् ।
अथातो ब्रह्मजिज्ञासेत्याद्याधिकरणं कृतम् ॥
द्वितीयं चाधिकरणं जन्माद्यस्य यतस्त्विति ।
सूत्रेणैकेन रचितं सर्वज्ञेन महात्मना ॥
तृतीयं वर्णितं शास्त्रयोनित्वादिति सूत्रतः ।
एकेनैवाधिकरणं वर्णकद्वयरञ्जितम् ॥

End :

पादक्रमेण सूत्रसंख्याश्लोकः—

एकत्रिंशद्द्वात्रिंशत्पुनस्त्रिचत्वारिंशद्द्विशतिर्वै तथाष्टौ
सप्तत्रिंशत्पञ्चचत्वारिंशत् त्रिपञ्चाशद्द्विशतिर्द्वे तथाच ।
विंशत्सप्ताथैकचत्वारिंशत् षट्षष्टिर्वै द्वे च पञ्चाशदेव
एकन्यूनं विंशदेवैकविंशत्षोडश्यौ द्वयेकविंशत्क्रमेण॥
संख्याधिकरणानां द्विनवतिश्च शतोत्तरा ।
सूत्राणां पञ्चपञ्चाशत्तथा पञ्चशतानि च ॥

647 8. H. 54.

अधिष्ठानविवेकः—पूर्णप्रकाशानन्दसरस्वतीकृतः

Palm-leaf. 8 Foll. 8¼ × 6½ inches. 17 lines in a page. Telugu script. Old. Injured. Good writing.

This is a short treatise on the Advaita Vedānta dealing with the problem of the super-position of the appearance of the world on the Brahman which only is the ultimate truth. It is said that the pure Brahman which underlies all appearance is the true adhiṣṭhāna (ground). The author Pūrṇaprakāśānandasarasvatī was the disciple of Advaitānandasarasvatī probably the author of the Brahmavidyābharaṇa of the 17th century. (*Vide* No. 485 of this volume).

Complete.

Beginning :

श्रीकृष्णमच्युतं नत्वा श्रीगुरूंश्च गरीयसः ।
अधिष्ठानविवेकोऽयं क्रियते बोधसिद्धये ॥

अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यत इति वृद्धवचनम् । अध्यारोपो नाम वस्तुन्यवस्त्वारोपः । वस्तु सच्चिदानन्दात्मकं ब्रह्म । अज्ञानादिसकलजडसमूहोऽवस्त्वित्यर्थः । अवस्तुस्वरूपस्य प्रपञ्चस्यारोपो भ्रान्तिरित्यर्थः । वाचारम्भणमित्यादिश्रुत्या अज्ञानसहितः कार्यप्रपञ्चः कारणब्रह्मव्यतिरेकेण नास्तीत्येवमधिष्ठानब्रह्ममात्रपर्यवशेषणमपवाद इत्यर्थः । तथाच सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुत्या सच्चिदानन्दलक्षणं ब्रह्मैव कालत्रये वर्तते । नेह नानास्तीति श्रुत्या अज्ञानसहितानृतजडदुःखात्मकप्रपञ्चः कालत्रयेऽपि नास्तीति वेदान्तसिद्धान्तः ।

End :

तथाच श्रुतिः—न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते विमुक्तश्च विमुच्यत इति च । तथाच अध्यारोपापवादजनितनिष्प्रपञ्चब्रह्मात्मैक्यज्ञानान्मुक्तिरिति सिद्धम् ।

Colophon :

इति श्रीमत्परमहंसश्रीमदद्वैतानन्दसरस्वतीपूज्यपादशिष्यपूर्णप्रकाशानन्दसरस्वतीविरचितमधिष्ठानविवेकप्रकरणं समाप्तम् ।

648 22. B. 26.

अध्यारोपप्रकरणम्

Palm-leaf. 3 Foll. 15½ × 1½ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

This is an anonymous work on the Advaita Vedānta explaining that the world is erroneousy superposed on the Brahman which only is the ultimate Truth.

Beginning :

यस्यात्मभूतस्य गुरोः प्रसादा-
दहं विमुक्तोऽस्मि शरीरबन्धात् ।
सर्वोपदेष्टुः पुरुषोत्तमस्य
तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥

पूर्वमध्यारोपापवादाभ्यां ब्रह्म ज्ञात्वेति शास्त्रेणोक्तम् । अत्र प्रथमतोऽध्यारोप उच्यते । अध्यारोपो नामैकस्मिन् वस्तुन्यन्यस्य वस्तुन आरोपो यः सोऽध्यारोप इत्युच्यते । तत्कथम्? अत्र दृष्टान्त उच्यते । तद्दृष्टान्तः कथम्? शुक्तौ रजताध्यारोपो यथा । रज्जौ सर्पाध्यारोपो यथा । स्थाणौ पुरुषाध्यारोपो यथा । मरुभूमौ मरीचिचकायां जलाध्यारोपो यथा ।

End :

सुषुप्त्यवस्थायां कारणशरीरे चाभिमानकृतमात्मानं प्राज्ञं प्रत्युच्यते । प्राज्ञस्यैव पारमर्थिक इति च नामद्वयमस्ति । अनेन प्रकारेण सर्वप्रपञ्चस्योत्पत्तिरुच्यते ।

Colophon :

इत्यध्यारोपप्रकरणं समाप्तम् ।

649 8. J. 32.

अनात्मश्रीविगर्हणम् — शंकराचार्यकृतम्

Paper. 6 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 28 lines in a page. Malayālam script. Old. Injured. Good writing.

18 verses teaching the excellence of the realisation of self and worthlessness of the worldly achievements according to the view of the Advaita Vedanta. The work is attributed to S'rī S'aṁkarācarya. The work was printed and published in the S'ri Vāṇī Vilās Press, Srirangam.

Complete.

Beginning :

लब्धा विद्या राजमान्या ततः किं
प्राप्ता संपत्प्राभवाढ्या ततः किम् ।
भुक्ता नारी सुन्दराङ्गी ततः किं
येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥ १ ॥

End :

अन्ये तु मायिकजगद्भ्रान्तिव्यामोहमोहिताः ।
न तेषां जायते क्वापि स्वात्मसाक्षात्कृतिर्भुवि ॥ १८ ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकराचार्यकृतमनात्मश्रीविगर्हणप्रकरणं समाप्तम् ।

650 22. B. 40.

अनुबन्धचतुष्टयम्

Palm-leaf. 4 Foll. $16\frac{1}{2} \times 1\frac{1}{4}$ inches. 7 lines in a page. Telugu script. Old. Injured. Illegible writing.

The work explains the fourfold Anubandhas or necessary elements which enable one to enter into the inquisition as to what is self and what is non-self. The author's name is not known.

Complete.

Beginning :

सर्वप्राणिनो नित्यशुद्धबुद्धमुक्ता अपि स्वविवर्तस्य देहेन्द्रियादिप्रपञ्चस्य किंचिदहमिति किंचिदनृतमिति चाकर्ता स्वयं कर्ताहमिति चाभोक्ता स्वयं भोक्ताह-

मिति च पुण्यपापफलरहितस्य मे पुण्यपापफलानि विनेष्यन्नहमिति च भेददृष्टिरूपयाविद्यया भ्रान्तय एवोक्ताः। अत्राविद्यास्वरूपमाह। एकस्यामविद्याया-मेव प्रकृतिरिति चाज्ञानमिति च मायेति च तम इति चानेकप्राकाराः सन्ति।

End:

प्रयोजनं नाम प्रत्यगात्मनोऽप्यज्ञानतत्कार्यनाश-रूपानर्थनिवृत्तिरपि त्रिविधपरिच्छेदशून्यानन्दावाप्ति-रपि प्रयोजनमित्युक्तमेव। चत्वार्येतान्यनुबन्ध-चतुष्टयमित्युक्तम्। एतेष्वधिकारवानात्मानात्मविवेकेन कृतार्थो भवेत्।

Colophon:

इत्यनुबन्धचतुष्टयं संपूर्णम्।

651 22. D. 88.

अनुभवपञ्चकम्

Palm-leaf. 1 Foll. 17 × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Five verses on realisation of the self as identical with the Brahman and distinct from the body, senses etc.

The work was printed and published with the title Advaitapañcaratna, in the Sri Vani Vilas Press, Srirangam.

Complete.

Beginning:

नाहं देहो नेन्द्रियाण्यन्तरङ्गो
नाहंकारः प्राणवर्गो न बुद्धिः।
दारापत्यक्षेत्रवित्तादिदूरः
साक्षी नित्यः प्रत्यगात्मा शिवोऽहम्॥ १॥

End:

नाहं ज्ञातो न प्रवृद्धो न नष्टो
देहस्योक्ताः प्राकृताः सर्वधर्माः।
कर्तृत्वादिश्चिन्मयस्यास्ति नाहं-
कारस्यैव ह्यात्मनो मे शिवोऽहम्॥ ९॥
आत्मभूपतिरसौ पुरातनः
पीतमोहमदिरामदाकुलः।
किंकरः स्वमनसोऽपि किंकरै-
रिन्द्रियैरहह किंकरीकृतः॥

652 27. F. 38.

अनुभवपञ्चकम्

Palm-leaf. 1 Fol. 16½ × 1 inches. 5 lines in a page. Telugu script. Old. Injured. Good writing.

Reads the following end and colophon:

मत्तो नान्यत् किंचिदत्रास्ति दृश्यं
सत्यं बाह्यं वस्तु मायोपकल्पितम्।
आदर्शान्तर्भासमानस्य तुल्यं
मय्यद्वैते भाति तस्माच्छिवोऽहम्॥ ९॥

इत्यनुभवपञ्चकं संपूर्णम्।

653 24. E. 37.

अनुभवामृतम्—बालकृष्णब्रह्मानन्दयोगिकृतम्

Palm-leaf. 81 Foll. 17½ × 1¼ inches. 6 lines in a page. Telugu script. Old. Fair. Illegible writing.

Wooden boards are added to both sides.

This is a metrical treatise in 1500 verses on the realisation of the self according to the principles accepted in the school of Advaita Vedānta and the philosophy of Yoga. The work is written in the form of conversation between Vyāsa and S'uka. The author was Bālakṛṣṇa who also calls himself as Bālakṛṣṇabrahmānandayogin.

The work contains 13 adhyāyas dealing with the following topics :

१. नान्दी
२. अधिकारिनिर्णयः
३. त्वंपदविवेकः
४. तत्पदविवेकः
५. महावाक्यविवेकः
६. सप्तभूमिकाभ्यासः
७. श्रवणादिनिरूपणम्
८. परमात्मपदनिरूपणम्
९. मायानिरसनम्
१०. जीवत्रयनिरूपणम्
११. जगदेकमुक्तिनिरूपणम्
१२. योगीश्वरचरित्रवर्णनम्
१३. निर्गुणाराधनम्

Complete.

Beginning :

ध्यात्वा श्रीगुरुपादाब्जं नत्वा गणपतिं यतिः ।
नत्वाम्बां शारदाम्बां च लिखत्यनुभवामृतम् ॥
ब्रह्मैवासावेकवक्त्रो विष्णुर्द्विभुज एषकः ।
अत्रिनेत्रोऽपि रुद्रोऽयं वेदव्यासोऽस्तु धीप्रदः ॥
ग्रन्थोऽयं प्राक् श्रुत इति नोपेक्ष्यस्त्वार्यकोविदैः ।
वस्तु दर्पणमेवेति पश्यतां पण्डितैर्द्विजैः ॥
प्राचीनैः पण्डितैरुक्तं वेदान्तार्थं यतिः स्वयम् ।
लिलेख मननायैव मुदे भक्तिमतां सताम् ॥
निस्त्वग्रम्भाफलं यद्वन्निस्त्वगिक्षुर्यथा तथा ।
अनुष्णक्षीरवत्सर्वैः सेव्यं स्वानुभवामृतम् ॥
ग्रन्थेन सुलभेनैव स्थेयमात्मानमात्मनि ।
ज्ञात्वालं संस्कृतार्थः स्यात्किमन्यैः शास्त्रविस्तरैः ॥
लिखित्वाप्यथ वाचित्वा ज्ञात्वा स्वार्थं गुरोर्मुखात् ।
श्रुतः स्वात्मा स्फुरत्येव करामलकवत्सदा ॥
माता पाययति क्षीरं बालो रौतीतिवन्मनः ।
स्वहितं नैव जानाति विश्वासेन वशं नयेत् ॥
श्रवणाभिमुखं भूयात्तदा तत्तु शनैः शनैः ।
हित्वा नवोढतां प्रौढं तदासक्तं भवेन्मनः ॥
किं वदामोऽभ्यासवशात्परानन्दपदं मनः ।
लब्ध्वा वसेत्सुखेनैव मोक्षं सायुज्यमाप्नुयात् ॥
ज्ञात्वा गुरुमुखेनैव वेदान्तार्थं समन्ततः ।
सर्वेषां च मुमुक्षूणां मुदे मुनिरलीलिखत् ॥
श्रोतारः शुकवद्यूयं शृणुध्वं सुलभं शुभम् ।
स्वानुभूत्यमृतं प्रीत्या युष्मभ्यं पाययाम्यहम् ॥
श्रुत्वैवानुभवामृतं यतिकृतं पेयं मुमुक्षुद्विजै-
र्भूजैर्दुर्लभमेव साधितमिदं भावत्कभाग्योदयात् ।
कारुण्यादमृतेश्वरस्य जगतां संतोषसंवृद्धये
संतोषेण लिलेख हंसमतिमान् श्रीबालकृष्णो यतिः ॥

End :

एतं यो वाचयति ग्रन्थं यो लिखति वदति च स्वार्थम् ।
यः पठति यः शृणोति हितं रक्षतु मल्लिकार्जुनो भक्तम् ॥
श्रीमन् श्रितभक्तजनप्रेयन् सुरमौनिवन्द्यपदपद्म ।
मन्मथमर्दन जय भगवदमृतेश्वर पाहि मित्रशतधामन् ॥
श्रीमत्परमहंसेन बालकृष्णेन योगिना ।
निर्गुणाराधनमिदं व्यलेख्यनुभवामृतम् ॥
सार्धसहस्रश्लोकैर्वर्धितमिदमनुभवामृतं पूर्णम् ।
श्रद्धालुभिर्निषेव्यं सिद्धैरनुभूयमानमिह तूर्णम् ॥
दीक्षितेभ्यश्च शास्त्रिभ्यो वेदविद्भ्यश्च सद्य ओम् ।
संसारपक्षपातिभ्योऽप्यस्तु नारायणस्मृतिः ।
वर्धतां वर्धतां लोके ग्रन्थोऽयं साधु सत्प्रियः ।
गुरुदेवद्विजातीनामाशिषः सन्तु सर्वदा ॥

Colophon :

इति श्रीमत्परमहंसबालकृष्णब्रह्मानन्दराजयोगि-प्रणीतेऽनुभवामृतग्रन्थे निर्गुणाराधनकथनं नाम त्रयोदशोऽध्यायः ।

श्रीशिवरामब्रह्मानन्दस्वामिलिखितम् ।

654 29. M. 21.

अनुभवोल्लासः

Palm-leaf. 36 Foll. 15 × 1¼ inches. 7 lines in a page. Telugu script. Old. Much injured. Good writing.

This is a metrical treatise explaining the nature of the self and the realisation of the same according to the doctrine of the school of the Advaita Vedānta. The author's name is not known. It is stated that the work consists of 606 verses; but 612 verses are actually seen here.

Complete.

Beginning :

. . . . रूपाय विश्वातीतचिदात्मने ।
सर्वभूतात्मभूताय साक्षिणे ब्रह्मणे नमः ॥ १ ॥
यदज्ञानादिदं भाति यज्ज्ञानात्प्रविलीयते ।
तथैव लीयते यस्मिंस्तस्मै ज्ञानात्मने नमः ॥ २ ॥
यस्यान्तःस्थमिदं विश्वं येन सर्वं प्रकाश्यते ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ३ ॥
प्रसादाद् गुरुवर्यस्य यस्य स्वात्मतयाखिलम् ।
पश्याम्येतज्जगत्साक्षात्तं गुरुं प्रणतोऽस्म्यहम् ॥४॥
अध्यारोपापवादाभ्यां वक्ष्ये तत्त्व . . . ।
. . . ज्ञानसिद्ध्यर्थं तत्त्वज्ञानार्थिनां सताम् ॥ ९ ॥
यद्वेदान्तप्रकारेण तस्य तस्य तथैव हि ।
तदीयादेव तत्सिद्धावनुबन्धैः किमन्यथा ॥ ६ ॥

End :

गोपनीयं त्वया साधो ज्ञानमेतदनुत्तमम् ।
तदैक्यदर्शनाविष्टतद्दर्शनसुलक्षणम् ॥ ६०६ ॥
. . . . . ।
. . याविरक्ताय न देयं ज्ञानमात्मनः ॥ ६०८ ॥
भक्तियुक्ताय शिष्याय स्वान्ते . . . . ।
श्रुत्वैवं वचनं तस्य कृत्वा पादाभिवन्दनम् ॥६०९॥
स चचार तथा लोके तस्याज्ञां शिरसा वहन् ।
श्रद्धयैत . . . . . नन्दमश्नुते ॥ ६१० ॥
सषड्भिः षट्शतश्लोकैर्दर्शितोऽनुभवो मम ।
गुरोः प्रसादात्संप्राप्तः . . . ॥ ६११ ॥
. . . . . मन्त्रं मयैवं
ध्यायं ध्यायं परममलं सच्चिदानन्दरूपम् ।
लीनं लीनं . . . . . .
. . . चरन् कालमेवं नयामि ॥ ६१२ ॥

Colophon :

अनुभवोल्लासः समाप्तः ।

655 9. H. 66.

अनुभूतिप्रकाशः—विद्यारण्यकृतः

Paper. 3 Foll. 12 × 7¾ inches. 48 lines in a page. Telugu script. Old. Injured. Illegible writing.

This is a metrical paraphrase of the twelve principal Upaniṣads in 20 adhyāyas according to the view of the school of the Advaita Vedānta. The work is called Anubhūtīprakāsa. The author was the famous Vidyāraṇya pupil of Vidyātīrtha. It deals with the following Upaniṣads :

Adhyāya	1	Aitareyopaniṣad
,,	2	Taittirīyopaniṣad
,,	3 to 5	Chāndogyapaniṣad
,,	6	Muṇḍakopaniṣad
,,	7	Praśnopaniṣad
,,	8 and 9	Kauṣītakyupaniṣad
,,	10	Maitrāyaṇyupaniṣad
,,	11	Kaṭhopaniṣad
,,	12	Śvetāśvataropaniṣad
,,	13 to 18	Bṛhadāraṇyakopaniṣad
,,	19	Talavakāropaniṣad
,,	20	Nṛsiṁhatāpanyupaiṣad

The work was completely printed and published in the Nirnayasagar Press, Bombay in the year 1902 A.D.

Contains the 20th adhyāya only dealing with the Nṛsiṁhatāpanyupaniṣad.

Beginning :

अथर्वणीये तापनीय उत्तरस्मिन् प्रजापतिः ।
देवानबूबुधन्मन्त्रराजप्रणवमार्गतः ॥ १ ॥
मन्त्रराजं तापनीये श्रुत्वा पूर्वं तदा धिया ।
ध्यायन्तः सगुणं ब्रह्म देवा धीशुद्धिमाप्नुवन् ॥२॥
ततस्ते निर्गुणं ब्रह्म पपच्छुः शुद्धबुद्धयः ।
अणोरणीयान् यः प्रत्यक्प्रणवे तं वद प्रभो ॥ ३ ॥

End :

सन्मात्रो नित्य इत्यादिश्रुत्या तत्तु स्फुटीकृतम् ।
अथर्वणे तु कैवल्यप्रमुखाः श्रुतयः स्फुटाः ॥
श्रुतिस्मृतीतिहासानामभिप्रायविदव्ययः ।
श्रुतिव्याख्यानतस्तुष्याद्विद्यातीर्थमहेश्वरः ॥

Colophon :

इति श्रीविद्यारण्यस्वामिकृतावनुभूतिप्रकाशिकायां वेदविद्याख्यानं नाम विंशोऽध्यायः ।

The scribe adds :

शके वस्वग्निबाणेन्दावनुभूतिप्रकाशकः ।
ग्रन्थोऽविमुक्तौ लिखितो जगदानन्दभिक्षुणा ॥

656 9. F. 66.

अनुभूतिरत्नमालिका

Paper. 4 Foll. 8 × 6 inches. 40 lines in a page. Grantha script. Old. Injured. Good writing.

This is a metrical treatise on the realisation of the self according to the principles accepted in the school of the Advaita Vedānta. The author's name is not mentioned in the MS. The work contains 58 stanzas which are the same as found in Sadāśivendrasarasvatī's Bodhāryā (Stanzas 103-158).

Complete.

Beginning :

अजरोऽहमक्षरोऽहं प्रज्ञोऽहं प्रत्यगात्मबोधोऽहम् ।
परमानन्दमयोऽहं परमशिवोऽहं भवामि परिपूर्णम् ॥
आद्योऽहमात्मभाजामात्मानन्दानुभूतिरसिकोऽहम् ।
आबालगोपमखिलैरहमित्यनुभूयमानमहिमाहम् ॥
इहपरसुखविमुखोऽहं निजसुखभोगानुभूतिभरितोऽहम् ।
ईशोऽहमीश्वराणामीर्ष्यादोषानुषङ्गरहितोऽहम् ॥

End :

निखिलनिगमान्तलक्ष्यं हानोपादानहीनचिन्मात्रम् ।
अनुभूतिमानगम्यं ब्रह्मैवानन्दमस्मि परिपूर्णः ॥
तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन्देहम् ।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः ॥
हयमेधशतसहस्राण्यथवा कुरुतां ब्रह्मघातलक्षाणि ।
परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते सदा विमलः ॥
विदितं वेदरहस्यं
विदितो देहो ह्ययमनात्मेति ।
विदितः पर इति चात्मा
किमतः परमस्ति जन्मसाफल्यम् ॥

Colophon :

इति श्री-अनुभूतिरत्नमालिका संपूर्णा ।

त्वङ्मांसरुधिरमेदोऽस्थिमज्जा इति षट् कोशाः । अशनायापिपासाशोकमोहजरामरणानि षड्ऊर्मयः । अस्ति जायते वर्धते परिणमतेऽपक्षीयते नश्यतीति षड् भावविकाराः । अन्यस्मादन्यस्योत्पत्तिरारम्भः । एकस्यैव पूर्वावस्थां परित्यज्यावस्थान्तरप्राप्तिः परिणामः । एकस्यैव पूर्वावस्थामपरित्यज्यावस्थान्तरभावो विवर्तः ।

657 19. P. 2.

अपरोक्षानुभूतिः—शंकराचार्यकृता

Palm-leaf. 10 Foll. 7 × 2 inches. 12

lines in a page. Grantha script. Old. Injured. Good writing.

This is a metrical treatise on the self realisation by the direct perception according to the school of the Advaita Vedānta. It also explains the process of Rājayoga as being helpful for the realisation of the true nature of the self. The work contains 147 anuṣṭubh verses. The authorship is attributed to the famous Śaṁkarācārya. There are several editions of the work with or without commentary.

Complete.

Beginning :

श्रीहरिं परमानन्दमुपदेष्टारमीश्वरम् ।
व्यापकं सर्वलोकानां कारणं तं नमाम्यहम् ॥
अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये ।
सद्भिरेषा प्रयत्नेन वीक्षणीया मुमुक्षुभिः ॥
स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् ।
साधनं प्रभवेत्पुंसां वैराग्यादिचतुष्टयम् ॥
ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु ।
यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम् ॥

End :

परिपक्वं मनो येषां केवलोऽयं च सिद्धिदः ।
गुरुदैवतभक्तानां सर्वेषां सुलभो जवात् ॥
मोक्षस्य न हि देशोऽस्ति न ग्रामान्तरमेव वा ।
अज्ञानहृदयग्रन्थिनाशो मोक्ष इति स्मृतः ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशंकरभगवत्पादकृतिरपरोक्षानुभूतिः समाप्ता ।

658 19. C. 20.

अपरोक्षानुभूतिः—शंकराचार्यकृता

Palm-leaf. 3 Foll. $15\frac{3}{4} \times 1\frac{1}{4}$ inches. 7 lines in a page. Telugu script. Old. Much injured. Good writing.

Wooden boards are added to both sides.

Breaks off in the 51st verse.

The first verse begins with श्रीरामं परमानन्दं instead of श्रीहरिं परमानन्दम्.

659 19. M. 45.

अपरोक्षानुभूतिः—शंकराचार्यकृता

Palm-leaf. 2 Foll. $9\frac{1}{2} \times 1\frac{1}{2}$ inches. 5 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the first 15 verses only.

660 22. P. 4.

अपरोक्षानुभूतिः—शंकराचार्यकृता

Palm-leaf. 13 Foll. $11\frac{1}{2} \times 1$ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Reads the following extra lines at the end after the colophon.

एतानि शंभुर्भुवनानि शंभुर्वनानि शंभुर्गिरयश्च शंभुः ।
स एव सर्वं . . . . स एकः परमार्थरूपः ॥
मलमूत्रपात्रमेतद् गात्रमहोरात्रमत्र दृष्ट्वापि ।
गोत्रकुलसूत्रवादी नेत्रविहिनश्च नात्र संदेहः ॥
येषां बुद्धौ भेद आभाति सत्यं ।
तेषां वक्त्रे मृत्तिकेत्येव सत्यम् ॥

661 25. O. 9.

अपरोक्षानुभूतिः—शंकराचार्यकृता

Palm-leaf. 7 Foll. $13\frac{1}{2} \times 1\frac{1}{8}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Reads the following verse at the end :

अहिमिव जनयोगं सर्वदा वर्जयेद्यः
कुणपमिव सुनारीस्त्यक्तकामो विरागी ।
विषमिव विषयार्त्तिं मन्यमानो दुरन्तं
जयति परमहंसो मुक्तिभावं समेति ॥

662 33. K. 3.

अपरोक्षानुभूतिः—शंकराचार्यकृता

Palm-leaf. 6 Foll. $8\frac{1}{2} \times 1\frac{3}{4}$ inches. 15 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

663 34. O. 25.

अपरोक्षानुभूतिः—शंकराचार्यकृता

Palm-leaf. 11 Foll. $9\frac{1}{2} \times 1\frac{1}{4}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Reads the following extra verse in the beginning :

मयि सुखबोधपयोधौ महति च ब्रह्माण्डबुद्बुदसहस्रम् ।
मायामयेन मरुता भूत्वा भूत्वा तिरोधत्ते ॥

Reads the following verse at the end :

रथ्यान्तरे मूत्रपुरीषमध्ये चण्डालवेश्मन्यथवा श्मशाने ।
कृतप्रयत्नोऽप्यकृतप्रयत्नो देहावसाने लभते च मोक्षम् ॥

664 22. B. 26.

अपवादप्रकरणम्

Palm-leaf. 1 Foll. $15\frac{1}{2} \times 1\frac{1}{2}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

This is a short work on the Advaita Vedānta teaching that the phenomenal world is only of negative nature and not of positive. The author is vaguely mentioned as Paramahaṁsaparivrājaka.

Complete.

Beginning :

अथापवाद उच्यते । अपवादस्य किं वा लक्षणमित्युक्ते कारणाद्विभिन्नं कार्यं न च । तत्कथं दृष्टान्तेन निरूप्यते ? तथैव दृष्टान्तेन निरूप्यते । मृज्जनितघटशरावादयो मृद्विना यथा न भवन्त्येव, तन्तुजनितपटादयः तन्तुव्यतिरेकेण यथा न भवन्त्येव, स्वर्णजनितकटककुण्डलादयः स्वर्णव्यतिरेकेण यथा न भवन्त्येव, अयोजनितखड्गादयोऽयोव्यतिरेकेण यथा न भवन्त्येव, तथा आत्मनो जनितप्रपञ्चोऽपि आत्मव्यतिरेकेण नेति ज्ञायते ।

End :

स्थूलसूक्ष्मादिदेहानामात्मन्यारोप एवच ।
अपवादस्ततोऽप्येषां सम्यगत्र प्रदर्शितः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यविरचितमपवादप्रकरणं संपूर्णम् ।

665 33. H. 5.

अवधूतगीता

Palm-leaf. 9 Foll. $9\frac{1}{2} \times 2\frac{1}{4}$ inches. 12

lines in a page. Telugu script. Old. Injured. Good writing.

The Avadhūtagitā is a metrical work written purely on the Advaita Vedānta. Hence it has been included among the Prakaraṇa works of the Advaita Vedānta. Most of the MSS. except a very few, mention the work as Avadhūtagrantha. However as it is widely known by the title Avadhūtagītā it is mentioned here by that name. The work is written in the form of a dialogue between the sage Dattātreya and his disciple Gorakṣaka Hence it is also called Dattātreyagitā. The work is divided into various Prakaraṇas of which the present MS. contains 7 only while the printed edition published by the Ashtekar & Co., Poona in 1915 with the title Gītāsaṁgraha, Contains 8 Prakaraṇas calling them as adhyāyas. The subjects dealt with in the work are :

१. आत्मसंवित्त्युपदेशः ६. मोक्षनिर्णयः
२–४. स्वरूपनिर्णयः ७,८. स्वात्मसंवित्त्युपदेशः
५. शमादिकथनम्

Beginning :

अस्य श्री अवधूतगीतामन्त्रस्य अवधूतऋषिः अनुष्टुप् छन्दः श्रीभगवान्निरञ्जनो देवता । निरञ्जनदेवताप्रीत्यर्थे जपे विनियोगः ।

ईश्वरानुग्रहादेव पुंसामद्वैतवासना ।
महाभयपरित्राणा द्वित्राणामेव जायते ॥
येनेदं पूरितं सर्वमात्मनैवात्मनात्मनि ।
निराकारं कथं वन्दे ह्यभिन्नं शिवमव्ययम् ॥
पञ्चभूतात्मकं विश्वं मरीचिजलसंनिभम् ।
कस्याहो मे नमस्कारो योऽहमेको निरन्तरः ॥
आत्मैव केवलं सत्यो भेदाभेदो न विद्यते ।
अस्ति नास्ति कथं ब्रूहि विस्मयः प्रतिभाति मे ॥
वेदान्तसारसर्वस्वं ज्ञानं विज्ञानमेव च ।
अहमात्मा निराकारः सर्वं वेद्मि स्वभावतः ॥
यो वै सर्वात्मको देवो निष्कम्पो गगनोपमः ।
स्वभावनिर्मलः शुद्धः स एवाहं न संशयः ॥

End :

धर्मादिमोक्षपर्यन्तं निरीहाः सर्वदा वयम् ।
कथं रागविरागौ च कल्पयन्ति विपश्चितः ॥
एतस्मात्किमिहेन्द्रजालमपरं यद्गर्भवासे स्थितं
रेतश्चेह च हस्तमस्तकपदप्रोद्भूतनानाङ्कुरम् ।
पर्यायेण शिशुत्वयौवनजरावैषेरनेकैर्युतं
पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यधो गच्छति ॥
विन्दति विन्दति न हि न हि मन्त्रं
न हि न हि छन्दोलक्षणतन्त्रम् ।
समरसमग्नो भावितपूतः
प्रलपितमेतत्कथमवधूतः ॥

Colophon :

इत्यवधूतग्रन्थे दत्तात्रेयगोरक्षकसंवादे सप्तमप्रकरणं सर्वं समाप्तम् ॥

666 22. C. 21.

अवधूतगीता

Palm-leaf. 12 Foll. 16½ × 1½ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Contains 7 Prakaraṇas.

667 10. F. 15.

अवधूतगीताटीका—परमानन्दतीर्थकृता

Paper. 325 Foll. 8½ × 6½ inches. 14

lines in a page. Devanāgarī script. New. Good. Good writing.

This is a commentary on the Avadhūta-gītā described above. The commentator Paramānandatīrtha mentions himself as the disciple of Bhāratītīrtha who may be identified with the author of the Adhikaraṇaratnamālā and the disciple of Vidyātīrtha (about 1280 A.D.). Our author, therefore, must have flourished in the middle of the 14th century A.D. The commentator divides each of the Prakaraṇas into three sub-Prakaraṇas.

The MS. contains the commentary for the first three Prakaraṇas as divided into 9 sub-Prakaraṇas.

Beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
गोरक्षकस्य माहात्म्यं दत्तात्रेयस्य वैभवम् ।
संवादमुभयोश्चैवमद्भुतं ब्रह्मनिर्णयम् ॥
तस्य पट्टाभिषेकं चाखण्डैकरससाधने ।
प्रश्नोत्तराभ्यां प्रथमं वर्णानां सप्तमेन वै ॥
प्रथमं वाक्यसंदर्भैर्नानावृत्तैश्च सक्रमैः ।
अनिर्देश्यमतीतं च वस्तुतत्त्वं निरूप्यते ॥

अत्रेत्थं दत्तात्रेयसंहितायां कथासंदर्भः—

अत्रिश्च भगवान्पूर्वमनपत्यस्तपश्चरन् ।
अतीतं रूपमुद्दिश्य पुत्रार्थं भार्यया सह ॥

संवत्सरशतस्यान्ते ब्रह्मादयस्तस्य वरदानायागताः । ततो ब्रह्मनिष्ठं पुत्रं प्रार्थयामास । ते च तथैव दत्त्वा पूजिताः सन्तो यथास्थानं ययुः । ततो दिनत्रयेण भगवान् विष्णुरेव पुत्ररूपोऽभवत् । ततो जातकर्म नामकरणं दत्तात्रेय इति चक्रार ।

End :

हे गोरक्षक एकरसोऽवधूतः समरसमग्नत्वात् भावितान्तरः पूतो नास्त्येव । मग्नश्चेत् कथं वा ममोपदिष्टवानिति चेत्, महासमुद्रे मग्न इव एकरस-सागरे मग्नसमये प्रोक्तवान् । अनन्तरं दर्शनाभावात् मग्नमात्रं न भवति । किं तु भावितपूतः । तेन प्रलपितम् । एतेन किमुक्तमिति चेत्, अनुभवनिष्ठे-नात्मदर्शनं गतेनोक्तमसत्यं न भवति । प्रमाणत्वे-नोक्तमेवं गीतं प्रलपितं विद्धि । एवमेव सुखेन तिष्ठस्वेत्यर्थः ।

Colophon :

इत्यवधूतग्रन्थे दत्तात्रेयगोरक्षकसंवादे तृतीयप्रकरणे तृतीयप्रकरणं समाप्तम् ।

इति भारतीतीर्थशिष्यपरमानन्दतीर्थविरचिता अवधूतगीताटीका समाप्ता । इति तृतीयप्रकरणे तृतीयप्रकरणम् ।

The scribe adds :

अत्रेः पुत्राय हरये अनसूयासुताय च ।
दत्तात्रेयाय गुरवे अवधूताय ते नमः ॥

668 9. B. 16.

अवधूतगीताटीका—परमानन्दतीर्थकृता

Paper. 12 Foll. $7\frac{3}{4} \times 6\frac{1}{2}$ inches. 12 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the 1st Prakaraṇa incomplete.

669 9. F. 84.

अवधूतगीताटीका—परमानन्दतीर्थकृता

Paper. 9 Foll. $10\frac{1}{4} \times 8$ inches. 13 lines in a page. Telugu script. Old. Injured. Illegible writing.

The leaves bear the serial Nos. 19 to 27.

Contains the commentary for the verses 10 to 16 only of the 1st sub-Prakaraṇa as found in the printed edition published by the Ashtekar and Co., Poona.

Reads the following colophon of the 1st sub-Prakaraṇa at the end of the 11th verse :

इत्यवधूतग्रन्थे दत्तात्रेयगोरक्षकसंवादे नित्यरूप-दर्शनं नाम प्रकरणं समाप्तम् ।

670 22. C. 12.

अवधूतगीताटीका—परमानन्दतीर्थकृता

Palm-leaf. 166 Foll. 16 × 1½ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Breaks off in the 3rd division of the 3rd Prakaraṇa.

671 27. J. 76.

अवधूतगीताटीका—परमानन्दतीर्थकृता

Palm-leaf. 173 Foll. 15½ × 1⅜ inches. 7 lines in a page. Grantha script. Old. Fair. Good writing.

Wooden boards are added to both sides.

Contains the Prakaraṇas 1 to 3 as divided into 9 sub-Prakaraṇas.

Date of copying.

वृषनामसंवत्सरे चैत्रमासे तृतीयदिवसे गुरुवासरे पौर्णमास्यां चित्रानक्षत्रे दत्तात्रेयगीता समाप्ता ।

672 30. A. 23.

अवधूतगीताटीका—परमानन्दतीर्थकृता

Palm-leaf. 108 Foll. 9½ × 2 inches. 13 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Prakaraṇas 1 to 3 as divided into 9 sub-Prakaraṇas.

Reads the following additional verses in the begining :

यत्स्वरूपमहमात्मना तथा
यत्स्वरूपमिदमात्मनैव तु ।
भाति तत्तु मम चिद्वपुः सदा
भाति नान्यदिति निश्चयो मम ॥
अहं समस्तं मम रूपतः पृथ-
ग्नकिंचिदस्तीति सुनिश्चयः कृतः ।
अमायवेदान्तवचोभिरञ्जसा
पितामहेनापि च सत्यमीरितम् ॥
अत्र संशयमतिर्विनश्यति
भ्रष्ट एव परमार्थदर्शनात् ।
अत्र निश्चितमतिस्तु मुच्यते
कष्टरूपभवपाशबन्धनात् ॥
पञ्चाशद्वर्णरूपेण यया व्याप्तमिदं जगत् ।
शब्दब्रह्ममयीं वाणीं भजे तां परदेवताम् ॥

673 34. O. 25.

अवधूताष्टकम्

Palm-leaf. 1 Foll. 9¼ × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Eight verses describing the characteristics of the Avadhūtas who have renounced the wordly affairs and devoted themselves on the realisation of the self according to the doctrine of the Advaita Vedānta.

Complete.

Beginning :

गुरुप्रमाणीकृतचित्तवृत्तय-
स्तदागमेषु प्रवणप्रवृत्तयः ।
अमानिनो डम्भविवर्जिता नरा-
स्तरन्ति संसारसमुद्रमश्रमम् ॥ १ ॥
अहिंसकाः क्षान्तिपरास्तपोधनाः
सुखेषु दुःखेषु समानबुद्धयः ।
ऋजुस्वभावा विषयेषु निःस्पृहा-
स्तरन्ति संसारसमुद्रमश्रमम् ॥ २ ॥

End :

निवृत्तलोभाः परिहीनमत्सरा
निवृत्ततृष्णा विषयेषु निःस्पृहाः ।
पुण्येषु पापेषु निवृत्तवृत्तय-
स्तरन्ति संसारसमुद्रमश्रमम् ॥ ८ ॥
अवधूताष्टकं गुह्यं प्रातः काले पठन्ति ये ।
तेऽज्ञानकाननं दग्ध्वा स्वस्वरूपा भवन्ति हि ॥९॥

674 21. L. 30.

अष्टावक्रगीता

Palm-leaf. 51 Foll. $16\frac{3}{4} \times 1\frac{1}{4}$ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Like the Avadhūtagītā described above, the Aṣṭāvakragītā also was written purely on the Advaita Vedānta and hence it has been generally mentioned among the Prakaraṇa works on that Vedānta. The work is a metrical exposition of the doctrine of the Advaita Vedānta in twenty-one Prakaraṇas containing 302 verses. It was written in the form of the conversation between the sage Aṣṭāvakra and the king Janaka and hence is called Aṣṭāvakragītā or Aṣṭāvakrasūkta. The work has been printed and published in 21 chapters by the Ashtekar and Co. Poona in 1915. From the last verse of the last chapter as given blow, the work seems to have been called also as Avadhūtānubhūti as described in I. O. No. 2363. Viz :

विंशत्येकमितैः खण्डैः श्लोकैरात्माग्निमध्यखैः ।
अवधूतानुभूतेश्च श्लोकाः संख्याक्रमा अमी ॥

The MS. contains the commentary also side by side of the text. The following subjects are dealt with in 21 Prakaraṇas according to the printed edition :

१. उपदेशप्रकरणम्	१२. ज्ञानम्
२. अनुभवोल्लासः	१३. सुखम्
३. उपदेशः	१४. शान्तिः
४. उल्लासः	१५. तत्त्वोपदेशः
५. लयः	१६. विशेषोपदेशः
६. उपदेशः	१७. तत्त्वज्ञानोपदेशः
७. अनुभवः	१८. शमः
८. बन्धः	१९. आत्मविश्रान्तिः
९. मोक्षः	२०. जीवन्मुक्तिः
१०. निर्वेदः	२१. संख्याक्रमः
११. उपशमः	

Contains the Prakaraṇas 1 to 20 only.

Beginning :

मुक्तिमिच्छसि चेत्तात विषय्यान्विषवत्त्यज ।
क्षमार्जवदयातोषसत्यं पीयूषवद्भज ॥ १ ॥
न पृथ्वी न जलं नाग्निर्न वायुर्द्यौर्न वा भवान् ।
एषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये ॥ २ ॥
यदि देहं पृथक्कृत्य चिति विश्राम्य तिष्ठसि ।
अधुनैव सुखी शान्तो बन्धमुक्तो भविष्यसि ॥ ३ ॥

न त्वं विप्रादिको वर्णो नाश्रमी नाक्षगोचरः ।
असङ्गोऽसि निराकारो विश्वसाक्षी सुखी भव ॥ ४ ॥
धर्माधर्मौ सुखं दुःखं मानसानि न ते विभो ।
न कर्तासि न भोक्तासि मुक्त एवासि सर्वदा ॥ ९ ॥

End :

मुक्तो यथास्थिति स्वस्थः कृतकर्तव्यनिर्वृतः ।
समः सर्वत्र वैतृष्ण्यान्न स्मरत्यकृतं कृतम् ॥ ९८ ॥
न प्रीयते वन्द्यमानो निन्द्यामानो न कुप्यति ।
नैवोद्विजति मरणे जीवने नाभिनन्दति ॥ ९९ ॥
न धावति जनाकीर्णं नारण्यमुपशान्तधीः ।
यथातथा यत्रतत्र सम एवावतिष्ठते ॥ १०० ॥

Then reads the following colophon pertaining to the commentary :

इति श्रीविश्वेश्वरविरचितायामष्टावक्रगीताटीकायां शान्तिशतकं विंशं प्रकरणं समाप्तम् ।

The 20th Prakaraṇa of this MS. corresponds to the 18th Prakaraṇa of the printed edition mentioned above.

675 21. L. 30.

अष्टावक्रगीताटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 51 Foll. $16\frac{3}{4} \times 1\frac{1}{4}$ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

This is a commentary by Vis'vesvara on the Aṣṭāvakragītā described above. The commentary is called Dīpikā. The author Vis'vesvara may be identified with the commentator on S'rī S'aṁkarācārya's Vākyavṛtti. In that commentary he calls himself as the pupil of Mādhavaprajña.

The MS. contains the Prakaraṇas 1 to 20 only.

Beginning :

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यस्मिन् मयि स्वप्रकाशे जगदेतच्चराचरम् ।
सृष्टिस्थित्यन्तमाप्नोति तं भजे गुरुरूपिणम् ॥
सच्चिदानन्दमद्वैतं सर्वाधिष्ठानमुत्तमम् ।
नत्वाष्टावक्रगीतायां दीपिका तन्यते परा ॥

इह खलु ज्ञानविज्ञासंपन्नः परमकारुणिकोऽष्टावक्रमुनिः मुक्तिकामनया समुपेतं कंचिच्छिष्यं शमाद्यधिकारपूर्वकमात्मतत्त्वमुपदिशति—मुक्तिमिति । तातेति सानुग्रहसंबोधने । हे शिष्य त्वं सर्वानर्थनिवृत्तिसहितां परमानन्दवृत्तिरूपां मुक्तिमिच्छसि चेत्तर्हि विषयान् अनर्थहेतुत्वात् विषवत् त्यज ।

End :

पुरुषो जनाकीर्णं प्रदेशं नानुधावति । नाप्यरण्ये । सर्वत्र शान्तत्वात् यथा तथा जनसंमर्दे तदसंकीर्णे यत्र कुत्र वा सम एव स्वस्थचित्त एवावतिष्ठते, प्राप्तात्मसाक्षात्कारत्वात् ।

Colophon :

इति श्रीविश्वेश्वरविरचितायामष्टावक्रगीताटीकायां शान्तिशतकं विंशं प्रकरणं समाप्तम् ।

This chapter corresponds to the 18th chapter of the printed edition.

676 9. F. 44.

आत्मबोधः

Paper. 2 Foll. $8 \times 6\frac{1}{2}$ inches. 30 lines in a page. Grantha script. Old. Injured. Good writing.

This Ātmabodha is different from the well-known Ātmabodha of the famous S'rī S'aṁkarācārya described in the next

number. The work explains the principles of the Advaita Vedānta in simple manner so as to enable even a lay-student to understand them easily.

The author's name is not known.

Beginning :

कथं बन्धः ? कथं मोक्षः ? का विद्या ? का अविद्या चेति । जाग्रत्स्वप्नसुषुप्तितुर्यं च कथम् ? अन्नमय-प्राणमयमनोमयविज्ञानमयानन्दमयाः कथम् ? कर्ता जीवः क्षेत्रज्ञः साक्षी कूटस्थोऽन्तर्यामी कथम् ? प्रत्यगात्मा परमात्मा माया चेति कथम् ? आत्मेश्वर अनात्मनां देहादीनामात्मत्वेनाभिमन्यते । सोऽभिमान आत्मनो बन्धः ।

End :

माया नाम अनाद्यन्तवती प्रमाणाप्रमाणसाधारणा, न सती नासती न सदसती स्वयमधिकविचाररहिता निरूप्यमाणा सती लक्षणशून्या । सा मायेत्युच्यते ।

Colophon :

इत्यात्मबोधप्रकरणं समाप्तम् ।

677 8. J. 50.

आत्मबोधः—शंकराचार्यकृतः

Paper. 13 Foll. $7\frac{1}{2} \times 5$ inches. 19 lines in a page. Grantha script. Old. Injured. Good writing.

This is the well-known Ātmabodha written by the famous S'rī S'aṁkarācārya in 68 verses on the Advaita Vedānta, specially dealing with the nature and characteristics of the soul and his identity with the Supreme Brahman. It also explains the nature of Saṁsāra, the different embodiments of the soul, the super-imposition on the Ātman and the state of Jīvanmukti.

The MS. Contains the commentary also complete.

Beginning :

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥ १ ॥
बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम् ।
पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति ॥२॥
अविरोधितया कर्म नाविद्यां विनिवर्तयेत् ।
विद्याविद्यां निहन्त्येव तेजस्तिमिरसंघवत् ॥ ३ ॥
अवच्छिन्न इवाज्ञानात्तन्नाशे सति केवलः ।
स्वयं प्रकाशते ह्यात्मा मेघापायेंऽशुमानिव ॥ ४ ॥
अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम् ।
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ॥ ९ ॥

End :

दिग्देशकालाद्यनपेक्ष्य सर्वगं
शीतादिहृन्नित्यसुखं निरञ्जनम् ।
यः स्वात्मतीर्थं भजते विनिष्क्रियः
स सर्ववित्सर्वगतोऽमृतो भवेत् ॥ ६८ ॥

Reads the following colophon pertaining to the commentary :

इति श्रीपरमहंसपरिव्राजकाचार्यगोविन्दभगत्पूज्य-पादशिष्यश्रीमच्छंकरभगवत्पादाचार्यविरचितात्मबोध-प्रकरणस्य टीका समाप्ता ।

678 9. B. 12.

आत्मबोधः—शंकराचार्यकृतः

Paper. 4 Foll. 10×8 inches. 26 lines in a page. Telugu script. Old. Injured. Illegible writing.

Complete.

Reads the following colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्द-

भगवत्पूज्यपादशिष्यश्रीमच्छंकराचार्यविरचितमात्मबोधप्रकरणं समाप्तम् ।

679 9. C. 93.

आत्मबोधः—शंकराचार्यकृतः

Paper. 8 Foll. 6 × 59 inches. 14 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

680 9. E. 85.

आत्मबोधः—शंकराचार्यकृतः

Paper. 12 Foll. $10\frac{1}{4} \times 4\frac{1}{2}$ inches. 13 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The MS. contains the commentary also.

Complete.

681 9. F. 94.

आत्मबोधः—शंकराचार्यकृतः

Paper. 1 Foll. 20 × 8 inches. 38 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

The MS. adds the last hymn of the Taittirīyopaniṣad तस्यैवं etc. after the colophon of the Ātmabodha.

682 9. H. 79.

आत्मबोधः—शंकराचार्यकृतः

Paper. 7 Foll. $12\frac{1}{2} \times 4$ inches. 10 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the commentary also.

Contains the verses 1 to 27 only.

683 10. D. 27.

आत्मबोधः—शंकराचार्यकृतः

Paper. 15 Foll. $11\frac{3}{4} \times 5\frac{1}{2}$ inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The first leaf is damaged.

The MS. contains the commentary also.

Complete.

684 19. B. 8.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 21 Foll. $10\frac{1}{2} \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Good. Good writing.

The MS. contains the commentary also.

Complete.

685 19. P. 2.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 6 Foll. 7 × 2 inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

686 22. D. 47.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 3 Foll. $15 \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

687 22. D. 48.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 4 Foll. 14 × 1¼ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The date of copying: Hevilambi year, Makara month.

688 22. D. 49.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 4 Foll. 9 × 1¾ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

689 22. D. 50.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 6 Foll. 16 × 1¼ inches. 5 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

Reads the following additional verse in the beginning:

हरलीलावताराय शंकराय परौजसे ।
कैवल्यकलनाकल्पतरवे गुरवे नमः ॥

The scribe adds:

पञ्चेष्टिपुरवासिना सोमसुन्दरेण लिखितः ।

690 22. D. 51.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 3 Foll. 15½ × 1½ inches. 10 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

691 22. D. 52.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 5 Foll. 9½ × 1¼ inches. 8 lines in a page. Grantha script. Old. Fair. Good writing.

Complete.

692 22. D. 53.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 16 Foll. 6¾ × 1 inches. 4 lines in a page. Telugu script. Old. Fair. Good writing.

Complete.

693 22. D. 54.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 3 Foll. 16½ × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains also the Telugu meaning.

Breaks off in the 11th verse.

Adds the following verse in the beginning.

सुरासुरशिरोरत्नमरीचिखचिताङ्घ्रये ।
विघ्नान्धकारसूर्याय गणाधिपतये नमः ॥

694 22. D. 55.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 9 Foll. 12 × 1 inches. 4

lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

695 22. D. 56.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 6 Foll. 14 × 1 inches. 5 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

Adds the following verses in the beginning.

वन्दे वरप्रदमहं वरवारणेन्द्र-
वक्त्रं सदा क्षितिभृदीश्वरजातनूजम् ।
विघ्नेश्वरं विबुधवन्दितपादपद्मं
संसारसंभवभयापहमानतानाम् ॥

शतमखपूजितपादं + आश्रये रामम् ॥

696 22. D. 60.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 17 Foll. 13 × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the commentary also.

Complete.

697 22. D. 61.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 14 Foll. 16½ × 1⅛ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the commentary also.

Complete.

Reads the following verse in the beginning :

यस्मिन्न्यस्तमतिः क्षिप्रं तरत्यज्ञानसागरम् ।
तं वन्दे देवदेवेशं गोपालं लीलया विभुम् ॥

698 22. D. 62.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 9 Foll. 16 × 1⅛ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the commentary also.

Complete.

699 24. C. 18.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 12 Foll. 16¾ × 2½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

The MS. contains the commentary also.

Complete.

700 25. M. 6.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 3 Foll. 16 × 1½ inches. 13 lines in a page. Grantha script. Old. Injured. Clear writing.

Wooden boards are added to both sides.

Complete.

701 25. N. 11.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 11 Foll. 15 × 1⅛ inches. 8

lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the work in duplicate and the commentary also.

Wooden boards are added to both sides. Complete.

702 27. N. 30.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 9 Foll. $7\frac{1}{2} \times 1\frac{1}{8}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

703 28. J. 54.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 18 Foll. $12\frac{1}{8} \times 1$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the commentary also. Complete.

704 28. M. 54.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 8 Foll. $7 \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides. Complete.

705 29. C. 2.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 17 Foll. $15\frac{1}{2} \times 1\frac{1}{2}$ inches. 6 lines in a page. Telugu script. Old. Injured. Illegible writing.

The MS. contains the commentary also. Complete.

706 30. G. 13.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 16 Foll. $13 \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Fair. Good writing.

The MS. contains the commentary also. Complete.

707 30. I. 6.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 4 Foll. 16×1 inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

708 30. K. 16.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 12 Foll. $15\frac{1}{2} \times 1$ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the commentary also. Complete.

709 33. C. 1.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 12 Foll. 14×1 inches. 6 lines in a page. Oriya script. Old. Injured. Good writing.

Wooden boards are added to both sides. Complete.

710 33. C. 12.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 12 Foll. 16 × 1¼ inches. 6 lines in a page. Oriya script. Old. Injured. Good writing.

Complete.

711 33. H. 5.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 9 Foll. 10 × 2 inches. 15 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the commentary also.

Complete.

712 33. H. 19.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 2 Foll. 9 × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 24th verse.

713 33. K. 3.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 3 Foll. 8½ × 1¾ inches. 15 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the commentary also.

Complete.

714 34. L. 30.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 16 Foll. 12½ × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Clear writing.

Wooden boards are added to both sides.

The MS. contains the commentary also.

Complete.

715 34. O. 23.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 32 Foll. 9 × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the commentary also.

Complete.

716 34. O. 25.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 27 Foll. 9½ × 1¾ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the commentary also.

Complete.

717 40. C. 65.

आत्मबोधः—शंकराचार्यकृतः

Paper. 5 Foll. 9 × 5 inches. 13 lines in a page. Telugu script. Old. Injured. Clear writing.

The MS. contains the commentary also.

Complete.

718 8. J. 50.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Paper. 13 Foll. 7½ × 5 inches. 19 lines in a page. Grantha script. Old. Injured. Good writing.

This is a commentary on S'rī S'aṁkarācārya's Ātmabodha, by Visvesvara. The commentary is called Dīpikā. This Visvesvara may be idendified with the author of the Vākyavṛttiṭīkā wherein he mentions himself as Visvesvarapaṇḍita, the pupil of Mādhavaprajña.

Complete.

Beginning :

शतमखपूजितपादं शतपथमनसाप्यगोचराकारम्।
सितजलरुहनेत्रं सीतावामाङ्कमाश्रये रामम्।

तत्र भगवान् श्रीमच्छंकराचार्य उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयं निर्माय तदवलोकनासमर्थानां मन्दबुद्धीनामनुग्रहार्थं सर्ववेदान्तसिद्धान्तसंग्रहमात्मबोधाख्यप्रकरणं प्रदिदर्शयिषुः प्रतिजानीते—तपोभिरिति। कृच्छ्रचान्द्रायणनित्यनैमित्तिकाद्यनुष्ठानरूपैस्तपोभिः क्षीणानि पापानि रागाद्यन्तःकरणदोषा येषां तेषां, नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमिति वचनात्।

End :

इदं तु निरुत्तमं निर्गतमुत्तमं यस्मादिति। बाह्यतीर्थस्नायी तु किंचिज्ज्ञः प्रादेशिको मरणधर्मा च भवति। एतत्स्नायी तु तद्विपरीत इति बाह्यतीर्थादस्य वैलक्षण्यमवसेयम्।

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पादाचार्यविरचितात्मबोधप्रकरणस्य टीका समाप्ता।

719 9. E. 85.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Paper. 12 Foll. $10\frac{1}{4} \times 4\frac{1}{2}$ inches. 13 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Contains the text also.

Complete.

720 9. H. 79.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Paper 7 Foll. $12\frac{1}{2} \times 4$ inches. 10 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the text also.

Breaks off in the 27th verse.

721 10. D. 27.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Paper. 15 Foll. $11\frac{3}{4} \times 5\frac{1}{2}$ inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The first leaf is damaged. The MS. contains the text also.

Complete.

Date of copying :

शाके १९६४. आश्विनकृष्ण १४.

Adds the following lines :

ज्ञात्वाप्यसर्पं सर्पोत्थं यथा भीतिं न मुञ्चति।
विध्वस्ताखिलमोहोऽपि मोहकार्यं तथात्मवित्॥

722 19. B. 8.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 21 Foll. $10\frac{1}{2} \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Good. Good writing.

The MS. contains the text also.
Complete.

723 22. D. 60.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 17 Foll. 13 × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the text also.
Complete.

The first page of the Fol. 1 contains a few lines of the end of the 3rd adhyāya of the Uttaragītāvyākhyā by Gauḍapādācārya.

724 22. D. 61.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 14 Foll. 16½ × 1⅛ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the text also.
Complete.

725 22. D. 62.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 9 Foll. 16 × 1⅛ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the text also.
Complete.

726 24. C. 18.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 12 Foll. 16¾ × 2½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.
The MS. contains the text also.
Complete.

727 25. N. 11.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 11 Foll. 15 × 1⅛ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Adds the following verse after the colophon at the end :

स्नातं तेन समस्ततीर्थनिचये दत्तं महीमण्डलं
विप्रेभ्यः पितृदेवतासुरगणाः सर्वेऽपि संतर्पिताः।
जप्तो मन्त्रसहस्रकोटिरमुना तप्तं च तीव्रं तपो
यस्य ब्रह्मविचारणे क्षणमपि प्राप्नोति धैर्यं मनः॥

728 28. J. 54.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 18 Foll. 12⅛ × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the text also.
Complete.

Reads the different colophon mentioning the commentator as Raghunāthasarasvatī, though the commentary is the same as of Viśveśvara.

729 29. C. 2.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 17 Foll. 15½ × 1½ inches.

6 lines in a page. Telugu script. Old. Injured. Illegible writing.

The MS. contains the text also.

Complete.

730 30. G. 13.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 16 Foll. 13 × 1¼ inches. 8 lines in a page. Grantha script. Old. Fair. Good writing.

The MS. contains the text also.

Complete.

The colophon mentions the author as Viśveśvarapaṇḍita.

Adds the following verse in the beginning :

अभ्रश्यामः पिङ्गजटाबद्धकलापः
प्रांशुर्दण्डी कृष्णमृगत्वक्परिधानः ।
साक्षाल्लोकान् पावयते कविमुख्यः
पाराशर्यः पर्वसुरूपं विवृणोतु ॥

Reads the following colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पादाचार्यशिष्यश्रीशंकरभगवत्पादाचार्यविरचितात्मबोधप्रकरणस्य श्रीविश्वेश्वरपण्डितविरचिता दीपिका समाप्ता ।

731 30. K. 16.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 12 Foll. 15½ × 1 inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the text also.

Complete.

732 33. H. 5.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 9 Foll. 10 × 2 inches. 15 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the text also.

Complete.

733 33. K. 3.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 3 Foll. 8½ × 1¾ inches. 15 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

734 34. L. 30.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 16 Foll. 12½ × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Clear writing.

Wooden boards are added to both sides.

The MS. contains the text also.

Complete.

735 34. O. 23.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 32 Foll. 9 × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the text also.

Complete.

736 34. O. 25.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Palm-leaf. 27 Foll. 9½ × 1¾ inches.

8 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the text also.

Complete.

737 40. C. 65.

आत्मबोधटीका दीपिका—विश्वेश्वरकृता

Paper. 15 Foll. 9 × 5 inches. 13 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the text also.

Complete.

738 8. F. 24.

आत्मविद्याविलासः—सदाशिवेन्द्रसरस्वतीकृतः

Paper. 3 Foll. 8 × 6 inches. 19 lines in a page. Grantha script. Old. Injured. Good writing.

The Ātmavidyāvilāsa is a metrical treatise on the Advaita-Vedānta specially dealing with the knowledge and realisation of the self. The work contains 63 verses (62 on the subject and 1 on Phalaśruti) written in Āryā metre. The author Sadāśivendrasarasvatī was the pupil of Paramaśivendrasarasvatī and a contemporary of the King Sarabhoji or Sarfoji of Tanjore (1711 to 1727 A.D.). It is understood that the author's preceptor Paramaśivendrasarasvatī was the pupil of another Sadāśivendra who was in his turn, the pupil of Candracūḍendra, the pupil of Mahādevendra of the Kāñcī Kāmakoṭipīṭha. The following other works are attributed to our author: Bodhāryā, Gururatnamālikā, Śivamānasikapūjā, Saparyāparyāyastava, Ātmanirvedastava, Yogapañcāśikā, Brahmasūtravṛtti (No. 505 of this volume) and Navamaṇimālā. The work was printed and published at Kumbakonam. The author must have flourished between the last part of the 17th century and the middle of the 18th century A.D. It has been stated in a letter written by one Mallāripaṇḍita to the King Sarfoji, that this work was handed over to the writer by the author at Dīpāmbālpura in Tanjore Dt. (Vide No. 7685 of the Tanjore Library Catalogue Vol. XIII).

Complete.

Beginning:

वटतरुनिकटनिवासं पटुतरविज्ञानमुद्रितकराब्जम् ।
कंचन देशिकमाद्यं कैवल्यानन्दकन्दलं वन्दे ॥
निरवधिसंसृतिनीरधिनिपतितजनतारणस्फुरन्नौकाम् ।
परमतभेदनगुटिकां परमशिवेन्द्रार्यपादुकां नौमि ॥
देशिकपरमशिवेन्द्रादेशवशाद्बुद्धदिव्यमहिमाहम् ।
स्वात्मनि विश्रान्तिकृते परमं प्रस्तौमि किंचिदिदम् ॥
निरुपमनित्यनिरीहो निष्कलनिर्मायनिर्गुणाकारः ।
विगलितसर्वविकल्पः शुद्धो बुद्धश्चकास्ति परमात्मा ॥

End:

अरसमगन्धमरूपं विरजस्कमसत्त्वमतमस्कम् ।
निरुपमनिर्भयतत्त्वं तत्किमपि द्योतते नित्यम् ॥
इति गुरुकरुणापाङ्गादार्याभिर्द्व्यधिकषष्टिसंख्याभिः ।
निरवद्याभिरवोचं निगमशिरस्तन्त्रसारभूतार्थम् ॥
गदितमिममात्मविद्याविलासमनुवासरं स्मरन्विबुधः ।
परिणतपरात्मविद्यः प्रपद्यते सपदि परमार्थम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्रा-

र्यपूज्यपादशिष्यश्रीसदाशिवब्रह्मेन्द्रार्यविरचित आत्मविद्याविलासः संपूर्णः ।

739 8. G. 39.

आत्मविद्याविलासः—सदाशिवेन्द्रसरस्वतीकृतः

Paper. 3 Foll. 6 × 4¼ inches. 16 lines in a page. Telugu script. Old. Injured. Illegible writing.

Complete.

740 9. F. 86.

आत्मविद्याविलासः—सदाशिवेन्द्रसरस्वतीकृतः

Paper. 2 Foll. 9 × 7 inches. 14 lines in a page. Telugu script. Old. Injured. Good writing.

Breaks off in the 30th verse.

741 19. B. 8.

आत्मविद्याविलासः—सदाशिवेन्द्रसरस्वतीकृतः

Palm-leaf. 7 Foll. 10½ × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

742 19. C. 20.

आत्मविद्याविलासः—सदाशिवेन्द्रसरस्वतीकृतः

Palm-leaf. 4 Foll. 15 × 1¼ inches. 6 lines in a page. Telugu script. Old. Much injured. Illegible writing.

Wooden boards are added to both sides.

Complete.

743 21. B. 50.

आत्मविद्याविलासः—सदाशिवेन्द्रसरस्वतीकृतः

Palm-leaf. 8 Foll. 14 × 1¼ inches. 14 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

744 22. D. 88.

आत्मविद्याविलासः—सदाशिवेन्द्रसरस्वतीकृतः

Palm-leaf. 6 Foll. 17 × 1 inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

745 33. K. 3.

आत्मविद्याविलासः—सदाशिवेन्द्रसरस्वतीकृतः

Palm-leaf. 3 Foll. 8½ × 1¾ inches. 15 lines in a page. Grantha script. Old. Injured. Good and small writing.

Complete.

746 22. P. 2.

आत्मविद्याविलासः—सदाशिवेन्द्रसरस्वतीकृतः

Palm-leaf. 6 Foll. 12¼ × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

This is a different version of the Ātmavidyāvilāsa described above. The verses are written in Vasantatilakā metre. The work is attributed to the same author as that of the work described last.

This work contains 43 verses. The work is not printed.

Complete.

Beginning :

यत्पादपद्ममकरन्दजुषां नराणां
संसारघोरभुजगान्न भवेत्स्म भीतिः ।

सच्चिद्घनं सकलसौख्यलवाम्बुराशिं
श्रीदक्षिणाभिमुखमूर्तिमहं भजामि ॥
एतावदेव खलु पुंभिरवाप्तुमर्हं
यच्चेतसो निलयनं निजतत्त्वबोधे ।
आक्रोशनं श्रुतिशिरांसि यदर्थमेव
कुर्वन्ति येन हि भवेत्पुरुषः सुखाब्धिः ॥
मातेव पुत्रमवबोधयति श्रुतिर्हि
लोकं समस्तमपि योजयितुं सुखेन ।
तस्माच्छ्रुतेरभिहितार्थमतन्द्रितेन
चित्तेन साधयितुमत्र जना यतध्वम् ॥

End :

आम्नायमस्तकसुसंस्कृतवैभवोऽहं
व्योम्नोऽपि पूर्णतममूर्तिरहं स्थिरोऽहम् ।
सर्वालयोऽहमहमाद्यवभासकोऽहं
वाग्याद्यगोचरसदोदितसौख्यकोऽहम् ॥ ४३ ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यपरमशिवेन्द्र-पादाब्जसेवापरायणसदाशिवयतीन्द्रविरचित आत्मविद्याविलासः संपूर्णः ।

747 30. N. 12.

आत्मविद्याविलासः—सदाशिवेन्द्रसरस्वतीकृतः

Palm-leaf. 6 Foll. $14\frac{1}{2} \times 1$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Same work as the above written in Vasantatilakā metre.

Complete.

748 9. B. 25.

आत्मानात्मविवेकः—शंकराचार्यकृतः

Paper. 5 Foll. 6 × 4 inches. 19 lines in a page. Telugu script. Old. Injured. Illegible writing.

The leaves bear the serial numbers 12 to 16.

This is a Prakaraṇa work on the Advaita Vedānta investigating as to what is Ātman and what is Anātman. The work is attributed to the famous S'rī S'aṁkarācārya. If this work is held to have been written by the famous Ācārya, this must be the source of the 7th chapter of the Vāsudevamanana wherein the subject has been dealt with elaborately with close resemblance. Otherwise it should be held that the chapter mentioned above must have been the source of many works written with the title of Ātmānātmaviveka by many others summarizing the chapter in different versions.

Beginning :

आत्मा स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तोऽवस्थात्रयसाक्षी । कथम्? आत्मैव बाह्येन्द्रियान्तरिन्द्रियसापेक्षस्तेन जाग्रदवस्थां वेत्ति । स्वप्नमन्तःकरणवृत्तिद्वारा वेत्ति । सुषुप्तिमन्यानपेक्षया वेत्ति । तस्मादात्मैवावस्थात्रयस्य साक्षी । यद्वा सद्यः सर्वं साक्षादीक्षते ।

End :

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।

इति श्रुतिस्मृतिपुराणेभ्योऽयमर्थोऽनुशिष्यते । नमो ब्रह्मविद्भ्यो नमो ब्रह्मविद्भ्यः । एवं नास्ति न भोक्ता न भविष्यति ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभग-

वत्पूज्यपादाचार्यशिष्यश्रीमच्छंकरभगवत्पादाचार्यविरचित आत्मानात्मविवेकः संपूर्णः ।

749 22. D. 39.

आत्मानात्मविवेकः

Palm-leaf. 10 Foll. 15¾ × 1 inches. 5 lines in a page. Telugu script. Old. Injured. Illegible writing.

Similar to the above with different version. The author's name is not mentioned.

Complete.

Beginning :

अथात्मानात्मविवेकः कथ्यते । आत्मा नाम स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तोऽवस्थात्रयस्य साक्षी । आत्मैवान्तरिन्द्रियबाह्येन्द्रियसापेक्षः सन् सर्वं वेत्ति । आत्मा मनसा संयुज्यते । मन इन्द्रियेण । इन्द्रियमर्थेन संयुज्यत इति वचनात् ।

नेत्रे जागरितं विद्यात्कण्ठे स्वप्नं समाचरेत् ।
सुषुप्तिं हृदयस्थं तु तुरीयं मूर्धनि स्थिम् ॥

इति श्रुतिवचनाच्च । आत्मैव जाग्रदवस्थां वेत्ति । स्वप्नमन्तःकरणवृत्तिद्वारा वेत्ति । सुषुप्तिमन्यनिरपेक्षया वेत्ति । तस्मादात्मैवावस्थात्रयस्य साक्षी । यद्वा हृद्यस्तं सर्वं साक्षादीक्षते प्रकाशत इति साक्षी ।

End :

आत्मानात्मविवेकशून्यहृदयो ह्यत्यन्तमज्ञो जनः
स्वात्मानन्दमतिप्रसिद्धममलं हृद्यस्य देहादिषु ।
तद्भूतं मनुते सदात्मकमतः श्वानैर्यथा हृष्यते
शुष्कास्ते प्रचयं च दन्तविवरादुद्भूतरक्तादिकम् ॥
अलं विकल्पैरहमेव देवता
मयि स्थितं विश्वमिदं चराचरम् ।
इदं रहस्यं च मयैव दृश्यते
विचिन्तनीयो गुरुरेव केवलः ॥

Colophon :

इति सर्वोपनिषत्सारसंग्रहे आत्मानात्मविवेकप्रकरणं संपूर्णम् ।

750 22. D. 40.

आत्मानात्मविवेकः—सदाशिवेन्द्रसरस्वतीकृतः

Palm-leaf. 8 Foll. 10 × 1⅛ inches. 7 lines in a page. Grantha script. Old. Good. Good writing.

This is another version of the same work. The first verse suggests that the work must have been written by Sadāsivendrasarasvatī probably the same as the author of the Ātmavidyāvilāsa and other Prakaraṇa works on the Advaita Vedānta.

Complete.

Beginning :

सदाशिवयतीन्द्राय शुद्धाय परमात्मने ।
सर्वलोकैकनाथाय सदानन्दाय ते नमः ॥

प्राणिनां दुःखं केन जायते ? शरीरपरिग्रहेण । शरीरपरिग्रहः केन जायते ? कर्मणा । कर्म केन जायते ? रागादिना । रागादिः केन जायते ? अभिमानेन । अभिमानः केन जायते ? अविवेकेन । अविवेकः केन जायते ? अज्ञानेन । अज्ञानं केन जायते ? केनापि न जायते । अनादि तत् । पुनश्चावरोहेण द्रष्टव्यम् । अज्ञानेन किं जायते ? अविवेकः । अविवेकेन किं जायते ? अभिमानः ।

End :

आत्मैव ब्रह्मेति यो वेद स ब्रह्मैव । ब्रह्म वेद,

ब्रह्मैव भवति, ब्रह्मविदाप्नोति परम्, स यो ह वैतत्परमं ब्रह्म वेद ब्रह्मैव भवति, तरति शोकमात्मविदिति श्रुतेः ।

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन ।
ज्ञानं लब्धा परां शान्तिमचिरेणाधिगच्छति ॥

इत्यादिश्रुतिस्मृतिभ्यः ।

Colophon :

आत्मानात्मविवेकः समाप्तः ।

Then the following verses are added :

भवसंचितपापौघ + भजे ॥
वन्दे गुरूणां चरणारविन्दे
संदर्शितस्वात्मसुखाम्बुधीनाम् ।
जनस्य ये जाङ्गलिकायमाने
संसारहालाहलमोहशान्त्यै ॥
श्रीगुरुशंकरचरणस्मरणं हे मानस कुरु ध्यानम् ।
संसारसागरतरणे न हि न हि तेऽन्य उपायः ॥
परमाद्वैतविज्ञानं स्वयमेव ददाति यः ।
सोऽयं गुरुः परः साक्षाच्छिव एव न संशयः ॥
भ्रान्त्या प्रतीतसंसारो विवेकान्न तु कर्मभिः ।
न रज्ज्वारोपितः सर्पो घण्टाघोषान्निवर्तते ॥

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमः श्रीगुरुभ्यो गुरुभ्यः ।

751 22. D. 43.

आत्मानात्मविवेकः

Palm-leaf. 4 Foll. $16\frac{1}{4} \times 1\frac{1}{8}$ inches. 6 lines in a page. Telugu script. Old. Injured. Illegible writing.

Different version of the same work as the above.

The author's name is vaguely mentioned as परमहंसपरिव्राजकाचार्य.

Complete.

Beginning :

अथात्मानात्मविवेकः कथ्यते । आत्मा कः? आत्मा तु शरीरत्रयविलक्षणः, अवस्थात्रयसाक्षी, पञ्चकोशव्यतिरिक्तः, सच्चिदानन्दस्वरूपः । इमान्यात्मनो लक्षणानि । अनात्मा तु समष्टिव्यष्ट्यात्मकसकलप्रपञ्चोऽपि । प्रपञ्चस्वरूपात् शरीरत्रयात् विलक्षण आत्मा ज्ञातव्यः । शरीरत्रयं नाम स्थूलसूक्ष्मकारणानीति पूर्वोक्तमेव । तथाप्यत्रापि संग्रहेणोच्यते । स्थूलशरीरस्य लक्षणं षट्कोशात्मकमपि करचरणाद्यवयवयुक्तमपि षड्भावविकारसहितमपि चोच्यते ।

End :

यस्य कस्यचित् जातिमतोऽप्याश्रमिणोऽपि गुरुकृपयेदं ज्ञानं कदाचिदागतमेव, तदा प्रभृत्येव ब्रह्मादिभिः पूज्याः । एतस्मिन्नद्वितीयज्ञाने जात्यन्तरभेदो न । ते परमात्मस्वरूपाः । इति श्रीश्रुतिस्मृतिपुराणेतिहासागमाभ्युदयवचनसिद्धवेदान्तसारसंग्रहः ।

पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे वसेत् ।
जटी मुण्डी शिखाधारी मुच्यते नात्र संशयः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्येण विरचितमात्मानात्मविवेकप्रकरणं समाप्तम् ।

752 22. D. 47.

आत्मानात्मविवेकः

Palm-leaf. 2 Foll. $15\frac{1}{2} \times 1\frac{3}{4}$ inches. 8 lines in a page. Grantha script. Old, Fair. Good writing.

Different version of the same work as the above.

The author's name is not mentioned.

Beginning :

आत्मानात्मविवेकः कथ्यते । आत्मा स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तोऽवस्थात्रयसाक्षी नित्यशुद्धमुक्तसत्यपरमानन्दस्वरूपः । अनात्मा स्थूलसूक्ष्मकारणशरीराणि । स्थूलशरीरं नाम पञ्चीकृतभूतकार्यम् । पञ्चीकृतभूतानि पृथिव्यप्तेजोवाय्वाकाशाः । सूक्ष्मशरीरं नामापञ्चीकृतभूतकार्यम् । तच्च सप्तदशकलिङ्गम् ।

End :

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥

इति भगवद्वचनात् ।

आत्मानात्मविवेकेन पुंसः संसारनिष्कृतिः ।
तद्विना जन्मकोट्यापि बन्धच्छेदो न सिध्यति ॥

Colophon :

इत्यात्मानात्मविवेकप्रकरणं समाप्तम् ।

753 20. I. 8.

आत्मानात्मविवेकः

Palm-leaf. 2 Foll. $14\frac{3}{4} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Same work as the above with the same reading.

Incomplete.

754 20. J. 33.

आत्मानात्मविवेकः

Palm-leaf. 3 Foll. $14 \times 1\frac{1}{4}$ inches. 5 lines in a page. Grantha script. Old. Good. Good writing.

Same work as the above with the same reading.

Incomplete.

755 21. M. 42.

आत्मानात्मविवेकः

Palm-leaf. 2 Foll. $9\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Same work as the above with the same reading.

Complete.

756 22. D. 57.

आत्मानात्मविवेकः—स्वयंप्रकाशयोगिकृतः

Palm-leaf. 3 Foll. $15 \times 1\frac{1}{8}$ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Similar work written by Svayamprakāsayogin. Nothing is known about the details of the author.

Complete.

Beginning :

यं विनिद्रा जितश्वासाः संतुष्टाः संयतेन्द्रियाः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै विद्यात्मने नमः ॥

आत्मानात्मविवेकः कथ्यते । आत्मा स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तः अवस्थात्रयसाक्षी, पञ्चकोशविलक्षणः चतुर्विंशतितत्त्वाधारः, मायया प्रतीयमानाभ्यां जीवेश्वराभ्यां भिन्नः, नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दस्वरूपः ।

निर्मलो निश्चलः पूर्णः परमात्मा सनातनः ।
निर्विकारो निराकारः प्रत्यग्भूतः स्वयंप्रभः ॥

अथानात्मा स्थूलसूक्ष्मकारणशरीराणि । स्थूलशरीरं नाम पञ्चीकृतपञ्चमहाभूतकार्यं प्रारब्धकर्मणा जीवस्य कर्मफलभूतयोः सुखदुःखयोर्भोगस्यायतनम् । तदुक्तम्—

पञ्चीकृतमहाभूतसंभवं कर्मसंचितम् ।
शरीरं सुखदुःखानां भोगायतनमुच्यते ॥

इति ।

End :

आत्मानात्मविवेकशून्यहृदयो ह्यत्यन्तमज्ञो जनः
स्वात्मानन्दमतिप्रसिद्धममलं त्वध्यस्य दारादिषु ।
उद्भूतं मनुते सदात्र रमते श्वा वै यथा स्वादये-
च्छुष्कास्थिप्रचये स्वदन्तविवरादुद्भूतरक्तादिकम् ।

इत्यादिवचनाच्चायमर्थोऽवसीयते ।

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः ।

Colophon :

इति श्रीमत्स्वयंप्रकाशयोगीन्द्रकृतात्मानात्मविवेकप्रकरणाख्यो ग्रन्थः समाप्तः ।

लक्ष्यं कृत्वा त्रिकोणे रविशशिहुतभुङ्मण्डलं दर्शयित्वा
नादं कृत्वा तु कोणे नयनयुगमनः स्थापयेन्नासिकाग्रे ।
निश्चिन्तो निर्विचेष्टो नियमितमनसा न्यस्तनासाग्रदृष्ट्या
जित्वा सर्वान्सकलकलुषान्योगवान् राजयोगी (?) ॥

757 30. I. 6.

आत्मानात्मविवेकः

Palm-leaf. 3 Foll. 16 × 1 inches. 6 lines in a page. Telugu script. Old. Injured. Illegible writing.

Different version of the same work as the above. The author's name is not mentioned.

Complete.

Beginning :

आत्मानात्मविवेकः कथ्यते । आत्मा स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तः अवस्थात्रयसाक्षी पञ्चकोशव्यतिरिक्तः, चतुर्विंशतितत्त्वेभ्यो व्यतिरिक्तः, नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दस्वरूप आत्मा । अनात्मा स्थूलसूक्ष्मकारणशरीरम् । कारणशरीरं नाम . . व्याकृतमित्युच्यते । तच्च न सत्, नासत्, नापि सदसत् ।

End :

अरिषड्वर्गो नाम कामक्रोधलोभमोहमदमात्सर्यादयो मनोधर्माः । षड्ऊर्मयो नाम अशनाया पिपासा शोकमोहौ जरामृत्यू । अशनायापिपासे प्राणधर्मौ । शोकमोहौ मनोधर्मौ । जरामरणे स्थूलदेहधर्मौ । एतत्सर्वमनात्मा ।

Colophon :

आत्मानात्मविवेकः समाप्तः ।

758 30. J. 11.

आत्मानात्मविवेकः

Palm-leaf. 4 Foll. 16½ × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Similar to the above.

Complete.

Beginning :

बहुजन्मस्वनुष्ठितसुकृतादिभिः शुद्धान्तःकरणस्यात एव साधनचतुष्टयसंपन्नस्यात्मानात्मविवेकः कथ्यते । साधनचतुष्टयसंपन्नो नाम नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कं मुमुक्षुत्वं चेति । नित्यानित्यवस्तुविवेको नाम ब्रह्म नित्यं जगदनित्यमिति बुद्धेर्निश्चयः । ऐहिकामुष्मिकफलभोगविरागो नाम अस्मिन् लोके शरीरस्थिति-

व्यतिरिक्तेषु भोगेषु सर्वलोके विद्यमानभोगेषु च वान्ताशनमूत्रपुरीषादिष्विवात्यन्तं विरतिः ।

End :

आत्मातिरिक्तपदार्थस्तु कालत्रयेऽपि नास्तीति यस्तु निश्चिनोति स एव मुक्तः कृतकृत्य इति सर्ववेदान्तसिद्धान्तः ।

ईश्वरो गुरुरात्मेति मूर्तिभेदाद्विभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥

Colophon :

आत्मानात्मविवेकः समाप्तः ।

759 29. M. 21.

आत्मानात्मविवेकः

Palm-leaf. 3 Foll. $15\frac{1}{2} \times 1\frac{1}{4}$ inches. 5 lines in a page. Telugu script. Old. Injured. Illegible writing.

Same work as the above with the same reading.

Incomplete.

760 33. F. 11.

आत्मानात्मविवेकः

Palm-leaf. 2 Foll. $15\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Fair. Good writing.

Same work as the above with same reading.

Incomplete.

The following additional stanza is added at the end.

अधुना मम नाथ नास्ति चिन्ता
हृदये त्वं दयया न तिष्ठसीति ।
यदि मे मनसि स्फुरस्यजस्रं
त्वदृते किं वद दृश्यमस्ति विष्णो ॥

761 33. K. 3.

आत्मानात्मविवेकः

Palm-leaf. 8 Foll. $8\frac{1}{2} \times 1\frac{3}{4}$ inches. 15 lines in a page. Grantha script. Old. Injured. Good writing.

Different version of the same work.

Complete.

Beginning :

आनन्दमानन्दकरं प्रसन्नं
ज्ञानस्वरूपं निजबोधयुक्तम् ।
योगीन्द्रवन्द्यं भवरोगवैद्यं
श्रीमद्गुरुं नित्यमहं नमामि ॥
आत्मविद्या मया लब्धा ब्रह्मणेव सरस्वती ।
यस्य तत्त्वोपदेशेन तस्मै श्रीगुरवे नमः ॥
आत्मानात्मविवेकेन पुंसः संसारनिह्नुतिः ।
तद्विना जन्मकोट्यापि बन्धच्छेदो न सिध्यति ॥
स्थूलसूक्ष्मादिदेहानामात्मन्यारोप एव च ।
अपवादस्ततोऽप्येषां सम्यगत्र प्रदर्शितः ॥

सच्चिदानन्दस्वरूपं यच्छुद्धचैतन्यं तस्मिन् प्रकृतिरारोपिता । या तस्मिन्नारोपिता सा केत्यपेक्षायां सा निरूप्यते । तस्याः प्रमाणवचनम्,

ब्रह्मत्वं मे सदा नित्यं सर्वदानन्दरूपतः ।
प्रकृतित्वं ततः सृष्टं सत्त्वादिगुणसाम्यतः ॥

End :

अत्र संमतिः,

कर्मणा जन्मिनो जन्म यान्ति मुक्तिं न यान्ति ते ।
एवं विविच्य यो विद्यात्सच्चिदानन्दरूपताम् ।
स्वस्यैव वेत्ति यो विद्वान् स मुक्तः स च पण्डितः ॥

एवमात्मानात्मविवेकं विविच्य आत्मानं यो विजानाति स जीवन्मुक्तो भवति । तरति शोकमात्मवित् । ब्रह्म वेद ब्रह्मैव भवति । तथाच श्रुतिः—

उत्पत्तिमायतिं स्थानं विभुत्वं चैव पञ्चधा ।
अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते ॥
विज्ञायामृतमश्नुत इति ।

Colophon :

आत्मानात्मविवेचनप्रकरणं समाप्तम् ।

762 34. O. 23.

आत्मानात्मविवेकः

Palm-leaf. 10 Foll. 9 × 1¾ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves bear the serial numbers 43 to 52.

This also is a different version of the same work. The author's name is not known.

Incomplete.

Beginning :

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशंकरं लोकशंकरम् ॥
आत्मानात्मविवेकेन मुच्यते भवबन्धनात् ।
आत्मानात्मविवेकोऽयमुच्यते संग्रहात्ततः ॥

आत्मा नाम स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तः, अवस्थात्रयसाक्षी, पञ्चकोशव्यतिरिक्तः, सच्चिदानन्दस्वरूपः । किंच नित्यशुद्धमुक्तबुद्धसत्यपरमानन्दाद्वयश्च । नित्यः षड्भावविकारशून्यः कार्यकारणरहितः । शुद्धः आणवादिदोषरहितः । बुद्धः बोधस्वरूपः, अनृतजडदुःखाभावात्मकः । मुक्तः बन्धरहितः देहत्रयसंबन्धरहितः । सत्यः कालत्रयाबाध्यः, अविद्यारहितः ।

End :

पञ्च कोशा नाम—स्थूलदेहोऽन्नमयकोशः । कर्मेन्द्रियैरितरप्राणैश्च सह प्राणः प्राणमयकोशः । ज्ञानेन्द्रियसहितं मनो मनोमयकोशः । तैरेव सहिता बुद्धिर्विज्ञानमयकोशः । शरीरद्वयकारणमात्मा ज्ञानमानन्दमयकोशः । एतेषां कोशत्वम् .

763 34. O. 25.

आत्मानात्मविवेकः

Palm-leaf. 5 Foll. 9½ × 1½ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Similar to the above. The author's name is not mentioned.

Complete.

Beginning :

यदबोधादिदं भाति यद्बोधाच्च निवर्तते ।
नमस्तस्मै परानन्दवपुषे प्रत्यगात्मने ॥

अतीतानेकजन्मसु कृतसुकृतप्रसादासादितशुद्धबुद्धीनां विवेकवैराग्यनिरुपमसमाधिसाधनसंपन्नानां परित्यक्तसर्वकर्मणां मोक्षमात्रमीप्सतां तदुपायभूतं तत्त्वज्ञानमापतितं श्रुतिमुखादधिगतमपि तन्निरुपमं सम्यगवाप्तुमिच्छतामतिलघुनोपायेन कथमुत्पद्यतामिति मन्वानः सन्नाचार्यः कथ्यते । आत्मा स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तः, अवस्थात्रयस्य साक्षी, पञ्चकोशव्यतिरिक्तः, चतुर्विंशतितत्त्वेभ्यो व्यतिरिक्तः । किंतु नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दस्वरूपः । अनात्मा स्थूलसूक्ष्मकारणशरीराणि अवस्थात्रयाणि पञ्चकोशानि चतुर्विंशतितत्त्वानि ।

End :

तापत्रयं नाम आध्यात्मिकाधिभौतिकाधिदैविकानि अष्टचत्वारिंशच्छतुःशतसहस्ररोगरूपाण्याध्यात्मिकः । मनुष्यव्याघ्रमूषकमशकवृश्चिकादय आधिभौतिकाः । अतिवर्षाशनिपाताग्निकूपतटाकनद्यादय आधिदैविकाः । आध्यात्मिकमिन्द्रियम् । आधिभूतं विषयम् । आधि-

दैवं देवता। एवमात्मानात्मविवेकनिर्णयं यो वेद-स विद्वान् कृतकृत्यो भवेत्।

Colophon :

एतत्प्रकरणं समाप्तम्

764 25. N. 11.

आत्मानात्मविवेकः—शंकराचार्यकृतः

Palm-leaf. 7 Foll. $15\frac{1}{4} \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The work is attributed to S'rī S'aṁkarācārya.

Complete.

Beginning :

आत्मानात्मविवेकः कथ्यते। आत्मनः किं-निमित्तो दुःखशरीरपरिग्रहः? निमित्तं दुःखम्। न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुतेः। शरीरपरिग्रहः केन भवति? कर्मणा भवति। कर्म केन भवतीति चेत्, रागादिभ्यः। रागादिः केन भवतीति चेत्, अभिमानात्।

End :

तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि इति भगवद्वचनाच्चात्मानात्मविवेकं कृत्वा तिष्ठति यः पुमान् जटी शिखी मुण्डी वापि मुच्यते नात्र संशय इत्यादि-वचनाज्जीवन्मुक्तो भवति।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पादशिष्यश्रीमच्छंकराचार्यविरचित आत्मानात्म-विवेकः संपूर्णः।

765 23. C. 15.

आत्मानात्मविवेकप्रकाशिका—सदाशिवेन्द्र-सरस्वतीकृता

Palm-leaf. 6 Foll. 7×1 inches. 5 lines in a page. Telugu script. Old. Injured. Illegible writing.

This is a short metrical work investigating the nature and characteristics of the Ātman and the matter. The author's name is mentioned as Sadāsivendra. The author may be identified with that of the Ātmavidyāvilāsa etc. who was disciple of Paramasivendra and contemporary of King Sarabhoji of Tanjore (1711 to 1727 A.D.) (Vide No. 738 of this volume).

Complete.

Beginning :

अथाद्वैतज्ञानविचारेऽस्मत्परमगुरुसदाशिवब्रह्मेन्द्र-कृते आत्मानात्मविवेकप्रकाशिकार्या उदाहियन्ते—

ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी पुरदर्पनाशनकरी चक्रायुधा वैष्णवी।
वाराही घनघोरघुर्घुररवाप्यैन्द्री च वज्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु वो मातरः॥ १॥
अखिलपरहंसदेशिकमागमसिद्धान्तदर्शकं प्राज्ञम्।
आनन्दपूर्णसागरमनिशमहं नौमि शंकराचार्यम्॥ २॥
शरणं न भवति जननी
न पिता न सुता न सहोदरा नान्ये।
परमं शरणमिदं मे
चरणं मम शिरसि देशिकन्यस्तम्॥ ३॥
स्वात्मावबोधहीनाः कुणपशरीरा भिया न परितुष्टाः।
वारिजबुद्बुदरक्षां मोहाः कुर्वन्ति मोहबन्धेन॥ ४॥

End :

कारुण्यसान्द्रकाङ्क्षित-
फलदाः सकल्पितसुविशेषाः।
श्रीगुरुकटाक्षपाताः
शिव शिव शमयन्तु चित्तसंतापम्॥ २३॥

766 30. J. 32.

आत्मानात्मविवेकसंग्रहः

Palm-leaf. 1 Foll. $18\frac{1}{2} \times 1\frac{1}{2}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

This is a summarized version of the Ātmānātmaviveka described above. The author's name is not mentioned.

Complete.

Beginning :

आत्मानात्मविवेकः कथ्यते । आत्मा स्थूल-सूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तः, अवस्थात्रयस्य साक्षी, पञ्चकोशविलक्षणः, चतुर्विंशतितत्त्वाधारः । मायया प्रतीयमानाभ्यां जीवेश्वराभ्यां भिन्नः । नित्य-शुद्धबुद्धमुक्तसत्यपरमानन्दस्वरूपः ।

निर्मलो निश्चलः पूर्णः परमात्मा सनातनः ।
निर्विकारो निराकारः प्रत्यग्भूतः स्वयंप्रभुः ॥
को वानात्मा ? अनात्मा स्थूलसूक्ष्मकारणशरीरादिः । स्थूलशरीरं नाम पञ्चीकृतपञ्चमहाभूतकार्यम् ।

End :

एवमात्मानात्मविवेकं सदा यः करोति स तु जीवन्मुक्तो भवति । तरति शोकमात्मवित्, ब्रह्म वेद ब्रह्मैव भवति, अव्यक्तोऽयमचिन्त्योऽयमित्यादि-भगवद्वचनात् ।

Colophon :

समाप्त आत्मानात्मविवेकसंग्रहः । सह नाववतु ।
ओं शान्तिः ।

767 39. A. 12.

इष्टसिद्धिः—विमुक्तात्मभगवत्कृता

Paper. 358 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 2 Volumes.

The Iṣṭasiddhi is a Prakaraṇa work on the principles of the Advaita Vedānta in the line of S'rī S'aṁkarācārya. The work is divided into 8 Adhyāyas. It is in the form of the text in verse and the commentary in prose. The author Vimuktātman was the disciple of Avyayātman about whom nothing is known in detail. The work was born in mind and criticised by S'rī Yāmunācārya (1150 A.D.) in his Siddhitraya. It was also mentioned by Maṅkhaka (1150 A.D.) in his S'rīkaṇṭhacarita. As the Iṣṭasiddhi criticises Bhāskara's view, it must be later than Bhāskara (850 A.D.). Ānanda-bodhayati (1050 A.D.) quoted in his Pramāṇamālā, a verse from the work of his preceptor. That verse is found in the Iṣṭasiddhi. Taking all these facts into consideration we may fix the date of Vimuktātman as 1000 A.D. The work was printed and published in the Gaekward's Oriental Series, Baroda, No. 65 in the year 1933, together with the commentary called Vivaraṇa.

Complete.

Beginning :

यानुभूतिरजामेयानन्तात्मानन्दविग्रहा ।
महदादिजगन्मायाचित्रभित्ति नमामि ताम् ॥
इष्टानिष्टाप्तिहानीच्छोस्तत्सिद्धिर्यद्दृशा श्रुतेः ।
तं मां नत्वेष्टसिद्ध्यर्थं विवृणोम्यात्मसंदृशे ॥

येति स्वतः सिद्धतां द्योतयति ; अनुभूतेरनुभाव्यत्वे

घटादिवदननुभूतित्वप्रसङ्गात्। न च स्वतः सिद्धस्य प्रागभावादयः स्वतोऽन्यतो वा सिध्यन्ति। अतोऽस्या नान्येऽपि भावविकाराः। जन्मादित्वात्तेषाम्। चेत्यानां च न चिद्धर्मत्वम् रूपादिवत्। अतोऽमेया।

End:

सर्वेष्टः परमानन्दो वेदान्तात्मप्रमाणकः।
इत्येषोऽर्थो विशेषेण मयेष्टो वेदविन्मयः॥
अर्थश्चायमनिर्वाच्या यद्यविद्या प्रसिध्यति।
व्यचीचरमविद्यां तामत इष्टार्थसिद्धये॥

Colophon:

इति श्रीमदव्ययात्मभगवत्पूज्यपादशिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य विमुक्तात्मभगवतः कृताविष्टसिद्धावष्टमोऽध्यायः समाप्तः।

768 39. C. 5.

इष्टसिद्धिविवरणम्—ज्ञानोत्तमकृतम्

Paper. 526 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 2 Volumes.

This is a commentary on the Iṣṭasiddhi of Vimuktātman. One of the introductory verses of the commentary, mentions the commentator's name as Jñānottama and states that the commentator was an inhabitant of the village known as Maṅgalam in the Cola country. It is also stated that the name Jñānottama came to the commentator as hereditary from his grandfather. From this reference we have to understand that our commentator was a householder and not a Saṁnyāsin at the time of writing the commentary. He is also known to have written a commentary on Sureśvara's Naiṣkarmyasiddhi which was printed and published in the Bombay Sanskrit and Prakrit Series, No. 38 in the year 1925. The learned editor of the book concluded that Jñānottama must have lived about 1300 A.D.

Complete.

Beginning:

यः शिक्षयन्मुनीनाद्यानास्ते वटतरोरधः।
तस्मै तेजस्त्रिनेत्राय कस्मैचिद्गुरवे नमः॥
तर्कोदग्रनखोद्भिन्नवावदूकमहासुरः।
श्रुतीः प्रह्लादयन् जीयाद्विमुक्तात्मा नृकेसरी॥
चोलेषु मङ्गलमिति प्रथितार्थनाम्नि
ग्रामे वसन् पितृगुरोरभिधां दधानः।
ज्ञानोत्तमः सकलदर्शनपारदृश्वा
व्याख्यामिमां वितनुते स्फुटमिष्टसिद्धेः॥

प्रारिप्सितस्य प्रकरणस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय चेष्टदेवतां नमस्यन्नर्थाद्विषयादिकं दर्शयति—यानुभूतिरिति। महदादिजगत्कारणेन ब्रह्मणा प्रत्यगात्मन एकत्वाभिधानाद्विषयसूचनम्। प्रतिपाद्यस्यानन्दत्वाभिधानात् प्रकरणश्रवणजनितज्ञानेन तं साक्षात्कृतवतस्तदाविर्भावः प्रयोजनमिति सूचितम्। इदानीं श्लोकात्मकं प्रकरणं व्याख्यास्यन्नाचार्यः तद्गताविघ्नादिसिद्ध्यर्थमिष्टदेवतां प्रणमति—इष्टानिष्टेति॥

End:

स्वपक्षमुपसंहरति—तस्मादिति। द्वैतं पुंभेदश्च सप्तमाध्यायोक्तदोषः। तत्त्वया नेष्यते चेत्तर्हि कथं तद्व व्यवस्थालाभ इत्याशङ्क्याह—तत्रेति। अव-

स्तुतोऽपरमार्थतः। क्वचिदपि व्यवस्था मया नेष्यत इति न; किंतु सर्वथापीष्यते, मायाभूमौ दृष्टत्वादित्यर्थः। विशेषतश्चाविद्यासाधने कारणमाह—प्रत्यक्षादीत्यादिना। उक्तमर्थजातं संक्षिप्याह—अस्ति मुक्तिरित्यादिना।

Colophon :

इतीष्टसिद्धिविवरणे अष्टमोऽध्यायः समाप्तः। समाप्ता चेयमिष्टसिद्धिटीका।

769 39. A. 3.

इष्टसिद्धि विवरणम्—आनन्दानुभवकृतम्

Paper. 266 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is another commentary on Vimuktātman's Iṣṭasiddhi. The author Ānandanubhava was the pupil of Nārāyaṇajyotis and wrote the following other works : Nyāyaratnadīpāvali and Padārthatattvanirṇaya (See further numbers of this volume). As Ānandagiri (1280 A.D.) wrote commentaries on these works mentioned above (R. Nos. 3604 and 4342 of the Madras Govt. Library) Ānandānubhava must have lived about 1200 A.D. Ānandānubhava mentions his Iṣṭasiddhivivaraṇa and Nyāyaratnadīpāvali in the Padārthatattvanirṇaya. The names of Udayana, Medhātithi, S'ālika and Kumārila are mentioned in the work. The commentary is not available in print.

Complete.

The MS. is full of lacunæ.

Beginning :

श्रीमत्पदं जयति संसृतिजिष्णु विष्णोः
संपूर्णमप्यखिलदेहभृतां हृदिस्थम्।
संसारवारिनिलयं निखिलं पिबन्तो
यद्वेदिनः क . . . स्य वहन्ति लीलाम्॥
वेदान्तोदधिमन्थनेन परमं येनामृतं निर्मितं
संप्राप्यासुरभीषिता अभयदं शिष्या मुदा भेजिरे।
जित्वा चासुरवृन्दमूर्जितब . . . . . निष्कृतिं
वन्दे तस्य पदारविन्दयुगलं नारायणज्योतिषः॥
स जयति सिन्धुरवदनो देवो यत्पादपङ्कजस्मरणम्।
वासरमणिरिव तमसां राशिं नाशयति विघ्नानाम्॥
न प्रज्ञातिसमुत्कर्षान्नापि प्रख्यातिलिप्सया।
भक्त्येष्टसिद्धेर्निबद्धो निबन्धेऽभियतेंऽशतः॥

ननु श्रुतिप्रतीति . . . . लानुभवरूपस्य ब्रह्मणः स्वप्रकाशत्वादिष्ट . . . विषयादिष्टसिद्धिरपि तपस्विनी ना(रम्भणीया), सुतरां तद्विवरणम्। सत्यम्। तथाप्यसंभावनादेरागमप्रतिपत्तिप्रतिबन्धस्य प्रध्वंसाय प्रारब्धेष्टसिद्धिः . . . स्वानुभव . . . मिवादिप्रस . . . पांसुमु(न्मू)लयितुमभिलषन्ति ये, तेऽनुकम्प्यन्ते विवरणेन। तत्र प्रारिप्सितपरिसमाप्तिप्रचयगमनशिष्टाचारप्राप्तेष्टदेवतानमस्कारच्छलेन प्रकरणार्थमविरोधं चाविष्करोति—यानुभूतिरिति।

End :

आत्माज्ञानदाहे दृष्टान्तो न युज्यत इति परेणोक्तम्। तत्प्रपञ्चयति—भ्रान्तिः सर्वेति। स्वप्नसर्पादिदाहप्रतीतिरपि सविषयात्माविद्यामूलैवेति न तन्नाशस्य दृष्टान्तः। सिद्धान्तग्रन्थशेषस्त्वतिरोहितार्थः।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यनारायणज्योतिः-पूज्यपादशिष्यस्य भगवत आनन्दानुभवस्य कृतावाष्टसिद्धिविवरणेऽष्टमोऽध्यायः समाप्तः।

770 9. F. 43.

उपदेशशिखामणिः—त्यागराजकृतः

Paper. 1 Fol. 8¼ × 6½ inches. 32 lines

in a page. Grantha script. Old. Injured. Good writing.

18 verses on the greatness of devotion on the God and unworthiness of worldly pleasures as taught in the works of S'rī S'aṁkarācārya and other Ācāryas. The verses imitate the Bhajagovinda-stotra of S'rī S'aṁkarācārya. The author Tyāgarāja was the pupil of Ānandanātha and belonged to Kāsyapagotra. He is said to have belonged to the Telugu country.

Complete.

Beginning :

भज गौरीशं भज गौरीशं भज गौरीशं मुग्धमते ।
भज गौरीशं भज गौरीशं भज गौरीशं मुग्धमते ॥१॥
सत्यं वद रे धर्मं चर रे कृत्याकृत्यविचारं कुरु रे ।
कालो याति गृहीत्वा देहं व्यर्थं मा कुरु मानुषजन्म ॥

End :

जननत्राणसमर्थः साम्बः शंकर एको ह्यास्ते सत्यम् ।
ध्यात्वा मुक्तो भवति शिवं यं तं त्वं भावय हृदयाकाशे ॥
त्यागेशपदानन्दसमुद्रे भानुहिमांश्वोर्योगविशेषे ।
काले स्नात्वा पूतो भव रे न पुनर्जननं न पुनर्मरणम् ॥

Colophon :

इत्यानन्दनाथपादपाद्मोपजीविना काश्यपगोत्रोत्पन्नेनान्ध्रेण त्यागराजनाम्ना विरचित उपदेशशिखामणिः संपूर्णः ।

771 28. M. 51.

उपदेशशिखामणिः—त्यागराजकृतः

Palm-leaf. 2 Foll. 11 × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

772 11. D. 15.

उपदेशसहस्री—शंकराचार्यकृता

Paper. 12 Foll. $10\frac{3}{4} \times 4$ inches. 7 lines in a page. Devanāgarī script. Old. Good. Good writing.

The Upades'asahasrī is the famous Prakaraṇa work on the Advaita-Vedānta. The work is also called Upades'asāhasrī or Upades'asahasra. It is traditionally known to have been written by the famous S'rī S'aṁkarācārya himself. The colophon also strengthens this fact which is further confirmed by the reference made by S'rī Vedāntades'ika of the rival school of Vis'iṣṭādvaita-Vedānta, in his S'atadūṣaṇī. He specifically refers to this work as to have been written by S'rī S'aṁkarācārya. The work has two parts—one in prose and the other in verse, both teaching the main and essential principles of the Advaita-Vedānta. The work has atleast three commentaries written by Ānandajñāna or Ānandagirī, Rāmatīrtha and Bodhanidhi. According to Ānandajñāna the text reads first the metrical portion and then the prose portion. But according to Rāmatīrtha the prose portion is the first and the metrical portion is the second. Bodhanidhi comments on the metrical portion only and does not mention the prose portion at all. The work contains the following chapters :

I. The prose portion :

१. शिष्यप्रतिबोधविधिः
२. आत्मबोधः
३. परिसंख्यानम्
१२. सूक्ष्मव्यापिता
१३. दृशिस्वरूपम्
१४. ईक्षितृत्वम्

II The metrical portion:

४. उपोद्घातः
५. आत्मज्ञानोत्पत्तिः
६. ईश्वरात्मा
७. तत्त्वज्ञानस्वभावः
८. बुद्ध्यपराधः
९. विशेषापोहः
१०. बुद्ध्यारूढम्
११. मतिविलापनम्
१५. प्रकाशः
१६. अचक्षुष्टम्
१७. स्वप्नस्मृती
१८. नान्यदन्यत्
१९. पार्थिवम्
२०. सम्यङ्मतिः
२१. तत्त्वमसिविचारः
२२. भेषजप्रयोगः

There are many editions of the work.

The codex contains a small portion of the prose portion.

Beginning :

अथ मोक्षसाधनोपदेशविधिं व्याख्यास्यामो मुमुक्षूणां श्रद्दधानानामर्थिनामर्थाय। तदिदं मोक्षसाधनं ज्ञानं साधनसाध्यात् अनित्यात् सर्वस्मात् विरक्ताय त्यक्तपुत्रवित्तलोकैषणाय प्रतिपन्नपरमहंसपारिव्राज्याय शमदमदयादियुक्ताय शास्त्रप्रसिद्धशिष्यगुणसंपन्नाय शुचये ब्राह्मणाय विधिवदुपसंपन्नाय शिष्याय जातिकर्मवृत्तविद्याभिजनैः परीक्षिताय ब्रूयात् पुनः पुनः यावद् ग्रहणं दृढीभवति।

End :

न ह्येकस्मिन्नात्मन्यसंसारित्वबुद्धौ शास्त्रन्यायोत्पादितायां तद्विपरीता बुद्धिर्भवति। न ह्यग्नौ शीतत्वबुद्धिः शरीरे वाजरामरणबुद्धिः। तस्मादविद्याकार्यत्वात् सर्वकर्मणां तत्साधनानां च यज्ञोपवीतादीनां परमार्थदर्शननिष्ठेन त्यागः कर्तव्यः।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशंकरभगवत्पादकृतोपदेशसहस्र्यां गद्यबन्धे प्रथमं प्रकरणं समाप्तम्।

773 10. E. 9.

उपदेशसहस्री—शंकराचार्यकृता

Paper. 144 Foll. $13\frac{1}{2} \times 7\frac{1}{4}$ inches. 15 lines in a page. Devanāgarī script. Old. Good. Good writing.

The MS. contains the commentary also copied up and down the text in each page.

Contains the metrical portion only.

Beginning :

चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम्।
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः॥
समापय्य क्रियाः सर्वा दाराग्न्याधानपूर्विकाः।
ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रमे॥

End :

अतोऽन्यथा न ग्रहनाश इष्यते
विमोहबुद्धेर्ग्रह एव कारणम्।
ग्रहोऽप्यहेतुस्त्वनलस्त्वनिन्धनो
यथा प्रशान्ति परमां तथा व्रजेत्॥
विमथ्य वेदोदधितः समुद्धृतं
सुरैर्महाब्धेस्तु यथा महात्मभिः।
तथामृतं ज्ञानमिदं हि यैः पुरा
नमो गुरुभ्यः परमीक्षितं च यैः॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्कृतिः सकलोपनिषत्सारोपदेशसहस्री समाप्ता॥

Date of copying :

शके १७९१. संवत् १८८६.

774 28. C. 80.

उपदेशसहस्री—शंकराचार्यकृता

Palm-leaf. 145 Foll. 16 × 1¾ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains Bodhanidhi's commentary also.

Contains the metrical portion only.

775 33. I. 3.

उपदेशसहस्री— शंकराचार्यकृता

Palm-leaf. 132 Foll. 16 × 1½ inches. 9 lines in a page. Telugu script. Old. Injured. Illegible writing.

The MS. contains Bodhanidhi's commentary also.

Contains the metrical portion only.

776 38. F. 5.

उपदेशसहस्री—शंकराचार्यकृता

Paper 359 Foll. 8¼ × 6½ inches, 15 lines in a page. Devanāgarī script. New. Good. Good writing.

The MS. contains Bodhanidhi's commentary also.

Contains the metrical portion only.

This transcript was made from the original MS. described in the last number.

777 33. M. 25.

उपदेशसहस्री—शंकराचार्यकृता

Palm-leaf. 84 Foll. 15 × 2¼ inches. 19 lines in a page. Grantha script. Old. Injured. Small and Good writing.

The leaves bear the serial numbers 1 to 76; eight leaves between 43 and 44 are not numbered.

The leaf 24 is half-broken.

The MS. contains Bodhanidhi's and Ānandajñāna's commenteries also.

Three extra leaves are added at the end repeating the matter found on Fol. 16 of the MS.

Complete.

Contains the metrical portion first and then the prose portion.

778 10. E. 9.

उपदेशसहस्रीव्याख्या पदयोजनिका—रामतीर्थकृता

Paper. 144 Foll. 13½ × 7¼ inches. 15 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a commentary on the Upadesasahasrī of S'rī S'aṁkarācārya. The commentary is called Padayojanikā. The author Rāmatīrtha was the pupil of Kṛṣṇatīrtha who was a contemporary of Jagannāthāśrama, the teacher of Nṛsiṁhāśrama. The author is known to have written also a commentary on the Saṁkṣepaśārīraka of Sarvajnātman. He must have lived towards the middle the 17th century A.D.

Contains the prose and metrical portions.

Beginning :

यत्राध्यस्तमिदं सर्वं मेयमात्राद्यविद्यया ।
भाति नो भाति यज्ज्ञानात्तदस्मि ब्रह्म चित्सुखम् ॥

तदेवं सर्वोपनिषदर्थसारसंग्रहं गद्यबन्धप्रबन्धेन सोपस्करं विस्तरेणोपदेष्टुकामो भगवान् भाष्यकारः पद्यग्रन्थारम्भे ग्रन्थप्रतिपाद्यपरदेवतानमस्काररूपं मङ्गलं कृतं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति—चैतन्यमिति ।

End :

अथवा यैर्गुरुभिः निमित्तभूतैः मया परं चेक्षितमिति योजना । तस्मादात्मज्ञं ह्यर्चयेद्भूतिकाम इति श्रुतेः ।

निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम् ।
अनुव्रजाम्यहं नित्यं पूये यस्यामङ्घ्रिरेणुभिः ॥

इति भगवद्वचनाच्च युक्तमत्र गुरुपूजनमित्यर्थः ॥ २८ ॥

उपदेशसहस्रीयं विवृता हि महात्मभिः ।
श्रद्धावेशान्मयाप्यस्याः पदयोजनिका कृता ॥
समस्तवेदार्थरहस्यगद्य-
पद्यप्रबन्धार्थतयावबोधः ।
कथं नु मादृङ्मतिबिम्बितः स्या-
दथापि भक्त्याहमिहास्मि रूढः ॥
हृद्यन्तराविष्कृतराममूर्ते-
स्तथा गुरूणां विपुलप्रसादात् ।
यथाकथंचिद्रचितेन विष्णु-
रनेन तुष्यत्वखिलान्तरात्मा ॥

Colophon :

इति श्रीमच्छंकराचार्यकृतोपदेशसाहस्र्याः पदयोजनिका नाम टीका कृष्णतीर्थशिष्यरामतीर्थविरचिता समाप्तिमगमत् ।

The date of copying :

शके १७९१ संवत् १८८१ वर्षे पुस्तकमिदं लिखितम् ।

The commentary was printed and published in the Mysore Govt. Oriental Library Series, No. 21 in 1899.

779 33. M. 25.

उपदेशसहस्रीव्याख्या—आनन्दज्ञानकृता

Palm-leaf. 11 Foll. (66 to 76). 15×2¼ inches. 19 lines in a page. Grantha script. Old. Injured. Good writing.

Three extra leaves added at the end repeat the portion contained on Fol. 16 of the MS.

This also is a commentary on S'rī Saṁkarācārya's Upades'asahasrī. The author Ānandajñāna also called Ānandagīri was the pupil of S'uddhānanda and the commentator on almost all the works of S'rī S'aṁkarācārya. For the details about the author attention may be drawn to the No. 462 of this volume. A complete copy of the commentary containing both the parts, is available in the India Office Library, London, (I. O. Catalogue No. 2279). The commentary is not available in print.

Contains the prose portion only.

Beginning :

कृतवाणीयतिं शान्तं जगद्वन्द्यं कृपानिधिम् ।
समाश्रये सदा भक्त्या प्रणताभीष्टदायिनम् ॥

सर्वोपनिषदां सारसंग्राहिका पद्यगद्यात्मिका हीयमुपदेशसाहस्रिका । तत्र पद्यभागं पागुक्तपरिपाट्या परिसमाप्य गद्यभागमवतारयन् भाष्यकारः ओंकारश्चाथशब्दश्चेत्यादिस्मृतिप्रामाण्यादथशब्दोच्चारणरूपं मङ्गलाचरणं कृत्वा चिकीर्षितप्रतिज्ञां करोति—अथेति । तत्र प्रवृत्त्यङ्गत्वेनाधिकारायनुबन्धं सूच-

यति—मुमुक्षूणामिति। तेषामुपकाराय मोक्षार्थज्ञानोपदेशप्रकारव्याख्याने स्थिते प्रथमं शिष्यानुशासनप्रकरणं प्रारिप्सुः शिष्याय कीदृशाय विद्या वक्तव्येत्याशङ्कायामाह—तदिदमिति। मोक्षसाधनं ज्ञानं विधिवदुपसन्नाय शिष्याय ब्रूयादिति संबन्धः।

End:

किंच यदि कश्चिदनात्मा नाम पदार्थः स्यात्, तदा तत्कृतं प्रियमप्रियं च संभाव्येत। न त्वनात्मास्ति सर्वात्मत्वान्ममेत्यनुसंदध्यादित्याह—अनात्मेति। परमबाधितत्वं हेतुः। तत्कृतप्रियाप्रिययोरप्राप्ताविति शेषः। शेषतया आत्मनोऽद्वयत्वविषयाणि द्वयस्यासत्यार्थानि च सर्वाण्युपनिषद्वाक्यानि पौनःपुन्येनालोचयितव्यानीत्याह—आत्मनश्चेति। अभ्यासो ग्रन्थस्य गद्यपद्यात्मनः समाप्त्यर्थः।

Colophon:

इति परिसंख्यानाख्यस्य तृतीयप्रकरणस्य व्याख्या समाप्ता

उपदेशसहस्रीयं गद्यपद्यमयी मया।
व्याकृता व्याकृताप्यन्यैर्मन्दानुग्रहसिद्धये॥
व्याक्रिया सत्क्रिया सेयं कुर्वन्ती शर्म निर्मलम्।
कृतीनां कृतविद्यानामाश्रितं पुरुषोत्तमम्॥

इति श्रीपरमहंसपरिव्राजकाचार्यशुद्धानन्दपूज्यपादशिष्यश्रीमद्भगवदानन्दज्ञानकृता उद्देशसहस्रीटीका समाप्ता।

अमृतकिरणशान्ताश्चित्सभानाथकान्ता-
हृदयकमलचिन्तास्त्यक्तहृत्क्लेशवृन्दाः।
शिवकथनमजस्रं कीर्तयन्तो मुदास्म-
त्करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥

780 28. C. 80.

उपदेशसहस्रीव्याख्या—बोधनिधिकृता

Palm-leaf. 145 Foll. 16 × 1¾ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

This is another commentary on the Upadesasahasrī of S'rī S'aṁkarācārya. The author Bodhanidhi mentions himself as the pupil of Vidyādhāman. Nothing is known about the author and his preceptor Vidyadhāman in detail.

The MS. contains the text also.

Contains the metrical portion only.

Beginning:

चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम्।
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः॥

चेतनमेव चैतन्यं ज्ञप्तिस्वरूपम्। स्वाविद्याकल्पितदिक्कालादि सर्वं व्याप्नोतीति सर्वगम्। सर्वगमित्युक्ते परमार्थतः सर्वं तद्गम्यमस्तीत्याशङ्का मा भूदित्याह—सर्वमिति। अविद्याकल्पितस्य स्वतोऽन्यत्वानुपपत्तिरिति भावः। सर्वभूतगुहाशयं सर्वेषां ब्रह्मादिस्तम्बपर्यन्तानां गुहासु बुद्धिषु साक्षितया स्वाभासद्वारेण शेत इति। यदेवंलक्षणम्। सर्वविषयातीतं परमार्थतोऽविद्यातत्कार्यरहितम्। सर्वं वेत्तीति सर्ववित् स्वाभासाविद्याद्वारेण। तस्मै सर्वविदे नमः प्रह्वीभावः।

End:

हि यस्मादेवं महता प्रयासेन समुद्धृतं यस्माच्च महद्भिर्महता प्रयत्नेन प्राप्तं तस्मात् मुमुक्षुभिः ब्रह्मात्मज्ञानार्थिभिः गुरुभक्तैर्देवताभक्तैश्च यत्नेन भवितव्यमिति। एवं वाक्यवृत्त्यनुसारेण जन्मनाशप्रकरणस्य पदार्थविवरणं कृतं देवतागुरुभक्तिप्रेरितेन मया।

इति सप्तशतश्लोका यतीन्द्रश्रीमुखोद्गताः।
विवृता गुरुभक्तेन मया ब्रह्मात्मबोधकाः॥
उपास्य श्रद्धया श्रीमद्विद्याधाममुनेश्चिरम्।

श्रीमत्पदाम्बुजं तस्य प्रसादान्न स्वबुद्धितः ॥
येन मे निखिलाद् द्वैतादाकृष्य मन आत्मनि ।
स्थापितं मुनिमुख्येन यावज्जीवं नमामि तम् ॥
यद्भाष्यसागरजयुक्तिमणीन् प्रकीर्णान्
प्राप्याधुना कतिपयान् कवयो भवन्ति ।
तस्मै नमो जनमनोऽब्जदिवाकराय
कृत्स्नागमार्थनिलयाय यतीश्वराय ॥

Colophon :

इति श्रीमद्विद्याधामशिष्येण बोधनिधिना श्रद्धाभक्तिमात्रप्रेरितेन कृतमुपदेशसहस्रग्रन्थविवरणं समाप्तम् ।

यत्पादकमलासङ्गान्निर्वाणं प्राप्तवानहम् ।
सर्वान्तरात्मभूतांस्तान् प्रणमामि गरीयसः ॥

The commentary is not available in print.

781 33. I. 3.

उपदेशसहस्रीव्याख्या—बोधनिधिकृता .

Palm-leaf. 132 Foll. 16 × 1½ inches. 9 lines in a page. Telugu script. Old. Injured. Illegible writing.

The MS. contains the text also.

Contains the metrical portion only.

Adds the following verse in the beginning :

विष्णुं पञ्चात्मकं वन्दे भक्त्याष्टादशभेदया ।
साङ्गवर्गोनविंशत्या भक्तैर्नवभिराश्रितम् ॥

782 38. F. 5.

उपदेशसहस्रीव्याख्या—बोधनिधिकृता

Paper. 359 Foll. 8¼ × 6½ inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

The MS. contains the text also.

This is a transcript made from the original MS. described in the last number.

Contains the metrical portion only.

783 33. M. 25.

उपदेशसहस्रीव्याख्या—बोधनिधिकृता .

Palm-leaf. 73 Foll. 15 × 2¼ inches. 19 lines in a page. Grantha script. Old. Injured. Small and good writing.

The leaves bear the serial numbers 1 to 65. Eight leaves found between the Nos. 43 and 44 are not numbered.

Contains the metrical portion only.

Reads the different beginning as follows:

Beginning :

विष्णुं पञ्चात्मकं वन्दे भक्त्याष्टादशभेदया ।
साङ्गवर्गोनविंशत्या भक्तैस्तु नवभिः स्मृतम् ॥
प्रणम्य कृष्णं प्रणतार्तिहारिणं
गुरूनपि स्वान्परमार्थरूपिणः ।
मया सहस्रीविवृतिर्विधीयते
कृतापि मन्दोपकृतिप्रसिद्धये ॥

सकलोपनिषत्सारसंग्राहिकामुपदेशसहस्रीं गद्यपद्यात्मिकां प्रारभमाणो भगवान् भाष्यकारश्चिकीर्षितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनपरिलब्धादृष्टसिद्धये च विशिष्टेष्टदेवतानुस्मरणरूपं मङ्गलाचरणं मुखतः संपादयन्नस्य शारीरकप्रकरणत्वात् तदीयमेवानुबन्धजातं सूचयति—चैतन्यमिति । यः सर्वज्ञः सर्वविदिति श्रुतेः सर्वं वेत्तीति व्युत्पत्त्या सर्वविदे तस्मै परस्मै नमः । वाङ्मनोदेहानां प्रह्वीभावो भूयादित्युक्ते वैशेषिकादिदर्शनानुरोधेन ताटस्थ्ये ईश्वरस्य शङ्किते चेतनमेव चैतन्यं कूटस्थज्ञप्तिस्वरूपम् । ताटस्थ्यनिराकरणा-

योक्तं चैतन्यमिति। चेतनस्यापि मध्यमपरिमाणत्व-मणुपरिमाणत्वं वेति दिगम्बराः सयूथ्याश्च निश्चि-न्वन्ति। तान्प्रत्युक्तं सर्वगमिति। चैतन्यस्य सर्वग-तस्यापि भिन्नत्वं सांख्या मन्यन्ते। तत्राह— सर्वमिति।

784 25. M. 6.

एकश्लोकः—शंकराचार्यकृतः

Palm-leaf. 1 Foll. 16 × 1½ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

This is the single verse attributed to the famous S'rī Saṁkarācārya. The verse is said to have been addressed to a leper with a view to impart the knowledge of the self to him so that he may be liberated not only from the disease, but also from the bondage of birth and death.

Complete.

Beginning and end:

किं ज्योतिस्तव भानुमानहनि मे रात्रौ प्रदीपादिकं
स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्याहि मे।
चक्षुस्त्वस्य निमीलनादिसमये किं धीर्धियो दर्शने
किं तत्राहमतो भवान्परमकं ज्योतिस्तदस्मि प्रभो॥

785 34. J. 2.

एकश्लोकव्याख्या स्वात्मदीपनम्—स्वयंप्रकाश-मुनिकृतम्

Palm-leaf. 4 Foll. 16 × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

This is the commentary on the Eka-sloka described above. The commentary is called Svātmadīpana. The author Svayaṁprakāsamuni was the disciple of Gopālayogīndra. The author is known to have written also the Hastāmalaka-slokavyākhyā (No. 7412 Tanjore) and the Pancīkaraṇavivaraṇa (No. 7299 Tanjore), and Pramāṇavibhāgas'lokavyākhyā. In the Pañcīkaraṇavivaraṇa he mentions the line of his preceptors as Pūrṇānanda, Puruṣo-ttamayogin, S'ivarāmayogin and Gopāla-yogin or Gopālānandasarasvatī whose grand pupil Nārāyaṇatīrtha wrote his Vārttika in 1592 A.D. Therefore our author's date must be somewhere in the middle of the 16th century A.D.

The MS. contains the text also.

Complete.

Beginning:

वामेन सीतां परिरभ्य बाहुना
वामाङ्गलग्नां दृशि मुद्रयान्यतः।
तत्त्वं करेणोपदिशन्तमद्वयं
हनूमते दाशरथिं हरिं भजे॥

भास्वद्रत्नासनस्थं मणिनिकरलसत्सर्वहैमाङ्घ्रिभूषं
हैमाहीन्द्रत्रिसूत्रं विधृतकटिलसत्त्वाचकौसुम्भचेलम्।
सान्द्रानन्दं सुरक्ताभयवरदकरं स्मेरवक्त्रं त्रिनेत्रं
साम्बं चन्द्रार्धमौलिं स्फुटरजतनिभं मन्त्रमूर्तिं भजामि
वेदा निश्वसितं यस्य पञ्च भूतानि वीक्षितम्।
स्मितं चराचरं यस्य तं रामं शरणं भजे॥

ब्रह्मा मङ्गलदेवतापतिरयं चन्द्रार्धचूडोऽथवा
व्यासः श्रीशुक एव नूनमिति यो लोकैः सदालोक्यते।
कारुण्यामृतवारिधिं त्रिजगतां कल्याणमूर्तिं गुरुं
वन्दे तारितशिष्यवर्गमनिशं गोपालयोगीश्वरम्॥
श्रीमद्गोपालयोगीन्द्रप्रसादादेव केवलम्।
व्याख्यानमेकश्लोकस्य क्रियते स्वात्मदीपनम्॥

इह खलु भगवान् सर्वज्ञो भाष्यकारः,

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरत्यगात् ॥

इत्यादिगुणविशिष्टो भगवत्पादाभिधानो दुर्वादिदर्वीकरमन्त्रराजः शंकराचार्यः तीर्थ इव भुवनं पावयन्, सद्वैद्य इव संरक्षन्, चन्द्र इव आप्यायन्, कल्याणचित्रै रत्नैरिवालंकुर्वन् शश्वद्विश्वं विचचार । तत्र ग्रामविशेषे कूश्माण्डमिव पाण्डराभमुल्लूकमिव सूर्यावलोकनाक्षमं लज्जया जनावलोकनाक्षमं त्राहि त्राहीति प्रणमन्तं कंचन कुष्ठिनमालोक्य परमकारुणिकत्वेन तावदेनं संसारसंकटान्मोचयिष्यन् . . . .

* * * *

शिष्यं पृच्छति—किं ज्योतिस्तवेत्यादिना ।

किं ज्योतिस्तव भानुमानहनि मे रात्रौ प्रदीपादिकं
स्यादेवं रविदीपदर्शविधौ किं ज्योतिराख्याहि मे ।
चक्षुस्त्वस्य निमीलनादिसमये किं धीर्धियो दर्शने
किं तत्राहमतो भवान्परमकं ज्योतिस्तदस्मि प्रभो ॥

तव किं ज्योतिः ? केन ज्योतिषा आलोकेन अन्धकारनिवृत्तिद्वारा तवेष्टदर्शनं भवेत् ।

End :

तस्मादहं ब्रह्मास्मीति नित्यशुद्धबुद्धसत्यस्वभावपरमानन्दं ब्रह्मैवाहमिति ज्ञात्वा कृतकृत्यो भवेत् ।

श्रवणमननशीलान् नित्यमन्तेनिवासा-
द्गुरुवरमपि देव त्वन्मयं तत्प्रसादात् ।
निजसुखजलराशौ गाढमग्नो न जाने
किमिह रचनजालैस्त्वां च सीतासमेतम् ॥

Colophon :

इति परमहंसपरिव्राजकाचार्यश्रीमद्गोपालयोगीन्द्रशिष्यश्रीमत्स्वयंप्रकाशमुनिना विरचितैकश्लोकव्याख्या समाप्ता ।

Adds at the end the following verse giving the formula to find out the exact time of the day by measuring one's shade by his footsteps :

पादच्छाया पञ्चयुता पञ्चोत्तरशतं भजेत् ।
तल्लब्धं घटिका ज्ञेया तच्छेषं तु विनाडिका ॥

786 9. B. 32.

एकश्लोकव्याख्या स्वात्मदीपनम्—स्वयंप्रकाशमुनिकृतम्

Paper. 3 Foll. $6\frac{1}{4} \times 4\frac{1}{2}$ inches. 14 lines in a page. Kanarese script. Old. Good. Good writing.

Incomplete.

Begins with the verse श्रीमद्गोपालयोगीन्द्र etc.

787 28. N. 34.

एकश्लोकव्याख्या स्वात्मदीपनम्—स्वयंप्रकाशमुनिकृतम्

Palm-leaf. 4 Foll. $12\frac{1}{4} \times 1$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

788 30. G. 13.

कर्माकर्मविवेकः—रामचन्द्रेन्द्रसरस्वतीकृतः

Palm-leaf. 15 Foll. $12\frac{1}{2} \times 1$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The work explains the distinction between Karman and Akarman, *i.e.* Brahman. The function played by the Avidyā, which is key-stone of the doctrine of the Advaita school of

Vedānta, is clearly explained here with its two divisions namely Mūlāvidyā and Tūlāvidyā. The work is attributed to Rāmacandrendrasarasvatī pupil of Vāsudevendrayogin. The author is known to have written also the following minor works on the Advaitā Vedānta: Tattvampadārthaikyaśataka, Brahmatārasoḍaśa samādhi, Brahmapraṇavadīpikā, Bhedatamomārtāṇḍaśataka. Mahāvākyaratnāvali, Mahāvākyaratnāvaliprabhā, Rāmacandradayāṣṭaka, Liṅgabhaṅgamuktiśataka, Videhamuktiprakaraṇa and Sarvavedāntasiddhānta.

Complete.

Beginning:

नीरन्ध्रनीरसाविद्याकर्मारण्यदवानलम् ।
आत्मारामं हरिं वन्दे त्रिपान्नारायणाभिधम् ॥
नत्वा गुरुमविद्योत्थकर्माब्धिं तर्तुमिच्छताम् ।
कर्माकर्मविवेकाख्यनौकेयं क्रियते दृढा ॥
अकर्मप्रत्यगद्वैतत्रिपान्नारायणात्मनि ।
कर्मत्रयात्मिकाविद्या कल्पिता व्योम्नि नैल्यवत् ॥
भिद्यते सा पुनर्द्वेधा समष्टिव्यष्टिभेदतः ।
मूलाविद्या समष्ट्याख्या व्यष्टिस्तूलाभिधां गता ॥
तुरीयबीजसूक्ष्मादिस्वविभक्तांशभेदतः ।
चतुर्धा भिद्यतेऽविद्याद्वयं चापि स्वभावतः ॥

End:

अविद्याकर्मणि क्षीणे निरधिष्ठानमद्वयम् ।
त्रिपान्नारायणाख्यं तदकर्म ब्रह्म शिष्यते ॥
नौस्तारयेत्सरित्पारं स्वारूढान्पारवर्जितम् ।
अविद्याकर्मजलधिं स्वद्रष्टृनपि नौरियम् ॥
नौकामिमां प्रपश्यन्तु चक्षुष्मन्तो मुमुक्षवः ।
तरन्तु कर्मजलधिं यान्तु विष्णोः परं पदम् ॥

Colophon:

वासुदेवेन्द्रसच्छिष्यरामचन्द्रेन्द्रयोगिना ।
कर्माकर्मविवेकोऽयं कृतो हरिपदाप्तये ॥

789 34. D. 16.

कर्माकर्मविवेकः—रामचन्द्रेन्द्रसरस्वतीकृतः

Palm-leaf. 6 Foll. 15½ × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

790 10. F. 18.

कैवल्यदीपिका—कृष्णकृता

Paper. 269 Foll. 8¼ × 6½ inches. 16 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript copied from the original MS. belonging to S'rī Sundararāmaśāstri of Madura in 1916.

The MS. contains the commentary also.

This is a metrical adaptation in Sanskrit of the Tamil work called Kaivalyanavanītam of Tāṇḍavarāyasvāmi of Nannilam, Tanjore Dt. who was the pupil of Nārāyaṇaguru. The work elucidates the nature and characteristics of the Kaivalyasalvation according to the view of the school of Advaita-Vedānta. It is divided into two parts viz. Tattvapradīpa in 108 verses and Saṁśayaccheda in 176 verses. The author who calls himself as Kṛṣṇa was the pupil of Kṛṣṇānandayati *alias* Brahmānandayati. The author seems to have written a commentary also called Prabhā on this work.

Complete in 2 parts.

Beginning :

स्वर्णक्षेत्रवधूस्पृहासहितहृत्तन्मुक्तचित्तात्मना-
मन्तर्व्योमविकासिनित्यमहसे तस्मै परस्मै नमः ।
यद्वेदान्तगिरो वदन्त्यनुदिनं सप्तक्षमाणां परा
या भूमिश्च ततोऽपि दूरममलं तुर्यं सदैकं शिवम् ॥
सृष्टिस्थित्यन्तहेतूनपि कमलभवाधोक्षजे ज्ञानमूर्ती-
रासाद्यैवाखिलेशत्वमपि परिगतं निष्कलं यत्स्वरूपम् ।
पूर्णं व्योम्नो विशुद्धं विमलतरमजं नित्यमुक्तं निरीहं
चित्ताकाशे सदाहं विलसितमभयं भावये ज्योतिराद्यम् ॥
यस्य प्रसादान्मयि भातमेत-
न्मिथ्येति विज्ञाय जगत्समग्रम् ।
अस्म्येव नित्यं परिपूर्णवस्तु
व्योमेव वन्दे वरदेशिकं तम् ॥ ३ ॥
मदीयं शरीरेन्द्रियाद्यं समस्तं
मदीयप्रबोधेन दूरं विधूय ।
हिमं सूर्यवन्मामथैकं च कृत्वा
स्थितं स्वेन रूपेण सेवे गुरुं तम् ॥ ४ ॥
आद्यन्तहीनान्तरवस्तुपूर्ण-
श्रीकृष्णयोगीन्द्रपदं प्रणम्य ।
अनात्मबन्धेतरदर्शि शास्त्रं
मूढात्मनां वच्म्यपरोक्षतत्त्वम् ॥ ५ ॥
श्रीमच्छारीरभाष्यादिकसकलमहाशास्त्रदुग्धाब्धिमध्या-
दादायात्यन्तसारं पय इव सुवचःकुम्भलक्षैर्भृतं यत् ।
पूर्वाचार्यैस्तदद्य प्रकरणविधया वच्मि कैवल्यसर्पिः
प्रज्ञानामश्नतां यद्भवविषयरसो न स्वदेन्मानसाय ॥
कैवल्यपूर्वनवनीतसमाह्वयं त-
च्छास्त्रं द्विधा हि पटलं रचयामि चैकम् ।
तत्त्वप्रदीपमपरं किल संशयान्ध-
कारप्रदीपमिति सद्गुरुपादभक्त्या ॥ ७ ॥
नित्यानित्यविवेचनं प्रथमतस्तत्साधनं तत्परं
चेहामुत्रविराग एव पठितः पश्चाच्छमाद्या अपि ।
मोक्षेच्छेति च सूरिभिर्जगदिदं मिथ्येति सत्यं परं
ब्रह्मैवेति विनिश्चयो भवसुखास्वादे विरक्तिः परा ॥

End :

इत्थं विद्यासुखमिति मया वर्णितं भक्तियोगा-
देतच्छास्त्रं यदि परिचिनोत्यत्र यः कोऽपि मर्त्यः ।
नित्यानन्दे प्रविततपदे प्राप्य निष्ठामयत्ना-
ज्जीवन्मुक्तो भवति यतिराट् सत्यमेवं मयोक्तम् ॥ १७४ ॥
वाक्ये छान्दोग्यगामिन्यपि
किल सदसीत्येव यद् घुष्यते त-
त्त्वं चैतन्यं तुरीयं त्वनुभवति
जनः शास्त्रतो यो विदित्वा ।
मुक्त्वा संदेहजातं निरति-
शयसुखं निर्विकल्पं निरीहं
ब्रह्म प्राप्यानुभूतिं स तु
भजतितरां पूज्यते सर्वदैकः ॥ १७५ ॥
शीतं श्रीगुरुपादपद्मसलिलं मूर्ध्नानिशं बिभ्रतां
यद्भूगतसर्वतीर्थपयसामामज्जनोत्थं फलम् ।
ये कैवल्याख्यमिदं पठन्ति
सुधियः शास्त्रं प्रबोधप्रदं
ते नित्यं परिपूर्णसौख्यभरिता
नन्दन्ति मुक्ताः स्वयम् ॥ १७६ ॥

Colophon :

इति श्रीमद्गुरुब्रह्मानन्दयतीन्द्रचरणारविन्दमकरन्द-
तृप्तस्वान्तेन कृष्णेन विरचितेयं कैवल्यदीपिका समाप्ता ।

791 40. C. 3.

कैवल्यदीपिका—कृष्णकृता

Paper. 40 Foll. 12½ × 8 inches. 24 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 26th verse of the 1st chapter.

792 10. F. 18.

कैवल्यदीपिकाव्याख्या प्रभा—कृष्णकृता

Paper. 269 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 16 lines in a page. Devanāgarī script. New. Good. Good writing.

The MS. contains the text also.

This is a commentary on the Kaivalya-dīpikā described in the last number. The commentator seems to be the same as the author of the text. The commentary is called Prabhā.

Complete in 2 parts.

Beginning:

यस्याङ्घ्रिपद्मविगलन्मकरन्दसारो
जीवेश्वरैक्यदृढताकृतिवज्रलेपः ।
न्यग्रोधमूलनिलयाय नमः परस्मै
धाम्ने स्वमौनपरिबोधिततत्त्वभूम्ने ॥
अमृतमतुलनित्यानन्दसान्द्रस्वरूपं
विदितसकलवेदान्तार्थतात्पर्यनिष्ठम् ।
मृदितसकलदोषं मोक्षकामैः सुसेव्यं
गुरुवरमहमीडे कृष्णसंज्ञं यतीन्द्रम् ॥
यदीयवाक्सूर्यरुचिप्रणाशितो
हृदन्धकारो नमतामशेषतः ।
महात्मनः शिष्यहिते सदा रता-
ननामि ताञ्शंकरपूज्यदेशिकान् ॥
नत्वा श्रीकृष्णयोगीन्द्रपादपङ्केरुहद्वयम् ।
भक्त्या कैवल्यदीपस्य कुर्वे व्याख्यां प्रभाभिधाम् ॥

इह कश्चित्कविः सम्यग्विदितब्रह्मात्मतत्त्वः स्वयं कृतार्थोऽपि स्वानुभववदन्येषामपि मुमुक्षूणां मोक्षसाधनात्मतत्त्वावगमाय वेदान्तसारस्पष्टकथनरूपं किंचित्प्रकरणमारभमाणः तस्य निष्प्रत्यूहपरिपूरणादिसिद्धये प्रेक्षावत्प्रवृत्त्यङ्गभूतविषयादिप्रदर्शनाय च स्वकृतं मङ्गलं ग्रन्थतो निबध्नाति—स्वर्णेति ।

End:

एतच्छास्त्राभ्यासफलं जीवन्मुक्तिरिति दर्शयन् प्रकरणमुपसंहरति—शीतमिति । शीतं तापत्रयादिदुःखनिवृत्तिकरं श्रीगुरुपादपङ्कजतीर्थं मूर्ध्ना उत्तमाङ्गेन सर्वदा बिभ्रतां भूगतसर्वतीर्थपयसां गङ्गादिनदीतीर्थानामवगाहनजं फलं यथा तद्वत् ये कैवल्याभिधं शास्त्रं प्रकरणं प्रबोधप्रदं विवेकविज्ञानजनकं पठन्ति, इदं मननादेराप्युपलक्षणम्, ते सर्वपरिपूर्णसौख्यमुदिता भूमानन्दसमुद्रनिमग्नाः, अत एव मुक्ता निवृत्ताज्ञानतत्कार्यबन्धाः स्वयं कृतकृत्या विदितसर्ववेद्या नन्दन्ति हृष्यन्ति तुष्यन्ति च ।

Colophon:

इति श्रीमद्गुरुब्रह्मानन्दयतीन्द्रचरणारविन्दमकरन्दतृप्तस्वान्तेन कृष्णेन विरचितेयं कैवल्यदीपिकाप्रभा समाप्ता ।

793 40. C. 3.

कैवल्यदीपिकाव्याख्या प्रभा—कृष्णकृता

Paper. 40 Foll. $12\frac{1}{2} \times 8$ inches. 24 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 26th verse of the 1st chapter.

794 25. L. 23.

काशीपञ्चकम्

Palm-leaf. 1 Foll. $14\frac{3}{4} \times 1\frac{1}{8}$ inches. 6 lines in a page. Grantha script. Old. Fair. Good writing.

Five verses on the realisation of the self. The work is called Kāśīpañcaka because its first verse begins with the word Kāśī. The author's name is not known. Another Kāśīpañcaka in different version is printed and published in the Śrī Śāṁkaragranthāvali, Śrirangam.

Complete.

काशीक्षेत्रं शरीरं त्रिभुवनभवनव्यापिनी ज्ञानगङ्गा
विश्वेशो यस्तुरीयः सकलजडजगत्साक्षिभूतान्तरात्मा।
भक्तिः साक्षाद्वयेयं निजगुरुचरणध्यानमेव प्रयागः
सर्वं तीर्थं शरीरे निवसति किमहो विद्यते तीर्थमन्यत्॥

End:

क्रियान्तरासक्तिमपास्य कीटकं
ध्यायन्नलिर्ह्यलिभावमृच्छति।
तथैव योगी परमार्थतत्त्वं
ध्यात्वा समायाति तथैव निष्ठया॥

795 11. D. 145.

खण्डनखण्डखाद्यम्—श्रीहर्षकृतम्

Paper. 32 Foll. $11\frac{3}{4} \times 4\frac{3}{4}$ inches. 11 lines in a page. Devanāgarī script. Old. Fair. Good writing.

The Khaṇḍanakhaṇḍakhādya is an important dialectical work on Advaita-Vedānta. The author Śrīharṣa was identical with the author of the famous poem Naiṣadhīyacarita wherein he mentions the following other works written by him: Arṇavavarṇana, Śivaśaktisiddhi, Navasāhasāṅkacampū, Candapraśasti, Vijayapraśasti, Gauḍeśakulapraśasti, Īśvarābhisaṁdhi, Sthairyavicāraṇā and Khaṇḍanakhaṇḍakhādya. The work attempts to refute the views of Naiyāyikas such as Uddyotakara, Vācaspati and Udayana in regard to the reality of the world. The author tries to prove that the Brahman only is ultimate reality and everything else is false. He was the son of Śrī Hīrapaṇḍita and Māmalladevī. He was honoured by the King of Kānyakubja probably Jayacandra by name, who ruled over Kanauj in the latter part of the 12th century A.D. Śrīharṣa often refers to Udayana (984 A.D.) and is referred to by Gaṅgeśopādhyāya (1200 A.D.). Therefore Śrīharṣa must have been somewhere in the 12th century A.D. Some scholars opine that he was in the 10th century A.D. while others in the 9th century A.D. The work contains the following chapters:

१. प्रमाणतदाभासखण्डनम्
२. निग्रहस्थाननिर्वचनम्
३. नामार्थनिरुक्तिः
४. अनिर्वचनीयसर्वस्वम्

The work was printed and published with Ānandapūrṇa's commentary in the Chowkhamba Sanskrit Series, in 1914.

Contains the 1st Paricceda incomplete.

Beginning:

अविकल्पविषय एकः
स्थाणुः पुरुषः श्रुतोऽस्ति यः श्रुतिषु।
ईश्वरमुमया न परं
वन्देऽनुमयापि तमधिगतम्॥
मानापनोदनविनोदनते गिरीशे
भासेव संकुचितयोरुचितं तदिन्दोः॥
भेत्तुं भवानिशचितं दुरितं भवानि
नम्रीभवानि घनमङ्घ्रिसरोजयोस्ते॥

शब्दार्थनिर्वचनखण्डनया नयन्तः
सर्वत्र निर्वचनभावमखर्वगर्वान् ।
धीरा यथोक्तमपि कीरवदेतदुक्त्वा
लोकेषु दिग्विजयकौतुकमातनुध्वम् ॥

अथ कथायां वादिनोर्नियममेतादृशं मन्यन्ते । प्रमाणादयः सर्वतन्त्रसिद्धाः पदार्थाः सन्तीति कथायामभ्युपेयम् । तदपरे न क्षमन्ते । तथाहि— प्रमाणादीनां सत्त्वं यदभ्युपेयं कथकेन तत्कस्य हेतोः ? किं तदनभ्युपगच्छद्भ्यां वादिप्रतिवादिभ्यां तदभ्युपगमसाहित्यनियतस्य वाग्व्यवहारस्य प्रवर्तयितुमशक्यत्वात्, उत कथकाभ्यां प्रवर्तनीयवाङ्मयव्यवहारं प्रति हेतुभावात्, उत लोकसिद्धत्वात्, अथवा तदनभ्युपगमस्य तत्त्वनिर्णयस्य विजयातिप्रसञ्जकत्वात् ?

End :

स्यादेतत् । स्मृतित्वस्यान्योन्याभावमादाय यातिप्रसक्तिर्दर्शिता, सा नोपपद्यते । भेदाभेदवादिमते स्मृतित्वाभेदस्य स्मृत्या सहाभ्युपगमात् । ययोर्भेदाभेदः, तयोस्तत्रान्योन्याभावानभ्युपगमात् । न । कथं ह्यवधार्य स्मृतित्वस्य भेदाभेदः स्मृत्या, नानुभूत्येति ? अनुभूत्या सह तद्विशिष्टप्रमाया अभावादिति चेन्न, किं सत्याः किमसत्या इत्याद्युक्तविकल्पदोषात् । प्रागभावप्रतियोगिन्या इति चेत् ; न, अनुभूतौ तादृश्याः स्वी . . . . .

See for the line broken, the printed edition of the work p. 334 Chowkhamba Sanskrit Series.

796 21. A. 34.

खण्डनखण्डखाद्यव्याख्या खण्डनफक्किकाविभजनम्—आनन्दपूर्णकृतम्

Palm-leaf. 53 Foll. 27 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Illegible writing.

Wooden boards are added to both sides.

This is a commentary on S'rīharṣa's Khaṇḍanakhaṇḍakhādya. The commentary is called Khaṇḍanaphakkikāvibhajana or Vidyāsāgarī. The author Ānandapūrṇa who was also called Vidyāsāgaramuni, refers to his two teachers S'vetagiri and Abhayānanda. The following are his other works : Brahmasiddhivyākhyā Bhāvas'uddhi, Mahāvidyāviḍambanavyākhyā, Pañcapādikāvyākhyā, Pañcapādikāvivaraṇavyākhyā, Mokṣadharmavyākhyā, Bṛhadāraṇyakabhāṣyavārttikavyākhyā Nyāyakalpalatikā, Nyāyacandrikā, Nyāyasāravyākhyā Vyākhyāratna and Kāsīkāvṛttivyākhyā Prakriyāmañjarī. His Nyāyacandrikā has been mentioned by Appayadīkṣita (1520 to 1593 A.D.) in his Siddhāntales'asaṁgraha. His date may be fixed approximately as 1350 A.D.

The text and commentary were printed and published in the Chowkhamba Sanskrit Series, Benares in 1914.

Contains a small portion of the first Pariccheda.

Beginning :

यो विश्वोऽकारवाच्यः सकलविषयभुग्भ्रान्ति-
कृत्कारणाभ्यां
बद्धः संस्कारमात्रप्रविरचिततनुस्तैजसश्चैत्युवाच्यः ।
प्राज्ञो ज्ञानैकबद्धः सुरनरसकलानन्दभुङ्माक्षरेण
वाक्यार्थो यस्तुरीयो विगलितसकलं सोऽहमेवास्मि
भूमा ॥ १ ॥
यः पौलस्त्यमखर्वगर्वहरणादुत्कृत्य शैलं बला-
त्कैलासं कलहंसधौतममलं लोकाधिपालप्रभुः ।

लङ्कालग्नमुखं विलोक्य चलितां देवीं च कोलाहला-
त्प्राहस्याहह चेत्ययं विजयते निन्ये स पातालकम् ॥
कारुण्यसत्कर्बुरपत्रराजितं
रामात्मभृङ्गीमुखचुम्बनोल्लसत् ।
त्रिलोकसत्केसरकर्णिकालयं
श्रीरामराजीवमहं भजे भजे ॥ ३ ॥
मृदुलमृदुलभावस्मेरसंपूर्णवक्त्रा
नलिनदलनिभश्रीलोचनालोकलोका ।
ललितललितपादक्षेपणोत्क्षेपलीला
मम वचसि विधत्तां संनिधिं वर्णमाता ॥ ४ ॥
भो भो भावोग्रपूर्णप्रविचलितलसन्नेत्रपत्रप्रशोभ-
श्रीमद्वक्त्रारविन्दप्रविसृतकराग्रोढरत्नौघकुम्भ ।
कारुण्याख्याम्बुवृष्ट्या कुरु कुरु सुदृढं गाढविघ्नाभिताप-
प्रध्वंसं भावमुग्धप्रविरचितमिदं कृत्यबीजं प्ररोहेत् ॥५॥
अबोधपङ्कावलबोधनीरे
यदीयवाङ् मे करकायतेऽञ्जसा ।
वन्दे मुनीन्द्रान्मुनिबृन्दवन्द्यान्
श्रीमन्मुनीञ्श्वेतगिरीन् वरिष्ठान् ॥ ६ ॥
वन्दे संबुद्धतत्त्वं मुनिनिकरकराराधितश्रीपदाब्जं
विद्यालक्ष्म्याश्रिताङ्कं वियति कृतगतिं स्वात्मदृष्टप्रपञ्चम् ।
वेदान्तोद्घोषजन्मप्रकटनसुभगं शेषभोगाप्तदेहं
स्वानन्दारण्यमीशं कृतभजनजनत्राणनोद्योगशीलम् ॥
कथाख्यभूमिप्रचलत्प्रचण्डं
वादीभकुम्भप्रविभेदितोत्रम् ।
रसावसिक्तं बुधमण्डनं यत्
तत्खण्डनं व्याकरवाणि नीत्या ॥ ८ ॥
सर्वतः सारमाहृत्य पुष्पेभ्य इव षट्पदैः ।
क्रियते खण्डनस्येयं टीका नयविभूषिता ॥ ९ ॥

ग्रन्थारम्भे शिष्टाचारपरंपराप्राप्तकर्तव्यताभावं परदेवतास्तुतिनमस्कारलक्षणं मङ्गलं विधातुमधिकारि-प्रयोजनसंबन्धाभिधेयप्रतिपादनाय चाह — अवि-कल्पेति । अस्य च नियोगतः फलवत्कार्यान्तरा-रम्भसंयोगात्साक्षाद्दृष्टफलत्वाच्च फलवत्संनिधावफलं तदङ्गमिति कार्यान्तरशेषत्वेऽवधृते सत्यारम्भस्य समाप्तिपर्यन्तत्वादपेक्षिताविघ्नपरिसमाप्तिः प्रयोजनम् । अपेक्षितविधेरनपेक्षितकल्पनं दुर्बलमिति फलान्तर-कल्पनाया दुर्बलत्वात् । अतो यथासांप्रदायिकमध्या-यानध्यायादिस्वाध्यायाविघ्नार्थमिदमपि । तदयमर्थः— तमीश्वरं वन्द इति संबन्धः । नन्वीश्वरस्य दृश्यत्वे घटादिसाम्यात् शास्त्राविषयत्वेन नमस्काराविषय-त्वम् , अदृश्यत्वे शशशृङ्गवदसत्त्वमेव, स्वप्रकाशत्वे सदा प्रकाशत्वादविदितत्वाभावात् शास्त्रागोचरत्वम् । तदवेष्टदेवता । अतो न युक्तस्तत्प्रणाम इत्यत आह —अविकल्पेति ।

End :

परमतसिद्धं जल्पमङ्गीकृत्य खण्डनानां सार्वपथी-नत्वं किं न दर्शयितुं शक्यमित्याशङ्क्योपाय-विशेषाच्छक्यत इत्याह—जल्पेति । यदि परपक्षं प्रति-क्षिप्य स्वपक्षसाधनाय दैवगत्या असिद्ध्यादिदोषवत एव प्रमाणतयाभिधानं कृत्वा तद्दोषं प्रतिवाद्युद्भावयेत् , तदासौ दोषोद्भावनकारी कयाचिल्लक्षणादिखण्डन-युक्त्या साधनीय इति संभवत्येव जल्पेऽप्यवकाश इत्यर्थः ।

Then the following remark is written in the margin :

इतः परं खण्डनमण्डनमारभ्यते.

797 21. A. 34.

खण्डनखण्डखाद्यव्याख्या खण्डनमण्डनम्—वरद-पण्डितकृतम्

Palm-leaf. 263 Foll. 27 × 1¾ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

This is another commentary on the Khaṇḍanakhaṇḍakhādya of S'rīharṣa. The commentary is called Khaṇḍanamaṇḍana. The author Varadapaṇḍita was the pupil of Vidyānanda. The author's other work is Vedāntahṛdaya (R. No. 3600 of the Madras Govt. Oriental MSS. Library.) It is said that the commentary consists of 12000 Granthas.

Contains from the Kaṇḍanayukti of the 1st chapter up to the end of the 4th chapter.

Beginning:

इत्थमुपोद्घातचिन्तां परिसमाप्य खण्डनयुक्तीर्वक्तुं पृच्छति—कीदृश्य इति। उत्तरमुच्यत इति। तावदिति संप्रतिपत्तौ। व्यवस्थितिर्व्यवस्था व्यवच्छेद इति यावत्। प्रमाणादेः स्वरूपसिद्धिः। प्रत्यक्षादिना हि प्रमेयादि व्यवच्छिन्नम्। तद्वीस्तु प्रमाकरणत्वादिलक्षणादिनैव। तथापि किमित्यत्राह—लक्षणेति। लक्षणखण्डनयुक्तय एताः। लक्ष्यखण्डनयुक्तयोऽप्युपलक्ष्यन्ते, तदनुपपत्तेः। न च परस्पराव्यावृत्तं विश्वमेतत्स्यात्। मेयविलक्षणमानादिसिद्धेश्च। न किंचित्सिध्येत्। लक्षणाधीनेति। इह सामान्येन सर्वलक्षणखण्डनं सर्वपरिच्छेदशेषभूतम्। अत एवोपोद्घातान्ते कृतं लक्षणप्रकरणं ज्ञानमधिकरणलक्षणं नाम। आदिशब्दात् लक्षणानि।

End:

अनुपासितगुरुदेवताकस्य नेहाधिकारः। किंतु तदुपासकस्येत्याह—ग्रन्थेति। हठपाठो बोधपर्यन्तो न शक्य इति दर्शितमाद्यपादेन। मयेह शास्त्रे क्वचित्क्वचित् ग्रन्थग्रन्थिः प्रयत्नात् बुद्धिपूर्वं प्रयासेन न्यस्तः। अप्राज्ञमपि प्राज्ञमात्मानं मन्यते प्राज्ञंमन्यम्। तदृक् मनो यस्य खलस्य प्राज्ञंमन्यमनाः। अनतिरेकेण मनसि कर्तृत्वमुपचरितम्। मनःपदमात्मपरं वा। हठान्निपठिती हठपाठकः। मेति न माङ्, येन लुङ् स्यात्। किंतु मा। ततो मा खेलत्विव्यविरुद्धम्। श्रद्धेति। श्रद्धया आराद्धो हि गुरुः ग्रन्थिं श्लथीकरोति, नान्यथा। तेन श्लथीकृतः दृढग्रन्थिः यस्मै सः। सज्जनः तथा कथितः। उक्तानामेतेषां तर्काणां ये रसाः अमृतरससमाः। स्वरूपाण्येव सम्यक्त्वं वा। तदूर्मिषु मज्जनं तदेकपरत्वम्। तेन सुखान्युत्पद्यन्ते। तानि सहृदयानामनुभवसिद्धानीतरेषु आसञ्जनमासक्तिमासादयतु।

ग्रन्थग्रन्थिषु गन्धसिन्धुरमहाहंकारनिःसंज्ञक-
प्राज्ञंमन्यजनाभिमानशमनप्रागल्भ्यसंहारिषु।
तत्तद्दर्शनदर्शनप्रशमिताबोधप्रबुद्धां धियं
संधाय श्लथता मयेह विहिता श्रीशारदादेशतः॥
सर्वानिर्वचनीयतामतितरां व्यक्तोक्तयुक्तिक्रमाद्यो निश्चित्य विपश्चिदादरभराद्भूयोऽपि तां भावयेत्।
ब्रह्मैवाहमिति प्रगाढदृढया बुद्ध्या च संबध्यते
जीवन्मुक्तिदशाश्रियं श्रयति सग्लान्या विना शाश्वतीम्॥
वेदाद्यागमदुग्धसिन्धुमथनात्तन्मेयमन्थाद्रिणा
दिव्याभोगविचारवासुकिवशादाश्रित्य धैर्यं परम्।
ब्रह्मोद्बोधसुधां विधाय दयया मर्त्यानमर्त्यानमी
कुर्वन्तो गुरवो जयन्ति जगतां लक्ष्मीशवद्रक्षकाः॥
कल्याणवाहवतु वः कवितावतार-
हेतुः परावरमयी परमेशशक्तिः।
श्रीशारदाशतमखप्रमुखैः प्रपूज्या
जन्मादिमूलमखिलस्य चराचरस्य॥
अद्वयानन्दमात्मानं मां नमामि महेश्वरम्।
नित्यबुद्धं नित्यशुद्धं नित्यमुक्तमनुक्तिकम्॥
न ख्यातये नापि च लाभलोभा-
न्न पूजनायापि ममैष यत्नः।

श्रीमद्गुरुप्रोक्तपदार्थसिद्धये
संपादितोऽसौ मननप्रकारः ॥

Colophon :

इति श्रीमद्विद्यानन्दपूज्यपादशिष्यवरदपण्डितकृतौ खण्डनमण्डने चतुर्थः परिच्छेदः। समाप्तं च खण्डनमण्डनम्।

Another MS. of the work found in the Govt. Oriental MSS. Library, Madras reads the following additional stanzas at the end (Vide R. 3618) :

महति हरितगोत्रे श्रोत्रियत्वादिपात्रे
गुरुमतगहनार्थव्याक्रियाक्रीडनाढ्ये।
इह हि पुरुषरूपा भारती चावतीर्णा
जयति स जनको मे भट्टनारायणाख्यः।
खण्डनमण्डनमेतद्व्याख्यानं विरचितं विशालधिया।
द्वादशसहस्रसंख्याग्रन्थं विबुधेन वरदराजेन ॥
विकसिततामरसोदरसोदरयोः शारदापदाम्बुजयोः।
भक्तिरसूत यदीया खण्डनगहनार्थबोधनी सिद्धिम्।

798 34. C. 13.

खण्डनखण्डखाद्यव्याख्या आनन्दवर्धनम्—शंकरमिश्रकृतम्

Palm-leaf. 93 Foll. $16\frac{1}{4} \times 1\frac{1}{2}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

The first leaf is badly-broken.

This also is another commentary on S'rīharṣa's Khaṇḍanakhaṇḍakhādya. The title of the commentary is mentioned as Ānandavardhana in the MS. available in the Tanjore Palace Library (No. 7545, page 5619 of the Descriptive Catalogue of Sanskrit MSS. Vol. XIII.) The author S'aṁkaramiśra was the son of one Bhavanāthamiśra who should not be confounded with the famous auther of the Nayaviveka. As the commentator S'aṁkaramiśra is known to have written Kroḍapatras on Gadādara's works he must have lived about 1700 A. D.

Contains the 1st Pariccheda incomplete.

Beginning :

As the first leaf of this MS. is badly broken the following extracts of the beginning are given from the printed edition of the Chowkhamba Sanskrit Series No. 445.

हरिशङ्करयोः सितासितं भुजगारातिभुजङ्गलाञ्छनम्।
वपुरस्तु मुदे विरुद्धयोरपि संसर्गि न भिन्नतां गतम्॥
विरुद्धधर्मद्वयसंनिपातेऽप्यभेद एवेति विभावयन्तम्।
पुनातु भेदप्रतिभासशून्यं स्त्रीपुंसरूपं शिवयोः शरीरम्॥
भवनाथसूक्तिगुम्फनमिह खण्डनखाद्यटीकायाम्।
श्रीशंकरेण विदुषा विदुषामानन्दवर्धनं क्रियते ॥

प्रारिप्सितप्रतिबन्धकदुरितनिवारणकारणेष्टदेवतानमस्काररूपं मङ्गलं कुर्वन्नेव प्रेक्षावत्प्रवृत्त्यङ्गप्रयोजनाभिधेयसंबन्धप्रतिपादनपरः परमतनिराकरणचिकीर्षया स्वमतं ब्रह्माद्वैतमास्थायुको वैतण्डिकोऽपि स्वप्रौढिप्रकटनाय सूचयन्नाह—अविकल्प इति। एकः पुरुष इति। अद्वितीयं ब्रह्मेत्यर्थः, श्रुतिषु तथा श्रुतत्वात्। यद्यथा श्रुतिषु श्रुतं तत्तथा, यथा ब्रह्मण आनन्दमयत्वम्। तथाचाद्वितीयं ब्रह्मेति स्थापनसूचना। तमीश्वरं वन्दे, यः अविकल्पविषयः। विकल्पः संशयः, तद्विषय इत्यर्थः।

End :

आशयमुद्घाटयति—अभावादीति। प्रतियोगिस्मृत्यैव यथा भावविशिष्टाज्ञानं तथा दैवाधीनव्याप्ति-

स्मृतिलक्षणविशेषणज्ञानमहिम्ना व्याप्तिविशिष्टपर्वतीय-धूमपरामर्श एव प्रथमं जायत इति न ततः पश्चादपि धूमदर्शनजद्वितीयस्मरणं मन्तव्यमिति ।

799 30. G. 13.

गुणत्रयविवेकः—स्वयंप्रकाशमुनिकृतः

Palm-leaf. 3 Foll. $12\frac{1}{2} \times 1$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

This is a small metrical work explaining the nature and characteristics of the three Guṇas *namely* Sattva, Rajas and Tamas, which give the manifestation of the material world. The author Svayaṁprakāśamuni was the pupil of Vāsudevendrayogin whose another pupil Rāmacandrendra wrote the Karmākarmaviveka and Tattvaṁpadārthaikyaśataka described under numbers 788 and 808 of this volume.

The work is said to have contained 49 Granthas in Anuṣṭub verses.

Complete.

Beginning :

नत्वा गुरुं रामचन्द्रं निर्गुणं सत्यचित्सुखम् ।
गुणत्रयविवेकोऽयं क्रियते तत्पदाप्तये ॥
श्रीरामचन्द्रे निर्माये सत्तासामान्यरूपिणी ।
गुणत्रयात्मिका माया कल्पिता रज्जुसर्पवत् ॥
कालत्रयेऽपि नास्त्येव मायामाये परात्मनि ।
तथापि भ्रान्तबुद्धीनां जगद्भाति यथार्थवत् ॥
सप्तविंशतिधा भिन्नमायात्रिगुणमिश्रितम् ।
जगच्छ्रीरामचन्द्रस्तु जगन्मायाविलक्षणः ॥
मायागुणमयं विश्वं निर्गुणं ब्रह्म सर्वगम् ।
विश्वं मायामयं ज्ञात्वा विश्वातीतं समाश्रयेत् ॥

End :

जगन्मायेति विज्ञाय मायागुणविलक्षणम् ।
त्रिपाद्विभूतिनिलयं रामचन्द्राख्यमद्वयम् ॥
परं ब्रह्माहमस्मीति भावनान्मुच्यते भवात् ।
यो मयोक्तेन मार्गेण मायात्रिगुणमण्डितम् ॥
विश्वं मिथ्येति विज्ञाय विश्वातीतं निरञ्जनम् ।
शान्ताविद्याद्वयपदं त्रिपान्नारायणाभिधम् ।
परं ब्रह्माहमस्मीति ब्रह्म संपद्यते हि सः ॥

Colophon :

इति श्रीवासुदेवेन्द्रपादपङ्कजसेविना ।
स्वयंप्रकाशमुनिना ज्ञानवैराग्यशालिना ॥
निस्त्रैगुण्यपरब्रह्मप्रत्यक्षीकरणे पटुः ।
गुणत्रयविवेकोऽयं कृतो हरिपदाप्तये ॥
गुणत्रयविवेकस्य निर्गुणप्रापकात्मनः ।
ग्रन्थस्त्वेकोनपञ्चाशदिति ज्ञेयो विचक्षणैः ।

800 22. B. 26.

चेतनाचेतनप्रकरणम्

Palm-leaf. 3 Foll. $15\frac{1}{2} \times 1\frac{1}{2}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Gives the characteristics of what is called sentient and non-sentient according to the view of the school of Advaita Vedānta.

Complete.

Beginning :

अथ चेतनाचेतनस्वरूपमुच्यते ।
चेतनाचेतने ये वै श्रुतौ सम्यक्समर्थिते ।
ते द्वे मया विचार्येते भाषया श्रूयतामिह ॥

प्रपञ्चे द्वौ पदार्थावित्युच्यते । तत्कथम्? आत्मा अनात्मा चेति द्वौ पदार्थौ स्तः । प्रपञ्चातीत आत्मा प्रपञ्चान्तःपातीति कथमुक्तः ? तथैवोक्तः । तत्कथम्?

प्रपञ्चश्चेतनात्मकोऽचेतनात्मकश्चेति द्विविध इत्युच्यते। अत एव चात्मा प्रपञ्चान्तःपतीत्युच्यते।

End:

अनेन प्रकारेण आत्मानात्मविवेक इत्युच्यते। एनमात्मानमहमिति यो मन्यते स मुक्तो भवतीति वेदान्तेषूच्यते।

Colophon:

चेतनाचेतनप्रकरणम्।

801 9. F. 43.

जगन्मिथ्यात्वोपदेशः

Paper. 2 Foll. $8\frac{1}{2} \times 6\frac{1}{2}$ inches. 32 lines in a page. Grantha script. Old. Injured. Good writing.

The work teaches the fact that the entire phenomenal world is false according to the school of the Advaita Vedānta.

Incomplete.

Beginning:

सतोऽस्ति खलु भाव एव त-
न्नाप्यभाव इह विद्यते सतः।
तेन नास्ति जगदित्यलं ब्रुवे
शङ्क्यतेऽत्र जगदस्ति चेद्वद ॥ १ ॥
भूतपञ्चकमलं विचारितं
केन दृष्टमिह नास्ति तत्कुतः।
शास्त्रतः प्रवदता च युक्तितः
पश्यतापि न हि दृष्टमुच्यते ॥ २ ॥
स्थूलदेह इह पञ्चभूतकैः
कल्पितो न हि वास्तवो भवेत्।
पञ्चभूतमपि नास्ति तत्कथं
स्थूलसत्त्वमिह दृश्यमुच्यते ॥ ३ ॥

End:

इत्यभावजगदस्ति कीदृशं
ज्ञानदृष्टिमवलम्ब्य तद्वद।
वक्तुमत्र तव बोधदृङ् न चेत्
ज्ञानसिद्धमनुसेव्य बुध्यताम् ॥ २८ ॥

802 20. I. 8.

जीवेश्वरनिरूपणम्

Palm-leaf. 3 Foll. $14\frac{1}{2} \times 1\frac{1}{4}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Explains the characteristics of the individual souls and Īśvara. The author's name is not known.

Complete.

Beginning:

जीवेश्वरयोः स्वरूपं निरूपयिष्यामि। अन्तःकरणं तदधिष्ठानचैतन्यं तत्प्रतिबिम्बचैतन्यमित्येतत् त्रयं संभूय जीव इत्युच्यते। अन्तःकरणमात्रं चैतन्यमित्युक्ते घटस्यापि जीवता स्यात्। घटस्य स्वच्छद्रव्यत्वाभावात् न जीवत्वमिति चेत्, तर्हि दर्पणादेर्जीवत्वं स्यात्। दर्पणादेर्बाह्यपदार्थत्वान्न जीवतेति चेत्, तर्हि आन्तराणामिन्द्रियाणामपि जीवता स्यात्।

End:

एवं तापत्रयस्वरूपं विज्ञायेदं तापत्रयं शरीरत्रयस्यैव, देहेन्द्रियादिसाक्षिणो मम नास्तीति यस्तु जानाति स एव मुक्त इति वेदान्तसिद्धान्तः।

Colophon:

इति जीवेश्वरस्वरूपनिरूपणं समाप्तम्।

803 25. L. 23.

जीवेश्वरनिर्णयप्रकाशः

Palm-leaf. 3 Foll. $14\frac{1}{4} \times 1\frac{1}{8}$ inches. 6

lines in a page. Grantha script. Old. Fair. Good writing.

This is said to be a portion of the S'iva-rahasya-Khaṇḍa of the Skāndapurāṇa. In the form of a conversation between Pārvatī and Īs'vara it describes the characteristics of the individual souls and Īs'vara.

Complete.

Beginning :

स्वात्मप्रकाशशिवमूर्तिरेकिका
तद्विमर्शतनुरेकिका तयोः ।
सामरस्यवपुरिष्यते परा
पादुकापरशिवात्मनो गुरुः ॥
संचिन्तयामि चरणौ कुलरन्ध्रपीठे
शंभोरशेषजननस्थितिनाशहेतोः ।
षष्टयुत्तरत्रिशतदिव्यमरीचिकान्ते
पादोपरि . . . षडन्वयरत्नशुक्लाम् ॥
वन्दे गुरुपदद्वन्द्वमवाङ्मनसगोचरम् ।
रक्तशुक्लप्रभामिश्रमतर्क्यं त्रैपुरं महत् ॥

श्रीपार्वत्युवाच—

को जीव ईश्वरः कश्च शुद्धब्रह्ममयः स्वयम् ।
का माया कान्वविद्या च ब्रूहि मे परमेश्वर ॥

ईश्वर उवाच—

शृणु देवि महाभागे ज्ञानरूपा त्वमेव च ।
लोकानुग्रहणार्थाय ज्ञानगोष्ठी त्वया कृता ॥
घटमध्ये यदाकाशं मठाकाशं तथैव च ।
तदाकाशमहाकाशं तद्वद्ब्रह्म व्यवस्थितम् ॥
घटाकाशसमो जीवो मठाकाशवदीश्वरः ।
घटस्थाने त्वविद्या च मठमाया तथैव च ॥

End :

ईश्वर उवाच—

अनन्तकोटिब्रह्माण्डं मम मध्ये व्यवस्थितम् ।
ममाधारे लयोत्पत्तिरहं व्यापक एव च ॥

Colophon :

इति श्रीशिवरहस्ये उमामहेश्वरसंवादे जीवेश्वर-निर्णयप्रकाशः समाप्तः ।

804 9. B. 24.

ज्ञानप्रदीपिका

Paper. 2 Foll. $5\frac{3}{4} \times 3\frac{1}{2}$ inches. 20 lines in a page. Telugu scripts. Old. Fair. Illegible writing.

A small metrical work teaching that the Brahman alone is real and everything other than that is false according to the school of Advaita-Vedānta.

Complete.

Beginning :

नित्यानन्दैककन्दाय निर्मलाय चिदात्मने ।
ज्ञानोत्तमाय गुरवे साक्षिणे ब्रह्मणे नमः ॥
मौनी त्वेकमना भूत्वा संभवं कर्मसंचितम् ।
शरीरं सुखदुःखानां भोगायतनमुच्यते ॥

End :

अलं विकल्पैरहमेव देवो
मयि स्थितं विश्वमिदं चराचरम् ।

Colophon :

इति ज्ञानप्रदीपिका समाप्ता ॥

805 9. B. 23.

ज्ञानबोधः—शुककृतः

Paper. 2 Foll. $5\frac{3}{4} \times 3\frac{3}{4}$ inches. 19 lines in a page. Telugu script. Old. Fair. Illegible writing.

On the principles of the Advaita-Vedānta.

Complete.

Beginning :

भिन्नभेदं जगत्सर्वं त्रैलोक्यं सचराचरम् ।
अभिन्नं सैव विश्वात्मा तस्य भिक्षा विधीयते ॥

End :

अथवा लयविज्ञानं ध्यानधारणमध्यमम् ।
स्वतपोजपमालम्ब्य पूजार्चनधनो भव ॥

Colophon :

इति श्रीशुकयोगीन्द्रविरचितो ज्ञानबोधः संपूर्णः ।

806 33. K. 3.

ज्ञानाङ्कुशम्—सव्याख्यानम्

Palm-leaf. 5 Foll. $8\frac{1}{2} \times 2$ inches. 15 lines in a page. Grantha script. Old. Injured. Good writing.

In 25 verses, the work teaches the importance of the self-control which gives the Kaivalya-liberation to a person. The author's name is not mentioned. The verses are accompanied by a commentary.

Complete.

Beginning :

अथ मुमुक्षूणामखिलपुरुषार्थसाधकानां नित्यशुद्धबुद्धमुक्ताद्वयानन्दज्ञानस्य चित्तसमाधानमूलत्वात् तदर्थं ज्ञानाङ्कुशाख्यं प्रकरणं करोति—

महात्मनां सत्त्ववशाद् व्यवस्थिति-
र्दृढा परिज्ञानसमाहितात्मनाम् ।
परापवादेष्वपि मादृगात्मनः
समानयेत्कल्पनयानयाङ्कुशम् ॥ १ ॥

महात्मनां परापवादेषु सत्स्वपि सत्त्ववशात् व्यवस्थितिर्दृढा भवति । मादृगात्मनः परापवादेषु सत्सु अनया कल्पनया अङ्कुशं समानयेदित्यन्वयः । अयमर्थः—परोक्षज्ञाने दृढीकृतप्रज्ञानां महतामन्यैर्दुरुक्तिषु कृतासु सात्त्विकगुणवशेनोपशमं गमितासु शमादिबाहुल्यादिति भावः । मादृगात्मन इति जात्येकवचनम् । अस्माकं मादृगात्मनामपरोक्षज्ञानरहितानामनया वक्ष्यमाणया अङ्कुशं समानयेत् । यथा मत्तो गजोऽङ्कुशेन स्ववशं नीयते, तथा चित्तहस्तिनमपि ज्ञानाङ्कुशेन स्ववशं कुर्यादित्यर्थः ।

End :

सर्वतः परिधावन्तं मनोमत्तमतङ्गजम् ।
ज्ञानाङ्कुशवशं नीत्वा पुनः पन्थानमानयेत् ॥

सर्वतः समस्तदेशे प्रशस्ते चाप्रशस्ते च परिधावन्तं परित इतस्ततो वेगेन गच्छन्तमुच्छृङ्खलं मनोमत्तमतङ्गजं चित्तरूपं मत्तहस्तिनं ज्ञानाङ्कुशवशं नीत्वा उक्ताभिर्युक्तिभिर्यदुत्पन्नं ज्ञानं तदेवाङ्कुशः अङ्कुशमिवाङ्कुशो नियामकत्वात् , तस्य वशं निघ्नतां नीत्वा प्रापय्य पुनः पन्थानं सन्मार्गमानयेत् । सन्मार्गे प्रापिते मनसि साधनचतुष्टयसंपन्नस्याधिकारिणः सद्गुरूपसत्तितः श्रवणादिक्रमेण ज्ञानोत्पत्त्या जीवन्मुक्तिरिह देहे कैवल्यं सिध्यतीति सर्वं समञ्जसं भवति ।

Colophon :

ज्ञानाङ्कुशं समाप्तम् ।

807 40. E. 54.

तत्त्वंपदार्थविवेकः—पूर्णानन्दसरस्वतीकृतः

Paper. 86 Foll. 11×5 inches. 26 lines in a page. Telugu script. Old. Fair. Illegible writing.

This is a treatise on the Advaita school of Vedānta philosophy, elucidating the principles taught in Madhusūdanasaras-

vatī's Siddhāntabindu, a commentary on S'rī S'aṁkarācārya's Dasas'lōkī. The author herein acknowledges Brahmānandasarasvatī's commentary on the Siddhānta bindu and explains some facts which were not dealt with in that commentary. Pūrṇānandasarasvatī was the pupil of Puruṣottamānandasarasvatī and grandpupil of Advaitānandasarasvatī. The author salutes S'rī Rāma in the beginning and end of the work. Another copy of the work is available in the Madras Govt. Oriental MSS. Library (R. No. 1382). The work is not available in print.

Complete.

Beginning :

ईशानविष्णुशब्दाद्यैर्यद्वाच्यं रामनामकम् ।
कारुण्यपूर्णनयनं कामरूपं भजाम्यहम् ॥
नमः श्रीज्ञानमुद्राय वटमूलनिवासिने ।
अज्ञानध्वान्तनाशाय गुरवे मुनये सदा ॥
सिद्धान्तबिन्दोर्व्याख्यानं ब्रह्मानन्देन भिक्षुणा ।
कृतमप्येकदेशस्य तात्पर्यं वर्ण्यतेऽधुना ॥

अथ कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इत्यादिस्मृत्यनुसारेणाज्ञानतज्जन्यान्तःकरणोपाधिकतयैकस्यैव चैतन्यस्य जीवेश्वरविभागसंभवेऽप्यज्ञानोपाधिकचित्त्वरूपेश्वरपदशक्यतावच्छेदकस्य विभिन्नधर्मिवाचकपदशक्यतावच्छेदकत्वाभावेन न तस्य शिवेशानादिपदवाच्यत्वम् ; न वा विष्णवादिपदवाच्यत्वं तेषाम् ; तत्र केवलयोगवृत्त्यैव प्रयोगसंभवादित्याशङ्कानिराकरणायेश्वरोपाधिभूताज्ञानस्यैकरूपत्वेऽपि मैत्रायणीयश्रुत्यनुसारेण स्वगतसत्त्वादिगुणविशिष्टत्वेन भेदमुपेत्य तदुपाधिकतयैकस्यैव नानाशब्दवाच्यत्वं दर्शयति । तत्रेश्वरोऽपि त्रिविधः । स्वोपाधिभूताविद्यागुणभेदेन ब्रह्मविष्णुमहेश्वरभेदादिति । त्रिविधः त्रिप्रकारः । त्रयः प्रकाराः धर्मा यस्येति व्युत्पत्त्या धर्मत्रयविशिष्ट इति यावत् । एवंच विभिन्नतत्तद्धर्मविशिष्टत्वेनैकस्यापि विभिन्नतया तत्तद्व्यवहारोपपत्तिरिति भावः । उक्तं चाभियुक्तैः—

सगुणं ब्रह्म संप्रोक्तं ब्रह्मविष्ण्वादिभेदतः ।
नानाविधं नारदाद्यैरिदमत्यन्तमादरात् ॥

इति ।

End :

विशिष्टकेवलयोस्तादात्म्यस्य सिद्धान्तितत्त्वेनेष्टापत्तिसंभवात् । तत्तत्पुरुषीयतत्तज्ज्ञानतत्तदज्ञानाभावकूटविशिष्टचरममुक्तपुरुषीयचरमतत्त्वसाक्षात्कारस्यैव तत्तदधीनतत्पुरुषीयाज्ञानोभयनाशकत्वोपगमेन तदानीं सद्वितीयत्वापातनासंभवात् । अभावस्याधिकरणस्वरूपतया न तेन सद्वितीयत्वापत्तिरिति शिवम् ।

यं प्राहुर्निखिलागमाः प्रतिदिनं ध्यायन्ति यं योगिनो
यं ज्ञात्वैव पराशरप्रभृतयः संसारपाथोनिधिम् ।
तीर्त्वा मुक्तिमुपागताः श्रुतिमतां निर्दुःखरूपां शुभां
तं भूमानमुपास्महे रघुवरं चिन्मुद्रयालंकृतम् ॥
यः क्षीराब्धिनिकेतनोऽप्यनुदिनं मुन्यन्नमास्वादयन्
देव्या बद्धकुचेलया समुदयन्नृष्याश्रमेष्वाश्रितः ।
यो ब्रह्मादिसुरेन्द्रवन्दितपदोऽप्यारण्यभूमौ रत-
स्तं भूमानमुपास्महे रघुवरं चिन्मुद्रयालंकृतम् ॥
यः पौलस्त्यकुलान्तकोऽपि सततं हर्यादिसंरक्षणे
दक्षः स्वल्पफलाशनोऽप्यनुपमं स्वीयं पदं स्वेच्छया ।
दत्तं येन समस्तपुण्यनिचयैः प्राप्यं शबर्यै पुन-
स्तं भूमानमुपास्महे रघुवरं चिन्मुद्रयालंकृतम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्र-

श्रीमद्द्वैतानन्दपूज्यपादशिष्यपुरुषोत्तमानन्दसरस्वती-शिष्यपूर्णानन्दसरस्वतीकृततत्त्वंपदार्थविवेके त्वंपदार्थ-निरूपणं समाप्तम् ।

किंचिदत्र विरुद्धं चेदुक्तं दैववशान्मया ।
भ्रान्तेः पुरुषधर्मत्वात्तत्क्षन्तव्यं मनीषिभिः ॥

808 34. D. 16.

तत्त्वंपदार्थैक्यशतकम्—रामचन्द्रेन्द्रकृतम्

Palm-leaf. 7 Foll. $15\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Fair. Good writing.

One hundred verses written in Anuṣṭubh metre by Rāmacandrendra pupil of Vāsudevendra. The work deals with the identity between the individual souls and the Supreme Brahman as taught in the Vedic texts like Chāndogya-Upaniṣad (तत्त्वमसि).

Complete.

Beginning :

अविद्यापादसर्वस्वध्वान्तमध्याह्नभास्करम् ।
प्रत्यक्परैक्यदातारं नौमि रामनिशाकरम् ॥
नत्वा गुरुपदं प्रत्यक्परमात्मैक्यमिच्छताम् ।
तत्त्वंपदार्थलक्ष्यैकशतकं क्रियते स्फुटम् ॥
निर्मायं ब्रह्मतारार्थं प्रत्यक्परचिदात्मकम् ।
सदा विजयते ब्रह्म त्रिपान्नारायणाभिधम् ॥

End :

विभागकलनाशून्यं सत्तासामान्यचित्सुखम् ।
त्रिपान्नारायणाख्यं तत्तुर्यतुर्यं विशिष्यते ॥
यस्तत्त्वंपदलक्ष्यैक्यशतकार्थं गुरोर्मुखात् ।
आदराद्वेत्ति स मुनिस्तुर्यतुर्यपदं व्रजेत् ॥

Colophon :

श्रीवासुदेवेन्द्रशिष्यरामचन्द्रेन्द्रयोगिना ।
तत्त्वंपदगलक्ष्यैक्यशतकं सुखदं कृतम् ॥

809 8. G. 4.

तत्त्वकौस्तुभः—भट्टोजिदीक्षितकृतः

Paper. 176 Foll. $12\frac{1}{2} \times 8$ inches. 24 lines in a page. Telugu script. Old. Fair. Good writing.

This is an original work on the Advaita-Vedānta mainly refuting the view of the Dvaita school of Vedānta of Ānandatīrtha. The work is divided into three Paricchedas, the first dealing with the Tāntrika system of Mādhvas, the second with their interpretation of Vedantasūtras and the third with the soundness of the Advaitic view of S'rī S'aṁkarācārya. The author was the son of Laksmīdharabhaṭṭa and is believed to have been the younger contemporary of Appayadīkṣita. His other works are the siddhāntakaumudī, S'abdakaustubha, Prauḍhamanoramā etc. He flourished in the beginning of the 17th century A.D. The work has been partly printed and published in the S'aṁkara-gurukula Patrikā, S'rirangam.

Complete in three Paricchedas.

Beginning :

विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगम् ।
चरीकर्ति बरीभर्ति संजरीहर्ति लीलया ॥
केलदीवेंकटेन्द्रस्य निदेशाद्विदुषां मुदे ।
ध्वान्तोच्छित्तौ पटुतरस्तन्यते तत्त्वकौस्तुभः ॥
फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
शांकरादपि भाष्याब्धेस्तत्त्वकौस्तुभमुद्धरे ॥

इह खलु केचित् पाञ्चरात्राद्यागमांस्तदनुसारिपुराण-भागांश्चोपजीव्य तदधिकारितत्त्वमपर्यालोचयन्तः श्रौत-स्मार्तमार्गं त्यजन्ति त्याजयन्ति च । तान् सम्यक्

शिक्षयितुं तन्त्राद्यधिकारी तावन्निरूप्यते। तत्रायं राद्धान्तः—

शापाद्वा गौतमादीनां पापद्वा महतो नराः।
ये गता वेदबाह्यत्वं ये च संकीर्णयोनिजाः॥
तेऽधिक्रियन्ते तन्त्रादौ स्त्रीशूद्राश्च यथायथम्।

End :

भूयश्चान्ते विश्वमायानिवृत्तिः; ज्ञानेन तु तदज्ञानमेषां नाशितमात्मन इत्यादिश्रुतिस्मृतिबलेनाविद्यानिवृत्तौ सिद्धायां प्रमाणबलेन तदितरकार्याणामेवाविद्योपादानकत्वकल्पनात् शुष्कतर्काणां चोपेक्षणीयत्वात्। तस्मात्सिद्धमद्वितीयं ब्रह्मैव तात्पर्यविषयः। तत्साक्षात्काराच्च कृतकृत्यतेति सिद्धम्।

शुद्धाद्वैतसमर्थने पटुतरं यस्योपदेशं सकृच्छ्रुत्वा त्वैक्यरुचिं सदा विदधते त्यक्तेषणाभेदिनः।
ये द्रव्येषु गुणेषु कर्मसु तथा जाता विशेषेषु च
क्रोधाहंकृतयोद्धतैः सह खं संबन्धयेद्भास्वते (?)॥
केलदीवेंकटेन्द्राज्ञापालनैकपरायणः।
अचीकरमिमं ग्रन्थं तत्त्वकौस्तुभसंज्ञितम्॥
पदवाक्यप्रमाणज्ञान् गुणग्राहिविपश्चितः
कौतुकाक्रान्तमनसः प्रमोदयतु मत्कृतिः॥

Colophon :

इति श्रीमद्विशुद्धाद्वैतप्रतिष्ठापकेत्यादिबिरुदावलीविराजमानेन सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमलेन केलदिवेंकटभूपेन कारिते विद्वन्मुकुटमाणिक्यलक्ष्मीधरभट्टसूरिसूनुभट्टोजिभट्टविरचिते तत्त्वकौस्तुभे तृतीयः परिच्छेदः। समाप्तोऽयं ग्रन्थः।

810 21. G. 6.

तत्त्वकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm-leaf, 132 Foll. 17½ × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Paricchedas 1 and 2.

811 30. A. 13.

तत्त्वकौस्तुभः—भट्टोजिदीक्षितकृतः

Palm-leaf. 51 Foll. 15½ × 2 inches. 14 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the Paricchedas 1 and 2.

812 38. F. 4.

तत्त्वचन्द्रिका—उमामहेश्वरकृता

Paper. 501 Foll. 8¼ × 6½ inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in two volumes.

This is a transcript made from the original MS. described in the next number.

The Tattvacandrikā is a treatise on Advaita-Vedānta. The author Umāmaheśvara of the Vellāla family was the pupil of Akkayasāstrin. The work attempts to refute the views of Śrī Rāmānuja and Śrīkaṇṭha on the interpretation of the Brahmasūtras. The author states that the view of Sri Ānandatīrtha was already refuted by previous authors and hence he does not deal with it here. His other works are Virodhavarūthinī (Adyar Library), Prasaṅgaratnākara (Aufrecht C.C. p. 70), Advaitakāmadhenu (Tanjore 7526) and Vēdantasidāhantasāra (Madras Govt. R. 1403). His son Bhāskaradīkṣita was the author of the Taptamudrāvidrāvaṇa.

The Tattvacandrikā contains the following 12 Ullāsas or chapters :

१. शास्त्रतात्पर्यनिरूपणम्.
२. भेदनिरसनम्
३, ४. परकीयोपेयस्वरूपखण्डनम्
५. परकीयोपायस्वरूपखण्डनम्
६. जिज्ञासाधिकरणभङ्गः
७. द्वितीयाधिकरणभङ्गः
८. तृतीयाधिकरणभङ्गः
९. चतुर्थषष्ठाधिकरणभङ्गः
१०. तदनन्यत्वाधिकरणभङ्गः
११. तार्तीयीकाधिकरणभङ्गः
१२. फलाध्यायविचारः

Complete.

Beginning :

हस्ताभ्यां पुस्तकं शस्तं व्याख्यामुद्रां च बिभ्रतम्।
जटाधरं तपोनिष्ठं मुञ्जकेशमुनिं भजे ॥
श्रेयांसि मम भूयांसि दत्तां किमपि दैवतम्।
अर्धाङ्गमङ्गना यस्य शेखरः क्षणदाकरः ॥
हरलीलावताराय शंकराय वरौजसे।
कैवल्यकलनाकल्पतरवे गुरवे नमः ॥
गुरून् प्रज्ञाजितगुरून्नमाम्यकव्यशास्त्रिणः।
प्रविष्टो निगमान्ताब्धिर्यदनुग्रहनौकया ॥
उमामहेश्वरज्ञेन वेल्लालकुलजन्मना।
क्रियते निर्गुणब्रह्ममीमांसातत्त्वचन्द्रिका ॥
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेद इति मन्वादयो जगुः ॥
सर्ववेदान्तवाक्यानामुपबृंहणसंमता।
भगवत्पूज्यपादीया व्याकृतिः परिदृश्यते ॥
मध्वरामानुजादीनामुपबृंहणवैरिणी।
श्रुत्यन्तव्याकृतिः सर्वा स्वमनीषैकमूलिका ॥
श्रुतिस्मृतिपुराणानि कल्पयित्वा स्वबुद्धितः।
निर्व्यूढं दर्शनं स्वीयं मध्वेन प्रतिभावता ॥
रामानुजस्तु यतिराट् प्रसिद्धानां जगत्त्रये।
शैवब्राह्मपुराणानां प्रमाणानामपि स्वतः ॥
वेदार्थप्रथनार्थानामप्रामाण्यं प्रकल्पयन्।
वैष्णवानि पुराणानि व्याकुर्वंश्च स्वबुद्धितः ॥
तन्त्रं निरवहत् स्वीयं स्वकीयमतिवैभवात्।
अकल्पयन्नसिद्धानि प्रसिद्धान्यविनाशयन् ॥
निमील्य नेत्रे वेदानामुपबृंहणवर्त्मनि।
स्वोत्कण्ठयैव श्रीकण्ठः श्रुत्यर्थं पर्यकल्पयत् ॥
तस्मादेतन्मतध्वस्त्यै सांप्रतं प्रयतामहे।
भाष्यं रामानुजस्यात्र श्रीकण्ठस्यापि दूष्यते ॥
मध्वविध्वंसने मध्वन्यक्कारे च महात्मभिः।
मध्वदर्शनमामूलमूलं भस्मीकृतं यतः ॥
ततस्तद्दूषणायात्र साक्षान्नैव प्रयत्यते।
न्यायसाम्यात्तु तस्यापि स्यादेवात्र निराकृतिः ॥
सर्ववेदान्तवाक्यानामन्तरेणोपबृंहणम्।
स्वबुद्धिमात्राद्व्याख्यानं यतो मध्वादिभिः कृतम् ॥
ततो मध्वादितन्त्राणि मृषा शाक्यादितन्त्रवत्।
इति प्रदर्श्यते यत्नाद् गुरूणां करुणबलात् ॥

अथातो ब्रह्मजिज्ञासेत्यारभ्य अनावृत्तिः शब्दादनावृत्तिः शब्दादित्येवमन्ते ब्रह्ममीमांसाशास्त्रे संशयः —किमिदं जीवब्रह्माभेदजगन्मिथ्यात्वपरम्, आहोस्वित् तद्भेदतत्सत्यत्वपरमिति। कुतः संशयः? तत्तद्विरुद्धार्थानेकसूत्रार्थदर्शनादिति ब्रूमः। किं तावत्प्राप्तम्? जीवब्रह्मभेदजगत्सत्यत्वपरमेवेदं शास्त्रम्।

End :

तदिदं रामानुजश्रीकण्ठादिकृतब्रह्मसूत्रविज्ञानस्य संख्यावद्भिः सकलप्रमाणविरुद्धत्वेन प्रत्याख्येयत्वात् सकलवेदोपबृंहणन्यायानुगृहीतस्य भगवत्पादीयविवरणस्यैवातिरमणीयत्वेन शरणीकरणीयत्वात् अथातो

ब्रह्मजिज्ञासेत्यारभ्य अनावृत्तिः शब्दादित्येवमन्तं कृत्स्नं ब्रह्ममीमांसाशास्त्रं जीवब्रह्माभेदजगन्मिथ्यात्वपरमिति सिद्धम्।

Colophon:

इति श्रीवेल्लालकुलसंभवेनोमामहेश्वरेण विरचितायां तत्त्वचन्द्रिकायां फलाध्यायविचारो नाम द्वादश उल्लासः।

तत्त्वचन्द्रिका समाप्ता।

813 8. G. 6.

तत्त्वचन्द्रिका—उमामहेश्वरकृता

Paper. 190 Foll. $12\frac{1}{2} \times 8\frac{3}{4}$ inches. 36 lines in a page. Telugu script. Old. Much injured. Illegible writing.

This is the original MS. from which the transcript described in the last number was made.

814 41. A. 52.

तत्त्वप्रदीपिका—चित्सुखमुनिकृता

Paper. 102 Foll. $10\frac{1}{2} \times 3\frac{1}{2}$ inches. 11 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The leaves bear the serial numbers 1 to 115. Foll 22, 29, 59 to 69 are missing.

After Vācaspati and Prakāsātman, our author Citsukha was a great philosopher and author in Advaita-Vedānta. His Tattvapradīpikā is an important treatise on S'rī S'aṁkarācāryā's line of Advaita-Vedānta. The work gives a correct analysis and interpretation of some of the most important concepts of Advaita-Vedānta. He refers to good number of works among which the following few may be mentioned: Nyāyalīlāvatī, Prasastapādabhāṣya, Kusumāñjali, Ṛjuvimalā, Tātparyaparis'uddhi, Mānamanohara, and Nyāyaratnadīpāvalī. The work contains the following four Paricchedas: Samanvaya, Avirodha, Sādhana and Phala. The author Citsukha was the pupil of Jñānottamamuni. His other works are: Brahmasiddhivyākhyā Abhiprāyaprakās'ikā, Nyāyamakarandavyākhyā, Pramāṇamālāvyākhyā, Khaṇḍanakhaṇḍakhādyavyākhyā, Vivarṇatātparyadīpikā, Adhikaraṇamañjārī, Bhāṣyabhāvaprakās'ikā, Viṣṇupurāṇavyākhyā, Adhikaraṇasaṁgati and Naiṣkarmyasiddhiṭīkā. He belonged to the period about 1200 A.D. The work along with commentary Nayanaprasādanī was printed and published in the Nirnayasagara Press, Bombay in 1915.

Contains the first Paricchedā without beginning.

Beginning:

ननु कथं विगलितनिखिलभेदब्रह्मप्रतिपत्तिः? प्रत्यक्षादिविरोधात्। तथाहि—प्रत्यक्षेण तावदिदमस्माद्भिन्नमिति नीलपीतादेर्भेदमध्यवस्यामः। अथ मतम्—किं प्रत्यक्षं भेदमेव गोचरयति, उत वस्त्वपि। यदापि वस्त्वपि, तदापि भेदपूर्वकं तद्गोचरयेत्, तत्पूर्वकं वाभेदम्? युगपदेव वोभयम्? नाद्यः, धर्मिप्रतियोगिवस्तुप्रतिपत्तिमन्तरेण भेदस्य प्रतिपत्तुमशक्त्यत्वात्। अत एव न भेदग्रहपूर्वको वस्तुग्रहः, न वस्तुग्रहपूर्वको भेदग्रहः; बुद्धेर्विरम्य व्यापाराभावात्।

End:

न चाभाससमानयोगक्षेमता, भारताध्ययनानाम-

नादित्वनिरसनेन पुरस्तान्निरस्तत्वात् । एवमपौरुषेयतया वेदान्तानामसंभाविताशेषपुरुषदोषसंसर्गेभ्यस्तेभ्यो विगलितनिखिलभेदविशुद्धब्रह्मप्रमितिः सिध्यतीति सिद्धम् ।

Colophon :

इति तत्त्वप्रदीपिकायां प्रथमः परिच्छेदः ।

विज्ञानं स्वप्रकाशं भवति च पुरुषस्तद्वपुर्भावरूपं
ध्वान्तं मिथ्याप्रपञ्चो भ्रमभरनिरयोऽनादिभावोऽप्रबोधः ।
आरोपारोप्यसिद्धप्रमितिजनकताखण्डतास्वप्रमात्त्वं
शक्तिर्लक्ष्यः पदार्थान्वय इति कथिताः पौरुषेयो न वेदः ॥

The front page of the MS. gives the name of the owner of the MS :

गोविन्दभास्करदशपुत्रस्य राघवगोविन्देन दत्ता ।

815 36. F. 13.

तत्त्वप्रदीपिका—चित्सुखमुनिकृता

Paper. 9 Foll. 11 × 4 inches. 12 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Wants three leaves in the beginning.

Contains the 4th Paricceda only without beginning.

Reads the following end :

न हि सर्वविमोकः परमात्मसाक्षात्कारमन्तरेणोपपन्नः, रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तत इति स्मरणात् । यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ; अथ मर्त्योऽमृतोभवत्यत्र ब्रह्म समश्नुते इति श्रुतेश्च । तदेवं श्रुतिस्मृतिपुराणादिष्वाश्रीयमाणा जीवन्मुक्तिः प्रद्वेषमात्रेण नापलापयितुं शक्यत इति सिद्धम् ।

Colophon :

इति श्रीगौडपादाचार्यपरमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यश्रीमत्परमहंसपरिव्राजकाचार्यश्रीचित्सुखमुनिविरचितायां तत्त्वप्रदीपिकायां चतुर्थः परिच्छेदः समाप्तः ।

The scribe adds :

नृसिंहेनालेखि ।

816 21. G. 18.

तत्त्वप्रदीपिका—चित्सुखमुनिकृता

Palm-leaf. 191 Foll. 12½ × 1 inches. 6 lines in a page. Grantha script. Old. Much injured. Good writing.

Wants beginning in the 1st chapter and breaks off in the 2nd chapter.

817 35. B. 144.

तत्त्वप्रदीपिका—चित्सुखमुनिकृता

Paper 75 Foll. 11½ × 3½ inches. 9 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The leaves bear the serial numbers 7 to 93. The leaves Nos. 17, 22, 26, 48, 55, 61, 62, 65, 67 and 77 to 79 are missing.

Contains a fragment of the 1st Paricheda.

818 35. B. 144.

तत्त्वप्रदीपिकाव्याख्या नयनप्रसादनी—प्रत्यक्स्वरूपाचार्यकृता

Paper. 5 Foll. 11½ × 3½ inches. 9 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The Foll. bear the serial numbers 1 to 5.

This is an authoritative commentary on Citsukhamuni's Tattvapradīpikā. The commentary is called Nayanaprasādanī or Mānasanayanaprasādanī. The commentator Pratyaksvarūpācārya was the pupil of Pratyakprakāsācārya. His date must be about 1400 A.D. The commentary with the text was printed and published in the Nirnayasagar Press, Bombay in 1915.

The MS. contains a small portion in the beginning of the 3rd Pariccheda.

Beginning :

किं त्रैलोक्यसरोवरस्य न चिरादुन्निद्रमेकाम्बुजं
किं वा योगिमनःसरोरुहवनप्रोद्बोधको भानुमान् ।
किं वा संसृतिसूरतश्रजनतामोदे सुधादीधिति-
र्देवोऽसौ विविधं विभावितवपुः श्रीसुन्दरः पातु वः ॥
इति स्म निर्वैरकथं निरूपितं
समस्तवेदान्तवचोभिरद्वयम् ।
अथ स्वतः सिद्धविमुक्तये नयै-
रुपायविज्ञानशरीरचिन्तनम् ॥

अनेन च हेतुहेतुमद्भावलक्षणः परिच्छेदयोः संवन्धोऽपि दर्शितः । अविरुद्धतया साध्येऽवधृते हि साधनान्वेषणावकाश इति । अपरोक्षज्ञानं जनयतीत्युक्तममृष्यमाणा वैशेषिकादयो मीमांसकाश्च केचिन्मण्डनमिश्रप्रभृतयः प्रत्यवतिष्ठन्ते—ननु कथमिति । न केवलं शब्दत्वहान्या प्रत्यक्षत्वापत्तिर्बाधिका, अनुपलब्धिपराहतिश्चेत्याह—धर्माधर्मेति ।

End :

विपक्षे बाधसंभवादित्येतत् विवृणोति—इह त्विति । श्रूयतां नाम, ततः किम्? तत्राह—स चेति । यथा चाज्ञाननिवृ.

819 10. E. 35.

तत्त्वबोधः—मुकुन्दमुनिकृतः

Paper. 27 Foll. 8¾ × 5 inches. 9 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is a small Prakaraṇa work explaining the principles of Advaita-Vedānta. This work is also named Vivekasindhu or Paramārthabodha in the MSS. available in the Tanjore Palace Library. (Nos. 7530 and 7531 of the Descriptive Catalogue of the Sanskrit MSS. in the Tanjore Library Vol. XIII). The author Mukundamuni is known to have been the pupil of one Harināṭha and possessed the surname Muktināṭha.

Complete.

Beginning :

अगुणाय गुणाढ्याय स्वेच्छानन्दस्वरूपिणे ।
शुद्धाय स्वप्रकाशाय श्रीराममुनये नमः ॥
निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः ।
कथं सर्गादिकर्तृत्वं ब्रह्मणोऽप्युपपद्यते ॥

सत्त्वरजस्तमोगुणरहितस्य सर्वप्रमाणातीतस्य विद्याविद्यारहितस्य केवलस्य ब्रह्मणः सृष्टिकर्तृत्वं कथं घटते? एतादृशं ब्रह्म जगतः कारणमिति न वदन्ति सूक्ष्मतत्त्वज्ञाः निरालम्बसिद्धा ब्रह्मवादिनः । तर्हि किं पुनः कारणम्? मायाशबलं ब्रह्म कारणमिति । मायाशबलं ब्रह्म किमिति चेत्, मायासहितं मायाशबलमित्युच्यते । नन्वेतन्न संभवति । चैतन्यं स्वयंप्रकाशम् । माया च तमोरूपा । न त्वविद्या स्वयंज्योतिरात्मानं ढौकते । कूटस्थमद्वितीयं चात्मानं तमःस्वरूपाविद्या कथमावृणोति सूर्यं तम इव?

परिहरति—सत्यम्; अविद्यास्वभाव एष यत्र न संभवति तत्र संभव: प्रतीयमानत्वात्।

End:

अज्ञानस्य ज्ञानं स्वभावो न भवति। ज्ञानस्यापि ज्ञानं स्वभावो न भवति। किंतु यदा यदा ज्ञानमागत्य ज्ञानं स्पृशति तदा मध्ये ज्ञानमुत्पद्यते। उत्पद्यमानं किमज्ञानं नि:शेषं नाशयतीति, ज्ञानं वा नि:शेषं नाशयतीति चर्चायामज्ञानं नि:शेषं नाशयत् स्वयमपि नाशमामुवत् ज्ञानमात्रमवशेषयति।

Colophon:

इति सकलयोगीश्वराचार्यश्रीहरिनाथचरणारविन्दानवरतशुश्रूषाप्रसादलब्धज्ञानतरणिकिरणश्रेणिनिरस्त-संसारविकारेण श्रीमुक्तिनाथमुकुन्दमुनिना विरचितो निखिलाज्ञानदहनस्तत्त्वबोध: समाप्त:।

Then the scribe adds:

शुभं भवतु कल्याणमारोग्यधनसंपद:।
मम शत्रुविनाशाय दीपज्योतिर्नमोऽस्तु ते॥

संवत् १७९२ वर्षे कार्त्तिकमासे कृष्णपक्षे तृतीयायां तिथौ श्रीगुरुवासरे लिखितम्। गिरिनारायणज्ञातीयजोशीशंकरेण लिखितम्।

मङ्गलं लेखकानां तु पाठकानां तु मङ्गलम्।
मङ्गलं सर्वलोकानां भूमिभूपतिमङ्गलम्॥

820 8. D. 78.

तत्त्वबोध:—वासुदेवेन्द्रमुनिकृत:

Paper. 6 Foll. 7½ × 4¾ inches. 9 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is another Tattvabodha of different author. This also gives a brief summary of the principles accepted in the school of Advaita-Vedanta of S'rī S'aṁkarācārya. The other copies of this work give the author's name as Vāsudevendra in the colophons.

Complete.

Beginning:

वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुम्।
मुमुक्षूणां हितार्थाय तत्त्वबोधो विधीयते॥

साधनचतुष्टयसंपन्नाधिकारिणां मोक्षसाधनभूतं तत्त्वविवेकप्रकारं वक्ष्याम:। साधनचतुष्टयं किम्? नित्यानित्यवस्तुविवेक:, इहामुत्रार्थफलभोगविराग:, शमादिषट्कसंपत्ति:, मुमुक्षुत्वं चेति। नित्यानित्यवस्तुविवेको नाम—नित्यं वस्त्वेकं ब्रह्म, तद्व्यतिरिक्तं सर्वमनित्यमिति। अयमेव नित्यानित्यवस्तुविवेक:।

End:

तथाच श्रुति:—सुहृद: पुण्यकृत्यां द्विषन्त: पापकृत्यां गृह्णन्तीति। तथात्मवित् संसारं तीर्त्वा ब्रह्मानन्दमिहैव प्राप्नोति। तरति शोकमात्मविदिति श्रुते:।

तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथवा।
ज्ञानसंप्राप्तिसमये मुक्तोऽसौ विगताशय:॥

इति स्मृते:।

Colophon:

तत्त्वबोध: समाप्त:।

The scribe adds:

लिखितं ब्रह्मचारिबलदेवेन संवत् १८२३ मिते वैशाखकृष्ण ४ बुधवासरे।

821 22. D. 61.

तत्त्वबोध:—वासुदेवेन्द्रमुनिकृत:

Palm-leaf. 5 Foll. 16 × 1½ inches. 6

lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

Reads the following end :

जलोपाधौ निवृत्ते सति प्रतिबिम्बमेव बिम्बं यथा स्यात्, वर्त्युपाधौ निवृत्ते सति दीप एव महाग्निर्यथा स्यात्, अविद्यातत्कार्योपाधौ निवृत्ते सति जीवश्च तथा सच्चिदानन्दपरिपूर्ण ब्रह्म भवतीति सकलशास्त्रसंग्रहतत्त्वविवेकः । गुरुकटाक्षवीक्षणप्रसादात् कृतमिदं प्रकरणम् । ये सर्वदार्थविचारं कुर्वन्ति ते सकलशोकांस्तरन्ति, सकलश्रेयांस्यनुभवन्ति, जीवन्मुक्ता भवन्ति, कृतार्थाः स्युः ।

Colophon :

इति तत्त्वबोधः समाप्तः ।

Then adds the following verses :

देहेन्द्रियेषु वैराग्यं यम इत्युच्यते बुधैः ।
अनुरक्तिपरे तत्त्वे नियमः परिकीर्तितः ॥
सर्ववस्तुसदाहीनं भावमासनमात्मनः ।
जगत्सर्वमिदं मिथ्या प्राणायामः स कीर्तितः ॥
चित्तस्यान्तर्मुखीभावः प्रत्याहारः स उच्यते ।
सोऽहं चिन्मात्र एवेति चिन्तनं ध्यानमुच्यते ॥
चित्तस्य निश्चलीभावो धारणा परिकीर्तिता ।
ध्यानस्य विस्तृतिः सम्यक् समाधिरभिधीयते ॥

822 25. F. 19.

तत्त्वबोधः—वासुदेवेन्द्रमुनिकृतः

Palm-leaf. 2 Foll. 20 × 2 inches. 12 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

Reads the following end :

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥

इत्यादि ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्वासुदेवेन्द्रस्वामिकृतं तत्त्वबोधप्रकरणं समाप्तम् ।

823 26. H. 21.

तत्त्वबोधः—वासुदेवेन्द्रमुनिकृतः

Palm-leaf. 9 Foll. 9½ × 1¼ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

824 29. C. 6.

तत्त्वबोधः—वासुदेवेन्द्रमुनिकृतः

Palm-leaf. 6 Foll. 14½ × 1 inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

Reads भिद्यते हृदयग्रन्थिः etc. at the end.

825 30. G. 13.

तत्त्वबोधः—वासुदेवेन्द्रमुनिकृतः

Palm-leaf. 6 Foll. 13 × 1 inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

826 25. O. 9.

तत्त्वबोधः

Palm-leaf. 5 Foll. 12 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Similar to the work mentioned above with different version. The author's name is not known.

Complete.

Beginning :

शुक्लाम्बरधरं विष्णुं + सर्वविघ्नोपशान्तये ॥
संसारं तर्तुमिच्छूनां प्रस्थानानधिकारिणाम् ।
गुरुं विनायकं नत्वा तत्त्वबोधो विधीयते ॥

साधनचतुष्टयवतामधिकारिणां तत्त्वबोधाख्यं प्रकरणं वदामीत्यर्थः । साधनचतुष्टयं नाम नित्यानित्यवस्तुविवेकः । इहामुत्रार्थफलभोगविरागः । शमादिषट्कसंपत्तिः, मुमुक्षुत्वं चेति । नित्यानित्यवस्तुविवेको नाम सच्चिदानन्दस्वरूपमेकं ब्रह्म नित्यम्, एतदन्यत् वस्त्वनित्यमिति विवेको नित्यानित्यवस्तुविवेकः । इहामुत्रार्थफलभोगविरागो नाम इह लोके स्रक्चन्दनवनितादिविषयेषु अमुत्र स्वर्गादिलोकभोगादिषु च काङ्क्षाराहित्यमेव ।

End :

तस्मात् चिन्मात्रव्यतिरिक्तं वस्त्वन्तरं नास्त्येव । चिन्मात्ररूप एवाहमिति यो जानाति स एव मुक्त इति वेदान्तसिद्धान्तः ।

स्थूलसूक्ष्मादिदेहानामात्मन्यारोप एव च ।
अपवादस्तथाप्येषां सम्यगत्र प्रदर्शितः ॥

Colophon :

इति तत्त्वबोधप्रकरणं समाप्तम् ।

827 19. P. 2.

तत्त्वमसिदशकम्

Palm-leaf. 2 Foll. 7 × 2 inches. 14 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves bear the serial numbers 32 and 33.

Ten verses each containing its 4th pāda as तत्त्वमसि etc. and teaching the identity of the soul with the Brahman as accepted in the school of Advaita-Vedānta. The author's name is not known.

Complete.

Beginning :

निस्तमसि नीरजसि निर्गलितत्त्वे
तेजसि विवेकजुषि भेदमतिशून्ये ।
निर्वचनमानसपदादिकमचिन्त्यं
तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ १ ॥

End :

शुक्तिगुणमादि रजतादिरिव विदितं
यद्विश्वमखिलं विविधमोहगुणभावम् ।
नैव परमार्थमखिलैः पुरुषवाच्यं
तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ १० ॥

828 34. O. 41.

तत्त्वविवेकः—नृसिंहाश्रमकृतः

Palm-leaf. 11 Foll. 23½ × 2½ inches. 20 lines in a page. Grantha script. Old. Injured. Good and small writing.

The Tattvaviveka, also called Vedāntatattvaviveka is an original treatise on Advaita-Vedānta dealing with the characteristics of Avidyā, Jīva, Brahman etc. as taught by the Upaniṣadic passages *Tattvamasi* etc. The author Nṛsiṁhāśrama was the pupil of Gīrvāṇendrasarasvatī and Jagnnāthāśrama. His other works are : Tattvavivekadīpana, Advaitadīpikā, Pañcapādikāvivaraṇavyākhyā

Bhāvaprakāśikā, Bhedadhikkāra, Saṁkṣepaśārīrakavyākhyā Tattvabodhīni, Pañcapādikāvyākhyā Vedāntaratnakośa (D. No. 7065 of the Tanjore Library) and Nṛsiṁhavijñāpana. Another MS. of this work available in the India Office Library, (Nos. 2379 and 2380), gives the date of composition as Saṁ. 1604=1547 A.D. Therefore our author may be fixed in the middle of the 16th century A.D.

Complete in 2 Paricchedas.

Beginning:

विश्वस्य योनिं विश्वेशं विज्ञानानन्दविग्रहम् ।
नरकेसरिणं वन्दे प्रत्यञ्चं पुरुषोत्तमम् ॥ १ ॥
साक्षात्कृतब्रह्मभासा प्रहसन्मुखपङ्कजम् ।
महीयांसमहं वन्दे गरीयांसं जगत्पतिम् ॥ २ ॥
गुरुणा करुणापूर्वमुपदिष्टाद्वयात्मनः ।
कुर्वे तत्त्वविवेकं तं वीक्षतां नरकेसरी ॥ ३ ॥

इह खलु कश्चित्कुतश्चिद्भाग्योदयान्निर्व्यलीकं नित्यादिभिराराधिताराध्यपादभगवदनुग्रहवशादतिविमलमानसः स्वयमेवेत्थं जगत्तत्वमालोचयति । ननु कर्मणां स्वतन्त्रफलसाधनानां कथं मनोवैमल्यहेतुत्वम्, तथा च संस्कारकर्मतापत्तिरिति चेत्, न तावदर्थविरोधः, नित्यादीनां पापनिवर्तनस्वभावत्वात् ।

End:

तस्मात् सिद्धं जीवस्याद्वैतब्रह्मसाक्षात्कारात् भेदभ्रमनिवृत्त्या सच्चिदानन्दब्रह्मावाप्तिरिति ।

जिज्ञासितव्यमनवद्यपुमर्थचित्तैः
प्रज्ञासुखं स्वमहिमानवशेषयोनिः ।
शास्त्रैकहृद्यतमशेषविधेयशेषि
श्रेयोऽस्तु नो नरमृगाकृति मङ्गलाब्धिः ॥
तुष्यन्त्यव्यक्तवचसा मुग्धस्य पितरो ननु ।
मम त्वत्प्रीतये भूयाद्वाणीयं नरकेसरिन् ॥
क्वाहं महीयसाशास्यं वात्सल्यं क्व गुरोरिदम् ।
अपि चण्डालकलशे काशते खलु भास्करः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमज्जगन्नाथाश्रमपूज्यपादशिष्यश्रीमन्नृसिंहाश्रमविरचिते तत्त्वविवेके द्वितीयः परिच्छेदः ।

829 33. K. 7.

तत्त्वविवेकः—नृसिंहाश्रमकृतः

Palm-leaf. 33 Foll. 15 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the first Paricchedа without the beginning, and a fragment of the 2nd Paricchedа.

830 34. O. 41.

तत्त्वविवेकव्याख्या तत्त्वविवेकदीपनम्—नृसिंहाश्रमकृतम्

Palm-leaf. 32 Foll. 23½ × 2½ inches. 20 lines in a page. Grantha script. Old. Injured. Good and small writing.

This is a commentary on Nṛsiṁhāśrama's Tattvaviveka described in the last number. The commentary was written by the same author as that of the text. The commentary is called Tattvavivekadīpana *alias* Advaitaratnakośa. The author Nṛsiṁhāśrama is believed to have been the contemporary of Appayadīkṣita and Bhaṭṭojidīksita. He lived in the middle of the 16th century A.D.

The commentary is not available in print.

Complete in 2 Paricchedas.

Beginning :

यदालिङ्ग्य प्रमाणानि बोधयन्त्यात्मनः स्फुटम् ।
प्रमेयं प्रचुरानन्दं तं वन्दे नृहरिं गुरुम् ॥

प्रेक्षावत्प्रवृत्त्यङ्गमभिधेयादि दर्शयन्नेव निर्विघ्नपरिसमाप्तिकामनया कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति —विश्वस्येति । प्रत्यञ्चं पुरुषोत्तमं वन्द इत्यनेन जीवब्रह्मभेदस्तत्त्वमस्यादिवाक्यार्थः प्रकरणप्रतिपाद्यो दर्शितः । प्रत्यञ्चं जडानृताहंकारादिभ्यः प्रातिकूल्येन सत्यज्ञानानन्दादिस्वरूपतयाञ्चति प्रकाशत इति निष्कृष्टाहंकारादि चैतन्यं प्रत्यक् । तदनेन शोधितत्वंपदार्थः । पुरुषोत्तमं परमात्मानं नीलगिरीशम्, उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इति स्मृतेः । अनेन शोधिततत्पदार्थ उक्तः । अनयोः सामानाधिकरण्याच्चाभेदः ।

End :

शास्त्रस्यैकस्यैव तात्पर्यगोचरः । न त्वनुमानादिगोचर इति तृतीयसूत्रद्वितीयवर्णकस्य समन्वयसूत्रप्रथमवर्णकस्य चार्थसंग्रहः । अशेषाणां यज्ञादिविधेयानां जिज्ञासादिद्वारेणाभिव्यङ्ग्यतया ब्रह्म शेषि, न तु कस्यचिच्छेषमिति द्वितीयवर्णकार्थसंग्रहः । श्रेयः परमानन्दः । नरः जीवः । मृग्यते अन्विष्यते मुमुक्षुभिरिति मगः परमात्मा । तदाकृतिः प्रत्यगभिन्नब्रह्मात्मकं श्रीनृसिंहाकारमित्यर्थः । मङ्गलाब्धिः स्वयं श्रेयोरूपमपि श्रेयःसाधनानामपि परा काष्ठेत्यर्थः । स्वकृतिं परमेश्वराय निवेदयते—तुष्यन्तीति । स्वस्येदं सामर्थ्यं गुर्वायत्तमिति दर्शयन् गुरुं महीकरोति—काहमिति ।

यदीक्षणेन संनुन्नं मायाविक्रीडितं जगत् ।
श्रीनृसिंहस्य तस्यैषा कृतिः कल्याणदास्तु वः ॥
अरुचिरिह न कार्या साधवः साध्वसाधु-
प्रकटनपटु चेतोऽमत्सरं वो यदि स्यात् ।
न हि कुशलपरीक्षादत्तचित्ताः कथंचि-
च्छतमखमणिमालां काचबुद्ध्योत्सृजन्ति ॥

Colophon :

इति श्रीमत्परमंहसपरिव्राजकाचार्यश्रीजगन्नाथाश्रमपूज्यपादशिष्यश्रीनृसिंहाश्रममुनिविरचिते अद्वैतरत्नकोशाख्ये तत्त्वविवेकदीपने द्वितीयः परिच्छेदः ।

831 33. K. 7.

तत्त्वविवेकव्याख्या तत्त्वविवेकदीपनम्—नृसिंहाश्रमकृतम्

Palm-leaf. 77 Foll. 15 × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Contains fragments of the 1st and 2nd Paricchedas.

832 28. N. 28.

तत्त्वविवेकव्याख्या तत्त्वविवेकदीपनम्—नृसिंहाश्रमकृतम्

Palm-leaf. 144 Foll. 13½ × 1⅛ inches. 7 lines in a page. Grantha script. Old. Much injured. Good writing.

Wants beginning and end in the 1st Paricchedа and breaks off in the 2nd Paricchedа.

833 33. C. 32.

तत्त्वविवेकव्याख्या तत्त्वविवेकदीपनम्—नृसिंहाश्रमकृतम्

Palm-leaf. 118 Foll. 18 × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The folios bear the serial numbers 84 to 201.

Breaks off in the 2nd Paricchedа.

834 64950.

तत्त्वविवेकव्याख्या तत्त्वविवेकदीपनम्—नृसिंहाश्रमकृतम्

Paper. 238 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 15 lines in a page. Devanāgarī script. New. Good writing.

This is a transcript made from the original MSS. described under Nos. 831 and 833 above.

Breaks off in the 2nd Pariccheda.

835 9. I. 13.

तत्त्वविवेकदीपनव्याख्या भावप्रकाशिका—कालहस्तीश्वरयज्वकृता

Paper 339 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 16 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is a commentary on the Tattvavivekadīpana of Nṛsiṁhāśrama. The commentary is called Bhāvaprakāśikā. The commentator Kālahastīśvarayajvan was the pupil of Raghunāthāśrama. His other work is Bhedadhikkāravivṛti (R No. 2187 of the Madras Govt. Oriental MSS. Library).

Complete.

Beginning :

प्रणम्य दक्षिणामूर्तिं रघुनाथाश्रमान् गुरून् ।
भावप्रकाशिकाद्वैतरत्नकोशस्य रच्यते ॥

यदालिङ्गयेति । यदिति अव्ययम् । यमित्यर्थः । यद्वा तमित्यत्र विधेयप्राधान्यात् पुंलिङ्गनिर्देशः । प्रमाणं प्रत्यक्षादिप्रमितिः तत्करणं वा । आलिङ्गनमाश्रयता विषयता च । प्रत्यक्षादिप्रमितीनां चैतन्यविषयत्वं वक्ष्यते । वृत्तीद्धबोधस्य तदविषयत्वेऽपि बोधेद्धवृत्तेस्तद्विषयत्वात्, करणस्यापि तद्द्वारा तद्विषयत्वात्, अन्तःकरणस्य तत्र कल्पिततया तदाश्रयत्वात् तत्परिणामवृत्तेस्तदाश्रयत्वं स्फुटमेव । प्रमितिपक्षे बोधयन्तीत्यत्र बोधनमावरणनिवृत्तिः । स्फुटता च संशयनिवृत्तिः । तथाच बोधयन्ति चैतन्यमभिव्यञ्जयन्ति आवरणनिवृत्तिद्वारा अज्ञाननिवर्तनं कुर्वन्तीति यावत् । करणपक्षे बोधनं बोधजननम् । स्फुटता च आवरणनिवृत्तिः साक्ष्यभेदो वा । तथाच आवरणनिवर्तकं साक्ष्यभेदसंपादकं वा ज्ञानमुत्पादयन्तीत्यर्थः ।

End :

आकाशवैलक्षण्यमाह—आनन्दात्मेति । न चैवं दुःखप्रागभावार्थिनः प्रायश्चित्ते प्रवृत्तिर्न स्यादिति वाच्यम्, दुरितध्वंसार्थिन एव तत्र प्रवृत्तेः । अत एवेष्टसाधनताज्ञानमेव सर्वत्र प्रवर्तकम् । यद्वा यद्व्यतिरेके चासत्त्वमित्यत्र कादाचित्काभावो विवक्षितः प्रायश्चित्तानुरोधादिति ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरघुनाथाश्रमपूज्यपादशिष्यश्रीकालहस्तीश्वरयज्वकृतायामद्वैतरत्नकोशभावप्रकाशिकायां द्वितीयः परिच्छेदः ।

The scribe adds :

अद्वैतरत्नवरकोशनिगूढभाव-
संबोधिकां कृतिमलेखयदीडितस्य ।
श्रीकालहस्तिमखिनः पटुलेखकेन
नारायणाध्वरकृदीश्वरयज्वनाम्ना ॥

836 30. B. 15.

तत्त्वविवेकदीपनव्याख्या अद्वैतरत्नकोशपालिनी—रामाध्वरिकृता

Palm-leaf. 80 Foll. $19 \times 1\frac{1}{2}$ inches.

8 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Wooden boards are added to both sides.

This is another commentary on the Tattvavivekadīpana of Nṛsiṁhāśrama. The commentary is called Advaitāratnakośapālinī. The Commentator Rāmādhvarin was the son of Kṛṣṇayajvan who was the son of Bhaktanātha, the pupil of Nṛsiṁhāśrama. He must have lived in the end of the 17th century A.D.

Breaks off in the 2nd Pariccheda.

Beginning :

वन्दे यशोदया श्लाघ्यं सत्यानन्दपदेरितम् ।
नारायणानन्दकृष्णं नरत्राणपरायणम् ॥
यद्भासा भासते लोको यत्प्रभावेन तायते ।
तं वन्दे प्रचुरानन्दं रामं दाशरथिं गुरुम् ॥
ब्रह्मादयोऽपि यद्भक्त्या प्रारम्भान् फलवत्तया ।
लभन्तेऽभीष्टवरदं तं वन्दे गणनायकम् ॥
श्रीमद्रामाध्वरीन्द्रेण कृष्णयज्वेन्द्रसूनुना ।
अद्वैतरत्नकोशस्य विवृतिः क्रियतेऽधुना ॥

प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजने दर्शयन् चिकीर्षितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं कृतमपि मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—यदालिङ्गयेति । नृहरिमिति । स्वविषयाखण्डाकारज्ञानेनाज्ञानतत्कार्यं हरतीति हरिः परमात्मा । ना जीवः । ना चासौ हरिश्चेति नृहरिः । अनेन समासेन जीवब्रह्मणोरैक्यलक्षणः शास्त्रविषयो दर्शितः ।

Colophon found at the end of the first Pariccheda :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीनृसिंहाश्रमपूज्यपादशिष्यश्रीमद्वक्तनाथपौत्रेण श्रीमत्कृष्णयज्वेन्द्रसूनुना रामाध्वरीन्द्रेण विरचितायामद्वैतरत्नकोशपालिन्यां प्रथमः परिच्छेदः समाप्तः ।

End :

अनवगतेति । क्षित्यादिकं सकारणं कार्यत्वात् इत्यनुमानसिद्धजगत्कारणत्वानुवादेन जगदुत्पत्त्यादिकारणानां लोक एकत्वानवगमेन तदेकत्वप्रतिपादनपूर्वकं.

One extra leaf added at the beginning contains a list of books given to one Keśavācārya.

837 29. G. 4.

तत्त्वसंख्यानखण्डनम्—त्र्यम्बकभट्टकृतम्

Palm-leaf. 3 Foll. 17½ × 1⅛ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Herein the author Tryambakabhaṭṭa attempts to refute Ānandatīrtha's Tattvasaṁkhyāna which gives a concise description of the Tattvās as accepted in the school of Dvaita-Vedānta. The author takes also the views of Jayatīrtha and other commentators on the Tattvasaṁkhyāna, for his criticism. The author's other works are : Advaitasiddhāntavaijayantī and S'rutimatoddyota (Vāni Vilas Press, Srirangam), S'rutimatānumānopapatti (R No. 2202 of the Madras Govt. Oriental MSS. Library). He refers himself as the pupil of Brahmānandasarasvatī in his other works mentioned above.

Complete.

Beginning :

पूर्णज्ञानाय निर्भेदपरमानन्दमूर्तये ।
व्यासशंकररूपाय श्रीपरब्रह्मणे नमः ॥

पूर्णानन्दाय सत्यानामपि सत्याय शंभवे ।
निर्दोषज्ञानरूपाय नमोऽनन्ताय विष्णवे ॥

तत्त्वज्ञानस्य निखिलपुरुषार्थसाधनत्वात् तत्त्वं निरूप्यते । अबाध्योऽर्थस्तत्त्वम् । बाध्यत्वं च स्वसंसर्गिनिष्ठव्याप्यवृत्त्यत्यन्ताभावप्रतियोगित्वम् । न चैवमत्यन्तासतोऽपि तत्त्वरूपतापत्तिः, कालसंबन्धित्वेनापि विशेषणीयत्वात् । न च मुक्तिदशायां कालसंबन्धाभावादात्मनस्तत्त्वरूपता न स्यादिति वाच्यम्, कालसंबन्धोपलक्षितनिष्ठाबाध्यताया एव तत्त्वपदप्रवृत्तिनिमित्तत्वात् । यत्तु—अनारोपितरूपं तत्त्वम् । न च कूर्मरोमादावन्यत्रानारोपिते तुच्छेऽतिव्याप्तिः, प्रतीतौ सत्यामित्यस्यापि वाच्यत्वात् । इदमेव च स्वतन्त्रं परतन्त्रं च प्रमेयं द्विविधं स्मृतमित्यत्र प्रमेयपदेन सूचितं तत्त्वलक्षणम्, प्रतीतौ सत्यामनारोपितमित्यनेनारोपस्य प्रतीतविषयत्वलाभात् । न चेश्वरीयज्ञानविषयतामादायासत्यतिव्याप्तिः, तस्य सर्वविषयकत्वानुरोधेन सविषयकभ्रमविषयत्वस्यावश्यकत्वादिति वाच्यम् । सत्त्वप्रकारकयथार्थज्ञानविषयताया विवक्षितत्वादिति । तदसत्, सत्त्वस्य तत्त्वमात्रसाधारणस्यानतिप्रसक्तस्यावश्यं निवेश्यतया तस्यैव लक्षणत्वसंभवे इतरांशवैयर्थ्यात् ।

End :

अनुमानादिकं त्वप्रयोजकम् । विश्वं सत्यमित्यादिर्हि श्रुतिः इन्द्रबृहस्पतिस्तुल्यादिपरा । न तच्छेषभूतविश्वपरमार्थपरा, वाक्यभेदप्रसङ्गात् । किंतु प्रमाणान्तराविरुद्धप्रत्यक्षादिप्राप्तव्यवहारकालाबाध्यत्वरूपामुख्यसत्त्वानुवादिकैवेति न काचिदनुपपत्तिः । अधिकमन्यत्रानुसंधेयम् ।

Colophon :

इति त्र्यम्बकभट्टकृतौ तत्त्वसंख्यानखण्डनं समाप्तम् ।

838 21. H. 11.

तत्त्वसंग्रहः

Palm-leaf. 3 Foll. 14 × 1⅛ inches. 9 lines in a page. Grantha script. Old. Injured. Illegible writing.

Contains the folio Nos. 1, 6 and 7 only.

This is a small Prakaraṇa work explaining briefly the chief principles of Advaita-Vedānta. The author's name is not known.

Incomplete.

Beginning :

श्रीमद्गुरुपदद्वन्द्वं स्मृत्वाभीष्टप्रदं सदा ।
जिज्ञासुबालबोधार्थं क्रियते तत्त्वसंग्रहः ॥

अत्र खलु पदवाक्यप्रमाणज्ञेन भगवता बादरायणाचार्येण विरचितैः अथातो ब्रह्मजिज्ञासेत्यादिभिः अनावृत्तिः शब्दादनावृत्तिः शब्दादित्यन्तैरीशावास्यादिबृहदारण्यकान्तदशोपनिषच्छास्त्रनिर्णायकन्यायकलापरूपैः ब्रह्मसूत्रैः कर्तृत्वभोक्तृत्वादिलक्षणात्मकसंसारनिवर्तकनिर्गुणपरब्रह्मात्मैक्यापरोक्षविज्ञानमभिहितमपि तेषां सूत्राणां संग्रहरूपत्वेन न सर्वेषामप्यनायासेनोत्पद्यत इत्यत इह नित्यानित्यविवेकः, इहामुत्रफलभोगविरागः, शमादिषट्कसंपत्तिः, मुमुक्षुत्वं चेत्येवंविधसाधनचतुष्टयसंपत्तिद्वारेण करतलामलकवत्तद्विज्ञानमुत्पादयितुमेष प्रकरणारम्भः समुचित एव भवति ।

End :

यदुक्तं सकृच्छ्रवणमात्रेण निष्प्रतिबन्धज्ञानोदय इत्यादि, तदसत्, तथा शिष्टपरिग्रहाभावात् । युक्तिवि.

839 40. D. 12.

तत्त्वानुसंधानम्—महादेवानन्दसरस्वतीकृतम्

Paper. 48 Foll. 9½ × 5 inches. 10

lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is a Prakaraṇa work on Advaita school of Vedānta, teaching the main principles accepted in that school. The work is called Tattvānusaṁdhāna. The author Mahādevānandasarasvatī was the pupil of Svayaṁprakāśānandasarasvatī who was the pupil of Advaitānandasarasvatī. This Mahādevānandasarasvati is known to have written his Viṣnusahasranāmavyākhyā in S'aka year 1750=1694 (Page 197 of the Catalogue of Sanskrit MSS. in Jamnu, by M. A. Stein). Therefore his date must be the end of the 17th century A.D.

There are two printed editions of this work. One was printed in Telugu character at Madras in 1889 and the other in Devanāgarī character in Benares Sanskrit Series, in 1906.

Complete in 4 Paricchedas.

Beginning :

ब्रह्माहं यत्प्रसादेन मयि विश्वं प्रकल्पितम् ।
श्रीमत्स्वयंप्रकाशाख्यं प्रणौमि जगतां गुरुम् ॥१॥
देहो नाहं श्रोत्रवागादिको न
नाहं बुद्धिर्नाहमध्यासमूलम् ।
नाहं सत्यानन्दरूपश्चिदात्मा
मायासाक्षी कृष्ण एवाहमस्मि ॥ २ ॥

अथ मोक्षस्य वाक्यार्थज्ञानाधीनत्वात्तस्य च पदार्थज्ञानाधीनत्वात्तदर्थं तत्पदार्थं निरूपयामः । तत्पदार्थस्य लक्षणं द्विविधम्—तटस्थलक्षणं स्वरूपलक्षणं चेति । सृष्टिस्थितिलयकारणत्वं तटस्थलक्षणम् । यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्तीति श्रुतेः । तदुक्तं भवगवता सूत्रकारेण—जन्माद्यस्य यत इति ।

End :

भगवान् सूत्रकारोऽप्याह—अस्मिन्नस्य च तद्योगं शास्तीति । तस्मादहं ब्रह्मास्मीति तत्त्वमस्यादिवाक्यजन्यज्ञानाद् ब्रह्मभावलक्षणो मोक्षो भवतीति सिद्धम् । न स पुनरावर्तते,

तद्ब्रह्मयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥

इत्यादिश्रुतिस्मृतिभ्यः ।

श्रीमत्स्वयंप्रकाशास्मद्गुरुणा करुणावशात् ।
उपदिष्टं परात्मैक्यतत्त्वमावेदितं मया ॥
ब्रह्मेशविष्ण्वादिसमस्तदेवाः
स्वस्वाधिकारेषु विभीतचित्ताः ।
आज्ञावशाद्यस्य वसन्ति सर्वे
तं कृष्णमाद्यं शरणं प्रपद्ये ॥
या भारतीशर्वविरिञ्चिविष्णु-
देवादिभिर्नित्यमुपास्यमाना ।
सदाक्षमालाविलसत्कराग्रां
वाग्वादिनीं तां प्रणमामि देवीम् ॥
आकाशपुष्पमिव विश्वमहं निरीक्षे
मग्नोऽस्मि नित्यसुखबोधरसामृताब्धौ ।
प्रत्यञ्चमद्वयमनन्तसुखैकबोधं
साक्षात्करोमि पदभावनया गुरूणाम् ॥
यत्पादयुग्मकमलाश्रयणं विनाहं
संसारसिन्धुपतितः सुखदुःखभाक् स्यात् ।
यत्पादयुग्मकमलाश्रयणात्सुतीर्ण-
स्तद्देशिकाङ्घ्रिकमलं प्रणतोऽस्मि नित्यम् ॥
परमसुखपयोधौ मग्नचित्तो महेशं
हरिविधिसुरमुख्यान् देशिकं देहिमात्रम् ।

जगदपि न विजाने पूर्णसत्यात्मसंवि-
त्सुखतनुरहमात्मा सर्वसंसारशून्यः ॥
यदुकुलवररत्नं कृष्णमन्यांश्च देवान्
मनुजपशुमृगादीन् ब्राह्मणादीन्न जाने ।
परमसुखसमुद्रे मज्जनात्तन्मयोऽहं
गलितनिखिलभेदः सत्यबोधैकरूपः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपादशिष्यभगवन्महादेवसरस्वतीविरचितं तत्त्वानुसंधानं समाप्तम् ।

840 39. I. 19.

तत्त्वालोकटीका तत्त्वप्रकाशिका—प्रज्ञानानन्दकृता

Paper. 427 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from the original MS. available in the Bombay Branch of the Royal Asiatic Society, Bombay.

The Tattvālokaṭīkā is a commentary on the Tattvāloka which is a treatise on Advaita-Vedānta on the line of the Prakatārtha. It is believed that the author of the Tattvāloka was Janārdana *alias* the famous Ānandagirī. The commentary is called Tattvaprakāśikā. The commentator Prajñānānanda bows to Anubhūtisvarūpācārya as his grand-teacher and Narendranagarī, evidently as his direct teacher. Our author Prajñānānanda must have belonged to the beginning of the 14th century A.D. (For the details on Anubhūtisvarūpa, Janārdana, and Narendranagari, see the Introduction to the Tarkasaṁgraha of Ānandajnāna, published in the Gaekwad's Oriental Series, No. 3. Baroda in 1917).

Complete.

Beginning :

या चित्संसृतिमाश्रितेव तमसा संनद्धकामाधुना
निद्रामुद्रितविग्रहेव जरयत्यात्मस्थितं चात्मना ।
विश्वं शुद्धसुखस्वबुद्धविभवा नित्या विभुर्वैभवी
सानन्ता मम चेतसि प्रचरतां नित्यं परा सर्वदा ॥१॥
यत्कृपारससंसेकवर्धिताः शिष्यशाखिनः ।
प्रसूयन्ते महासिद्धीस्तं वन्दे गुरुमद्वयम् ॥ २ ॥
यस्यानुग्रहपात्रतामुपगते पुंसि प्रगल्भा गिरस्यायन्ते भवभूतिभीतिभिदुरज्ञानोद्भवे चात्मना ।
बोधद्वैधविधायितर्कतिमिरच्छेदोदये द्वैतिनां
तं वन्देऽनुभवस्वरूपयमिनं स्मृत्याखिलाभीष्टदम्॥३॥
कीर्तिर्यस्य चतुर्दशापि भुवनान्याक्रम्य भेजे प्रिया
प्रीत्याथ प्रतिभा परा प्रणयिनी स्थानानि विद्याभुवः ।
तावन्त्येव ततानि तानि बुभुजे स्वाराज्यभाजो भरार्यर्धातः सततं नरेन्द्रनगरीनामामृतं नौमि तम् (?) ॥४॥
यदुक्तं गुरुभिः सम्यक्तत्त्वालोके तु तन्मया ।
निबन्धीक्रियते भक्त्या मादृक्प्रीत्यै यथास्मृति ॥५॥
गुरुकृतिरपदोषा दोषभाज्यस्मदीये
जनयति निजशोभां नूनमेषा निबन्धे ।
मलिनमलिकुलं यत्पुष्पभङ्गीपिनद्धं
सरसमधुरभावं स्निग्धमुग्धं दधाति ॥ ६ ॥
मादृशोऽपि यशसे भृशोत्सुको
गल्भतेऽत्र विषये बुधोचिते ।
तन्नरेन्द्रनगरीयपादजः
प्रेरकोऽद्य जयति त्वनुग्रहः ॥

प्रारिप्सितग्रन्थपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिप्राप्ततत्त्वानुस्मरणच्छलेन प्रतिपाद्यमर्थं संक्षेपतो

दर्शयन्नाह—शुद्धानन्दघनोऽपीत्यादिना । तत्र तत्त्वमस्यादिवाक्यसिद्धं प्रत्यग्ब्रह्मणोरेकत्वमनुस्मरति—सोऽहमिति । तत्र केचिदाहुः—किमत्र संसर्गविशिष्टोऽखण्डो वा वाक्यार्थः? नाद्यः, क्रियाभावेन संसर्गानुपलम्भात् । न द्वितीयः, स्वगतभेदप्रसङ्गेनाद्वितीयश्रुतिविरोधात् । न तृतीयः, सोऽहंशब्दयोरपर्यायत्वात् । तान्प्रत्याह—शुद्धानन्दघनोऽपीति ।

The following colophon is found at the end of the first adhyāya :

इति श्रीमत्परमहंसपरिव्राजकाचार्यप्रज्ञानानन्दभगवतः कृतौ तत्त्वालोकटीकायां तत्त्वप्रकाशिकायां प्रथमोऽध्यायः ।

End :

ग्रन्थसमाप्तौ कर्तुर्नामोपनिबध्नाति—श्रीशारीरकेति । प्रत्यग्ब्रह्मणोरेकत्वं शास्त्रार्थमनुस्मरति—न विद्यत इति । तत्राद्वितीयस्वभावे सत्त्वे वेदान्तैकवेद्ये विशालजाला चासौ माया च, तस्याः कार्यं तस्मात् ज्ञानिसर्व . . . . ष्टयाहमिति विक्षेपः । तस्य कलास्तासां कल्पो येन विद्यते तदहं भवामीत्यन्वयः ।

या मायावयवेषु बिम्बितपरानन्दस्वभावा विभु-
र्नानाबुद्धिविधानतोऽनुभवति प्रौढीचकरोद्भवम् ।
संसारं क्वचिदन्यतो . . . ति ब्रह्मात्मविद्याफलं
मायोपाधिरधीश्वरस्य जगतो यो निश्चितिः सास्म्यहम्॥
यतो यतो भारनिमग्न . . . . ति
ततो ततो भासि यदि त्वमञ्जसा ।
तदा मयावाप्तमशेषमीप्सितं
किमन्यदिष्टं हि तवेक्षणात्परम् ॥
यस्यानुग्रहमात्रेण वागीशत्वसमुद्गमः ।
किं प्रज्ञानस्वरूपं तं न जाने गुरुमुत्तमम् ॥
प्रतिभाचन्द्रिकाचन्द्रं प्रोल्लसत्कीर्तिवर्त्मसु ।
अनुभूतिस्वरूपं तं प्रणमामि गुरुं परम् ॥
गाङ्गं पाथः सकलममलीकर्तुमेतत्किमागा-
दाशानां वा युगपदमलं वीक्षितं सं . . . . ।
ध्येयज्योतिः प्रकटमथवा कस्यचिद्विस्मितं वा
विश्वेशस्येति जयति यशस्तर्कितं तद्गुरूणाम् ॥
प्रज्ञानानन्दयतिना कृता तत्त्वप्रकाशिका ।
तत्त्वालोकस्य टीकेयं संतोषं तनुतात्सताम् ॥
मधुनि मधुकराणां कोविदत्वं किमेत-
द्यदुत कुसुमराशेस्तं तमाकृष्य सारम् ।
रसमभिजनयन् स्वादुप्रियं तद्विचित्रं
मधुततिरवलम्ब्या भाषते नेति . . . ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्य(प्रज्ञानानन्दकृता तत्त्वालोकव्याख्या) तत्त्वप्रकाशिका संपूर्णा ।

841 9. F. 43.

दशश्लोकी—शंकराचार्यकृता

Paper. 1 Fol. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 30 lines in a page. Grantha script. Old. Injured. Good writing.

In ten verses Sri S'aṁkarācārya teaches that the Ātman is distinct from the body, senses etc. The work is also called Advaitadas'aka or Nirvāṇadas'aka.

Complete.

Beginning :

न भूमिर्न तोयं न तेजो न वायु-
र्न खं नेन्द्रियं वा न तेषां समूहः ।
अनैकान्तिकत्वात्सुषुप्त्येकसिद्ध-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ १ ॥
न वर्णा न वर्णाश्रमाचारधर्मा
न मे धारणाध्यानयोगादयोऽपि ।
अनात्माश्रयाहंममाध्यासहाना-
त्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ २ ॥

End :

न चैकं तदन्यद् द्वितीयं कुतः स्या-
न्न वा केवलत्वं न चाकेवलत्वम् ।
न शून्यं न चाशून्यमद्वैतकत्वा-
त्कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥ १० ॥
दशश्लोकवर्या इमे सम्यगुक्ता
अहो शंकराचार्यवक्त्रारविन्दात् ।
नरा ये पठन्तीह संतोषबुद्धया
प्रयान्त्येव ते सच्चिदानन्दरूपम् ॥

842 19. P. 2.

दशश्लोकी—शंकराचार्यकृता

Palm-leaf. 2 Foll. 7 × 2 inches. 15 lines in a page. Grantha script. Old. Injured. Goodwriting.

Complete.

Reads the following colophon :

दशश्लोकी समाप्ता ।

843 20. F. 49.

दशश्लोकी—शंकराचार्यकृता

Palm-leaf. 2 Foll. 10½ × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

844 22. P. 6.

दशश्लोकी—शंकराचार्यकृता

Palm-leaf. 1 Foll. 14½ × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

845 25. M. 6.

दशश्लोकी—शंकराचार्यकृता

Palm-leaf. 1 Foll. 16¼ × 1¾ inches. 13 lines in a page. Grantha script. Old. Fair. Good writing.

The colophon mentions the name of the work as Advaitadaśaka.

The fourth pāda of the 10th verse is read as:

स एकोऽविशिष्टः शिवः केवलोऽहम् ।

Colophon :

इति शंकराचार्यपरिणताद्वैतदशकं संपूर्णम् ।

The MS. contains a good number of other works including some Upaniṣads and Prakaraṇa works on Advaita-Vedānta. Daśaślokī is found on Fol. 36.

846 33. K. 3.

दशश्लोकी—शंकराचार्यकृता

Palm-leaf. 1 Foll. 9 × 1¾ inches. 15 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

847 9. B. 24.

दशश्लोकी—शंकराचार्यकृता

Paper. 2 Foll. 6 × 4 inches. 21 lines in a page. Telugu script. Old. Injured. Illegible writing.

Complete.

The following verse is added at the end after the colophon :

कलत्रं धनं पुत्रपौत्रादि सर्वं
गृहे बान्धवाः सर्वमेतद्विहाय ।

गुरोरङ्घ्रिपद्मे मनस्तेन दत्तं
तत: किं तत: किं गुरोरङ्घ्रिपद्मे ॥

848 28. C. 54.

दशश्लोकी—शंकराचार्यकृता

Palm-leaf. 2 Foll. 11½ × 1 inches. 4 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

The colophon mentions the name of the work as Nirvāṇadaśaka.

849 28. C. 61.

दशश्लोकी—शंकराचार्यकृता

Palm-leaf. 2 Foll. 11½ × 1 inches. 4 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

The colophon mentions the name of the work as Nirvāṇadaśaka.

850 30. K. 16.

दशश्लोकी—शंकराचार्यकृता

Palm-leaf. 1 Fol. 16 × 1½ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

851 22. P. 6.

दशश्लोकीव्याख्या सिद्धान्तबिन्दु:—मधुसूदनसरस्वतीकृत:

Palm-leaf. 24 Foll. 14½ × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

This is a commentary on S'ri S'aṁkarācārya's Das'as'lokī described above. The commentary is called Siddhāntabindu. The commentator Madhusūdanasarasvatī was the disciple of Vis'ves'varasarasvatī. He must have lived about the last part of the 16th century A.D. He was the author of the following other works: Vedāntakalpalatikā, Advaitaratnarakṣaṇa, Advaitasiddhi, Prasthānabheda, Bhaktirasāyana, Bhagavadgītāvyākhyā and Saṁkṣepas'ārīrakaṭīkā. The Commentary is said to have been written on the request of his pupil Balabhadra.

Complete.

Beginning:

श्रीशंकराचार्यनवावतारं
विश्वेश्वरं विश्वगुरुं प्रणम्य ।
वेदान्तशास्त्रश्रवणालसानां
बोधाय कुर्वे कमपि प्रयत्नम् ॥

इह खलु साक्षात्परंपरया वा सर्वानेव जीवान् समुद्दिधीर्षुर्भगवान् शंकरोऽनात्मभ्यो विवेकेनात्मानं नित्यशुद्धबुद्धमुक्तस्वरूपं संक्षेपेण बोधयितुं दशश्लोकीं प्रणिनाय । नन्विदंकारास्पदेभ्योऽनात्मभ्यो विवेकेनाहंकारास्पदमात्मानं सर्वो लोकोऽहमस्मीति प्रत्येति, दु:खं चानुभवति ।

End:

तदेवं वेदान्तवाक्यजन्याखण्डाकारवृत्त्या तत्कल्पितसकलानर्थनिवृत्तौ परमानन्दरूप: सन् कृतकृत्यो भवतीति सिद्धम् ।

न स्तौमि तं व्यासमशेषमर्थं
सम्यङ् न सूत्रैरपि यो बबन्ध ।
विनापि तै: संग्रथिताखिलार्थं
तं शंकरं नौमि सुरेश्वरं च ॥
लघुरपि बह्वर्थवहश्चिन्तामणिरिव निबन्धोऽयम् ।

मधुसूदनेन मुनिना विहितो गुणिनां विनोदाय ॥
यदत्र सौष्ठवं किंचित्तद्गुरोरेव मे न हि ।
यदत्रासौष्ठवं किंचित्तन्ममैव गुरोर्न हि ॥
बहुयाचनया मयायमल्पो
बलभद्रस्य कृते कृतो निबन्धः ।
यददुष्टमिहास्ति यच्च दुष्टं
तदुदाराः सुधियो विभावयन्तु ॥

Colophon :

इति मधुसूदनसरस्वतीविरचितः सिद्धान्तबिन्दुः संपूर्णः ।

The scribe adds.:

विकृत्यब्दे धनुर्मासे कृष्णपक्षे कुजे दिने ।
चतुर्दश्यां तिथौ श्रीमद्वेंकटेशेन धीमता ॥
सिद्धान्तबिन्दुर्लिखितो वेदान्तार्थप्रकाशकः ॥

852 8. F. 50.

दशश्लोकीव्याख्या सिद्धान्तबिन्दुः—मधुसूदनसरस्वतीकृतः

Paper. 12 Foll. $8\frac{1}{2} \times 7\frac{1}{2}$ inches. 24 lines in a page. Telugu script. Old. Fair. Good writing.

Complete.

853 8. H. 35.

दशश्लोकीव्याख्या सिद्धान्तबिन्दुः—मधुसूदनसरस्वतीकृतः

Paper. 24 Foll. 9 × 5 inches. 11 lines in a page. Devanāgarī script. Old. Fair. Good writing.

Wants beginning and end.

854 19. G. 4.

दशश्लोकीव्याख्या सिद्धान्तबिन्दुः—मधुसूदनसरस्वतीकृतः

Palm-leaf. 31 Foll. 16 × $1\frac{1}{2}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wants beginning ; otherwise complete.

Reads the following colophon :

इति परमहंसपरिव्राजकाचार्यविश्वेश्वरभगवत्पूज्यपादशिष्यमधुसूदनसरस्वतीविरचितः सिद्धान्तबिन्दुः संपूर्णः ।

855 27. N. 1.

दशश्लोकीव्याख्या सिद्धान्तबिन्दुः—मधुसूदनसरस्वतीकृतः

Palm-leaf. 44 Foll. 17 × $1\frac{1}{8}$ inches. 6 lines in a page. Grantha script. Old. Much injured. Good writing.

Wants beginning ; otherwise complete.

856 8. F. 51.

सिद्धान्तबिन्दुव्याख्या न्यायरत्नावली—ब्रह्मानन्दसरस्वतीकृता

Paper. 86 Foll. $8\frac{1}{4} \times 7\frac{1}{4}$ inches. 25 lines in a page. Telugu script. Old. Fair. Good writing.

This is a gloss on the Siddhāntabindu of Madhusūdanasarasvatī which itself is a gloss on S'rī S'aṁkarācārya's Das'as'lokī. The commentary is called Nyāyaratnāvalī. It is also called Nyāyaratnamālā in the colophon of this MS. The commentator Brahmānandasarasvatī was the pupil of

Paramānandasarasvatī, S'ivarāmānanda-sarasvatī, and Nārāyaṇtīrtha *alias* Nārāyaṇānandasarasvatī. His other works are: Advaitasiddhivyākhyā Guru and Laghu Candrikās, Advaitasiddhāntavidyotana and Brahmasūtravṛtti called Sūtramuktāvali. (Nos. 617, 618, 598 and 502 of this volume respectively). He must have lived in the 17th century A.D.

The commentary was printed and published in the Advaitamañjarī Series, Kumbakonam, in 1893 and in the Kasi Sanskrit Series No. 65, Benares, in 1928.

Complete.

Beginning:

नमो नवघनश्यामकामकामितदेहिने ।
कमलाकामसौदामकणकामुकगेहिने ॥
अद्वैतसिद्धेष्टीकायास्तदीयायाश्च संग्रहात् ।
विचित्ररचना कापि ब्रह्मानन्देन रच्यते ॥
शंकरोक्तिसुधाम्भोधेर्गुरूणामुपदेशतः ।
उद्धृतां प्रकटीकुर्वे न्यायरत्नावलीमिह ॥

तत्राद्वितीयस्वप्रकाशनिरतिशयानन्दस्वरूपयोर्जीवब्रह्मस्वरूपयोरैक्यं मुक्तानन्दरूपं बोधयदहं ब्रह्मास्मीत्यादिवेदान्तमहावाक्यं द्वितीयविषयकप्रत्यक्षादिसर्वप्रमाणबाधकम् । अतोऽनात्मभूतं सर्वं मिथ्येत्याद्यर्थविवेचनरोचमानं श्रीमद्बादरायणशंकरसुरेश्वराद्याचार्यवर्यकृतमर्यादं वेदान्तदर्शनं दर्शनेषु सर्वेषु दर्शनीयतमं दर्शनम् । तस्य च विचारशास्त्रस्य विचार्यवेदान्तवाक्यद्वारा परमं तात्पर्यमुक्तम् ।

End:

शंकराचार्यास्तु सूत्राण्यनाश्रित्यापि सर्वार्थान् संगृहीतवन्तः, सूत्रानुक्तार्थानामपि वक्तृत्वादित्यर्थः । अतिस्वल्पो बह्वर्थप्रापको निबन्धनो ग्रन्थः । अत्र ग्रन्थे सौष्ठवं गुणवत्त्वम् । बलभद्रस्य स्वसेवकब्रह्मचारिणः ।

श्रीनारायणतीर्थानां गुरूणां चरणाम्बुजम् ।
नमामि वाङ्मनःकायैरनन्यशरणः सदा ॥
भजे श्रीपरमानन्दसरस्वत्याः पदाम्बुजम् ।
यदेवालम्ब्य संसारसागरो गोष्पदीकृतः ॥

Colophon:

इति श्रीब्रह्मानन्दसरस्वतीविरचिता सिद्धान्तबिन्दुव्याख्या न्यायरत्नमाला समाप्ता ॥

ओं तत्सत् श्रीमदनन्तानन्देन्द्रसद्गुरुचरणारविन्दाभ्यां नमः ।

857 26. D. 9.

द्वैतखण्डनम्

Palm-leaf. 3 Foll. 17 × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

A small work on Advaita-Vedānta refuting the Dvaita view which enunciates a real difference between the Brahman and the world. The work attempts to prove that there could be no a category called Bheda or difference.

Beginning:

श्रीगुरोः कृपया सम्यक् क्रियते द्वैतखण्डनम् ।
श्रुत्युक्तयुक्तिनीतिभ्यां शृणुतावहिता बुधाः ॥

तथाहि—सत्त्वं त्रिविधम् । प्रातिभासिकं सत्त्वं शुक्तिरजतादौ । व्यावहारिकं सत्त्वं घटपटादौ । सर्वदा बाधवैधुर्यलक्षणं पारमार्थिकं सत्त्वं ब्रह्मणीति । तत्र व्यावहारिको भेदो वस्तुस्वरूपत्वेन तदतिरिक्तधर्मत्वेन च वादिभिरङ्गीकृतः । तत्र प्राभाकरास्तावत् भेदस्य दुर्निरूपत्वात् घटात् पटो भिन्न इत्यत्र घट-

प्रतियोगिघटितं पटस्वरूपमेव भेदः, न ततोऽतिरिक्तमित्यङ्गीकुर्वते ।

End :

शास्त्रेण नश्येत्परमार्थरूपं
कार्यक्षमं नश्यति चापरोक्ष्यात् ।
प्रारब्धनाशे प्रतिभासनाश
एवं त्रिधा नश्यति देवमाया ॥

858 41. C. 93.

ध्वान्तानुबन्धधिक्कारः—रामेश्वरभट्टकृतः

Paper. 32 Foll. 8 × 5½ inches. 12 lines in a page. Telugu script. Old. Injured. Good writing.

This is a small work refuting the view of S'rī Ānandatīrtha and his followers regarding the difference between the Brahman and Jīvas. The author Rāmes'varabhaṭṭa was the son of Subrahmaṇyasūri of the Pāṇya family.

Wants beginning.

Beginning :

. . . . . नन्ताविद्यास्वीकारे तदीयानन्दपारतन्त्र्यादिकं ब्रह्मस्वरूपं तद्गुणगणादिकं चावृण्वीतेति । तच्च प्रतिजीवं भिन्नमिति एकमुक्तौ सर्वमुक्तिरित्यादिभवद्ग्रन्थस्वारस्यविरोधश्च । तथा कल्पनायां मानाभावश्च । किंच चक्षुराद्यावरककुड्यादिकं घटादिज्ञानकारणेन्द्रियसंनिकर्षप्रतिबन्धकं दृष्टम् । प्रकृते च साक्षिण एव ब्रह्मापरोक्षत्वात् तस्य च नित्यत्वात् तत्संबन्धस्य विषयविषयिभावादेश्च सत्यत्वात् ।

End :

कुतश्चित् सर्वज्ञाद्गुरोः स्वमुक्तिस्वरूपं ज्ञातव्यमिति चेत्, तादृशसर्वज्ञगुरोः पुण्यविशेषाल्लाभे तदा तद्वचनेनैव स्वयोग्यगुणा अपि ज्ञातुं शक्यन्त एवेति किं शास्त्रेण ? तस्मात्पररीत्या शास्त्रारम्भासंभवान्निरस्तदुस्तर्कभगवत्पादोक्तरीत्यैव शास्त्रमारम्भणीयमिति सिद्धम् ।

Colophon :

इति श्रीमत्पाण्यकुलतिलकसुब्रह्मण्यसूरिसूनुभट्टरामेश्वरविरचितो ध्वान्तानुबन्धधिक्कारः ।

859 22. D. 86.

निगमान्तार्थचन्द्रिका—नारायणाश्रमकृता

Palm-leaf. 2 Foll. 14 × 1½ inches. 10 lines in a page. Grantha script. Old. Much injured. Good writing.

A very small work explaining briefly the principles of the Advaita-Vedānta as taught in Upaniṣads. The author Nārāyaṇās'rama was the pupil of the famous Nṛsiṁhās'rama who wrote his Tattvaviveka in the middle of the 16th century (1547 A.D.). Nārāyaṇās'rama's other works are : Advaitadīpikāvivaraṇa, Bhedadhikkārasatkriyā and Advaitasiddhāntasaṁgraha. (Printed and published by the Nirnayasagar Press, Bombay). His date must be towards the end of the 16th century A.D.

Beginning :

वेदान्तवनसंचारि नीलाचलगुहाशयम् ।
ज्योतिर्विराजते ध्वस्तमायावरणवारणम् ॥
नत्वा श्रीशंकराचार्यममरेन्द्रयतीश्वरम् ।
क्रियते बालबोधाय निगमान्तार्थचन्द्रिका ॥

पदार्थो द्विविधः—दृक् दृश्यश्च, अन्यवादिपरिकल्पितानामत्रैवान्तर्भावात् । तत्र दृक्पदार्थ

आत्मा पारमार्थिक एकः सर्वदैकरूपोऽप्यौपाधिकभेदेन त्रिविधः—इश्वरो जीवः साक्षी चेति । तत्र कारणीभूतज्ञानोपाधिरीश्वरः । अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानोपहितो जीवः । अविद्याप्रतिबिम्बेश्वरपक्षे बिम्बचैतन्यम् । बिम्बोपाधिपक्षे जीवेश्वरानुगतसर्वानुसंधातृ चैतन्यं साक्षी ।

End :

तत्र सत्त्वप्रधानं देवशरीरम् । रजःप्रधानं मनुष्यशरीरम् । तमःप्रधानं तिर्यगादिस्थावरान्तशरीरम् । . . पाञ्चभौतिकस्यापि चित्ररूपस्येव क्वचिन्न्यूनाधिकभावो भूतानां न विरुध्यते । एवंविषयापञ्चीकृतै . . भूतजन्यश्चतुर्दशभुवन . . . ध्वंमध्याधोभागेन सत्त्वरजस्तमःप्रधानाः । एतच्च सर्वं ब्रह्माण्डाख्यं विराडिति मूर्तमिति चोच्यत इति ।

काशते कलितं यस्य पदं वैदिकमस्तकैः ।
भक्तमुक्त्यै समीहन्तं तं नृसिंहगुरुं भजे ॥

Colophon :

इति श्रीनारायणाश्रमकृता निगमान्तार्थचन्द्रिका समाप्ता ॥

860 9. G. 45.

निर्वाणषट्कम्—शंकराचार्यकृतम्

Paper. 1 Fol. $12\frac{1}{2} \times 6\frac{1}{2}$ inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Six verses on realisation of the self as distinguished from the material things such as body, senses etc. The work is attributed to S'rī Saṁkarācārya. It is available in print. (Sri Vani Vilas Press, S'rīrangam.)

Complete.

Beginning :

मनो बुद्ध्यहंकारचित्तादि नाहं
न श्रोत्रं न जिह्वा न च घ्राणनेत्रम् ।
न च व्योम भूमिर्न तेजो न वायु-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ १ ॥

End :

अहं निर्विकल्पो निराकाररूपो
विभुर्व्यापि सर्वत्र सर्वेन्द्रियाणाम् ।
न पापं धनं नैव मुक्तिर्न भीति-
श्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ६ ॥

Colophon :

इति श्रीमच्छंकराचार्यविरचितं निर्वाणषट्कं समाप्तम् ।

The scribe adds :

लिखितं काश्यां मध्ये सं १८८०.

861 9. C. 25.

निर्वाणषट्कम्—शंकराचार्यकृतम्

Paper. 1 Fol. $6 \times 4\frac{1}{2}$ inches. 12 lines in a page. Telugu. Old. Injured. Good writing.

Incomplete.

862 25. L. 23.

निर्वाणषट्कम्—शंकराचार्यकृतम्

Palm-leaf. 2 Foll. $15 \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The colophon wrongly reads निर्वाणपञ्चकं instead of निर्वाणषट्कम् ।

863 28. C. 48.

निर्वाणषट्कम्—शंकराचार्यकृतम्

Palm-leaf. 1 Fol. $11\frac{1}{2} \times 1$ inches. 5 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

Reads the following end :

जाग्रत्युद्भूतबाह्येन्द्रियविषयसमुल्लाससाक्षी शिवोऽहं
स्वप्ने दृष्टप्रपञ्चं प्रविमलमनोवृत्तिसाक्षी शिवोऽहम् ।
सुप्ते चित्ते प्रलीने प्रचलति च महावृत्तिसाक्षी शिवोऽहं
नित्यानन्दस्तुरीयो विगतविमलरसः सर्वसाक्षी शिवोऽहं ॥

864 30. D. 26.

निर्वाणषट्कम्—शंकराचार्यकृतम्

Palm-leaf. 1 Fol. $10\frac{1}{2} \times 1$ inches. 5 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

865 8. G. 37.

निर्वाणषट्कम्—शंकराचार्यकृतम्

Paper. 1 Fol. $6\frac{1}{2} \times 4\frac{1}{8}$ inches. 20 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

The MS. adds the following two stanzas at the end :

अनाकाशमाकाशमाकाशरूपं
निराकारसाकारमोंकारगम्यम् ।
सहस्रारमध्यस्थबिन्दुस्वरूपं
चिदानन्द + शिवोऽहम् ॥ ७ ॥

न गन्धं न पुष्पं न दीपं न धूपं
न नैवेद्यताम्बूलपुष्पाञ्जलिं च ।
अहं सद्गुरुर्वेदवाक्यप्रमाणं
चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ८ ॥

There is no colophon.

866 20. N. 4.

नैष्कर्म्यसिद्धिः—सुरेश्वराचार्यकृता

Palm-leaf. 30 Foll. $12\frac{1}{2} \times 1\frac{1}{4}$ inches. 8 lines in a page. Malayālam script. Old. Injured. Good writing.

The Naiṣkarmyasiddhi is a compendium of the principles of Advaita-Vedānta dealing with almost all the salient features of that philosophy. The work consists of the text and commentary thereon, the text being in Anuṣṭubh verses and the commentary in prose. The commentary portion is called Sambandhokti. The author Sureśvarācārya is generally believed to have been one of the direct disciples of S'rī S'aṁkarācārya. The identity between Maṇḍanamiśra and Sureśvarācārya still remains a controversial subject among the scholars though it was refuted by late Mahāmahopādhyāya S. Kuppuswami S'astri in his introduction to the Brahmasiddhi (Madras Govt. Oriental MSS. Series No. 4). The work is divided into four chapters or adhyāyas. The author is said to have belonged to the period about 620 to 700 A.D. There are several editions of the work, of which the edition of the Bombay Sanskrit and Prakrit Series No. 38 is best.

The MS. begins in the 2nd adhyāya (wanting a few lines in the beginning) and goes on upto the end of the 4th adhyāya.

Beginning :

. . . . . योऽयमहं ब्रह्मेति वाक्यार्थस्तत्प्रतिपत्तिर्वाक्यादेवेति प्रत्यक्षादीनामनेवंविषयत्वादित्यवादिषम् । तस्य विशुद्ध्यर्थमनैकान्तिकत्वं पूर्वपक्षत्वेनोत्थाप्यते ।

कृत्स्नानात्मनिवृत्तौ च कश्चिदाप्नोति निर्वृतिम् ।
श्रुतवाक्यस्मृतेश्चान्यः स्मार्यते च वचोऽपरः ॥

End :

वेदान्तोदरवर्ति भास्वदमलं ध्वान्तच्छिदस्मद्गियो
दिव्यं ज्ञानमतीन्द्रियेऽपि विषये व्याहन्यते न क्वचित् ।
यो नो न्यायशलाकयैव निखिलं संसारबीजं तमः
प्रोत्सार्याविरकार्षीदखिलगुरुः पूज्याय तस्मै नमः ॥
संबन्धोक्तिरियं साध्वी प्रतिश्लोकमुदाहृता ।
नैष्कर्म्यसिद्धेर्ज्ञात्वेमां व्याख्यातासौ भवेद्ध्रुवम् ॥

Colophon :

इति नैष्कर्म्यसिद्धिः समाप्ता ।

867 39. A. 15.

नैष्कर्म्यसिद्धिविवरणम्, विद्यासुरभिः—ज्ञानामृतमुनिकृता

Paper. 459 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 2 volumes.

This is a transcript made from the original MS. of the Madras Govt. Oriental MSS. Library.

This is a commentary on Sureśvarācārya's Naiṣkarmyasiddhi. The commentary is called Vidyāsurabhi. The commentator Jñānāmṛtamuni was the pupil of Uttamāmṛtamuni. He mentions one Ānandāraṇya.

Beginning :

नमामि नारायणमामरेड्यं
न मानमेयं जगतो निदानम् ।
निरस्तभेदं सुखसंविदेकं
निगूढमन्तःकरणेष्वसङ्गम् ॥
निरङ्कुशैश्वर्यजितामरेश्वरं
निरङ्कुशज्ञानजिताम्बुजासनम् ।
निराकृतद्वैतकथं यतीश्वरं
नमामि नाम्नासदशोत्तमामृतम् ॥
आनन्दारण्यपूज्यानां पदपङ्कजपांसवः ।
पान्तु मां मृत्युसंतानात्स्वान्तध्वान्तान्तहेतवः ॥
अम्भोभूगगनानलानिलमयैरब्गन्धपुष्पादिभिः
ब्रह्माण्डाह्वयदिव्यपक्वनिचयैर्मेयाद्यपूर्वादिभिः ।
गङ्गाद्यादिसमुद्रकल्पितपयोमध्वादिकैरन्वहं
ब्रह्मानन्दहविर्भिरर्चिततनौ लीयेऽत्र विघ्नेश्वरे ॥
अखण्डबोधध्वनिवेदविग्रहा-
मखण्डशीतांशुनिभाननां पराम् ।
अखण्डवाक्यार्थसमर्थनक्षमा-
मखण्डवाक्छक्तिमुमामुपास्महे ॥

आविर्भूतान्स्वबोधाद्विधिमुखजजलैर्वर्धितान्वेदवृक्षान्
शाखाभेदैर्विभिद्य श्रुतितुलितमहाभारतं योऽथ कृत्वा ।
श्रीमच्छारीरकाख्यं निरुपमसुखदं ब्रह्म पक्वं गृहीत्वा
तेभ्यो नः प्रादिशत्तं मुनिजनमहितं व्यासविष्णुं नमामि ॥

महामोहपङ्के विरिञ्चाचरान्तं
प्रजाहस्तिनं मग्नमालोक्य भाष्यैः ।

जलैः क्षालयित्वात्मविद्यां दिवं यो
नयत्येकलं शंकरं तं नमामि ॥
प्रकटविकटविश्वव्यापिनैष्कर्म्यसिद्धि-
द्युमणिकरगणौघैर्यो जगद्ध्वान्तमन्तम् ।
नयति विमलकीर्तिं तं सुरेशोदयाद्रिं
निबिडतमतमःस्रक्पाटनं नन्नमीमि ॥
ब्रह्मात्मदृष्टिहतमोहमदादिदोषाः
कारुण्यसागरनिमग्नमहाधियो ये ।
आशास्महे प्रणतिपूर्वमिमान् वदन्तु
नैष्कर्म्यसिद्धिविवृतेर्गुणदोषभेदान् ॥
उत्तरोत्तरनिरीक्षणे नृणां
मूढमेव महतामपीह यत् ।
वैपरीत्य इह मादृशामपि
प्रज्ञता भवतु मत्कृतिस्ततः ॥
गुणलेशमप्यगणयन् परितो बहुं
दोषमेव कथयन् खलतां वचसात्मनः ।
उत्तरोत्तरं प्रकटयेत्कुकविर्न वा
मादृशां स्खलनमाकलयेत् . . . ॥
वेदान्तेभ्यः किमपि भगवद्वाक्यतः किंचिदन्य-
द्भाष्यादिभ्यो बहु बहुतरं पूर्वटीकाक्षरेभ्यः ।
आचार्येभ्यो बहुतममहं भावतत्त्वं गृहीत्वा
व्याख्यां विद्यासुरभिममलां वच्मि नैष्कर्म्यसिद्धेः ॥
नैष्कर्म्यसिद्धेः संक्षेपादन्वयादिप्रधानतः ।
ज्ञानामृतेन यतिना व्याख्यानं क्रियते मया ॥

अनेकजन्मसु निरन्तरसंचितनित्यनैमित्तिककर्मा-
पूर्वनिकरपरिमार्जननिराकृतनिखिलदुरितरागादिमला -
न्तःकरणदर्पणः तैरेव कर्मभिः परितर्पितपितृदेवगण-
प्रेरितपरमेश्वरेण शंकरभगवत्पूज्यपादरूपिणा भाष्य-
कारेण ।

End :

ननु ज्ञातुमशक्यैव, तत्राह—साध्वीति । . . . .
अनयैव व्याख्यातुं शक्येत्यर्थः ।

समन्वयादींश्चतुरोऽपि सागरा-
नतीत्य जित्वा ककुबीश्वरान् हरेः ।
परं पदं संप्रति मुक्तबन्धनं
सुखैकतानं शिवमेति मे महः ॥
प्रत्यावृत्त्यप्रतर्क्यप्रकटकपटकृत्स्वाप्नबोधप्रभाव-
प्रोद्यत्खादिप्रपञ्चप्रभवभवसमापन्नयाथात्म्यदृग्दृक् ।
प्रज्ञानं ब्रह्मवाक्यश्रवणजनितमिध्वस्तदुर्ध्वान्ततर्क-
भ्रान्तिप्रज्ञानरूपप्रियतमविमलब्रह्मनिर्वाणमस्मि ॥
तत्त्वोपदेष्टॄन् व्याख्यातॄन् बुधान्मस्करिणो गुरून् ।
साष्टाङ्गपातं तानित्यं नमामि ब्रह्मवेदिनः ॥
यावद्गोभिः परिवृततनुः कामदा कामहन्त्री
यज्ञोद्भूतिर्मुनिवरजिता याति पादैश्चतुर्भिः ।
प्रत्यक्प्रख्या निगममनुवाक्छृङ्गिणी दिव्यरूपा
सेयं विद्यासुरभिरजिता मोक्षमार्गं पुनातु ॥

Colophon :

इति श्रीमदुत्तमामृतपूज्यपादशिष्यस्य ज्ञानामृत-
भगवतः कृतौ नैष्कर्म्यसिद्धिविवरणे विद्यासुरभिनाम्नि
चतुर्थोऽध्यायः समाप्तः ।

Then the following stanzas are added :

करकमलकलितवेणुं कम्बुग्रीवं करेणुललितगतिम् ।
कंसारातिं वन्दे वृन्दारकबृन्दवन्द्यपदकमलम् ॥
पञ्चवर्षमतिलोलमङ्गणे धावमानमलकाकुलेक्षणम् ।
किंकिणीवलयचारुनूपुरैरञ्चितं नमत नन्दनन्दनम् ॥
साष्टाङ्गपातमभिवन्द्य समस्तभावैः
सर्वान् सुरेन्द्रनिकरानिदमेव याचे ।
मन्दस्मितार्द्रमधुराननचन्द्रबिम्बे
नन्दस्य हन्त तनये मम भक्तिरस्तु ॥

The following two verses apparently belong to the commentary of the Iṣṭa-siddhi. They were copied here wrongly.

मायया यज्जगद्बीजं जीवा अज्ञानभेदतः ।
तज्ज्ञानं नित्यकूटस्थमद्वयं संभवाम्यहम् ॥
श्रुत्वापि यस्य बहुकालमचिन्तनेन
व्याख्यातुमक्षमतया परितापि चेतः ।
तस्यापि तापशमनाय मयेष्टसिद्धे-
रारभ्यते विवरणं महितार्थमेतत् ॥

868 39. B. 17.

नैष्कर्म्यसिद्धिविवरणम्—अखिलात्मकृतम्

Paper. 661 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 3 volumes.

This is a transcript made from the original MS. available in the Madras Govt. Oriental MSS. Library (R. No. 4340).

This is another commentary on Sureśvarācārya's Naiṣkarmyasiddhi. The commentary is called Vivaraṇa. The commentator Akhilātman was the pupil of Daśarathapriyayati (Rāmayati).

Complete.

Beginning :

विशुद्धविज्ञानचतुष्टयात्मने
जगत्प्रसूतिस्थितिनाशकारिणे ।
चतुर्विधाय त्रिगुणाय जिष्णवे
नमः सदा सर्वहिताय विष्णवे ॥
समन्वयोद्भवां शुद्धां सर्वमानाविरोधिनीम् ।
ब्रह्मात्मानुगतां नौमि नमामि भवभेदिनीम् ॥
परात्मबिम्बप्रतिबिम्बिता सा
नैष्कर्म्यसिद्धिर्यत आबभूव ।
सुदर्पणे स्पष्टमिवात्मबिम्बं
तस्मै सुरेशाय नमोऽस्तु नित्यम् ॥
विद्यासीतासहायो विमलशमरथः सर्ववेदान्तधन्वी
शश्वद्धर्मानुजेतो वशगखतुरगो मानयुक्तीषुधारी ।
पौलस्त्यं ब्रह्मविद्यापहरणचतुरं योऽवधीन्मोहशत्रुं
रामं तं नौमि वन्द्यं मम गुरुमनिशं योगकान्तारारामम् ॥
शमदमादियुताः परमात्मगां
धियमवापुरलं यदनुग्रहात् ।
मुनिगणा गुणपूगनिकेतनं
दशरथप्रियमेव नमामि तम् ॥
दशरथप्रियमस्करिभास्कर-
स्फुटपदाम्बुजचिह्नितमस्तकः ।
परमभक्तिभरेण सुरेशस-
त्प्रकरणोपनिबन्धनमारभे ॥

आब्रह्मस्तम्बपर्यन्तैरित्याद्यशेषवेदान्तसारसंग्रहप्र-करणमारभ्यत इत्यन्तेन ग्रन्थेन संबन्धोक्तिकारो-ऽधिकार्यभावादधिकारिसाध्यसाधनस्य विवक्षितमोक्ष-पुरुषार्थसाधनत्वाभावात् ।

End :

तज्ज्ञानमूलं किमित्याकाङ्क्षायां संबन्धोक्तिरेवे-त्याह—

संबन्धोक्तिरियं साध्वी प्रतिश्लोकमुदाहृता ।
नैष्कर्म्यसिद्धेर्ज्ञात्वेमां व्याख्यातास्या भवेद्ध्रुवम् ॥
सत्यं ज्ञानमनन्तं च परमानन्दमद्वयम् ।
सा . . . . तापरोक्षं मां नमामि भवभेदिनम् ॥
विगलज्जलजदावलिललितासितरुचिरं
विकसन्नवनलिनीदलरुचिलोचनयुगलम् ।
अवमानितरविमण्डलरुचिकुण्डलमकुटं
मयि मानस सततं भज कमलापतिममलम् ॥
नैष्कर्म्यसिद्धिमार्ताण्डः कैवल्यदिनकृद्यतः ।
आविरासीन्नमस्तस्मै सुरेशाय पुनः पुनः ॥

गुरुभक्तिभूषणविभूषितधी-
दृढशास्त्रनिश्चयमहानिधिमान् ।
विनयाम्बुजाञ्जलिमयं विकिर-
न्नखिलात्मको नमति पूज्यतमान् ॥
इति सन्न्यायसौगन्ध्यश्रीकृतिर्ग्रथिता मया ।
मालामलेयमाप्नोतु तद्विष्णोः परमं पदम् ॥

Colophon :

इति श्रीमद्दशरथप्रियपूज्यपादशिष्यस्य भगवतोऽखिलात्मनः कृतौ नैष्कर्म्यसिद्धिविवरणं समाप्तम् ।

869 39. B. 16.

नैष्कर्म्यसिद्धिव्याख्या भावतत्त्वप्रकाशिका—चित्सुखमुनिकृता

Paper. 132 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from the original MS. available in the Madras Govt. Oriental MSS. Library.

This also is another commentary on Sureśvarācārya's Naiṣkarmyasiddhi described above. The commentary is called Bhāvatattvaprakāśikā. The author Citsukhamuni was the pupil of Jñānottamamuni. He is known to have been the author of the following other works: Brahmasiddhivyākhyā Abhiprāyaprakāśikā, Brahmasūtrabhāṣyavyākhyā Bāṣyabhāvaprakāśikā (No. 470 of this volume), Nyāyamakarandavyākhyā, Tattvapradīpikā (No. 814 of this volume), Pramāṇamālāvyākhyā, Khaṇḍanakhaṇḍakhādyavyākhyā, Vivaraṇatātparyadīpikā, Viṣṇupurāṇavyākhyā, Adhikaraṇamañjarī (No. 634 of this volume) and Adhikaraṇasaṁgati. The author Citsukha must have belonged to the period about 1200 A.D. as he has been referred to by S'rī Vedāntades'ika (1268 to 1369 A.D.). Mr. M. Hiriyanna of Mysore opines that this commentary is an abridgement of another commentary called Candrikā by Jñānottama, printed and published in the Bombay Sanskrit and Prakrit Series No. 38.

Complete.

Beginning :

यत्साक्षात्सच्चिदानन्दं प्रत्यगद्वयमक्रियम् ।
तन्नमामि नृसिंहस्य योगिगम्यं परं पदम् ॥
ज्योतिर्यद्दक्षिणापूर्वं व्यासशंकरशब्दितम् ।
ज्ञानोत्तमाख्यं तद्वन्दे सत्यानन्दपदोदितम् ॥
संसारगरसंतापनिर्वापणसुधापगाम् ।
नैष्कर्म्यसिद्धिं यश्चक्रे तं नमामि सुरेश्वरम् ॥
नैष्कर्म्यसिद्धेः क्रियते पूर्वाचार्यवचोऽनुगा ।
मुनिना चित्सुखाख्येन भावतत्त्वप्रकाशिका ॥

व्याचिख्यासितायाः श्लोकसंदर्भरूपाया नैष्कर्म्यसिद्धेरधिकारिप्रयोजनतत्साधनसंबन्धविषयाणामभावादनारम्भमाशङ्क्य संबन्धोक्तिकारः प्रकरणारम्भसिद्धये क्रमेण तानुपपादयति—आब्रह्मस्तम्बपर्यन्तैरित्यादिना प्रकरणमारभ्यत इत्यन्तेन ग्रन्थेन ।

End :

एवं गुरुसंप्रदायप्राप्तप्रकरणस्य परानुग्रह एव । गुरुभक्तेर्विद्यां प्रत्यङ्गसाधनत्वं दर्शयितुं प्रकरणारम्भ इव प्रकरणसमाप्तावपि गुरुनमस्कारं करोति—वेदान्तेति । तस्मै पूज्याय नम इति संबन्धः । नैष्कर्म्यसिद्धेर्व्याख्यानक्षमतापर्यन्तपरिज्ञानं किंकारणमित्याकाङ्क्षायां संबन्धोक्तिरेवेत्याह—संबन्धोक्तिरिति ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यश्रीचित्सुखमुनिविरचितायां नैकर्म्यसिद्धिटीकायां चतुर्थोऽध्यायः समाप्तः ।

870 34. D. 7.

न्यायचन्द्रिका—आनन्दपूर्णकृता

Palm-leaf. 153 Foll. 15 × 2 inches. 9 lines in a page. Malayālam script. Old. Fair. Good writing.

The Nyāyacandrikā is a Prakaraṇa work on Advaita-Vedānta expounding the Advaitic view of Vedānta philosophy after refuting the other systems of philosophy *namely* Nyāya, Vaiśeṣika, Mīmāṁsā etc. The author Ānandapūrṇa was the pupil of Abhayānanda and S'vetagiri. His other works are: Khaṇḍanakhaṇḍakhādyavyākhyā Khaṇḍanaphakkikāvibhajana (No. 796 of this volume), Brahmasiddhivyākhyā Bhāvaśuddhi, Mahāvidyāviḍambanavyākhyā, Pañcapādikāvyākhyā, Pañcapādikāvivaraṇavyākhyā, Mokṣadharmavyākhyā, Bṛhadāraṇyakabhāṣyavārttikavyākhyā, Nyāyakalpalatikā, Nyāyasāravyākhyā Vyākhyāratna and Kāśikāvṛttivyākhyā Prakriyāmañjarī. As the Nyāyacandrikā has been mentioned by Appayadīkṣita (1520 to 1593 A.D.) in his Siddhāntaleśasaṁgraha, the author's date may be fixed about 1350 A.D. He is also called Vidyāsāgara.

Complete in 4 Paricchedas.

Beginning :

आविरस्तु महस्तन्नो गौरीसंध्याघनोदितम् ।
अन्तरायतमोहन्तृ नरस्तम्बेरमाकृति ॥
स्वप्रामाण्यविभूषणा श्रुतिवधूः प्रान्वेषमाणापि यं
दृष्ट्वा लक्षणतो न वक्तुमशकत्सर्वप्रमाणातिगम् ।
शुद्धानन्दचिदद्वयात्मवपुषं द्वैतेन्द्रजालास्पदं
वन्दे चन्द्रविभूषणं गिरिसुतादत्तार्धदेहं हरम् ॥

अथ किमिदं प्रमाणानां स्वतस्त्वं नाम? किं स्वजन्यत्वं वा, ज्ञानजन्यत्वं वा, अनुभवजन्यत्वं वा, प्रमाकरणजन्यत्वं वा, ज्ञानकारणजन्यत्वं वा, अनुभवकारणजन्यत्वं वा, प्रमाकारणव्यतिरिक्ताजन्यत्वं वा, ज्ञानकारणव्यतिरिक्ताजन्यत्वं वा, अनुभवकारणव्यतिरिक्ताजन्यत्वं वा, प्रमाकारणजन्यत्वे सति तद्व्यतिरिक्ताजन्यत्वं वा, ज्ञानकारणजन्यत्वे सति तद्व्यतिरिक्ताजन्यत्वं वा, अनुभवकारणजन्यत्वे सति तद्व्यतिरिक्ताजन्यत्वं वा, अन्यद्वा । न तावदाद्यः कल्पः, आत्माश्रयप्रसङ्गात् ।

End :

नूनं वैशेषिकैर्विप्रलब्धोऽसि । रजसः पतनं नास्ति द्रव्यत्वादिति ब्रुवाणः कथमपरथा वार्येत । तस्मात् ब्रह्मात्मतत्त्वसाक्षात्कारान्निखिलानर्थनिदानाज्ञाननिवृत्तौ परमानन्दसंवेदनप्राप्तिः कैवल्यमिति सकलश्रुतिमङ्गलम् ।

परापरस्वरूपेण परं यत्तत्प्रकाशितम् ।
श्रीमन्महाबलं देवं वन्दे गोकर्णमण्डनम् ॥
विद्यासागरसंभूतन्यायचन्द्रस्य चन्द्रिका ।
व्याप्य दिङ्मण्डलं जीयादियमाचन्द्रभास्करम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्याभयानन्दपूज्यपादशिष्येण भगवता आनन्दपूर्णमुनीन्द्रेण विद्यासागरापरनामधेयेन विरचितायां न्यायचन्द्रिकायां चतुर्थः परिच्छेदः ।

871 38. H. 15.

न्यायरत्नदीपावली—आनन्दानुभवकृता

Paper. 191 Foll. 8¼ × 6½ inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from the original MS. of Dr. C. Kunhan Raja of the Madras University.

This is an original Prakaraṇa work on S'rī S'aṁkarācārya's Advaita view of the Vedānta philosophy. The author Ānandānubhava was the pupil of Nārāyaṇajyotis. His other works are: Iṣṭasiddhivivaraṇa (No.769 of this volume) and Padārthatattvanirṇaya (41-A-39 of the Adyar Library). The famous author Ānandagiri (1280 A.D.) has written commentaries on the Nyāyaratnadīpāvalī and Padārthatattvanirṇaya (R. Nos. 3604 and 4342 of the Madras Govt. Oriental MSS. Library). T. M. Tripathi ascribed this Padārthatattvanirṇaya to one Gaṅgāpurībhaṭṭāraka (Page 14 of the Introduction to the Tarkasaṁgraha, Gaekwad's Oriental Series No. 3). The work consists of four adhyāyas named after those of the Brahmasūtras *namely* Samanvaya, Avirodha, Sādhana and Phala adhyāyas. Ānandanubhava must have lived about 1200 A.D.

Complete in 4 adhyāyas.

Beginning:

हरिपादं प्रणम्याथ वेदान्तार्थप्रसिद्धये ।
सन्न्यायरत्नदीपानामावलिः क्रियते मया ॥

यद्यपि वेदान्तार्थः स्फुट . . . . . भाष्यकारादिभिः, तथाप्यभिनवदुस्तर्कतिमिरतिरोहितश्चासौ । अतस्तत्प्रकाशनाय प्रयत्यते ।

ननु वेदस्यापि न विवक्षितार्थता अप्रमाणकत्वात् । किमु वेदवादिनोऽप्यनिष्टार्थानां वेदान्तानाम् । तथाहि यानि परस्परविरुद्धार्थानि वाक्यानि न तानि प्रमाणानि यथोन्मत्तवाक्यानि । तथाहि—ब्राह्मणो न हन्तव्य इत्यादिना क्वचिदहिंसोच्यते । तथा ब्राह्मणे ब्राह्मणमित्यादि ब्राह्मणादिवधविधानम् । तथा नैष्ठिकं ब्रह्मचर्यमुच्यते । न काञ्चनं परिहरेत् तद् व्रतमिति गुर्वङ्गनादिगमनं च । तथा ब्राह्मणस्य सुरापानविधिनिषेधौ । एवं च ब्रह्मणि एकमेवाद्वितीयमित्यादौ विरोधो द्रष्टव्यः । अत एवोक्तम्—त्रयो वेदस्य कर्तारो मुनिभग्ना निशाचरा इति ।

End:

तस्मादतिविशदा जीवन्मुक्तिः । तदेवं निरस्तसमस्ताप्रमाद्युपप्लवेभ्यो वेदान्तेभ्यः सच्चैतन्यानन्दैकरसेऽद्वितीयात्मन्यपरोक्षज्ञानोपजन इत्युक्तम् । उक्तं च तत्राविरोधः । दर्शितानि च तत्साधनानि तत्फलं चेत्यशेषमपि निरवद्यमवसेयम् ।

आचार्यरत्नाकरसंप्रसूता
सन्न्यायरत्नैरतिरत्नरूपा ।
उद्द्योतयन्ती परमं पुमांसं
दीपावली स्यात्पुरुषार्थसिद्धये ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्नारायणज्योतिःपूज्यचरणशिष्यस्य भगवत आनन्दानुभवस्य कृतौ न्यायरत्नदीपावल्यां चतुर्थोऽध्यायः ।

872 9. F. 43.

पञ्चकोशविमर्शिनी—त्यागराजकृता

Paper. 1 Fol. 8¼ × 6½ inches. 34

lines in a page. Grantha script. Old. Injured. Good writing.

Five stanzas teaching that the soul is distinct from the fivefold sheath supposed to invest the soul. The author Tyāgarāja was the pupil of Ānandanātha and belonged to Kās'yapagotra of Āndhra country. His other works are : Upades'asikhāmaṇi, (No. 770 of this volume) S'ivamīḍestotra, S'āntistava, Navamallikāstava, Rājarājes'varīstava, Āryāpañcadas'ī, Dharmāmbikāstava, S'ivātmasphūrtivilāsa, Navākṣarīstotra and Saṁvits'ataka.

Complete.

Beginning :

न चाहं शरीरं जडत्वात्पृथक्त्वा-
न्न च प्राणवर्गः पिपासादिमत्त्वात् ।
मनो नापि संकल्पमूलाश्रयत्वा-
त्ततस्त्यागराजस्वरूपोऽहमेव ॥ १ ॥

End :

न चेशः प्रभुत्वाच्च मायावृतत्वा-
न्न जीवोऽप्यविद्यावृतत्वाद्बहुत्वात् ।
न मायास्वरूपोऽप्यसत्त्वप्रसङ्गा-
त्ततस्त्यागराजस्वरूपोऽहमेव ॥ ९ ॥

Colophon :

इत्यानन्दनाथपादपद्मोपजीविना काश्यपगोत्रोत्पन्ने-नान्ध्रेण त्यागराजनाम्ना विरचिता पञ्चकोशविमर्शिनी संपूर्णा ।

873 28. K. 22.

पञ्चकोशविवेकः—शंकराचार्यकृतः

Palm-leaf. 2 Foll. 16 × 1½ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Distinguishes the soul from the fivefold sheath *namely* Annamaya, Prāṇamaya etc. The work is attributed to S'rī S'aṁkarācārya.

Complete.

Beginning :

अन्नमयो नात्मा, दृश्यत्वात् अन्नविकारत्वात् पुरीषवत् । अन्नमयवत्प्राणमयोऽपि नात्मा, दृश्यत्वात् वायुविकारत्वात् भस्त्रिकावायुवत् । सुषुप्तौ लीनेषु सर्वकरणेषु प्राणस्य सद्भावात् कथमनात्मेति चेत्, न, देहवत् बहिरन्तर्ज्ञानाभावात् ।

End :

स्मृतिश्च—

सोऽश्नुते सकलान्कामानक्रमेण सुरर्षभः ।
विदितब्रह्मरूपेण स मुक्तो नात्र संशयः ॥

इति ।

Colophon :

इति श्रीमच्छंकराचार्यविरचितं पञ्चकोशविवेक-प्रकरणं संपूर्णम् ।

874 10. D. 14.

पञ्चदशी—विद्यारण्यकृता

Paper. 270 Foll. 11½ × 5 inches, 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The MS. contains the commentary also copied up and down the text.

The Pañcadas'ī is a famous metrical compendium of the principles accepted in the school of Advaita-Vedānta in accordance with S'rī S'aṁkarācārya's view. The author Vidyāraṇya was identical with Mādhavācārya, brother of

Sāyaṇācārya, (the reputed commentator on Vedas) and the minister of Bukkaṇa *alias* the King Bukkarāya I (1356 to 1377 A.D.) of Vijayanagaram. He was the son of Māyaṇa and S'rīmatī. He was the author of the following other works: Parās'aramādhavīya, Jīvanmuktiviveka, Jaiminīyanyāyamālā and Vistara thereon. He was the pupil of S'aṁkarānanda, Bhāratītīrtha and Vidyātīrtha. The Pañcadas'ī is divided into three main chapters *namely* Viveka, Dipa and Ānanda, each containing 5 sub-divisions. Thus the work consists of 15 Prakaraṇas; *viz*: 1. Viveka—Pratyktattva, Pañcabhūta, Pañcakos'a, Dvaita and Mahā-Vākya. 2. Dīpa—Citra, Tṛpti, Kūṭastha, Dhyāna and Nāṭaka. 3. Ānanda—Yoga, Ātman, Advaita, Vidyā and Viṣaya. There are several printed editions of this work.

The MS. contains the three Chapters complete in the Order—Dīpa, Viveka and Ānanda.

Beginning of the *Dīpa* Chapter:

यथा चित्रपटे दृष्टमवस्थानां चतुष्टयम् ।
परमात्मनि विज्ञेयं तथावस्थाचतुष्टयम् ॥
यथा धौतो घट्टितश्च लाञ्छितो रञ्जितः पटः ।
चिदन्तर्यामिसूत्राणि विराट् चात्मा तथेष्यते ॥

End of the *Dīpa* Chapter:

यदि सर्वग्रहत्यागोऽशक्यस्तर्हि धियं व्रज ।
शरणं तदधीनोऽन्तर्बहिर्वेषोऽनुभूयताम् ॥

इति नाटकदीपं समाप्तम् ।

Beginning of the *Viveka* Chapter:

नमः श्रीशंकरानन्दगुरुपादाम्बुजन्मने ।
सविलासमहामोहग्राहग्रामैककर्मणे ॥
तत्पादाम्बुरुहद्वन्द्वसेवानिर्मलचेतसाम् ।
सुखबोधाय तत्त्वस्य विवेकोऽयं विधीयते ॥

End of the *Viveka* Chapter:

दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते ।
ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम् ॥

इति महावाक्यविवेकः ।

Beginning of *Ānanda* Chapter:

ब्रह्मानन्दं प्रवक्ष्यामि ज्ञाते तस्मिन्नशेषतः ।
ऐहिकामुष्मिकानर्थव्रातं हित्वा सुखायते ॥

End of the *Ānanda* Chapter:

प्रीयाद्धरिर्हरोऽनेन ब्रह्मानन्देन सर्वदा ।
पायाच्च प्राणिनः सर्वान् स्वाश्रिताञ्शुद्धमानसान् ॥

Colophon:

इति पञ्चदशीप्रकरणं समाप्तम् ॥

875 9. D. 26.

पञ्चदशी—विद्यारण्यकृता

Paper. 21 Foll. 10 × 6 inches. 12 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The MS. contains the commentary also.

Contains the Pañcakos'a, Dvaita and Mahāvākya portions of the Viveka chapter.

876 22. P. 1.

पञ्चदशी—विद्यारण्यकृता

Palm-leaf. 1 Fol. 13½ × 1⅛ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Mahāvākya portion of the Viveka chapter.

877 26. N. 16.

पञ्चदशी—विद्यारण्यकृता

Palm-leaf. 167 Foll. 18 × 1¾ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

It contains the commentary also.

Breaks off in the Ātma portion of the Ānanda chapter. Contains the chapters in the Order of Dīpa, Viveka and Ānanda.

878 28. J. 3.

पञ्चदशी—विद्यारण्यकृता

Palm-leaf. 24 Foll. 9½ × 1¾ inches. 18 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the commentary also.

Contains the Citra and Tṛpti portions of the Dīpa chapter.

879 29. M. 18.

पञ्चदशी—विद्यारण्यकृता

Palm-leaf. 218 Foll. 16½ × 2 inches. 8 lines in a page. Telugu script. Old. Much injured. Good writing.

The MS. contains the commentary also.

Wooden boards are added to both sides.

Contains the chapters Dīpa (wanting the beginning), Viveka and Ānanda.

880 30. C. 11.

पञ्चदशी—विद्यारण्यकृता

Palm-leaf. 3 Foll. 17 × 1¼ inches. 6 lines in a page. Telugu script. Old. Much injured. Illegible writing.

The MS. contains the commentary also.

Contains the Mahāvākya portion of the Viveka chapter.

881 34. F. 21.

पञ्चदशी—विद्यारण्यकृता

Palm-leaf. 54 Foll. 15½ × 1½ inches. 8 lines in a page. Telugu script. Old. Injured. Clear writing.

Wooden boards are added to both sides.

The MS. contains the commentary also.

Contains the Citra and Tṛpti (incomplete) portions of the Dīpa chapter.

882 10. D. 14.

पञ्चदशीव्याख्या—रामकृष्णकृता

Paper. 270 Foll. 11½ × 5 inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The MS. contains the text also.

This is a commentary on Vidyāraṇya's Pañcadasī by Rāmakṛṣṇa who mentions himself as a disciple of Vidyāraṇya the author of the text.

Contains the 3 chapters complete in the following order: Dīpa, Viveka and Ānanda.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
यस्य स्मरणमात्रेण विघ्ना दूरं प्रयान्ति हि ।
वन्देऽहं दन्तिवक्त्रं तं वाञ्छितार्थप्रदायकम् ॥

नत्वा श्रीभारतीर्थविद्यारण्यमुनीश्वरौ ।
क्रियते चित्रदीपस्य व्याख्या तात्पर्यबोधिनी ॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय परमात्मनीति पदेनेष्टदेवतातत्त्वानुसंधानलक्षणं मङ्गलमाचरन् अस्य ग्रन्थस्य वेदान्तप्रकरणत्वात् तदीयैरेव विषयादिभिस्तद्वत्तासिद्धिं मनसि निधाय अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते इति न्यायमनुसृत्य परमात्मन्यारोपितस्य जगतः स्थितिप्रकारं सदृष्टान्तं प्रतिजानीते—अथेति ।

End :

फलितमाह—निरुपाधीति । त्रिपुटीमानाभावात् भूमानन्द इत्युच्यत इत्यर्थः । ग्रन्थमुपसंहरति—ब्रह्मानन्देति । इदानीं ग्रन्थसमाप्तौ अभेदेन हरिं स्मरन् प्रार्थयते—प्रीयादिति ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचिते ब्रह्मानन्दे विषयानन्दो नाम पञ्चमोऽध्यायः ।

पञ्चदशीप्रकरणं समाप्तम्

883 9. D. 26.

पञ्चदशीव्याख्या—रामकृष्णकृता

Paper. 21 Foll. 10 × 6 inches. 12 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The MS. contains the text also.

Contains the Pañckosa, Dvaita and Mahāvākya portions of the Viveka chapter.

884 9. E. 29.

पञ्चदशीव्याख्या—रामकृष्णकृता

Paper. 26 Foll. 11 × 4 inches. 12 lines in a page. Devanāgarī script. Old. Much injured. Good writing.

Contains the Citra portion of the Dīpa chapter.

885 9. H. 45.

पञ्चदशीव्याख्या—रामकृष्णकृता

Paper. 123 Foll. 12 × 9 inches. 21 lines in a page. Telugu script. Old. Injured. Good writing.

Wants beginning in the Citra portion of of the Dīpa chapter and breaks off in the Advaita portion of the Ānanda chapter, containing the Viveka chapter as the second.

886 22. P. 1.

पञ्चदशीव्याख्या—रामकृष्णकृता

Palm-leaf. 4 Foll. $13\frac{1}{2}$ × $1\frac{1}{8}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Mahāvākya portion of the Viveka chapter.

887 24. F. 20.

पञ्चदशीव्याख्या—रामकृष्णकृता

Palm-leaf. 7 Foll. $8\frac{1}{2}$ × 1 inches. 5 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the Mahāvākya portion of the Viveka chapter.

888 26. N. 16.

पञ्चदशीव्याख्या—रामकृष्णकृता

Palm-leaf. 167 Foll. 18 × $1\frac{3}{4}$ inches.

10 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the text also.

Contains the following chapters in the order—Dīpa, Viveka and Ānanda (breaking in the Ātma portion).

889 28. J. 3.

पञ्चदशीव्याख्या—रामकृष्णकृता

Palm-leaf. 24 Foll. $9\frac{1}{2} \times 1\frac{3}{4}$ inches. 18 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the text also.

Contains the Citra and Tṛpti portions of the Dīpa chapter.

890 29. M. 18.

पञ्चदशीव्याख्या—रामकृष्णकृता

Palm-leaf. 218 Foll. $16\frac{1}{2} \times 2$ inches. 8 lines in a page. Telugu script. Old. Much injured. Illegible writing.

The MS. contains the text also.

Wooden boards are added to both sides.

Contains the chapters Dipa (wanting the beginning) Viveka and Ānanda.

891 30. C. 11.

पञ्चदशीव्याख्या—रामकृष्णकृता

Palm-leaf. 3 Foll. $17 \times 1\frac{1}{4}$ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the text also.

Contains the Mahāvākya portion of the Viveka chapter.

892 34. F. 21.

पञ्चदशीव्याख्या—रामकृष्णकृता

Palm-leaf. 54 Foll. $15\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Telugu script. Old. Injured. Clear writing.

The MS. contains the text also.

Wooden boards are added to both sides.

Contains the Citra and Tṛpti (Incomplete) portions of the Dīpa chapter.

893 8. D. 68.

पञ्चप्रकरणी—रामदासकृता

Paper. 29 Foll. $7\frac{1}{4} \times 5\frac{1}{2}$ inches. lines in a page. Telugu script. Old. Good. Good writing.

The Foll. bear the serial numbers 1 to 31. Foll. Nos. 3 and 4 are missing.

This is a short Prakaraṇa work on Advaita-Vedānta explaining the principles accepted in that school of Vedānta philosophy. The author's name is mentioned as Rāmadāsa. The work is divided into the following five chapters :

१. ब्रह्मात्मज्ञानविवेकः, २. अध्यारोपकथनम्, ३. अपवादनिरूपणम्, ४. साधनप्रकारनिरूपणम्, ५. आत्मप्रकाशनिरूपणम्.

Complete with a small break in the 1st chapter.

Beginning :

श्रीरामं सीतया सार्धं नत्वा सर्वहृदि स्थितम्।
तत्सुखानुभवग्रन्थं कुर्वे बुद्धिविशुद्धये ॥
सच्चिदानन्दरूपं तत्पूर्णं विष्णोः परं पदम्।

यत्प्राप्तये समारब्धा वेदान्ताः सकला अपि ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशान्ते महात्मनः ॥
अहं बद्धोऽस्मि संसारे मम मुक्तिः कथं भवेत् ।
किंचिद्वैराग्यसंपन्नः सोऽस्मिञ्शास्त्रेऽधिकारवान् ॥

तत्र प्रथमं गुरुशिष्यलक्षणम् । शान्तो दान्तो जितेन्द्रिय इह लोके परलोके च विषयसुखनिःस्पृहः शिष्यो योग्यो ज्ञानाधिकारी च । वेदान्तशास्त्रनिपुणो ब्रह्मानुभवसंपन्नश्च गुरुर्योग्यः । शान्तो दान्त उपरतस्तितिक्षुरिति, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति च श्रुतिद्वयम् ।

End :

किं बहुना । अयं देहयात्रामात्रार्थमिच्छानिच्छापरीच्छाप्रापितानि सुखदुःखलक्षणानि प्रारब्धफलान्यनुभवति । अन्तःकरणाभासादीनामवभाससाक्षी सन् तदा अवसाने प्रत्यगात्मनि ब्रह्मणि प्राणलये सति अज्ञानतत्कार्यविनाशात् परमकैवल्यानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डैकरसं ब्रह्मैवावतिष्ठते । न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते । विमुक्तश्च विमुच्यत इति श्रुतेः । आत्मलाभान्न परं विद्यत इति च । ब्रह्म वेद ब्रह्मैव भवति । ओं नमो ब्रह्माद्विन्नं परं नास्ति न भूतो न भविष्यति ।

Colophon :

इति पञ्चप्रकरण्यामात्मप्रकाशनिरूपणं नाम पञ्चमप्रकरणं संपूर्णम् ।

पञ्चप्रकरणीमेतां सत्सुखानुभवप्रदाम् ।
विचारयन्ति ये नित्यमात्मारामा भवन्ति ते ॥
इति श्रीमद्रामदासविरचिता पञ्चप्रकरणी समाप्ता ।

The scribe adds :

बार्हस्पत्यमानरक्ताक्षिनामसंवत्सरकार्त्तिकबहुल ११ मङ्गलवारंनाटिकि श्रीवेन्दिलोजाजालमुब्बावधानिलिखितम् ।

894 30. G. 13.

पञ्चरत्नम्—शंकराचार्यकृतम्

Palm-leaf. 1 Fol. 12½ × 1 inches. 8 lines in a page. Grantha script. Old. Fair. Good writing.

Five gem-verses teaching that Ātman is distinct from the body, senses etc. The work is attributed to the famous S'rī S'aṁkarācārya. The work is also called Ātmapañcaka or Advaitapañcaka. It was printed and published with the title Advaitapañcaka in the S'rī S'āṁkara granthāvali, Srirangam. Vol. 16.

Complete.

Beginning :

नाहं देहो नेन्द्रियाण्यन्तरङ्गं
नाहंकारः प्राणवर्गो न बुद्धिः ।
दारापत्यक्षेत्रवित्तादिदूरः
साक्षी नित्यः प्रत्यगात्मा शिवोऽहम् ॥ १ ॥

End :

मत्तो नान्यत्किंचिदत्रास्ति दृश्यं
सत्यं बाह्यं वस्तु मायोपकल्पितम् ।
आदर्शान्तर्भासमानस्य तुल्यं
मय्यद्वैते भाति तस्माच्छिवोऽहम् ॥ ५ ॥

The following extra verse is added at the end :

जाग्रत्युद्भूतबाह्येन्द्रियविषयसमुल्लाससाक्षी शिवोऽहं
स्वप्ने दृष्टप्रपञ्चप्रतिफलनमनोवृत्तिसाक्षी शिवोऽहम् ।
सुप्ते चित्ते प्रलीने प्रबलतममहामोहसाक्षी शिवोऽहं
नित्यानन्दस्तुरीये विगतकलिमलः सर्वसाक्षी शिवोऽहम् ॥

Colophon :

आत्मपञ्चकं संपूर्णम् ।

895 8. G. 37.

पञ्चरत्नम्—शंकराचार्यकृतम्

Paper. 2 Foll. 6½ × 4½ inches. 20 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

896 9. B. 32.

पञ्चरत्नम्—शंकराचार्यकृतम्

Paper. 8 Foll. 6½ × 4½ inches. 12 lines in a page. Kanarese script. Old. Good. Good writing.

The MS. contains the commentary also.

Complete.

897 9. F. 44.

पञ्चरत्नम्—शंकराचार्यकृतम्

Paper. 2 Foll. 9 × 6½ inches. 32 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the commentary also.

Contains the verse 1 to 4 only.

898 26. N. 3.

पञ्चरत्नम्—शंकराचार्यकृतम्

Palm-leaf. 1 Fol. 16 × 1½ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

899 9. B. 32.

पञ्चरत्नव्याख्या—नारायणेन्द्रकृता

Paper. 8 Foll. 6½ × 4⅛ inches. 12 lines in a page. Kanarese script. Old. Good. Good writing.

The MS. contains the text also.

This is a commentary on S'rī S'aṁkarācārya's Pañcaratna described above. The name of the commentator is mentioned as Nārāyaṇendra. Another copy of this work available in the Madras Govt. Oriental MSS. Library (D. 4632) mentions the title of the commentary as Kalpavallī.

Complete.

Beginning :

यदज्ञानाज्जगत्सर्वं यस्मिन्नेवावभासते ।
विज्ञाने नास्ति यत्सर्वं तद्वन्दे ब्रह्म सर्वगम् ॥

अथ भगवान् शंकराचार्यस्त्रिलोकगुरुः अज्ञानतिमिरभास्करस्वरूपः परमात्मा लोके मन्दबुद्धीनामनुग्रहार्थं करतलामलकवत् ब्रह्मसाक्षात्कारसिद्धयर्थं सर्ववेदान्तसारभूतं गुरोः प्रसादसिद्धमर्थमात्मानात्मविवेकपूर्वकं स्वानुभवं प्रकटयति पञ्चभिः श्लोकरत्नैः—नाहमिति । अस्यार्थः—परिदृश्यमानः स्थूलदेह आत्मा न । कथमिति चेत्, अस्यानात्मत्वात् । अनात्मत्वं कथमिति चेत्, भूतकार्यत्वात् ।

End :

गुरुवेदान्तवाक्येषु विश्वासश्रद्धाभक्तिपराः साधनचतुष्टयसंपन्ना देहाभिमानरहिता भक्तिज्ञानवैराग्यसंपन्नाश्चेत् तेषां मुक्तिः करतलामलकवदिति निश्चितार्थो भवतीत्यर्थः ।

Colophon :

नारायणेन्द्रविरचितं पञ्चरत्नव्याख्यानं समाप्तम् ।

Adds the following extra verse :

जीवः शिवः शिवो जीवः स जीवः केवलः शिवः ।
पाशबद्धः शिवो जीवः पाशमुक्तः सदाशिवः ॥

900 9. F. 44.

पञ्चरत्नव्याख्या

Paper. 2 Foll. 9 × 6½ inches. 32 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the text also.

This is another commentary on the Pañcaratna of S'rī S'aṁkarācārya. The commentator's name is not known.

Breaks off in the 4th verse.

Beginning:

अत्र भगवान् श्रीमच्छंकराचार्यो मन्दमतीनामात्मबोधाख्यप्रकरणं प्रदर्श्य तत्रापि मन्दमतीनामनुग्रहार्थं सर्वोपनिषत्सिद्धमर्थं गुरोः प्रसादात् सिद्धमात्मानात्मविवेकपूर्वकं स्वानुभवं प्रकटयति पञ्चभिः श्लोकैः—नाहमिति।

End:

ननु अहं . . जातः प्रवृद्धो नष्टः पश्यामि तिष्ठामीत्यादिना अहं कर्तेत्यादिना चानुभूयमानस्य मम नात्मत्वं स्यात्। यद्यज्जन्मादिधर्मकं तत्तदनात्मा यथा घट इत्यनुमानादित्याशङ्कमानं शिष्यं प्रति देहस्यैते धर्मा जननादयः; कर्तृत्वादिस्त्वहंकारस्यैवेत्युत्तरं पठति—जातो नाहं + शिवोऽहम्।

901 9. B. 30.

पञ्चीकरणम्—शंकराचार्यकृतम्

Paper. 1 Fol. 9¾ × 9 inches. 24 lines in a page. Telugu script. Old. Injured. Good writing.

This is a small Prakaraṇa work dealing with the process on which the five subtle elements combined together form the gross elements and the material world. The work is attributed to S'rī S'aṁkarācārya. The work is available in print.

Complete.

Beginning:

अथातः परमहंसपरिव्राजकानां समाधिविधिं व्याख्यास्यामः। सच्छब्दवाच्यमविद्याशबलं ब्रह्म, ब्रह्मणोऽव्यक्तम्, अव्यक्तान्महत्, महतोऽहंकारः, अहंकारात्पञ्च तन्मात्राणि, पञ्चतन्मात्रेभ्यः पञ्च महाभूतानि, पञ्चमहाभूतेभ्योऽखिलं जगत्। पञ्चानां भूतानामेकैकं द्विधा विभज्य तयोरेकं चतुर्धा विभज्येतरेषु संयोजनं पञ्चीकरणं भवति।

End:

अकार उकारे, उकारो मकारे, मकार ओंकारे, ओंकारोऽहमेव। अहमात्मा साक्षी कूटस्थः चिन्मात्रस्वरूपः। नाज्ञानं तत्कार्यं च। किंतु नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयं परब्रह्मैवाहमस्मीत्यभिदावस्थानं समाधिः।

Colophon:

पञ्चीकरणं समाप्तम्।

902 9. C. 103.

पञ्चीकरणम्—शंकराचार्यकृतम्

Paper. 2 Foll. 7½ × 5½ inches. 24 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

Adds at the end a few extra lines on the japa of Mahāvākya mantras.

903 27. D. 49.

पञ्चीकरणम्—शंकराचार्यकृतम्

Palm-leaf. 1 Fol. 9 × 1¾ inches. 13

lines in a page. Grantha script. Old. Fair. Good writing.

Complete.

904 28. F. 20.

पञ्चीकरणम्—शंकराचार्यकृतम्

Palm-leaf. 6 Foll. $15\frac{3}{4} \times 2$ inches. 11 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the commentary also.

Complete.

905 33. N. 46.

पञ्चीकरणम्—शंकराचार्यकृतम्

Palm-leaf. 3 Foll. $10\frac{1}{2} \times \frac{1}{2}$ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

906 35. C. 54.

पञ्चीकरणम्—शंकराचार्यकृतम्

Paper. 5 Foll. $9\frac{1}{2} \times 4\frac{3}{4}$ inches. 13 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The MS. contains the commentary also.

The leaves bear the serial Nos. 3 to 7.

Wants beginning; otherwise complete.

907 34. O. 25.

पञ्चीकरणम्—शंकराचार्यकृतम्

Palm-leaf. 2 Foll. $9\frac{1}{2} \times 1\frac{1}{2}$ inches. 9 lines in a page. Grantha script. Old. Fair. Good writing.

Complete.

908 25. O. 9.

पञ्चीकरणम्—अभिनवसदाशिवब्रह्मेन्द्रकृतम्

Palm-leaf. 4 Foll. $12\frac{3}{4} \times 1\frac{1}{4}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

This Pañcīkaraṇa is different from the work described above. The author's name is mentioned as Abhinava-Sadāsivabrahmendra disciple of Rāmacandrendra, probably of the 19thcentury.

Complete.

Beginning:

अव्याजकरुणापूरमज्ञानध्वान्तभास्करम् ।
श्रीरामचन्द्रं संसारपारं नौमि परात्परम् ॥
वेदान्तग्रन्थतात्पर्यग्रहणासक्तचेतसाम् ।
ब्रह्मतत्त्वं स्फुटीकर्तुं पञ्चीकरणमुच्यते ॥
अनिर्देश्यमपि ब्रह्म ह्यध्यारोपापवादतः ।
निर्देष्टुं श्रुत्यवष्टम्भाच्छक्यमल्पप्रयासतः ॥
अध्यारोपक्रमं वक्ष्ये मन्दबुद्ध्यनुसारतः ।
येनोपायेन मन्दानां ब्रह्मारोहं भवेन्मनः ॥
पञ्चविंशतिकोष्ठानि तदीशाने तु दण्डवत् ।
पञ्चकोष्ठयां लिखेत्तत्र पुच्छं प्रथममुच्यते ॥
वर्तुलं धवलं सूक्ष्मं स्निग्धं ब्रह्मात्ममुच्यते ।
त्रिकोणं धवलं सूक्ष्मम्क्षं प्राकृतमुच्यते ॥
मायिकं पाण्डरं स्थूलं त्रिकोणं त्वक्षमुच्यते ।
अक्षमावरणाख्यं यत् त्रिकोणं कृष्णपाण्डरम् ॥

End:

तथैव प्रत्यगभिन्ने ब्रह्मणि स्वाज्ञानविजृम्भित-नानारचनाध्वान्तं देशिकमुखोद्भूतवेदान्तश्रवणमनन-निदिध्यासनज्ञानप्रचण्डमार्ताण्डप्रकाशैकदेशान्निर्मूल्य

सर्वकलनाशून्यनित्यशुद्धबुद्धमुक्तस्वभावत्रिपान्नारायण-सत्तासामान्यब्रह्माहमस्मीति ब्रह्मैव संपद्यते ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्र-शिष्याभिनवसदाशिवब्रह्मेन्द्रकृतं पञ्चीकरणं संपूर्णम् ।

909 30. G. 13.

पञ्चीकरणम्—अभिनवसदाशिवब्रह्मेन्द्रकृतम्

Palm-leaf. 6 Foll. $12\frac{3}{4} \times 1$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

910 26. L. 42.

पञ्चीकरणम्—अभिनवसदाशिवब्रह्मेन्द्रकृतम्

Palm-leaf. 16 Foll. 12×1 inches. 4 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Reads the following additional verses in the beginning:

आनन्दमानन्दकरं प्रसन्नं
ज्ञानस्वरूपं निजबोधयुक्तम् ।
योगीन्द्रवन्द्यं भवरोगवैद्यं
श्रीमद्गुरुं नित्यमहं नमामि ॥
तमहं रामकृष्णाख्यसंज्ञं सच्चित्सुखात्मकम् ।
नमस्करोमि श्रुत्युक्ततत्पदप्राप्तिवाञ्छया ॥

Adds in the end:

वायुना नीयते मेघः पुनस्तेनैव नीयते ।
मनसा कल्प्यते बन्धो मोक्षस्तेनैव कल्प्यते ॥
या मा सा मायेति या न विद्यते साविद्येति ।

911 26. N. 3.

पञ्चीकरणवार्तिकम्—सुरेश्वराचार्यकृतम्

Palm-leaf. 5 Foll. $16 \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

This is a metrical exposition on the Pañcīkaraṇa of S'rī S'aṁkarācārya. The author Sures'vara was the direct pupil of S'rī S'aṁkarācārya and he was called Vis'varūpācārya in his pre-Saṁnyāsās'rama. There are many printed editions of this work. It contains 62 verses.

Complete.

Beginning:

ओंकारः सर्ववेदानां सारस्तत्त्वप्रकाशकः ।
तेन चित्तेन विज्ञानं मुमुक्षूणां प्रकाश्यते ॥
आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियम् ।
तत्स्वमायासमावेशाद्बीजमव्याकृतात्मकम् ॥
तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकम् ।
स्पर्शात्मकस्ततो वायुस्तेजो रूपात्मकं ततः ॥

End:

वाच्यवाचकनिर्मुक्तं हेयोपादेयवर्जितम् ।
प्रज्ञानघनमानन्दं वैष्णवं पदमश्नुते ॥
इदं प्रकरणं यत्नाज्ज्ञातव्यं ब्रह्मवित्तमैः ।
अमानित्वादिनियमैर्गुरुभक्तिप्रसादतः ॥
इमां विद्यां प्रयत्नेन योगी सन्ध्यासु सर्वदा ।
समभ्यसेदिहामुत्र भोगानासक्तधीः सुधीः ॥

Colophon:

इति परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पूज्यपादशिष्यश्रीसुरेश्वराचार्यविरचितं पञ्चीकरणवार्त्तिकं समाप्तम् ।

912 19. N. 23.

पञ्चीकरणवार्त्तिकम्—सुरेश्वराचार्यकृतम्

Palm-leaf. 3 Foll. 14 × 1 inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

913 24. O. 9.

पञ्चीकरणवार्त्तिकम्—सुरेश्वराचार्यकृतम्

Palm-leaf. 2 Foll. 12 × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden board is added in the front side.

Wants beginning; otherwise complete.

Adds the following verse at the end before colophon :

रागद्वेषादिरहित आत्मानं चिन्तयेत्सदा ।
कैवल्यं लभते गम्यं योगिभिर्नात्र संशयः ॥

914 27. D. 49.

पञ्चीकरणवार्त्तिकम्—सुरेश्वराचार्यकृतम्

Palm-leaf. 4 Foll. 9 × 1¾ inches. 13 lines in a page. Grantha script. Old. Fair. Good writing.

Complete.

915 28. F. 21.

पञ्चीकरणवार्त्तिकम्—सुरेश्वराचार्यकृतम्

Palm-leaf. 6 Foll. 10 × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Adds at the end the verse रागद्वेषादिरहितः etc. as given in No. 913 above

916 28. N. 32.

पञ्चीकरणवार्त्तिकम्—सुरेश्वराचार्यकृतम्

Palm-leaf. 4 Foll. 15 × 1⅛ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

917 33. H. 5.

पञ्चीकरणवार्त्तिकम्—सुरेश्वराचार्यकृतम्

Palm-leaf. 2 Foll. 10 × 2¼ inches. 13 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

918 33. N. 46.

पञ्चीकरणवार्त्तिकम्—सुरेश्वराचार्यकृतम्

Palm-leaf. 6 Foll. 10½ × ½ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

919 34. K. 7.

पञ्चीकरणवार्त्तिकम्—सुरेश्वराचार्यकृतम्

Palm-leaf. 3 Foll. 15 × 1¼ inches. 8 lines in a page. Grantha script. Old. Much injured. Clear writing.

Complete.

920 35. C. 54.

पञ्चीकरणवार्त्तिकम्—सुरेश्वराचार्यकृतम

Paper. 4 Foll. 9½ × 4¾ inches. 15 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Complete.

921 10. E. 33.

पञ्चीकरणव्याख्या विवरणम्—आनन्दज्ञानकृतम्

Paper. 11 Foll. 10 × 5¼ inches. 9 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is a commentary on S'rī S'aṁkarācārya's Pañcīkaraṇa. The commentary is called Vivaraṇa. The author Ānandajñāna also called Ānandagiri was the pupil of S'uddānanda and Anubūtisvarūpācārya. It is understood that Ānandajñāna was called Janārdana in his pre-Saṁnyāsāsrama and wrote the Tattvāloka. It is said that he was a native of Gujarat and lived in the latter half of the 13th century about 1280 A.D. He has written also commentaries on S'rī S'aṁkarācārya's Brahmasūtrabhāṣya and Upaniṣadbhāṣyas. This Vivaraṇa is available in print. According to this commentary, the text of the Pañcīkaraṇa begins only with the line पञ्चीकृतपञ्चमहाभूतानि etc.

Complete.

Beginning :

यदबोधादिदं भाति यद्बोधाद्विनिवर्तते ।
नमस्तस्मै परानन्दवपुषे परमात्मने ॥

अतीतानेकजन्मसुकृततत्प्रसादासादितशुद्धबुद्धिमतां विवेकवैराग्यशमदमादिसाधनसंपन्नानां परित्यक्तसर्वकर्मणां मोक्षमात्रमाकाङ्क्षतां तदुपायभूतं तत्त्वज्ञानमापातत: श्रुतिमुखादधिगतमपि सम्यगवाप्तुमिच्छतामतिलघुनोपायेन कथमिदमुत्पद्यतामिति मन्वान: सन्नाचार्य:

End :

तदेवमधिकारिणो वाक्यात् ब्रह्मैक्यसाक्षात्कारसमुत्पत्तौ अज्ञानतत्कार्यनिवृत्तौ अनारब्धफलादुपार्जितकर्मदहनादुत्तरकालीनकर्मणश्चानाश्लोषात् आरब्धफलकर्मणश्च भोगेनैव क्षयात् तदवस्थितिप्रयुक्तदेहावभासनिवृत्तौ तदात्मनावस्थिताविद्याभावात् तत्कार्यनिवृत्तेश्च वस्तुस्वरूपेणैव परिशेषात् प्रत्यगात्मा सच्चिदानन्दात्मकसत्यज्ञानानन्तानन्दस्वरूपं ब्रह्मैवेति सिद्धम् ।

षड्विधं लिङ्गमाश्रित्य वेदान्ता यत्र निष्ठिता: ।
विधानप्रतिषेधाभ्यां तं वन्दे पुरुषोत्तमम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छंकरभगवत्पादविरचितपञ्चीकरणस्यानन्दगिरिटीका संपूर्णा ।

922 28. F. 20.

पञ्चीकरणव्याख्या विवरणम्—आनन्दज्ञानकृतम्

Palm-leaf. 6 Foll. 15¾ × 2 inches. 11 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the text also.

Complete.

923 35. C. 54.

पञ्चीकरणव्याख्या विवरणम्—आनन्दज्ञानकृतम्

Paper. 5 Foll. 9½ × 4¾ inches. 13 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The MS. contains the text also.

The leaves bear the serial Nos. 3 to 7.

Wants beginning ; otherwise complete.

The scribe adds :

शके. १७४१ संवत्. १८७९ नर्मदोत्तरविकृति पौषशुद्धषष्ठी भृगौ पञ्चीकरणविवरणं समाप्तम् ।

924 10. E. 34.

पञ्चीकरणविवरणव्याख्या तत्त्वचन्द्रिका—रामतीर्थकृता

Paper. 13 Foll. $10\frac{1}{2} \times 5\frac{1}{2}$ inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is a commentary on the Pañcīkaraṇavivaraṇa of Ānandajñāna described above. The commentary is called Tattvacandrikā. The author Rāmatīrtha, was the pupil of Kṛṣṇatīrtha. His other works are: Upadeśasahasrīvyākhyā (No. 778 of this volume), Mānasollāsavyākhyā, Maitrāyaṇīyopaniṣadvyākhyā, Saṁkṣepaśārīrakavyākhyā and Vedāntasāravyākhyā. He is believed to have lived in the middle of the 17th century A.D.

Incomplete.

Beginning:

यन्नामरूपजगदुद्भवसंप्रतिष्ठा-
संरोधकारणमनिर्वचनीयशक्ति ।
सच्चित्सुखाद्वयवपुर्जगतो हिताय
रामाभिधामुपगतं भुवि तन्नमामि ॥
यत्पांसुधूसरितमस्तकमस्तपाप-
मज्ञानलक्षणमहाग्रहयक्षभूताः ।
मुक्त्वाशु मां ययुरजस्रमतीव रम्यं
श्रीकृष्णतीर्थगुरुपादयुगं नमामि ॥
जगन्नाथाश्रमाद्या ये गुरवो मे कृपालवः ।
तानहं विधिवन्नत्वा करवै तत्त्वचन्द्रिकाम् ॥

श्रीमच्छंकरभगवत्पूज्यपादविरचितं पञ्चीकरणाख्यं प्रकरणमतिसंक्षिप्तमनेकार्थसंग्रहगम्भीरमतिविमलमर्थतः प्रकटीचिकीर्षुरानन्दगिर्याचार्यः स्वचिकीर्षितस्याविघ्नपरिसमाप्तये विशिष्टशिष्टाचारपरिप्राप्तमिष्टदेवतानमस्कारलक्षणं मङ्गलमाचरन् शास्त्रस्य विषयप्रयोजने दर्शयति—यदबोधादिति । अयमक्षरार्थः—परमात्मने नम इत्यन्वयः ।

End:

तद्वेदमिति । अव्याकृतं सुषुप्तिनिद्रामायाविद्याशक्तिरित्याद्यनेकशब्दवाच्यमात्माज्ञानमित्यर्थः । तत्राज्ञानं सत्, उतासत्, अथवा सदसद्भिन्नम्, उताभिन्नम्, अथवा भिन्नाभिन्नमिति ।

925 34. K. 18.

पञ्चीकरणविवरणव्याख्या तत्त्वचन्द्रिका—रामतीर्थकृता

Palm-leaf. 28 Foll. 15×1 inches. 8 lines in a page. Grantha script. Old. Much injured. Illegible writing.

Wants beginning; otherwise complete.

Reads the following end:

षड्विधमिति ।

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

इति लिङ्गानि । विधानम्, सदेव सोम्येदमग्र आसीदित्यादि । प्रतिषेधः, नेह नानास्ति किंचनेत्यादिः ।

पञ्चीकृतेर्विवरणमर्थतः प्रकटीकृतम् ।
यथाश्रुतं यथाबुद्धि तेन तुष्येदुमापतिः ॥
सीतासुवर्णलतिकापरिवीतगात्रं
प्रेमारसार्द्रचरणं सुखपल्लवाढ्यम् ।
कीर्तिप्रसूनपरिपालितसर्वलोकं
रामाभिधं जगति कल्पतरुं नमामि ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकृष्णतीर्थ-

शिष्यरामतीर्थविरचिता पञ्चीकरणानन्दगिरीयव्याख्या तत्त्वचन्द्रिका संपूर्णा ।

926 41. A. 39.

पदार्थतत्त्वनिर्णयः—आनन्दानुभवकृतः

Paper. 52 Foll. $11\frac{3}{4} \times 4$ inches. 9 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The Padārthatattvanirṇaya is a metrical treatise explaining the characteristics of various Padārthas or categories accepted in the school of Advaita-Vedānta philosophy. The author Ānandānubhava was the pupil of Nārāyaṇajyotis. The author is known to have written the following other works: Iṣṭasiddhivivaraṇa (No. 769 of this volume) and Nyāyaratnadīpāvalī (No. 871 of this volume). Ānandajñāna *alias* Ānandagiri (1280 A.D.) is known to have written commentaries on the Padārthatattvanirṇaya and Nyāyaratnadīpāvalī (R. Nos. 4342 and 3604 of the Madras Government Oriental MSS. Library). Therefore our author's date must be about 1200 A.D. The work consists of two main Pariccheḍas *namely* Pūrvapakṣapariccheḍa and Siddhāntapariccheḍa. In the former Pariccheḍa the views of Naiyāyikas and Vaiśeṣikas are introduced and in the latter they are refuted.

Complete.

Beginning :

स जयति सिन्धुरवदनो
देवो यत्पादपङ्कजस्मरणम् ।
वासरमणिरिव तमसां
राशिं नाशयति विघ्नानाम् ॥
प्रणम्य विश्वसाक्षिणं गुरूंस्तदात्मनस्तथा ।
पदार्थतत्त्वनिर्णयः प्रवक्ष्यते प्रबोधनुत् ॥

शिष्टाचारप्राप्तेष्टदेवतागुरुनमस्कारच्छलेन प्रारब्धग्रन्थार्थतत्प्रयोजने चाविष्करोति—प्रणम्येति । विषयप्रयोजनकथनेनार्थात्संबन्धोऽधिकारी च दर्शितः । विश्वस्य साक्षी । अथवा विश्वश्चासौ साक्षी चेति विग्रहः । स्वाध्यस्तं विश्वं तादात्म्यसंबन्धात्साक्षादीक्षत इति विश्वसाक्षी । अतः स स्वयंज्योतिरद्वितीयश्चेत्युक्तं भवति । न हि तटस्थस्य ज्ञानवतः साक्षादीक्षणमुपपद्यते, ज्ञानार्थयोः संयोगाद्यसंभवात् । न च तटस्थे सर्वज्ञे मानमस्ति । सर्वं चैतत्सिद्धान्तपरिच्छेदे स्फुटं वक्ष्यामः । तं विश्वसाक्षिणं गुरूंश्च तदनुभवतस्तद्रूपान् । भक्त्यादिप्रकर्षेण तत्ता । दृग्दृश्यपदार्थयोस्तत्त्वं याथात्म्यम् । तन्निर्णयः इत्थं तत् नान्यथेत्यवधारणम् । विशदं वक्ष्यते । स चाज्ञानविपर्ययसंशयोपरमहेतुः ।

End :

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति, यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, इन्द्रो मायाभिः पुरुरूप ईयते, वाचारम्भणं विकार इत्याद्यागमहतत्वात् जडत्वादिहेतुभिश्च । प्रपञ्चितं चैतदिष्टसिद्धिविवरणे रत्नदीपावल्यां चेत्यलं विस्तरेणेति ।

पदार्थनिर्णयो जीयात्प्रतिपक्षातिशातनः ।
श्रेयोहर्म्यारुरुक्षूणां दत्तहस्तावलम्बनः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीनारायणज्योतिःशिष्येण भगवदानन्दानुभवेन विरचितः पदार्थतत्त्वनिर्णयः समाप्तः ।

The scribe adds :

पदार्थतत्त्वनिर्णयो नाम तर्कशास्त्रग्रन्थो गोविन्द-दशपुत्रस्य ।

927 28. F. 31.

परमार्थसारः—शेषकृतः

Palm-leaf. 67 Foll. 9 × 1½ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the Telugu meaning also of the verses.

The Paramārthasāra, as the title itself indicates, gives the important essence of the truth of Advaita-Vedānta in 85 Āryā verses. The author is mentioned as S'eṣa whom the commentator identifies with the Serpent-God (Ādi-S'eṣa). The work is also called S'eṣāryā after the author's name. As Ādi-S'eṣa is supposed to be the support of the earth bearing it on his head, he is also called by the name Jagadādhāra or simply Ādhāra. Hence the work is also called Ādhārakārikā. This work should not be confounded with Abhinavagupta's Paramārthasāra on Kashmerian Saivism.

Complete.

Beginning :

परं परस्याः प्रकृतेरनादि-
मेकं निविष्टं बहुधा गुहासु ।
सर्वालयं सर्वचराचरस्थं
त्वामेव विष्णुं शरणं प्रपद्ये ॥ १ ॥
आत्माम्बुराशौ निखिलोऽपि लोको
मग्नोऽपि नाचामति नेक्षते च ।
आश्चर्यमेतन्मृगतृष्णिकाभे
भवाम्बुराशौ रमते मृषैव ॥ २ ॥
गर्भगृहवाससंभव-
जन्मजरामरणविप्रयोगाब्धौ ।
जगदालोक्य निमग्नं
प्राह गुरुं प्राञ्जलिः शिष्यः ॥ ३ ॥

End :

महता कालेन महान्
मानुष्यं प्राप्य योगमभ्यस्य ।
प्राप्नोति दिव्यममृतं
यत्तत्परमं पदं विष्णोः ॥ ८६ ॥
वेदान्तशास्त्रमखिलं
विलोक्य शेषस्तु जगदाधारः ।
आर्यापञ्चाशीत्या
बबन्ध परमार्थसारमिदम् ॥ ८७ ॥

The first two stanzas read in the beginning, belong to the commentary.

928 22. O. 22.

परमार्थसारः—शेषकृतः

Palm-leaf. 51 Foll. 14 × 1½ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wants the first verse ; otherwise complete.

The MS. contains the commentary also.

929 34. K. 3.

परमार्थसारः—शेषकृतः

Palm-leaf. 17 Foll. 15 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injnred. Clear writing.

Begins in the 46th verse and goes on upto the end of the 84th verse.

The MS. contains the commentary also.

930 34. O. 25.

परमार्थसारः—शेषकृतः

Palm-leaf. 5 Fol. $9\frac{1}{2} \times 1\frac{1}{2}$ inches. 9 lines in a page. Grantha script. Old. Fair. Good writing.

Contains the verses 39 to 85.

Reads the following colophon :

शेषार्या समाप्ता ।

931 22. O. 22.

परमार्थसारव्याख्या—राघवानन्दकृता

Palm-leaf. 51 Foll. $14 \times 1\frac{1}{2}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the text also.

This is a commentary on the Paramārthasāra of S'eṣa described in the last number. As the last leaf containing the colophon is partly missing, the author's name cannot be decided from the evidence of this MS. However this commentary is, more or less, the same as that of Rāghavānanda published in the Trivandrum Sanskrit Series No. XII with slight variation of readings. Rāghavānanda is said to have been the pupil of Kṛṣṇānanda the pupil of Rāmabhadrānanda and Svayamprakāsānanda. The available portion of the colophon mentions Svayamprakās'ānanda, evidently in some connection with the author of the commentary and apparently as grand teacher of Rāghavananda. The author's other works are : Bhāgavatavyākhyā Kṛṣṇapadī, Prapañcasāravyākhyā and Laghustutivyākhyā (Trivandrum Sanskrit Series No. 60). In one of the MSS. of the Laghustutivyākhyā of this author the date of copying is given as Kollam year 861 corresponding to 1685 A.D. Therefore our author must have lived atleast about 1600 A.D. Our author's grand teacher Svayamprakās'ānanda must be different from another Svayamprakās'ānanda, the teacher of Acyutakṛṣṇānanda and pupil of Advaitānanda.

Wants beginning ; otherwise complete.

Beginning :

सर्वालयत्वे हेतुः सर्वचराचरस्थमिति । सर्वेषु चराचरेषु देहादिषु स्थितमाकाशवत् व्याप्यावस्थितमित्यर्थः । त्वामेव विष्णुमिति जीवब्रह्मैक्यं वेदान्तानां विषयोऽस्य विषयो दर्शितः ।

End :

जगदाधारः ; जगतामाधारभूतः । शेषस्तु आदिशेषः । अखिलं समस्तं वेदान्तशास्त्रमद्वैतशास्त्रं विलोक्य सम्यग्विचार्य आर्यापञ्चाशीत्या पञ्चाशीत्यार्याश्लोकैः ब्रह्मात्मैक्यप्रतिपादकं ग्रन्थं बबन्ध रचितवान् ।

Colophon :

. . . . . हंसपरिव्राजकाचार्यस्वयंप्रकाश . . . पञ्चाशीतिव्याख्यानं संपूर्णम् ।

932 34. K. 3.

परमार्थसारव्याख्या—राघवानन्दकृता

Palm-leaf. 17 Foll. $15 \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Clear writing.

The MS. contains the text also.
Contains the stanzas 46 to 84 only.

933 28. H. 17.

पुरुषार्थरत्नाकरः— रङ्गनाथसूरिकृतः

Palm-leaf. 158 Foll. 15 × 1¾ inches. 10 lines in page. Telugu script. Old. Injured. Good writing.

The work deals with the various subjects as given below, which directly or indirectly relate to the school of Advaita-Vedānta. The author Raṅganāthasūri belonged to the Ātreyagotra and Kuravisseri family. The name of his native place is mentioned as Colakanallur on the bank of the river Kāverī near S'rīraṅgam. He was the pupil of Kṛṣṇānandayati who was the son of Visvanātha and Ambā and pupil of Rāmabhadrayati and Vāsudevendrayati. His teacher Kṛṣṇānandayati must be identical with the author of the Siddhāntasiddhāñjana where his teachers' names are mentioned as Rāmabhadrānanda, Vāsudevandra and Svayaṁprakāsānanda. Our author Raṅganāthasūri mentions here the line of his teachers as Pūrṇānandasarasvatī, Puruṣottamānānda, S'ivarāmānanda, Gopālānanda, Svayaṁprakāsānanda, Rāmabhadrānanda (Rāmānanda) and Kṛṣṇānanda. The author of the Siddhāntasiddhāñjana also mentions the same line beginning with Pūrṇānanda and ending with Rāmabhadrānanda. Regarding the date of our author, we have to rest on his co-pupil Rāmānandayati who copied Siddhāntasiddhāñjana in 1670 A.D. (Vide the Introduction to the Siddhāntasiddhāñjana, Trivandrum Sanskrit Series No. 47 of the year 1916). Therefore our author Raṅganāthasūri must have lived towards the end of the 17th century A.D.

The work deals with the following subjects in 15 chapters :

१. पुराणप्रामाण्यविवेकः, २. त्रिवर्गतत्त्वविवेकः, ३. मोक्षतत्त्वविवेकः, ४. चतुर्वर्गसाधनविवेकः, ५. वर्णाश्रमधर्माणां भगवदाराधनरूपत्वविवेकः, ६. वर्णादिधर्मविवेकः, ७. भगवदाराधनविशेषविवेकः, ८. नामकीर्तनादिविवेकः, ९. भगवदाराधनोपपत्तिविवेकः, १०. अधिकारिविवेकः, ११. तत्त्वंपदार्थविवेकः, १२. विवेकज्ञानविषयैकात्म्यविवेकः, १३. योगबहिरङ्गविवेकः, १४. संयमविषयफलविवेकः, १५. मुक्तगतिविवेकः.

Another palm-leaf MS. of this work is available in the Madras Govt. Oriental MSS. Library (D. No. 5774). The work is not available in print.

Complete in 15 chapters.

Beginning :

यस्मिन्नायतते निरन्तरसदानन्दैकसंविन्मये
सर्गस्थेमलयं समस्तजगतामस्तादिमायामयम् ।
तं प्रत्यञ्चमशेषबुद्धिकलनासर्वस्वदीपाङ्कुरं
कुर्मः संनतिकर्म शर्म परमं यत्तत्पदं वैष्णवम् ॥ १ ॥
अस्ति श्रीविश्वनाथो भुवि सकलकलासार्वभौमः सुशीलस्तस्याम्बार्येति यार्या द्विगुणगुणतया विश्रुता धर्मपत्नी ।
तस्याः शुक्तेरिवासीदतिगुणमिव यो मौक्तिकं मुक्तसङ्गः
सोऽयं श्रीकृष्णयोगी जगति विजयते देशिकेन्द्रो यतीन्द्रः ॥

प्रागाज्ञनेयमुखमौनिकुलाय तत्त्वं
योऽदिक्षदादिमगुरुर्विजयाय यश्च ।

श्रीरामभद्रयमिसंयमिवासुदेवौ
तौ यद्गुरू तमुपयामि पतिं यतीनाम् ॥ ३ ॥
कावेरीपरिवाहवीचिनिवहप्रेङ्खोलपर्यङ्किका-
हिण्डत्कुण्डलिमण्डलीशशयनं यत्राधिशेते हरिः ।
श्रीरङ्गं महदस्ति धाम परमं यत्प्राहुरेकान्तिनः
प्रत्यक्षं परमं पदं तदिति यत्पर्यङ्कविद्याविदाम् ॥ ४ ॥
श्रीरङ्गावनिभागे सदातिथेयैरधिष्ठितः सुजनैः ।
चोलकनल्लूरस्ति ग्रामः श्रीमान् कवेरजोपान्ते ॥५॥
मिमानस्त्रैलोक्यं मिषति दिविषद्द्वेषिणि कलौ
पराश्चर्यैः पर्यापितविबुधकार्यः सुचरितैः ।
दयादृष्ट्या वृष्ट्या कलममिव काले सफलयन्
जगत्यत्र श्रीशो जयति कुहनावामनवटुः ॥ ६ ॥
कलमधुरात्यभिरामे कलमधुरालापकोकिलारामे ।
तस्मिन् सुजनावासे कावेरीहारिणि ग्रामे ॥ ७ ॥
शुभचरितोऽखिलमित्रं
सज्जनसामान्यसंपदार्यमतिः ।
गुरुजनवृद्धविनीतो
गुणमणिखनिरस्ति रङ्गनाथसुधीः ॥ ८ ॥
सुमतिरिह स रङ्गनाथो
बुधो रचयति पुरुषार्थरत्नाकरम् ।
विशदतरपुराणसारा-
मृतैः सुनिभृतमवगाहनीयं सताम् ॥ ९ ॥
संगृह्य वैष्णवपुराणसुभाषितानि
क्वापीतरार्षवचनानि च रङ्गनाथः ।
आत्रेयगोत्रतिलकः कुरुते पुमर्थ-
रत्नाकरं कुरविशेरिकुलप्रदीपः ॥ १० ॥
बाहुश्रुत्यपरिष्कृतोज्ज्वलगुणा नाखण्डिता पाण्डिती
सूक्ष्मार्थावगतिक्षमोहसरणिं मेधा न मे धावति ।
कोऽहं वस्तुगतिं विवेक्तुमथवा वक्तुं स एव स्वयं
मद्भावं प्रतिपद्य देशिकपतिर्वाचालयत्वद्य माम् ॥११॥
निर्णेतुं पुरुषार्थतत्त्वमखिलं ज्ञातुं च तत्साधनं
विष्ण्वाराधनमञ्जसा भगवतस्तत्त्वं विवेक्तुं परम् ।
निर्वाणं प्रतिपत्तुमत्र परमं यद्यायता लालसा
गाहध्वं पुरुषार्थरत्ननिलयं शक्यावगाहं सताम् ॥१२॥

इह खलु विद्यास्थानेषु ब्राह्मादिपुराणानि परिगणितानि—

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥

इति । तथा—

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥

इति ।

End :

एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीत्यादिदर्शनात् प्रव्रजितेन प्रत्यगेकरसपरमात्मतत्त्वसाक्षात्कारयोगे परमात्माराधने सम्यक्प्रणिधातव्यमित्यशेषमतिमङ्गलम् ।

विश्वोद्भूतिविभूतिसंस्थितिमहालीलारसज्ञो मृषा-
मायाशक्तिवशंवदात्ममहिमा यः प्रत्यगेकात्मकः ।
यस्याराधनमीप्सितार्थघटनादीक्षागृहीतव्रतं
स स्वाराधनमेव मत्कृतिमिमामङ्गीक्रियादीश्वरः ॥
निर्णेतुं पुरुषार्थतत्त्व + शक्यावगाहं सताम् ॥
प्राचीनानि निबन्धनानि भुवने सन्त्येव पारे शता-
दश्रद्धानमिहाद्य नूतनतया मा यात मेधाविनः ।
को यत्नात्तचिरत्नरत्ननिचये सत्यप्ययत्नागमं
नूत्नं रत्नमुपेक्षते शितमतिः स्याच्चेत्परीक्षाक्षमः ॥
शास्त्रार्थं प्रतिपत्तुमर्हतितमामर्वाक्षु कः सर्वशो
निर्वक्तुं प्रतिपन्नमर्थमथवा निर्वोढुमुर्वीतले ।
हन्ताहं तु चिरं प्रबन्द्धयशसा संभावितो भूयसा
कृष्णानन्दगुरूत्तमेन कृपया मद्भावमासेदुषा ॥

विद्या हृद्यानवद्या विपुलमपि यशो वाग्विलासा विचित्राः
श्लाघा विद्वत्समाजे शुभमपि चरितं शाश्वती सा च लक्ष्मीः।
भक्तिस्तस्यैव देवद्विजगुरुषु दृढा यत्र कुत्रापि धन्ये
तत्तादृक्षं कटाक्षं कमपि कलयते बालकृष्णो गुरुर्नः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकृष्णानन्द-भगवत्पूज्यपादशिष्यश्रीमदात्रेयगोत्रकुरविशेरिकुलमणि-दीपरङ्गनाथसूरिविरचिते पुरुषार्थरत्नाकरे मुक्तगति-विवेको नाम पञ्चदशस्तरङ्गः ।

सरलमनसां सर्वज्ञानां सभासु वदावदे
सुरगुरुरयं सा वा संज्ञान्तरेण सरस्वती ।
वटतरुतटीवासी विद्यागुरुः किमिति स्तुतो
जयतु नितरां कृष्णानन्दो गुरुर्जगतीगुरुः ॥
पूर्णानन्दाय गुरवे पुरुषोत्तमयोगिने ।
शिवरामसरस्वत्यै श्रीमद्गोपालयोगिने ॥
स्वयंप्रकाशमुनये रामभद्रयतीन्दवे ।
कृष्णानन्दसरस्वत्यै करोम्यनुकलं नमः ॥

The scribe adds :

श्रीमद्दुन्दुभिवर्षाख्ये दक्षिणायनगे शुभे ।
वर्षर्तौ श्रावणे मासि कृष्णसप्तमिजेन्दुजे ॥
वासरे भरणीऋक्षे धनुर्लग्ने महादिने ।
श्रीनडुङ्गेरिरामण्णो भूसुराद्यर्थिकामदम् ॥
पुरुषार्थरत्नाकरमैहिकामुष्मिकप्रदम् ।
इष्टापूर्तफलावाप्त्यै लेख्यं नारणसूरिणा ॥

934 33. C. 24.

प्रत्यक्तत्त्वप्रकाशिका— वासुदेवेन्द्रकृता

Palm-leaf. 61 Foll. 15 × 1⅛ inches. 10 lines in a page. Grantha script. Old. Slightly injured. Good writing.

This is a treatise on the principles accepted in the school of Advaita-Vedānta. The author Vāsudevendra was the pupil of Rāmacandrendra. The work consists of four Prakaraṇas dealing with the following subjects :

१. अध्यारोपापवादनिरूपणम्, २. प्रत्यगात्म-प्रकाशनम्, ३. महावाक्यार्थविचारः, ४. प्रणवो-पासनादिसंग्रहः ।

Complete.

Beginning :

ब्रह्मानन्दाय गुरवे सच्चिदानन्दमूर्तये ।
नमः प्रत्यक्प्रबोधाय स्वाविद्याध्वस्तभानवे ॥
सच्चिदानन्दरूपाय सृष्टिस्थित्यन्तहेतवे ।
प्रत्यग्रूपाय शुद्धाय श्रीरामब्रह्मणे नमः ॥
यत्कटाक्षसुधासिन्धौ मज्जता पुण्यपाकतः ।
मया ज्ञानमणिर्लब्धस्तं रामेन्द्रगुरुं भजे ॥
श्रीरामेन्द्रगुरोः पादयुग्मकञ्जरजोरविः ।
राजते मे हृदाकाशे मोहध्वान्तनुदः सदा ॥
नत्वा रामेन्द्रचरणौ वक्ष्ये मोक्षैकसाधनीम् ।
वेदान्तसारमुद्धृत्य प्रत्यक्तत्त्वप्रकाशिकाम् ॥
न ख्यातिपूजालाभेच्छा ग्रन्थसंग्रहणे मम ।
न विद्वत्ताबलं चात्र मुक्तिरेव हि कारणम् ॥

तत्रादावुपोद्घातः प्रदर्श्यते—

देवतावन्दनं चादौ ततश्च गुरुवन्दनम् ।
उपोद्घातस्ततः पश्चादनुबन्धचतुष्टयम् ॥

End :

रघुकुलवररत्नं राममन्यांश्च देवान्
मनुजपशुमृगादीन्ब्राह्मणादीन्न जाने ।
परमसुखसमुद्रे मज्जिता तन्मयोऽहं
गलितनिखिलभेदस्तत्त्वबोधैकरूपः ॥
श्रीरामेन्द्रगुरोः पादसेवानिर्मलचेतसा ।

वासुदेवेन रचिता प्रत्यक्तत्त्वप्रकाशिका ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीरामेन्द्रगुरुचरणारविन्दभृङ्गायमाणश्रीवासुदेवेन्द्रयतिना संगृहीतप्रत्यक्तत्त्वप्रकाशिकायां प्रणवोपासनादिसर्वसंग्रहप्रकरणं नाम चतुर्थोऽध्यायः ।

935 10. E. 61.

प्रस्थानभेदः—मधुसूदनसरस्वतीकृतः

Paper. 9 Foll. 10 × 5½ inches. 13 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Like Mādhava's Sarvadarśanasaṁgraha, the Prasthānabheda also gives a gist of the principles accepted in different school of Indian philosophy. The work has been printed and published in the Ānandāsrama Sanskrit Series No. 51. The author Madusūdanasarasvatī was the pupil of Viśveśvarasarasvatī and the author of the following other works: Advaitasiddhi, Vedāntakalpalatikā, Advaitaratnaraksaṇa, Siddhāntabindu etc. He must have flourished towards the end of the 16th century A.D.

Beginning :

अथ सर्वेषां शास्त्राणां भगवत्येव तात्पर्यं साक्षात्परंपरया चेति समासेन तेषां प्रस्थानभेदोऽत्रोपदिश्यते । तथाहि—ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति वेदाश्चत्वारः । शिक्षा कल्पो व्याकरणं छन्दो ज्योतिर्निरुक्तमिति वेदाङ्गानि षट् । पुराणन्यायमीमांसाधर्मशास्त्राणीति चत्वार्युपाङ्गानि । अत्रोपपुराणानामपि पुराणेऽन्तर्भावः ।

End :

तत्र तेषां तात्पर्यमबुद्ध्वा वेदविरुद्धेऽप्यर्थे तात्पर्यमुत्प्रेक्षमाणास्तन्मतमेवोपादेयत्वेन गृह्णन्तो जना अपथजुषो भवन्तीति सर्वमनवद्यम् ।

Colophon :

इति श्रीमधुसूदनविरचितः प्रस्थानभेदः । समाप्तोऽयं ग्रन्थः ।

The scribe adds :

सूर्यपुरस्थमहाराष्ट्रजातीयरामकृष्णात्मजरामचन्द्रस्येदं प्रस्थानभेदाख्यं पुस्तकं स्वार्थं परार्थं च वासुदेवेन लेखसमाप्तिमगमत् । संवत् १८९८ वर्षे शके १६७९ नन्दननाम्नि संवत्सरे पौषवद्य त्रयोदश्यां समाप्तम् ।

936 28. J. 43.

प्रौढानुभूतिप्रकरणम्—शंकराचार्यकृतम्

Palm-leaf. 2 Foll. 16 × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

The work contains 17 verses on realisation of the self by a Mukta. The work is attributed to the Great Śrī Śaṁkarācārya and was printed and published in the Śrī Śāṁkaragranthamālā, Srirangam.

Complete.

Beginning :

प्रौढप्रौढनिजानुभूतिगलितद्वैतेन्द्रजालो गुरु-
र्गूढं गूढमहाघदुष्टकुधियां स्पष्टं सुधीशालिनाम् ।
स्वान्ते सम्यगिहानुभूतमपि सच्छिष्यावबोधाय तत्सत्यं संस्मृतवान्समस्तजगतां नैजं निजालोकनात् ॥
द्वैतं मय्यखिलं समुत्थितमिदं मिथ्या मनःकल्पितं
तोयं तोयविवर्जिते मरुतले भ्रान्त्यैव सिद्धं न हि ।

यद्येवं खलु दृश्यमेतदखिलं नाहं न वा तन्मम
प्रौढानन्दचिदेकसन्मयवपुः शुद्धोऽस्म्यखण्डो-
ऽस्म्यहम् ॥

End :

स्वारस्यैकसुबोधचारुमनसे प्रौढानुभूतिस्त्विय
दातव्या न तु मोहदुग्धकुधिये दुष्टान्तरङ्गाय च ।
येयं रम्यविदर्पितोत्तमशिरः प्राप्ता चकास्ति स्वयं
सा चेन्मर्कटहस्तदेशपतिता किं राजते केतकी ॥१७॥

Colophon :

इति श्रीशंकराचार्यविरचितं प्रौढानुभूतिप्रकरणं संपूर्णम् ।

937 24. F. 11.

बालबोधसंग्रहः—शंकराचार्यकृतः

Palm-leaf. 15 Foll. $8\frac{1}{2} \times 1\frac{1}{2}$ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides

This is a compendium in simple style of the substances of the school of the Advaita-Vedānta. The work is attributed to S'rī S'aṁkarācārya.

Complete.

Beginning :

अध्यात्मविद्याप्रबोधप्रकारं व्याख्यास्यामः । आधिभौतिकाधिदैविकाध्यात्मिकादितापत्रयाग्निसंतप्तः सकलसाधनोपेतः संसाराद्विरज्य शिष्यः सद्गुरुं शरणं गत्वा साष्टाङ्गं प्रणिपत्य विज्ञापनं करोति—भो स्वामिन् मम संसारनिवृत्तिं कुरु । गुरुरुवाच—अरे शिष्य, तव संसारनिवृत्तिर्ज्ञानेन भवितव्या । ज्ञानं च श्रवणमननिदिध्यासनैः साक्षात्कारे भवति । शिष्य उवाच—भो स्वामिन्, श्रवणं नाम किम्? मननं नाम किम्? निदिध्यासनं नाम किम्? कः साक्षात्कारः?

End :

स्वामिन्,

न हि बन्धपदं न हि मोक्षपदं
न हि पापपदं न हि पुण्यपदम् ।
न हि रिक्तपदं न हि पूर्णपदं
किमु रोदिषि मानस सर्वसमम् ॥
अहो अहो नमो मह्यं मोक्षो नास्तीति मत्पदम् ।
असंस्पर्शशरीरेण येन सर्वमिदं धृतम् ॥

Then are added a few verses from the Bodhāryā of Sadāsivabodhendra.

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यकृतो बालबोधसंग्रहः समाप्तः ।

938 28. J. 54.

बालबोधसंग्रहः—शंकराचार्यकृतः

Palm-leaf. 9 Foll. 12 × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides. Complete.

939 30. N. 18.

बालबोधसंग्रहः—शंकराचार्यकृतः

Palm-leaf. 8 Foll. $12 \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves bear the serial numbers 1 to 9. The leaf 8 is lost.

Complete with a small gap in the middle.

940 33. D. 19.

बालबोधसंग्रहः—शंकराचार्यकृतः

Palm-leaf. 6 Foll. $15\frac{1}{2} \times 1\frac{1}{2}$ inches,

8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

941 28. K. 22.

बालबोधिनी—शंकराचार्यकृता

Palm-leaf. 2 Foll. 16 × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

This is one of the minor works giving in simple style the substance of the Advaita-Vedānta. The work is attributed to S'ri S'aṁkarāćārya in the colophon.

Complete.

Beginning :

प्रणम्य परमानन्दं मोहान्धतिमिरापहम् ।
तत्प्रसादबलेनैव क्रियते बालबोधिनी ॥
यस्य स्मरणमात्रेण क्षीयन्ते भवभीतयः ।
तं सर्वसाक्षिणं यामि शरणं कृपणो ह्यहम ॥

अथात्मा कीदृशः ? सद्रूपं सर्वदा भावरूपम् । चिद्रूपं विशुद्धबोधरूपम् । आनन्दं सुखरूपम् । सत्यम् अबाधितम । नित्यं कालत्रयावस्थायि । कूटस्थम् अविकारि । अस्थूलादिगुणवत् प्रत्यग्बोधैकरूपम् । आदिमध्यान्तरहितमेवात्मवस्तु ।

End :

ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ।
इति यस्य दृढा बुद्धिः स मुक्तो नात्र संशयः ॥
हंसः साक्षीति यो विद्याद्विविच्येदं पुनः पुनः ।
स एव मुक्तः स विद्वानिति वेदान्तडिण्डिमः ॥

Colophon :

इति सर्वोपनिषत्सारसंग्रहब्रह्मविद्यायां बालबोधिनीप्रकरणं संपूर्णम् ।

942 42. A. 113.

बालबोधिनी—शंकराचार्यकृता

Paper. 4 Foll. 13 × 4 inches. 8 lines in a page. Bengali script. Old. Injured. Good writing.

Reads the following colophon calling the work as Bahirmukhāntaḥkaraṇa-Bālabodhinī.

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीपरमहंसपरिव्राजकाचार्यशंकरभगवतः कृतौ बहिर्मुखान्तःकरणबालबोधिनी समाप्ता ।

943 9. F. 66.

बोधार्या—सदाशिवबोधेन्द्रसरस्वतीकृता

Paper. 8 Foll. 8 6 inches. 38 lines in a page. Grantha script. Old. Injured. Good writing.

The Bodhāryā is a small metrical work written in Ārya metre on the Advaita-Vedānta with special reference to the identity of the Individual soul with the Supreme Brahman. The colophon mentions the author as Sadās'ivabodhendrasarasvatī with the title of Jagadguru S'rī S'aṁkarācārya. This title suggests that some of the minor works on the Advaita-Vedānta which are generally said to have been written by the Great S'rī S'aṁkarācārya, may be attributed to this author Saās'ivabodhendrasarasvatī. The author is also called simply Bodhendrasvāmin.

The work is available in print. The edition contains 158 verses with the title Bodhāryā. The MSS. divide the work into

two parts, the first part containing 1 to 104 verses and the second 105 to 158. Some MSS. call the first part as Bodhāryā and the second as Svātmanirūpaṇa while others call the first part as Svātmanirūpaṇa and the second as Bodhāryā. Some MSS. call the entire work as Svātmanirūpaṇa or Svātmānandaprakāśikā with the authorship of the Great S'rī S'aṁkarācārya (Vide R. No. 4039*d*. of the Madras Govt. Oriental MSS. Library).

The present MS. contains the verses 1 to 104 and calls them as Bodhāryā.

Beginning :

श्रीगुरुचरणद्वन्द्वं
वन्देऽहं मथितदुःसहद्वन्द्वम् ।
भ्रान्तिग्रहोपशान्ति
पांसुमयं यस्य भसितमातनुते ॥ १ ॥
देशिकवरं दयालुं
वन्देऽहं निहतसकलसंदेहम् ।
यच्चरणद्वयमद्वय-
मनुभवमुपदिशति तत्त्वमस्यर्थम् ॥ २ ॥
संसारदावपावक-
संतप्तः सकलसाधनोपेतः ।
स्वात्मनिरूपणनिपुणै-
र्वाक्यैः शिष्यः प्रबोध्यते गुरूणा ॥ ३ ॥
अस्ति स्वयमित्यस्मि-
न्नर्थे कस्यास्ति संशयः पुंसः ।
तत्रापि संशयश्चेत्
संशयिता यः स एव भवसि त्वम् ॥ ४ ॥
नाहमिति वेत्ति योऽसौ
सत्यं ब्रह्मैव वेत्ति नास्तीति ।
अहमस्मीति विजानन्
ब्रह्मैवासौ स्फुटं विजानाति ॥ ५ ॥

End :

असकृदनुचिन्तितानां-
मध्याहर्तव्यनिजनिदेशानाम् ।
प्रामाण्यपरमसीम्नां
निगमनमिदमेव निखिलनिगमानाम् ॥ १०३ ॥
इति बोधितः स्वगुरूणा
शिष्यो हृष्यन्प्रणम्य तत्पदयोः ।
स्वानुभवसिद्धमर्थं
स्वयमेवान्तर्विचिन्तयामास ॥ १०४ ॥

Colophon :

इति श्रीमद्भगवत्पादश्रीशंकराचार्यविरचिता बोधार्या संपूर्णा ।

944 8. F. 24.

बोधार्या—सदाशिवबोधेन्द्रसरस्वतीकृता

Paper. 3 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 20 lines in a page. Grantha script. Old. Injured. Good writing.

This is the second part of the work as mentioned in the previous number. The author Sadāśivabodhendrasarasvatī is mentioned in the colophon with the title S'rī Jagadguru S'aṁkarabhagavatpāda.

Beginning :

अजरोऽहमक्षरोऽहं
प्राज्ञोऽहं प्रत्यगात्मबोधोऽहम् ।
परमानन्दमयोऽहं
परमशिवोऽहं भवामि परिपूर्णः ॥ १ ॥
आद्योऽहमात्मभाजा-
मात्मानन्दानुभूतिरसिकोऽहम् ।
आबालगोपमखिलै-
रहमित्यनुभूयमानमहिमाहम् ॥ २ ॥

इह परसुखविमुखोऽहं
निजसुखभोगानुभूतिभरितोऽहम् ।
ईशोऽहमीश्वराणा-
मीर्ष्यादोषानुषङ्गरहितोऽहम् ॥ ३ ॥

End :

हयमेधसहस्राण्यथ
वा कुरुतां ब्रह्ममेधलक्षाणि ।
परमार्थविन्न पुण्यै-
र्न च पापैः स्पृश्यते विमलः ॥ ९९ ॥
विदितं वेदरहस्यं
विदितो देहो ह्यनात्मेति ।
विदितः पर इति चात्मा
किमतः परमस्ति जन्मसाफल्यम् ॥ ९६ ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमज्जगद्गुरु-श्रीशंकरभगवत्पादविरुदश्रीसदाशिवबोधेन्द्रसरस्वती - प्रणीतं बोधार्याप्रकरणम् ।

945 19. B. 8.

बोधार्या—सदाशिवबोधेन्द्रसरस्वतीकृता

Palm-leaf. 11 Foll. $10\frac{1}{2} \times 1\frac{1}{8}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

The Foll. bear the serial numbers 32 to 42.

Adds the following verse in the beginning :

अखिलपरमहंसदेशिकमागमगूढार्थदेशिकं प्राज्ञम् ।
स्वानन्दपूर्णसागरमनिशं नौमि शंकराचार्यम् ॥

Then begins with the verse श्रीगुरुचरण-द्वन्द्वं etc. and ends with the following verse :

मोहान्धकारहरणं संसारोद्वेगसागरोत्तरणम् ।
स्वात्मनिरूपणमेतत्प्रकरणमन्तर्विचिन्त्यतां सन्तः ॥

Reads the following colophon :

इति स्वात्मनिरूपणप्रकरणं समाप्तम् ।

Contains the stanzas 1 to 102 and 146 to 151 of the printed edition of the Bodhāryā.

946 19. B. 31.

बोधार्या—सदाशिवबोधेन्द्रसरस्वतीकृता

Palm-leaf. 6 Foll. $14 \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The former owner of the MS.—Sundaram.

947 19. J. 23.

बोधार्या—सदाशिवबोधेन्द्रसरस्वतीकृता

Palm-leaf. 9 Foll. $16\frac{1}{2} \times 1\frac{1}{2}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

Adds the following verse at the end :

अपायबहुले पदं निदधतः कुमार्गे नरान्
निवार्य करुणातुरः स्वमखिलात्मनीनं स्वयम् ।
प्रकाशयति यः परं प्रणिहितं गुहायां रह-
स्तमेव गुणसागरं त्वमनुचिन्त्य कालं क्षिप ॥

The colophon ascribes the work to S'rī Saṁkarācārya pupil of Govindabhagavat-pūjyapāda and mentions the name of the work as Svātmanirūpaṇa.

948 21. G. 6.

बोधार्या—सदाशिवबोधेन्द्रसरस्वतीकृता

Palm-leaf. 2 Foll. $16\frac{1}{2} \times \frac{3}{4}$ inches. 7

lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 48th verse.

949 28. K. 34.

बोधार्या—सदाशिवबोधेन्द्रसरस्वतीकृता

Palm-leaf. 100 Foll. 12 × 1 inches. 4 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the commentary also.

Contains the verses 1 to 152 of the printed edition.

The colophon mentions the work by the name Svātmanirūpaṇa.

950 33. K. 3.

बोधार्या—सदाशिवबोधेन्द्रसरस्वतीकृता

Palm-leaf. 5 Foll. 9½ × 1½ inches. 16 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Adds the following verse in the beginning:

अखिलपरमहंसदेशिक-
मागमगूढार्थदेशिकं प्राञ्चम् ।
स्वानन्दपूर्णसागर-
मनिशं नौमि शंकराचार्यम् ॥

The work is mentioned as Svātmanirūpaṇa in the colophon.

951 35. B. 16.

बोधार्या—सदाशिवबोधेन्द्रसरस्वतीकृता

Paper. 25 Foll. 11½ × 6 inches. 15 lines in a page. Devanāgarī and Telugu scripts. Old. Injured. Good writing.

The MS. contains the commentary also copied side by side.

Complete in 155 verses.

The colophon mentions the work as Svātmanirūpaṇa.

952 41. C. 82.

बोधार्या—सदाशिवबोधेन्द्रसरस्वतीकृता

Paper. 200 Foll. 12 × 4½ inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing. Foll. Nos. 91 to 94 are missing.

The MS. contains the commentary also.

Contains the verses 1 to 103.

953 28. K. 34.

बोधार्याव्याख्या—सच्चिदानन्दसरस्वतीकृता

Palm-leaf. 100 Foll. 12 × 1 inches. 4 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the text also with the name Svātmanirūpaṇa.

This is a commentary on the Bodhāryā of Sadāśivabodhendra described above. The commentator Saccidānandasarasvatī does not mention his Guru's name. But he may be identified with the commentator of Śrutisārasamuddharaṇa, the pupil of Pūrṇātmayogin. (Ānandāśrama Sanskrit Series No. 103).

Contains the verses 1 to 152 of the printed edition of the text.

Beginning :

प्रचण्डपाषण्डविखण्डनोद्यतं
त्रयीशिरोऽर्थप्रतिपादने रतम् ।
बुधैर्नुतं योगकलाभिरावृतं
नमामि तं शंकरदेशिकं ततम् ॥

इह सकलशिष्टाग्रणीर्भगवान् शंकराचार्यः जिज्ञासुजनानुकम्पया सकलवेदान्तरहस्यप्रदर्शनपरं वेदान्तप्रकरणमारभमाणस्तत्रादौ श्रीगुरुचरणनमस्कारलक्षणं मङ्गलाचरणमार्यावृत्तद्वयेनाह—श्रीगुरुचरणमिति । श्रीगुरुचरणद्वन्द्वम् ; श्रीगुरुपदसरोजद्वयं वन्दे नमस्करोमि । अहं प्रकरणकर्ता । किंलक्षणं चरणद्वन्द्वम् ? मथितदुःसहद्वन्द्वम् ; मथितमुन्मूलितं दुःसहं मुमुक्षूणामसह्यं द्वन्द्वं द्वैतं येन ।

End :

श्रीनिवासः श्रीमहाविष्णुगुरुरेव भानुः सहस्रकिरणः भासयति प्रकाशयति । एतावता गुरुदेवतयोरैक्यभावनमेवात्मप्रकाशसाधनमिति प्रतिपादितं भवति ।

चैतन्यद्युतिरुचिराङ्गो दूरनिरस्तश्यामतासङ्गः ।
हृदयसरोजे विरजे भ्रमति भ्रमरो विलक्षणः कश्चित् ॥

Colophon :

इति श्रीमत्सच्चिदानन्दसरस्वतीविरचितार्याव्याख्या समाप्ता ॥

954 35. B. 16.

बोधार्याव्याख्या—सच्चिदानन्दसरस्वतीकृता

Paper. 25 Foll. 11½ × 6 inches. 15 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The MS. contains the text also.

Complete.

955 41. C. 82.

बोधार्याव्याख्या स्वात्मानन्दप्रकाशिका—प्रज्ञानाश्रमकृता

Paper. 200 Foll. 12 × 4½ inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The Foll. bear the serial numbers 1 to 204 ; but the Foll. 91 to 94 are missing.

The MS. contains the text also.

This is another commentary on Sadāśivabodhendrasarasvatī's Bodhāryā. The commentary is called Svātmānandaprakāśikā. The author Prajñānāśrama salutes one Bālamaskarin as his teacher. If this Bālamaskarin is identified with Bālakṛṣṇānandasarasvatī or Kṛṣṇānandasarasvatī, the author of the Siddhāntasiddhāñjana, our author may be assigned to the 17th century A.D. The commentator divides the text into the following five Prakaraṇas : Pañcakośaviveka, Mahāvākyaviveka, Vedaprāmāṇya, Ahamarthaviveka and Prakīrṇārthasaṁgraha.

Beginning :

श्रीदेशिकान् ब्रह्मनिष्ठान् श्रोत्रियान्करुणानिधीन् ।
वन्दे प्रत्यग्ब्रह्मविद्यासंपदायप्रवर्तकान् ॥
अन्तर्ध्वान्तसमुच्छेदपटवे भानुवर्चसे ।
श्रीबालमस्करीन्द्राय गुरवे प्रणतोऽस्म्यहम् ॥
स्वात्मनिरूपणविवृतिं स्मात्मानन्दप्रकाशिकानाम्नीम् ।
प्रज्ञानाश्रमभिक्षुः कुरुते यत्नात्स्वबुद्धिसंशुद्ध्यै ॥

अभीष्टदेवतानमस्काराद्युपनीतमदृष्टं हि विघ्ननामकसाध्यप्रतिबन्धकाधर्मतिरोधानद्वारा प्रारिप्सितं परिसमापयतीति प्रामाणिकम् । अतो निष्प्रत्यूहपरिसमा-

सिहेतुश्रीगुरुमूर्त्यूपाधिकस्वेष्टदेवतास्तुतिनमस्काराभ्यां विशिष्टादृष्टमुत्पिपादयिषुः सर्वज्ञो भगवान् भाष्यकारो लोकानुग्रहैकप्रयोजनकृतशरीरपरिग्रहः सकलवेदान्तदुग्धोदधेर्न्यायमन्दरेण विचारनिर्मथनादाविर्भूतस्यामृतस्य विन्यासकलशभूतं श्रीस्वात्मनिरूपणं नामार्याच्छन्दोमयं सकललोकानुजिघृक्षया जीवब्रह्मणोरत्यन्ताभेदनमात्रेण परमपुरुषार्थप्रापकं प्रकरणमारभमाणस्तस्य वेदान्तप्रकरणत्वात् तदीयैरेव विषयादिभिस्तद्वत्तासिद्धिमभिप्रेत्य ग्रन्थाद्बहिरेव कृतमपि शिष्यशिक्षायै शिष्टाचारपरिप्राप्तं मङ्गलमाचरन्नर्थात् प्रवृत्त्यङ्गभूतविषयप्रयोजने श्रीगुरुलक्षणं च सूचयति—श्रीगुर्वित्यादि । अहं श्रीगुरुचरणद्वन्द्वं वन्दे इति संबन्धः ।

End:

एवं च परमप्रमाणभूतवेदान्तवाक्यश्रवणेनात्मानेकतानिवृत्तिपूर्वकं निश्चिते प्रत्यगभिन्ने ब्रह्मणि मननेनासंभावनायां तिरस्कृतायामखण्डैकरसब्रह्मात्मनावस्थितिर्मुक्तिरिति समग्रोऽपि शास्त्रार्थोऽस्मिन् प्रकरणे संगृहीतः । अतो मुमुक्षुणावहितमनस्कतया ब्रह्मनिष्ठाचार्यमुखादेतत्प्रकरणं श्रुत्वा तदर्थं मत्वा निदिध्यास्यब्रह्मात्मनावस्थेयमित्येतदेव सकलनिगमानां निगमनमिति प्रकरणार्थोपसंहारः । ओं तत्सत् ॥ १०३ ॥

Colophon:

इति प्रकीर्णकार्थसंग्रहः संपूर्णः । पञ्चमप्रकरणं समाप्तम् ।

956 33. F. 4.

ब्रह्मतत्त्वसुबोधिनी—कृष्णानन्दयतिकृता

Palm-leaf. 43 Foll. $14\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

This is a treatise explaining the chief principles accepted in the school of Advaita-Vedānta.

The work contains the following four Prakaraṇas.

१. अध्यारोपापवादप्रकरणम्, २. महावाक्यविवेकप्रकरणम्, ३. दहरविद्योपासनप्रकरणम्, ४. जीवन्मुक्तिप्रकरणम्.

The author Kṛṣṇānandayati was the pupil of Akhaṇḍānandasarasvatī who may be probably identical with the commentator on the Bhāmatī (No. 455 of this volume). Our author Kṛṣṇānandayati must have lived in the 17th century A.D. He must be different from Kṛṣṇānandāsarasvatī the author of the Siddhāntasiddhāñjana who was the pupil of Rāmabhadrānanda and Svayaṁprakāśānandasarasvatī.

Complete in 4 chapters as given above.

Beginning:

श्रीनारायणपादपद्मनिहितस्वान्ताननन्तान् सदा
नानाशास्त्रविशारदाननुदिनं वेदान्तसंस्थापकान् ।
सांख्यादिप्रतिवादिमत्तकरिणां भेदे तु कण्ठीरवान्
वन्दे श्रीमदखण्डदेशिकवरान् वन्दारुमुक्तिप्रदान् ॥
श्रीनारायणरूपांस्तानखण्डानन्ददेशिकान् ।
नत्वा विमुक्तये ब्रूमो ब्रह्मतत्त्वसुबोधिनीम् ॥
निर्मलाय प्रशान्ताय भक्तानां मुक्तिदायिने ।
सच्चिदानन्दरूपाय श्रीरामाय नमो नमः ॥

लोके तावन्निष्कामनयानेकजन्मकृतसुकृतपरिपाकवशात्परिशुद्धान्तःकरणानां केवलमोक्षमात्रलिप्सूनां बहुग्रन्थावलोकनेष्वलसानां प्रत्यगभिन्नब्रह्मतत्त्वनिरूपणार्थं तावदध्यारोपापवादप्रकारं निरूपयामः । अस्ति हि प्राक् सृष्टेः निरस्तसमस्तप्रपञ्चं स्वप्रकाशचिदेकरसं ब्रह्म ।

End :

अविद्यातिमिरातीतं सर्वाभासविवर्जितम् ।
आनन्दममलं शुद्धं मनोवाचामगोचरम् ॥
वाच्यवाचकनिर्मुक्तं हेयोपादेयवर्जितम् ।
प्रज्ञानघनमानन्दं वैष्णवं पदमश्नुते ॥

इति । नित्यशुद्धमुक्तसत्यपरमानन्दानन्ताद्वयं प्रत्यग्भूतचैतन्यं परं ब्रह्मैवाहमस्मीति यस्तिष्ठति स ब्रह्मैव भवतीति सकलवेदान्तसिद्धान्तः ।

Colophon :

इति श्रीब्रह्मतत्त्वसुबोधिन्यां जीवन्मुक्तिप्रकरणं समाप्तम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदखण्डानन्दसरस्वतीपादाब्जसेवापरायणेन श्रीमत्कृष्णानन्दयतिना विरचिता ब्रह्मतत्त्वसुबोधिनी समाप्ता ।

957 33. D. 19.

ब्रह्मतत्त्वसुबोधिनी—कृष्णानन्दयतिकृता

Palm-leaf. 52 Foll. 15¾ × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

958 34. D. 16.

ब्रह्मतारषोडशसमाधिः—रामचन्द्रेन्द्रकृतः

Palm-leaf. 29 Foll. 15¼ × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Foll. bear the serial Nos. 76 to 106. Nos. 87, and 91 are missing.

Deals with meditation on the Brahman as identical with Praṇava or Tāramantra. The author Rāmacandrendrasarasvatī was the pupil of Vāsudevendrasarasvatī.

Complete.

Beginning :

तुर्यतुर्यपदारूढं ब्रह्मप्रणवलक्षणम् ।
तुर्यतुर्यं नमस्कुर्वे रामचन्द्राभिधं महः ॥
यदज्ञानादयं मोहो भवेद्यज्ज्ञानमात्रतः ।
निर्मोहब्रह्मभूम स्यात् तं त्रिपादेशिकं भजे ॥
नत्वा श्रीगुरुपादाब्जं श्रोत्रियाणां गतागसाम् ।
अकामहतबुद्धीनां वेदान्तार्पितचेतसाम् ॥
बहुतर्कादिजटिलप्रबन्धविमुखात्मनाम् ।
सुतरां प्राणिचिन्तायामक्षमाणामिहत्यजाम् ॥
आधारषट्कगानेकपीठपादालयं पुरम् ।
ब्रह्मप्रणवमालम्ब्य षोडशावयवात्मकम् ॥
विदेहमुक्तिसिद्ध्यर्थं समाधिः प्रोच्यते मया ।
पराक्प्रवणचित्तानां मनोवाचामगोचरम् ॥

End :

श्रीमत्परमहंसेड्यवासुदेवेन्द्रयोगिनः ।
पादपङ्कजसंभूतमकरन्दैकजीविना ॥
शिष्येण रामचन्द्रेण मौनिना वीतरागिणा ।
ब्रह्मतारार्थबोधिन्यः षोडश्यो भूमिकाः कृताः ॥
भूमिका मोक्षगन्धाढ्याः कनकाम्भोजसंनिभाः ।
रामचन्द्रार्पिता भक्त्या प्रवर्तन्तां चिराय ताः ॥

Two leaves added at the end contain a few passages from the गुणत्रयविवेक described in No. 799 of this volume.

959 9. F. 41.

ब्रह्मनैर्गुण्यवादः—विदूलशास्त्रिकृतः

Paper. 10 Foll. 8¼ × 6½ inches. 28 lines in a page. Grantha script. Old. Injured. Good and small writing.

This is a very recent work on Advaita-Vedānta maintaining the view that the Brahman is devoid of attributes or qualities. For this purpose it answers the objections raised on the subject by the western philosphers and other eastern philosophers like Naiyāyikas and Sāṁkhyas. The work is divided into two parts. In the first part the principles of western philosophy are dealt with and in the second those of Nyāya, Christianity etc. At the end of the first part the author's name is mentioned as Vidūlas'āstrin. It is also said that the following scholars approved the first part: 1. Sukula Umāraos'arman, 2. Parvatīya Cirañjīvis'arman, 3. Kākārāmas'arman, 4. Bhaṭṭa Vaijanāthas'arman, 5. Caturvedi Hīrānandas'arman, 6. Kās'īnāthas'āstrin, 7. Lajjā S'aṁkaras'arman, 8. Veṅkaṭarāmas'arman, 9. Badarīlālas'arman, 10. Kālīprasādas'arman, 11. Bābū Devas'arman, 12. Vastī Rāmadvivedin, 13. S'eṣa Ātmārāmas'arman, 14. Sakhārāma Bhaṭṭa and 15. Harḍīkar Gaṇes'as'āstrin. The second part conducts the discussion in the form of conversation between the Vedāntin in one side and the Naiyāyikas, Sāṁkhyas and Christians in the other side.

Complete.

Beginning:

अथ वेदान्तिनां मते दृश्यजातस्य वस्तुना सह कीदृशः संबन्ध इति विचारणीयम्। केचित् खलु वेदान्तिषु जगदेव सत् जगद्व्यतिरिक्त ईश्वरो नास्तीत्येवंविधाभ्युपगमदोषमारोपयन्ति। केचिच्च निर्गुणब्रह्मस्वीकारांशे महदनौचित्यं तेष्वारोपयन्ति। वस्त्ववस्तुनोः संबन्धविचारे वेदान्तग्रन्थेषु ब्रह्मशब्दसाहचर्येण भूयः प्रयुज्यमानो निर्गुणमिति शब्दो यूरोपूदेशीयान् प्रतिवादिनः सुबहु व्याकुलयति। तथा ह्युपलभ्यते कश्चित् वेदान्तदूषणोद्यतो यूरोपीयो निर्गुणशब्दस्य यः कोऽप्यर्थोऽस्तु; सर्वथा ब्रह्म शून्यरूपमेव; न हि गुणविनाकृतान्यात्मद्रव्याण्यनात्मद्रव्याणि वा प्रतीतिविषयीभवितुमर्हन्तीत्याह। तथा स एव श्रोतॄन् ब्रह्मणि स्वसत्ताविषयकमपि ज्ञानं नास्तीति मतस्यानौचित्यचमत्कारानुभवाय प्रार्थयते। अस्य च सर्वस्येदं प्रत्याख्यानं यन्निर्गुणशब्दस्तावत्पारिभाषिक इति।

End:

वेदान्ती—अस्त्वेवम्। परं तु वेदानां प्रामाण्ये सर्वप्रकारोपपत्त्यविरुद्धत्वमेव पर्याप्तं साधकम्। प्रत्युत खैष्टधर्मग्रन्थे श्रूयते—ईश्वरः सर्वाणि वस्तून्यसन्ति सत्तां प्रापितवानिति। केचिन्नवीना यूरोपिया आचार्यास्तु शक्तस्य शक्यकरणादिति सांख्यसिद्धान्तमेवाश्रयन्ते।

खैष्टवीयः—अहं पुनरपि तव समागममिच्छामि। तदा च खैष्टीयधर्मग्रन्थस्याद्याया ऋचष्टीकायां मया यदस्मिन् विषये लिखितं तदप्यानेष्यामि।

वेदान्ती—यदा तवेच्छा स्यात् तदा तां टीकामानय। यैः पण्डितैरन्येद्युस्त्वां प्रति प्रेषिते पत्रे संमतिलेखः कृतस्त इवाहमपि रत्रष्टधर्मप्रचारोपजीविजनमुखात् श्रूयमाणं खैष्टीयमतं यावद्भिरंशैरनुपपन्नं भासते तत्तावद्भिरंशैर्वस्तुतोऽनुपपन्नं न भवतीति प्रदर्शयितुं या त्वया खैष्टीयधर्मग्रन्थस्य व्याख्या कृता तया लाभो भविष्यतीति मन्ये।

खैष्टीयः—अतोऽहमिदानीं भवन्तं गमनानुमतिं प्रार्थये। अतस्त्वया मत्कृतटीकाविचारानङ्गीकारपक्षे

यान् विषयान् तुभ्यं प्रदर्शयितुमुत्सुक आसं तान् प्रसङ्गतस्तट्टीकाविचारकाले विचारयिष्यामः। ते च विषया यथा निर्गुणं ब्रह्म स्वीकृत्य तदनुसारेण कार्यजातव्यवस्थायां कार्यजातं स्वीकृत्य तदनुसारेण निर्गुणब्रह्मव्यवस्थायां च प्रतिबन्धकाः केचन दोषास्तथा यादृशनिगमनाङ्गीकारे व्यावहारिको दोषो नास्ति तादृशानि निगमनानीत्यादयः। अथ स्वस्ति भवते। वेदान्ती—स्वस्ति भवते।

Then some selected Sūtras on Nyāya, Yoga, Sāṁkhya and Mīmāṁsā are simply given.

960 34. D. 16.

ब्रह्मप्रणवदीपिका—रामचन्द्रेन्द्रसरस्वतीकृता

Palm-leaf. 21 Foll. 15½ × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves bear the serial Nos. 17 to 37.

Explains the method of meditation on the Brahman with Praṇava as taught in the Māṇḍūkyopaniṣad. The author Rāmacandrendrasarasvatī was the pupil of Vāsudevendrasarasvatī.

Complete.

Beginning:

जाग्रद्विश्वविराडादिकल्पनास्पदमाततम्।
त्रिपान्नारायणं वन्दे तुर्यतुर्यपदोज्ज्वलम्॥
नत्वा श्रीगुरुपादाब्जमध्यारोपापवादतः।
तुर्यतुर्यप्रबोधार्थं ब्रह्मतारार्थ उच्यते॥

असाधनमसाध्यमपदार्थमवाक्यार्थं निष्कलं निरवयवं निर्गुणममायममायाकार्यं सच्चिदानन्दलक्षणमेकमेवाद्वयं ब्रह्म सत्तासामान्यवैभवं ब्रह्म प्रणवार्थं तुर्यतुर्यस्वरूपेणैव सदा विजयते। तस्मिन् व्यष्टिसमष्ट्यात्मकगुणसाम्यसत्त्वसत्त्वसत्त्वरजःसत्त्वतमोगुणान्विता त्र्यर्धमात्रबीजं सूक्ष्मस्थूलत्र्यर्धमात्रचतुर्मकारोकाराकाररूपिणी त्रिगुणान्वितानन्तकोटिब्रह्माण्डनिदानाविद्या।

End:

स्वाज्ञानकालमारभ्य स्वज्ञानतः शरीरतयाभिमानविरूपविलयलक्षणविदेहकैवल्यपूर्वभाविव्यावहारिकदृष्ट्या भवेदिति चेन्न, तुर्यतुर्यव्यतिरेकेण व्यावहारिकदृष्ट्याद्यसंभवात्। तस्मादद्वयत्रिपात्तुर्यतुर्योऽस्मीति चरमसाक्षात्कारतः कर्मत्रयभोगावस्थानलक्षणानृतजडदुःखात्मकस्थूलसूक्ष्मकारणशरीरवासनाविरूपविलयनिर्विकल्पकसमाध्याविर्भूतस्वेतराशेषविशेषशून्यनिर्मायत्रिपान्नारायणतुर्यतुर्यस्वरूपलक्षणविदेहकैवल्यरूपेण ब्रह्मात्मविद्वरिष्ठोऽवशिष्यते।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यवासुदेवेन्द्रसरस्वतीशिष्यश्रीरामचन्द्रेन्द्रविरचितब्रह्मप्रणवदीपिका समाप्ता।

हेमाभां बर्हिबर्हस्फुरितकचभरां चारुनासां सुदन्तां बिम्बोष्ठीमुत्पलाक्षीं वदनजितकलानायकां कम्बुकण्ठीम्।
दक्षेणालिङ्ग्य रामं करकसरसिजं वामहस्ते दधानां श्रीमातर्नौम्यहं त्वां मम हृदि विलसद्रामवामाङ्कसंस्थाम्॥
बाह्येऽन्तःकामवल्ल्यां विषयतरुसमं छिन्धिखड्गैः कटाक्षैः
भक्तिं मे देहि गुर्वीं रघुपतिपदयोर्यामि मुक्तिं यया ताम्।
सद्बोधानन्दरूपां प्रदिश सपदि मे देहकैवल्यमुक्तिं
देवि त्वां लोकमातः प्रणतजननविध्वंसिनीं नौमि सीते॥

961 34. O. 39.

ब्रह्मभावनादीपिका

Palm-leaf. 14 Foll. 16½ × 1 inches.

5 lines in a page. Grantha script. Old. Injured. Good writing.

This is a short metrical work dealing with the meditation on the Brahman as identical with the individual soul. The author's name is not known.

Complete.

Beginning :

. . . परमात्मानं प्रकाशानन्दनात्मकम् ।
प्रणम्य क्रियते ब्रह्मभावनादीपिका स्फुटम् ॥
यस्य साधनयुक्तस्य . . . . कार्या ब्रह्मभावना ।
स्थूलसूक्ष्मादिकांस्त्यक्त्वा जननादिविचारतः ॥
गुरोरनुग्रहात्सिद्धिर्भाव . . . . . ।
. . . . . णं च महाकारणमित्यपि ॥

End :

स्वानुभूत्येकमानं च यत्तत्त्वं तदसौ स्थितः ।
. . . . . सुप्त-
मानन्दमन्यरमणेतरजस्तमो यत् ॥
आकाशकोशत . . . महान्त-
स्तस्मिन्पदे भवितचित्तलवा भवन्ति ॥

Colophon :

. . . ब्रह्मभावनादीपिकायां महाकारणशरीर-वैलक्षण्यनिजानन्दानुभूतिर्नाम प्रकरणं समाप्तम् ॥

962 8. F. 53.

ब्रह्ममीमांसाशास्त्रसंग्रहः

Paper. 10 Foll. 8 × 7¼ inches. 25 lines in a page. Telugu script. Old. Fair. Good writing.

Gives the essence of the Brahmamīmāṁsāśāstra or Brahmasūtras in accordance with the view of S'rī S'aṁkarācārya of Advaita School of Vedānta. The author's name is not known. The date of brith of S'rī S'aṁkarācārya is mentioned here as Saṁ. 845 = 788 A.D.

Incomplete.

Beginning :

अथात्र ब्रह्ममीमांसाशास्त्रस्य मतमुच्यते ।
तदेतत्सूत्रयामास भगवान् बादरायणः ॥
यत्सत्तया जगत्सत्यं भाति यद्ज्ञानतोऽखिलम् ।
तदेकं शाश्वतं ब्रह्म सच्चिदानन्दमाश्रये ॥

इह खलु परमकारुणिको मुनिर्बादरायणः कर्मकाण्डोदितयज्ञदानतपःस्वाध्यायादिकर्मभिः शुद्धाशयानां शमदमादिमतां नित्यानित्यवस्तुविवेकेनेहामुत्रफलभोगविरागिणां मुमुक्षूणां मोक्षोपायमध्यात्मविद्यामुपदिदिक्षुरथातो ब्रह्मजिज्ञासेत्यादिभिर्ब्रह्मसूत्रैरखिलवेदान्तश्रुतिवाक्यानि संग्रथयामास । सोऽयं सूत्रग्रन्थश्चतुर्भिरध्यायैर्विततो वेदान्तशास्त्रमिति ब्रह्ममीमांसेति वा व्यपदिश्यते ।

End :

तदनु विश्वरूपाचार्यवाचस्पतिमिश्रप्रभृतिभिराचार्यशिष्यप्रशिष्यादिभिर्वार्त्तिकविवरणभामतीप्रमुखानुदारनिबन्धनिचयानाबध्य सुप्रतिष्ठितेति ज्ञेयम् । शंकराचार्यप्रादुर्भावस्तु विक्रमार्कसमयादतीते पञ्चचत्वारिंशदधिकाष्टशतीमिते (८४५) संवत्सरे किल दे.

963 28. K. 50.

ब्रह्मविचाराधिकारनिरूपणम्

Palm-leaf. 3 Foll. 16 × 1⅛ inches. 6 lines in a page. Telugu script. Old. Injured. Clear writing.

Deals with the necessary qualification of the person who can enter the investigation

on the Brahman. The author's name is not known.

Complete.

Beginning :

अथ ब्रह्मविचाराधिकारमाह—साधनचतुष्टयसंपन्नत्वम् । साधनचतुष्टयं नाम—नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कसंपत्तिः, मुमुक्षुत्वं चेति । नित्यो नाम—सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुत्या यत् प्रतिपादितं तत् ब्रह्म । अनित्यो नाम—प्राज्ञेश्वरपर्यन्तं सर्वप्रपञ्चमनित्यम् ।

End :

द्विविधं लिङ्गमाश्रित्य वेदान्ता यत्र निष्ठिताः ।
विधानप्रतिषेधाभ्यां तं वन्दे पुरुषोत्तमम् ॥

इति ।

सत्यं हेतुविवर्जितं श्रुतिगिरामाद्यं जगत्कारणं
व्याप्तं स्थावरजङ्गमं निरुपमं चैतन्यमन्तर्गतम् ।
आत्मानं रविचन्द्रवह्निवपुषं तारात्मकं संततं
नित्यानन्दसुखावहं सुकृतिनां पश्यन्ति रुद्धेन्द्रियाः ॥
षट्कुक्षि पीठसंस्थं तदुपरि विलसत्सोमसूत्रं सबिन्दुं
तन्मध्ये नादसंज्ञं प्रणवमभिहितं बिन्दुनादौ पुनश्च ॥
इत्थं संचिन्त्य योगी विविधमनुदिनं तारकं व्योमसंस्थं
सर्वाकारं महेशं सकृदपि मननाच्चिन्तयेत्सोऽपि मुक्तः ॥

Colophon :

इति ब्रह्मविचाराधिकारनिरूपणं संपूर्णम् ।

964 8. F. 24.

ब्रह्मविदाशीर्वादपद्धतिः—विद्यारण्यकृता

Paper. 4 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 20 lines in a page. Grantha script. Old. Much injured. Good writing.

The work reveals the principles of Advaita School of Vedānta philosophy in the form of benedictions blessed by the preceptor to his disciple. The work is attributed to one Vidyāraṇyaguru. It contains of 52 passages in all. The work was printed and published in the Vidyāvinodini Press. Tanjore.

Complete.

Beginning :

हिरण्यगर्भादिस्थावरान्तेषु शरीरेषु यदेकं चैतन्यमस्ति तदेवाहमस्मीति दृढज्ञानसिद्धिर्भूयात् । १ । लयविक्षेपकषायास्वादेभ्यो रक्षितं चित्तमविघ्नेन ब्रह्मण्यवस्थितं भूयात् । २ । नित्यनिर्विकारासङ्गाद्वयपरिपूर्णसच्चिदानन्दस्वप्रकाशचिदेकरसब्रह्मात्मानुभवसिद्धिर्भूयात् । ३ । अहमादिदृश्यविलक्षणास्मत्प्रत्ययानुभूतप्रत्यक्चिन्मात्रानुभवसिद्धिर्भूयात् । ४ ।

End :

निरवयत्वेनासङ्गत्वेन चात्मनः केनापि संबन्धाभावात् आत्मा नित्यमुक्त इति नित्यमुक्तस्वरूपानुभवः सम्यगाविर्भूयात् । ९१ ।

साधनान्तरनिरपेक्षतया स्वयमेव भासमानत्वादात्मा स्वयंप्रकाश इति स्वयंप्रकाशात्मानुभवः सम्यगाविर्भूयात् । ९२ ।

Colophon :

इति श्रीविद्यारण्यगुरुवर्यविरचिता ब्रह्मविदाशीर्वादपद्धतिः समाप्तिमगमत् ।

The name of the scribe : Mahādeva.

965 40. C. 53.

ब्रह्मविदाशीर्वादपद्धतिः—विद्यारण्यकृता

Paper. 7 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 10

lines in a page. Telugu script. Old. Injured. Good writing.

The leaves are in disorder.

The following extra verse is added in the beginning :

हृदयकमलमध्ये निर्विशेषं निरीहं
हरिहरविधिवेद्यं योगिभिर्ध्यानगम्यम् ।
जननमरणभीतिभ्रंशि सच्चित्स्वरूपं
सकलभुवनबीजं ब्रह्मचैतन्यमीडे ॥

966 8. G. 30.

ब्रह्मविद्यारहस्यम्

Paper. 2 Foll. 7 × 5¾ inches. 22 lines in a page. Telugu script. Old. Injured. Clear writing.

This is one of the small Prakaraṇa works on Advaita-Vedānta. It explains the doctrine of Advaita-Vedānta including the identity between the Brahman and individual soul and falsehood of the world. The author's name is not known. The title of the work as Brahmavidyārahasya is found on the top of the first page of the MS.

Complete.

Beginning :

वेदादिचतुर्दशविद्यानिर्णीताध्यात्मशास्त्ररहस्यं ब्रह्माहमर्थ एव । जगत् किम्? तदुपाधिभूतम् । क्षेत्रं शरीरमेव, इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते इति स्मृतेः । तच्च क्षेत्रं शरीरात्मकम् । अहंपदार्थभूतं ब्रह्मैव, विश्वं विष्णुरिति स्मृतेः, सर्वं खल्विदं ब्रह्मेति श्रुतेश्च ।

End :

इदमर्थात्मना भासमानं जगत् बिम्बप्रतिबिम्बभावमुद्रया बिम्बभूताहमर्थ एव प्रतिबिम्बभूतजगद्द्वितयमहमेवेति सुप्तेरुत्थाय सुप्त्यन्तं सर्वेन्द्रियत्वं स्वार्थं स्वयमेवेति मननमध्यात्मशास्त्ररहस्यम् ।

967 8. G. 28.

ब्रह्मविद्यासारसंग्रहः

Paper. 28 Foll. 7 × 6½ inches. 20 lines in a page. Telugu script. Old. Injured. Good writing.

The work attempts to prove that the passages found in Upaniṣads, Purāṇas, Itihāsas etc. teach the principles as accepted in the school of Advaita-Vedānta of S'rī S'aṁkarācārya.

Contains 1 to 58 topics.

Beginning :

देवासुरमनुष्येषु ये भजन्त्यशिवं शिवम् ।
प्रायस्ते धनिनो भूपा न तु लक्ष्म्याः पतिं हरिम् ॥

इति दशमे अष्टाशीतितमाध्याये ।

ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति ।
यथा पुमान्न स्वाङ्गेषु शिरःपाण्यादिषु क्वचित् ॥
पारक्यबुद्धिं कुरुत एवं भूतेषु मत्परः ॥

इति चतुर्थस्कन्धे भगवदुक्तिः ।

सत्त्वं रजस्तम इति प्रकृतेर्गुणैस्तै-
र्युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः
श्रेयांसि तत्र खलु सत्यतनोर्नृणां स्युः ॥

इति प्रथमस्कन्धे ।

End :

यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै ।

तं ह देवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

इति श्रुतेः ।

968 8. G. 21.

ब्रह्मविद्यासारसंग्रहः

Paper. 16 Foll. 13 × 9 inches. 26 lines in a page. Telugu script. Old. Injured. Good writing.

Contains 1 to 58 topics.

969 8. G. 30.

ब्रह्मविद्यासारसंग्रहः

Paper. 8 Foll. 7 × 5¾ inches. 22 lines in a page. Telugu script. Old. Injured. Good writing.

This is similar to the work described above with different version. The author's name is not known.

Incomplete.

Beginning :

एकादशस्कन्धेऽष्टाविंशेऽध्याये—

यथा हिरण्यं सुकृतं पुरस्ता-
त्पश्चाच्च सर्वस्य हिरण्मयस्य ।
तदेव मध्ये व्यवहारमाणो
नानापदज्ञैरहमस्य तत्त्वम् ॥

एकादशस्कन्धे विंशेऽध्याये—

फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि ।
कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः ॥

End :

अहमो ब्रह्मत्वज्ञानं कदा भवति ? इत्युक्तौ स्वेन धाम्ना स्वप्रकाशत्वेन । इदं जगत्सर्वं कुहकं कपटम् । द्रष्टुः भोक्तुश्च ।

970 29. G. 29.

ब्रह्मविन्निधिः—आदि-वेंकटयोगिकृतः

Palm-leaf. 81 Foll. 11¾ × 1¾ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

This is a treatise dealing with the principles accepted in the school of Advaita-Vedānta according to the view of S'rī S'aṁkarācārya. The author Ādi-Veṅkaṭayogin was the son of Subbayāmātya and grandson of Koṇḍaya. He belonged to the Gannapūḍi family. He was the pupil of Svayaṁprakāśendra, the pupil of Rāmacandrendrayogin. The work contains the following 33 chapters :

१. गुरुदेवतामङ्गलम्
२. जगन्मिथ्यात्वचिन्तनम्
३. गुरुवरणम्
४. शिष्याधिकारसंपत्
५. गुरुशास्त्रपारंपर्यक्रमः
६. महावाक्यार्थविचारः
७. खेचरीमुद्रावश्यकता
८. इन्द्रियजयस्थानम्
९. प्राणायामावश्यकता
१०. ध्यानलक्षणम्
११. कालवञ्चनक्रमः
१२. निदिध्यासनक्रमः
१३. मन्त्रसूक्ष्माङ्गता
१४. जीवदेहनिरूपणम्

१५. सूक्ष्माङ्गस्वरूपम्
१६. जीवस्वरूपम्
१७. स्वापमृतिभेदः
१८. मुक्तिस्वरूपम्
१९. इन्द्रियप्रत्याहारोपायाः
२०. समन्त्रकमुद्रोपदेशः
२१. जीवन्मुक्तिनिरूपणम्
२२. विदेहमुक्तिनिरूपणम्
२३. मन्त्रभावकथनम्
२४. भगवद्ध्यानम्
२५. शास्त्रविनियोगः
२६. अद्वैतभक्तिः
२७. चित्तविकारनिरासः
२८. भगवद्दर्शनोपायाः
२९. मुद्रोपदेशविधानम्
३०. शिष्यानुभवः
३१. ग्रन्थकरणसंमतिः
३२. कालक्रमकथनम्
३३. अधिकारिफलनिरूपणम्

Complete.

Beginning :

श्रीरामचन्द्रयोगीन्द्रं स्वप्रकाशगुरुं शिवम् ।
स्मरामि तत्पदद्वन्द्वं भजामि श्रेयसे चिरम् ॥
श्रीरामचन्द्रयोगीन्द्रशिष्यमस्मद्गुरुं भजे ।
स्वप्रकाशमुनिं यस्य ध्यानात्तद्ब्रह्मवेत्पुमान् ॥
स्वयंप्रकाशयतिराड् जयत्यानन्दवारिधिः ।
यस्य सत्त्वोल्लसच्चित्तश्वेतद्वीपे हरिर्वसेत् ॥
अस्मद्गुरुत्वसंपन्नं स्वप्रकाशाख्यमद्भुतम् ।
तमःसर्वस्वहरणं तेजः किंचिद्विराजते ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीस्वयंप्रकाशेन्द्र-भगवत्पूज्यपादशिष्यसुब्बयामात्यपुत्रगन्नेपूडिआदि - वेंकटयोगिविरचिते ब्रह्मविद्यानिधौ गुरुदेवतामङ्गलं नाम प्रथमं प्रकरणम् ।

आदिवेंकटयोगीति शिष्यस्तस्य महात्मनः ।
प्रियश्च भगवद्भक्तपादसेवारतः सुधीः ॥
गन्नेपूडिग्रामनामा भारद्वाजकुलाग्रणीः ।
कोण्डयाख्यस्य पौत्रश्च सुब्बयामात्यपुत्रकः ॥
कृतसङ्गः सदा सत्सु मृदुवाक् शीलवान् शुचिः ।
गुरुभक्तो दयालुश्च पितृसेवापरायणः ॥
तस्यासीदद्भुता काचिन्मतिरीशकटाक्षजा ।
जाजीलतायां यद्वत्स्यात्कालात्पुष्पोद्गमस्तथा ॥
कोऽहं लोकेश्वरः कः स्यादभेदः कथमेतयोः ।
कस्माज्जगदिदं जातं कः कर्ता कुत्र तिष्ठति ॥

End :

जीवन्मुक्तिसुखं चात्र मुक्तिरन्ते फलं भवेत् ।
पठितव्यस्ततः सम्यगयं ग्रन्थो मुमुक्षुभिः ॥
जयत्वच्युतभक्तिः सा मुद्रा जयतु खेचरी ।
ज्ञानयोगश्च जयतु जयतां मे गुरोः पदौ ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीस्वयंप्रकाशेन्द्रभगत्पूज्यपादशिष्यसुब्बयामात्यपुत्रगन्नेपूडिआदि - वेंकटयोगिविरचिते ब्रह्मविद्यानिधिनामकग्रन्थे अधिकारिफलनिरूपणं नाम त्रयस्त्रिंशं प्रकरणं समाप्तम् ।

अङ्गीकृता हि मत्कृतिरखिलज्ञैर्बालकृष्णयतिवर्यैः ।
शाहाजियाग्रहारस्थितविद्वन्मुख्यसेवितपदाब्जैः ॥

971 10. G. 9.

ब्रह्मविद्यानिधिः—आदि-वेंकटयोगिकृतः

Paper. 84 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Contains the Prakaraṇas 6, 11 to 19, 21 to 23, 26, 27, 22, 30, 32, 7 to 10.

The scribe adds :

ग्रन्थोऽयं लिखितः सुतेन सुधिया श्रीनीलमेघाह्वय-
प्राज्ञानां धिषणाप्रमादवशतो दोषः क्वचिन्मूलतः ।
संभाव्यश्च यथाध्वगस्य चरणस्खालित्यमल्पेतरं
नो गर्ह्यं हि सतां तदेतदसकृत्संधुक्ष्यते साञ्जलि ॥
लिखितो मीनमासेऽसौ ब्रह्मविन्निधिसंज्ञकः ।
आनन्दाच्छत्रयोदश्यां सम्यक्संपूर्णतामगात् ॥

It is stated that this transcript was made from the original MS. of Sundararāmaśāstri of Madura.

972 38. G. 6.

ब्रह्मसिद्धिव्याख्या—शङ्खपाणिकृता

Paper. 433 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in two volumes.

This is a commentary on Maṇḍanamiśra's Brahmasiddhi which is one of the most important works on Advaita-Vedānta. Brahmasiddhi is one of the well known four Siddhis, the other three being Iṣṭasiddhi, Naiṣkarmyasiddhi and Advaitasiddhi. Maṇḍanamiśra the author of the Brahmasiddhi is believed to have lived in the period from 615 to 695 A. D. The author of the commentary was one Śaṅkhapāṇi about whom nothing is known in detail. The tradition says that he belonged to the sect of Kerala Nambūdris. The classified index of Sanskrit MSS. in the Adyar Library, Part II mentions this commentary with the title Samīkṣāphakkikā. The text and commentary were printed and published in the Madras Govt. Oriental Manuscripts Series No. 4 in the year 1937.

Complete in 4 Kāṇḍas.

Beginning :

यदधीनं सुरेन्द्राणामप्यारम्भसमापनम् ।
गणाधिपतिसंज्ञं तद्वस्तु मेऽस्त्विष्टकृत्सदा ॥

प्रकरणारम्भे विघ्ननिवृत्तये परामत्र च प्रतिपाद्यतयाभिमतां देवतां स्तुतिपुरःसरं नमस्यति—आनन्दमिति । कार्यारम्भे नमस्कारक्रियायामविगीतसदाचारः प्रमाणम् । न च जैमिनिना नमस्कारो न कृत इति विगानमाशङ्क्यम् । न ह्यकरणं विगानम् । अपि तु निन्दावादः । तथा होलाकादीनां नियतप्राच्यादिकर्तृकाणामपि प्रामाण्यमिति स्थितम् । स चात्र नोपलभ्यते । कृत एव वा जैमिनिनाप्यनिबद्धया वाचा मनसा च नमस्कार इति विशिष्टत्वादनुमिमीमहे । स च कार्यारम्भे तत्समाप्तिफलाभिसंधानेनैव शिष्टैराचर्यते । तेन विशिष्टफलाया एव स्मृतेस्तत्फलैव श्रुतिस्ततः कल्प्या । अतो न विश्वजिन्न्यायेन स्वर्गफलप्रसङ्गः ।

End :

परस्यामुत्तरकालिक्यां हानोपादानादिप्रवृत्तौ अङ्गत्वात् प्रत्यक्षादीनां प्रामाण्यमिति चेत्, एवं तर्हि शब्दात् प्रमिते ब्रह्मणि तत्साक्षात्करणायोपासनादिप्रवृत्तेर्वेदान्तजज्ञानस्य तदङ्गत्वे इष्यतामपुरुषार्थानां वेदान्तानां प्रामाण्यमिति भावः । इतिः ग्रन्थकरणपरिसमाप्तौ ।

Colophon :

इति शङ्खपाणिकृतौ ब्रह्मसिद्धिटीका समाप्ता ।

The scribe adds :

नेत्रालस्याद्धस्तवेगान्मातृकास्पष्टवर्णत: ।
न्यूनातिरेकतादि: स्याद्यदि शोध्या मनीषिभि: ॥

973 36. F. 14.

ब्रह्मसूत्रभाष्यसिद्धान्तसंग्रह:—उपनिषद्ब्रह्मयोगि-कृत:

Paper. 15 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 29 lines in a page. Grantha script. Old. Injured. Good writing.

This is a metrical summary of the topics dealt with in each of the Adhikaraṇas of the Brahmasūtras of Bādarāyaṇa in accordance with the view of S'rī S'aṁkarācārya. The topics are briefly indicated here with suitable abbreviations. The author assigns the terms Virāṭ, Viśva, Bīja and Turya to the four adhyāyas of the Brahmasūtras of Bādarāyaṇa. He again calls the four pādas of each adhyāya with the same terms said above. The author Upaniṣadbrahmayogin was the pupil of Vāsudevendrayogin. He is known to have written commentaries on all the Upaniṣads in accordance with the Advaitic view of S'rī S'aṁkarācārya. The work was printed and published in the Adyar Library Pamphlet Series No. 19 in the year 1949. The work is accompanied (on Foll. 8 to 15) by a gloss explaining the abbreviations used in the text. The work is also called Brahmasūtratārasiddāntavivṛti.

Complete.

Beginning :

यत्राकारादिपश्यन्तीमात्रापञ्चदशेश्वरा: ।
सूच्यन्ते तद्ब्रह्मसूत्राखण्डार्थं त्रैपदं भजे ॥
नत्वा श्रीदेशिकं ब्रह्मतारार्थानन्दमिच्छताम् ।
तत्सिद्धिसुलभोपायब्रह्मसूत्रार्थ उच्यते ॥
विराड्विराडादितुर्यबीजान्तकलनास्पदम् ।
नत्वा ब्रह्म ब्रह्मतारब्रह्मसूत्रार्थ उच्यते ॥
तत्तारो ब्रह्मसूत्रं स्याद्यत्र ब्रह्मेह सूच्यते ।
तारमात्रा अकाराद्याश्चतुरध्यायतां गता: ॥
आद्य: समन्वयोऽकर उकारो ह्यविरोधकृत् ।
मकार: साधनाध्याय: फलाध्यायोऽर्धमात्रक: ॥
अभिधात्रभिधेयैक्याद् द्व्यष्टपादा भवन्ति ते ।
प्रतिपादैकवाच्या: स्युर्विराड्वैश्वानरादय: ॥
उक्तषोडशपादानां लक्ष्यं तुर्यतुरियचित् ।
तत्र नामाधिकरणसिद्धान्तार्थालिसंग्रह: ॥

End:

न स्वातन्त्र्यं भवेत्सृष्टौ स्वातन्त्र्यं भोगमोक्षयो: ।
तुरीयतुर्यचरणं सप्ताधिकरणात्मकम् ॥

Colophon :

इति चतुर्थस्याध्यायस्य चतुर्थ: पाद: ।
सर्वाधिकरणानि द्विनवत्युत्तरयुक्शतम् ।
सूत्राणि पञ्चपञ्चाशदधिपञ्चशतानि हि ॥
वासुदेवेन्द्रसच्छिष्यरामचन्द्रेन्द्रयोगिना ।
सूत्रभाष्यार्थसिद्धान्त: संगृहीतो विदां मुदे ॥
कृष्णप्रसादाविर्भूतभाष्यसिद्धान्तसंग्रह: ।
सकृद्दर्शनमात्रेण भाष्यार्थज्ञानदो भवेत् ॥
तत्रस्थज्ञानविज्ञानसम्यग्ज्ञानादिना मुनि: ।
भूत्वा विदेहकैवल्यं यात्येवात्र न संशय: ॥
भाष्यप्रसिद्धसिद्धान्तसंग्रह: स्यात् त्रिसप्तति: ।
श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना ॥
ब्रह्मसूत्रब्रह्मतारसिद्धान्तविवृति: कृता ।
भाष्यसंग्रहसिद्धान्तव्याख्यानग्रन्थविस्तर: ।
पञ्चशतोपरिलसत्त्रिसहस्रमितिर्भवेत् ॥

974 9. B. 25.

ब्रह्मानुसंधानम्—शंकराचार्यकृतम्

Paper. 5 Foll. $5\frac{3}{4} \times 4$ inches. 18 lines in a page. Telugu script. Old. Injured. Illegible writing.

A short metrical work on the realisation of Brahman as identical with the self. The work is attributed to the famous S'rī S'aṁkarācārya. The work is not available in print.

Complete.

Beginning:

अहं ब्रह्मानुसंधानं कुर्वे दृश्यप्रशान्तये ।
जातिवर्णाश्रमज्ञानहानिबुद्धिसुखाकरम् ॥
अहमस्मि परं ब्रह्म सच्चिदानन्दलक्षणम् ।
न मनुष्यो न देवोऽहं न गन्धर्वो न राक्षसः ॥

End:

इत्थं ब्रह्मानुसंधानं येऽनुसंदधते जनाः ।
ते भवन्ति परं ब्रह्म पूर्णानन्दरसात्मकम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यपादाचार्यशिष्यश्रीशंकरभगवत्पूज्यपादाचार्य-विरचितं ब्रह्मानुसंधानप्रकरणं संपूर्णम् ।

975 22. D. 88.

ब्रह्मोत्तरतत्त्वरत्नमाला—शंकरमिश्रकृता

Palm-leaf. 4 Foll. $17 \times 1\frac{1}{4}$ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

This is a metrical work containing 32 verses on the principles of Advaita Vedānta. The work is written in the form of questions and answers between a pupil and his teacher. The colophon mentions the author's name as S'aṁkaramis'ra (Sukavi). The work is not available in print.

Complete.

Beginning:

अपारसंसारसमुद्रमध्ये
निमज्जतो मे शरणं किमस्ति ।
गुरो कृपालो कृपया वदैत-
द्विश्वेश पादाम्बुजतीर्थनौका ॥ १ ॥
बद्धो हि को यो विषयानुरागी
को वा विमुक्तो विषयैर्विमुक्तः ।
को वास्ति घोरो नरकः स्वदेह-
स्तृष्णाक्षयः स्वर्गपदं किमस्ति ॥ २ ॥
संसारहृत्कस्तु निजात्मबोधो
को मोक्षहेतुः प्रथितः स एव ।
द्वारं किमेकं नरकस्य नारी
का स्वर्गदा प्राणभृतामहिंसा ॥ ३ ॥

End:

किं कर्म यत्प्रीतिकरं मुरारेः
प्रस्थानकार्यं सततं भवाब्धौ ।
अहर्निशं किं परिचिन्तनीयं
संसारमिथ्यात्वशिवात्मतत्त्वम् ॥ ३१ ॥
कण्ठं गता वा श्रवणं गता वा
ब्रह्मोत्तराख्या मणिरत्नमाला ।
तनोतु मोदं विदुषां सुरम्या
रमेशगौरीशकथैव सद्यः ॥ ३२ ॥

Colophon:

इति श्रीसुकविशंकरमिश्रविरचिता ब्रह्मोत्तरतत्त्वरत्नमाला समाप्ता ।

976 24. E. 7.

भावाज्ञानप्रकाशिका—शिवरामकृता

Palm-leaf. 52 Foll. 17 × 1¾ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

This is a Prakaraṇa work on Advaita-Vedānta attempting to prove that the Ajñāna or ignorance is positive in nature and not negative. The followers of S'rī S'aṁkarācārya hold that the Ajñāna consisting of the three guṇas and preventing the soul from realisation of its identity with the Brahman, causes the self to appear as distinct personality and the material world as reality. This sort of function of Ajñāna can be justified, only when it is accepted as positive in nature. The author S'ivarāma of Haya family was the son of Kṛṣṇas'āstrin and pupil of Raṅganātha, probably the author of the Puruṣārtharatnākara (No. 933 of this volume), It is said that the work closely follows Nṛsiṁhās'rama's view. The author must have lived in the beginning of the 18th century A.D.

Beginning :

श्रीनृसिंहाश्रमं वन्दे सृष्टिस्थित्यन्तकारिणम् ।
तार्किकादीन्निराकर्तुं लीलामानुषधारिणम् ॥
श्रीकृष्णशास्त्रिणं वन्दे पितरं वेदपारगम् ।
सर्वशास्त्रार्थवेत्तारं साक्षात्कृतमहेश्वरम् ॥
कश्चिच्छ्रीरङ्गनाथाख्यो विद्यते च जगद्गुरुः ।
अनेकतन्त्रव्याख्याता बहुविद्याप्रदायकः ॥
तस्माच्छ्रीरङ्गविदुषो विद्यां लब्ध्वा च भक्तितः ।
तत्पादवन्दनं कृत्वा शिवरामेति विश्रुतः ॥
एवमन्यान् गुरून्नत्वा वेदवेदान्तपारगान् ।
विचार्य सर्वशास्त्राणि विमृश्य च पुनः पुनः ॥
अद्वैतविद्याविजयकृष्णशास्त्रिसुतः कविः ।
विचार्य चाश्रमोक्तीश्च भावाज्ञानप्रकाशनम् ॥
नृसिंहाश्रमपद्मध्याननिर्धूताखिलकल्मषः ।
हयवंशप्रसूतोऽहं कुर्वे मननसिद्धये ॥

अविद्योपाधिको जीवः, जीवपरयोर्भेदोऽप्यविद्योपाधिक इत्यद्वैतिनः । स च तदानीमेव घटेत, यद्यविद्यायां लक्षणप्रमाणाभ्यां निरूपणं स्यात् । तस्यां लक्षणादिकमेव न पश्याम इति पूर्वः पक्षः ।

End :

अनुमानमेव दृष्टमिति चित्सुखाचार्याणामनुमानं भावरूपाज्ञाने प्रमाणमेवेति सिद्धान्तः ।

977 54. A. 17.

भावाज्ञानप्रकाशिका—शिवरामकृता

Paper. 98 Foll. 8 × 6¼ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a transcript made from the original MS. described in the last number.

Complete.

978 23. G. 10.

भावाज्ञानप्रकाशिका—शिवरामकृता

Palm-leaf. 9 Foll. 16¼ × 1⅛ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

979 41. C. 90.

भाष्यभानुप्रभा—त्र्यम्बकशास्त्रिकृता

Paper. 79 Foll. 12½ × 4¼ inches. 13

lines in a page. Telugu script. Old. Injured. Good writing.

The Foll. bear the serial numbers 1 to 9 and again 1 to 70.

This is a Kroḍapatra on S'rī S'aṁkarācārya's Brahmasūtrabhāṣya. From anoher MS. of the work available in the Mysore Oriental Library, the author's name is made out as Tryambakasāstrin (*Vide* page 142 of the Catalogue of Sanskrit MSS., Vol. II, year 1910).

Incomplete.

Beginning :

अत्राथशब्द आनन्तर्यार्थः परिगृह्यते, नाधिकारार्थः, ब्रह्मजिज्ञासाया अनधिकार्यत्वादिति भाष्यम्। तत्र यद्यपि जिज्ञासाशब्दावयवार्थज्ञानेच्छाया अनधिकार्यत्वेऽपि तल्लक्षितस्यार्थस्य वा विचारस्य वाधिकार्यत्वं संभवति, तथापि अथशब्दस्याधिकारार्थत्वे विचारप्रयोजनादेरन्यस्मात् सौत्रशब्दादलाभेन विचारस्यापि प्रयोजनाधिकार्याद्यनवगतावनधिकार्यत्वादनुपादेयतेत्युक्तभाष्यार्थः । एवं चारभ्यत्वेन तदभिधानेऽपि प्रयोजनाधिकार्यादीनामवश्यवक्तव्यतया अथशब्दस्य तत्प्रतिपत्त्युपयोग्यानन्तर्यार्थकत्वमेव युक्तमिति भावः ।

End :

यदुक्तं पूर्वपूर्वपर्यायेष्ववयविनः स्वप्रधानतया प्रतिपाद्यत्वदर्शनात् आनन्दमयस्यावयविन एवात्रापि स्वप्राधान्येन प्रतिपादनं युक्तमिति ; तन्न, पूर्वपूर्वपर्यायेष्ववयविनां प्राधान्यमभ्युपेत्य प्रकारान्तरेण . . .

980 34. D. 16.

भेदतमोमार्तण्डशतकम्—रामचन्द्रेन्द्रसरस्वतीकृतम्

Palm-leaf. 7 Foll. 15 × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

One hundred verses written on unreality of difference between the Brahman and the world. The author Rāmacandrendra was the pupil of Vāsudevendra.

Complete in 100 verses.

Beginning :

स्वोद्भूतमायोत्थभिदागजेन्द्र-
प्रभेदपञ्चास्यमपारबोधम् ।
त्रिपाद्विभूतीश्वररामचन्द्रं
नमामि मायोत्थभिदाप्रशान्त्यै ॥
स्वकल्पितानेकभिदाप्रपञ्चा-
धिष्ठानमाद्यं निगमान्तवेद्यम् ।
कालत्रयाबाध्यमपारसौख्यं
श्रीवासुदेवेन्द्रगुरुं भजेऽहम् ॥
सकृत्प्रणामाद्बहुदुष्कृतघ्नं
नत्वा त्रिपाद्देशिकसार्वभौमम् ।
मायाभिदाध्वान्तविभेदचण्ड-
मार्तण्डसंज्ञं शतकं प्रकुर्वे ॥
निर्माय भूमात्मनि निर्विकल्पे
नारायणे निष्कलबोधरूपे ।
उच्चावचानेकभिदाकदम्बं
स्वाज्ञानतः कल्पितमेव मूढैः ॥
रज्जोर्यथा ज्ञानभवः फणीन्द्रः
साक्षात्कृते नश्यति रज्जुतत्त्वे ।
स्वाज्ञानतः कल्पितभेदपूगः
स्वज्ञानमात्राद्विनिवर्तते सः ॥

End :

जगद्विदाध्वान्तदिवाकराख्य-
प्रबन्धतात्पर्यविशारदो यः ।
स भेदविश्वभ्रमवर्जितः सं-
स्त्रिपात्परब्रह्मतया हि तिष्ठेत् ॥

Colophon :

श्रीवासुदेवेन्द्रपदारविन्द-
मरन्दसंतृप्तमहाशयेन ।
श्रीरामचन्द्रेण भिदान्धकार-
मार्ताण्डसंज्ञं शतकं कृतं स्यात् ॥

981 23. G. 10.

भेदधिक्कार:—नृसिंहाश्रमकृत:

Palm-leaf. 16 Foll. 18 × 1½ inches. 7 lines in a page. Grantha and Telugu scripts. Old. Injured. Good writing.

The Bhedadhikkāra is a dialectical work attempting to refute 'difference (Bheda)' which is held as a category by other philosophers like Naiyāyikas and Dvaitins. The author Nṛsiṁhāśrama was the pupil of Jagannāthāśrama and Gīrvāṇendrasarasvatī. His other works are: Advaitadīpikā, Tattvaviveka (Completed in 1547 A. D.). Tattvavivekadīpana *alias* Advaitaratnakośa, Pañcapādikāvivaraṇavyākhyā Bhāvaprakāśikā, Saṁkṣepaśārīrakavyākhyā Tattvabodhinī, Pañcapādikāvyākhyā, Vedāntaratnakośa (D. No. 7065 of the Tanjore Library) and Nṛsiṁhavijñāpana. He is believed to have been a contemporary of Appayadīkṣita and Bhaṭṭojidīkṣita. He must have lived in the middle of the 16th century A. D. The work was printed and published in the Benares Sanskrit Series, No. 86 in the year 1904 together with the commentary called Satkriyā of the author's pupil Nārāyaṇāśrama.

Complete.

Beginning :

वेदान्तवनसंचारि नीलाचलगुहाशयम् ।
ज्योतिर्विराजते ध्वस्तमायावरणवारणम् ॥
किं न त्वं नरसिंह एव यदि वा नाहं न नो चेत्कथं
बन्धो मय्यखिलेश्वरे त्वयि विभो किं नास्ति मत्त: पर: ।
भूयादर्थवदात्मबन्धहर इत्याद्यं वचोऽपौरुषं
न त्वं ना तदहं त्वमेव नृहरे भूयासमात्मंस्त्वयि ॥
हृदयालयमालम्ब्य करुणारससुन्दरम् ।
गुरूणां चरणाम्भोजं कुर्वे भेदस्य धिक्कृतिम् ॥

अन्त:करणातिरिक्तोऽहमिति प्रतीयमानो जीव: परस्मान्न भिद्यते, चेतनत्वात् पदार्थत्वाद्वा ब्रह्मवत् । विपक्षे भेदग्राहकप्रमाणाभावात् अभेदश्रुत्यप्रामाण्यप्रसङ्गाच्च नाप्रयोजकम् । तथा हि—

मानाभावादयुक्तेश्च न भिदेश्वरजीवयो: ।
जीवानामचितां चैव नात्मनो न परस्परम् ॥

End :

तस्मात्तत्वमसीत्यादे: सत्यज्ञानसुखात्मकम् ।
जीवो ब्रह्मेति संसिद्धमद्वैतं ज्योतिरस्तु मे ॥
आस्तामन्यप्रमाणत्वमभेदे सर्ववस्तुन: ।
भेदप्रमाणमेवैतदद्वैतं साधयेदिदम् ॥
गुरुचरणसकाशाद्भृतं निर्गतं य-
द्विगुणमनुगुणं वा वीक्षतां तत्क्षमात्मा ।
अपि विसृजति कश्चित्काचमालावमत्या
शतमखमणिमालां शारदाकाशनीलाम् ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमज्जगन्नाथाश्रमपूज्यपादशिष्यश्रीमन्नृसिंहाश्रमविरचितो भेदधिक्कार: समाप्त: ।

982 27. D. 45.

भेदधिक्कार:—नृसिंहाश्रमकृत:

Palm-leaf. 10 Foll. 17½ × 1½ inches.

9 lines in a page. Grantha script. Old. Much injured. Good writing.

Complete.

983 30. I. 18.

भेदधिक्कारः—नृसिंहाश्रमकृतः

Palm-leaf. 7 Foll. 18 × 1¼ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

984 34. O. 41.

भेदधिक्कारः—नृसिंहाश्रमकृतः

Palm-leaf. 4 Foll. 22½ × 2½ inches. 18 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

985 30. I. 18.

भेदधिक्कारव्याख्या सत्क्रिया—नारायणाश्रमकृता

Palm-leaf. 61 Foll. 18 × 1¼ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

This is a commentary on Nṛsiṁhāśrama's Bhedadhikkāra. The commentary is called Satkriyā. The commentator Nārāyaṇāśrama was the pupil of Nṛsiṁhāśrama, the author of the text. His other works are Advaitadīpikāvyākhyā Vivaraṇa, Advaitasiddhāntasaṁgraha and Nigamāntārthacandrikā (No. 859 of this volume). His date must be towards the end of the 16th century A. D.

Complete.

Beginning:

मृषामायाशक्त्यावृतमहिमनि ब्रह्मणि परे
जगज्जालं जातं स्फुरति वियतीवोरु नगरम् ।
विरिञ्चश्रीशेशत्रिदशनरतिर्यग्गतभिदा
कुतोऽतो भूमाहं निरवधिसदानन्दघनचित् ॥
काशते कलितं यस्य पदं वैदिकमस्तकैः ।
भक्तमुक्त्यै समीहन्तं तं नृसिंहगुरुं भजे ॥
गम्भीरभावभारेण दुर्वहा गौरवी कृतिः ।
तथापि भेदधिक्कारसत्क्रियां श्रद्धयारभे ॥

यद्यपि श्रुतिस्मृतीतिहासपुराणागमैः क्रियासमभिहारेण जगन्निदाने सर्वज्ञे परमात्मनि सजातीयादिसमस्तभेदो निन्दितो निषिद्धश्च । यद्यपि चात्रभवद्भिः बादरायणभगवत्पादादिभिः पूर्वाचार्यैरारम्भणादिन्यायेनापि भेदसत्ता निराकारि । तथापि केचित् स्वोत्प्रेक्षापरिकल्पितपरिभाषायुक्तिकलापाकुलितान्तःकरणा भेदसत्तां संभावयन्तः श्रुत्यादिसिद्धशुद्धाद्वितीयचिदात्मनि श्रद्धां न बध्नन्ति । अतस्तन्मोहशान्तये समस्तभेददुर्निरूपत्वप्रकटनाय ग्रन्थमारभमाणस्तत्परिसमाप्त्यादिफलकमीश्वरतत्त्वानुस्मरणं मङ्गलं मनसानुष्ठितं शिष्यशिक्षायै प्रकटयन् प्रकरणविषयादिकं च सूचयन् स्मृतवस्तुस्वरूपं सलक्षणप्रमाणं निर्दिशति—वेदान्तेत्यादिना ।

End:

अत्र विचाररहितानामनपेक्षामात्रेण वैगुण्यं न संभावनीयमित्यत्र दृष्टान्तमाह—अपीति । स्वच्छामिन्द्रनीलमणिमालां कश्चिदविचार्य काचमणिमालाभ्रान्त्या कापि त्यजति । नैतावता सा प्राज्ञैरुपेक्ष्यत इत्यर्थः ।

वेदान्तबृन्दविपिने विततं विशुद्ध-
मद्वैतमार्गमपवर्गपदाधिरोहम् ।

श्रीमद्गुरूक्तनयनुन्नसमस्तशङ्क-
मास्थाय यान्तु पदमुत्तममस्तदोषाः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यभगवन्नृसिंहाश्रमश्रीचरणचरणारविन्दपरिपूजननिरतनारायणाश्रमविरचिता भेदधिक्कारसत्क्रिया समाप्ता ।

986 25. N. 32.

भेदधिक्कारव्याख्या सत्क्रिया—नारायणाश्रमकृता

Palm-leaf. 31 Foll. $17\frac{3}{4} \times 1\frac{1}{2}$ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

One extra leaf containing some miscellaneous passages on Dharmaśāstra dealing with the S'rāddha, is added at the end.

987 30. C. 6.

भेदधिक्कारव्याख्या सत्क्रिया—नारायणाश्रमकृता

Palm-leaf. 58 Foll. $14 \times 1\frac{1}{8}$ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

Incomplete.

988 34. K. 29.

भेदधिक्कारव्याख्या सत्क्रिया—नारायणाश्रमकृता

Palm-leaf. 69 Foll. $16\frac{1}{2} \times 1\frac{1}{4}$ inches. 9 lines in a page. Grantha script. Old. Much injured. Good writing.

The leaves are in disorder.

Wants beginning and end.

989 21. F. 39.

भेदनिराकरणम्

Palm-leaf. 15 Foll. 15×1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

This is a small dissertation on Advaita Vedānta refuting the category of difference between the Jīva and the Brahman. Practically this is an epitome of the portion of the Advaitasiddhi of Madhusūdanasarasvatī dealing with the subject (*Vide* pages 787 to 792 of the Advaitasiddhi, published in the Nirnayasagar Press, Bombay, 1917.)

Incomplete.

Beginning :

जीवो ब्रह्माभिन्नः, भेदे प्रमाणाभावात् । तथाहि-घटादिनिष्ठभेदस्य घटादिस्वरूपत्वे घटज्ञानस्य धर्मिप्रतियोगिज्ञानानपेक्षत्ववत् भेदज्ञानस्यापि तदनपेक्षत्वापत्तिः । नचेष्टापत्तिः, प्रतियोगिज्ञानशून्यस्यापि भेदज्ञानापत्तेः । किंच घटस्य स्थितावाश्रयत्वेन घटानपेक्षत्ववत् तन्निष्ठभेदस्याप्याश्रयत्वेन घटानपेक्षत्वापत्तिश्च ।

End :

न ह्यस्माभिः पटस्य भेदान्वितघटस्वरूपेऽन्वयात् घटस्वरूपान्वितभेदे प्रतियोगित्वरूपनिरूपकत्वाद्वा घटस्वरूपता नापाद्यते । किंतु पटस्वरूपाभेदेन प्रतीयमानो यो भेदः तन्निरूपकत्वात् ।

990 25. M. 9.

मध्वतन्त्रमुखमर्दनम्—अप्पयदीक्षितकृतम्

Palm-leaf. 4 Foll. $14\frac{1}{4} \times 1\frac{1}{4}$ inches. 14 lines in a page. Grantha script. Old. Injured. Good and small writing.

Wooden boards are added to both sides.

The Madhvatantramukhamardana or Madhvamukhamardana or Madhvamukhabhaṅga as clled in various MSS. is an attempt to show that Ānandatīrtha's interpretation of the Brahmasūtras is not in accordance with the spirit of the Upaniṣads. The author takes the first five adhikaraṇas of the 1st pāda of the 1st adhyāya for his criticism and states that the remaining adhikaraṇas also can be criticised in the same way. The versatile author Appayadīkṣita was the son and pupil of Raṅgarājādhvarin of Bhāradvajagotra. He was the author of more than one hundred works among which, the Kalpataruparimala, Nyāyarakṣāmaṇi, S'ivārkamaṇidīpikā, Siddhāntalesasaṁgraha are famous works on the Vedānta. He is believed to have born in 1520 A.D. and lived for 72 years. He was patronized by the Vijayanagaram Kings Cinabomma, Narasiṁhadeva, and Veṅkaṭapati. He was a contemporary of Khaṇḍadeva and Bhaṭṭojidīkṣita. There are three editions of this work—two in Devanāgari and one in Grantha character.

Complete.

Beginning :

शिवं विष्णुं वा यद्यभिदधति शास्त्रस्य विषयं
तदिष्टं ग्राह्यं नः सगुणमपि तद्ब्रह्म भजताम् ।
विरोधो नातीव स्फुरति नहिनिन्दानयविदां
न सूत्राणामर्थान्तरमपि भवद्वार्यमुचितम् ॥
तथाप्यानन्दतीर्थीयं मतमग्राह्यमेव नः ।
यत्र वैदिकमर्यादा भूयस्याकुलतां गता ॥
अतः पञ्चाधिकरणीं लक्ष्यीकृत्यैव तन्मते ।
दूष्यस्थलानि सर्वत्र सूच्यन्ते सुधियां मुदे ॥

End :

असुरान् विजिगीषोः
स्वयमद्वैतब्रह्मादिव्यरत्नहरान् ।
विबुधेन्द्रस्य सखायः
श्लोका मरुत इव सन्त्विमे मुख्याः ॥
विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलि-
रप्पय्यदीक्षित इति प्रथितस्तनूजः ॥
सोऽयं मितपदमकरो-
न्महितार्थं मध्वशास्त्रमुखभङ्गम् ।
प्रीत्यै पुरामरातेः
श्रीकामाक्षीसमेतस्य ॥

Colophon :

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतिषु मध्वमुखभङ्गग्रन्थः संपूर्णः ।

The scribe adds :

मार्गसहायशास्त्रिणा लिखितमिदम ।

991 41. A. 73.

मध्वतन्त्रमुखमर्दनम् , व्यध्वविध्वंसनव्याख्यासहितम्—अप्पयदीक्षितकृतम्

Paper. 54 Foll. 10 × 5½ inches. 15 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The work is accompanied by the commentary of the author of the text Appayadīkṣita. The commentary is called Vyadhvavidhvaṁsana or Madhvamatavidhvaṁsana. The commentary is available in print in three different editions—

two in Devanāgarī and one in Grantha character. The commentary is also called Madhvamatavidhvaṁsana.

Complete.

Beginning :

उद्धाव्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥
मध्वतन्त्रमुखमर्दनं मया
यत्कृतं प्रकरणं मिताक्षरम् ।
पद्यरूपमनतिस्फुटाशयं
तत्सुखावगतये विविच्यते ॥

आनन्दतीर्थप्रवर्तितशारीरकशास्त्रप्राथमिकपञ्चाधिकरणप्रक्रियां प्रायस्तन्मतमर्यादयैव दूषयितुं प्रकरणमारभमाणः प्रारिप्सितप्रकरणनिर्विघ्नसमाप्त्यादिप्रयोजनायादौ विशिष्टेष्टदेवतानुसंधानकीर्तनरूपं मङ्गलमाचरन्नेव प्रकरणारम्भं तावदाक्षिपति—

शिवं विष्णुं वा यदभिदधति शास्त्रस्य विषयं
तदिष्टं ग्राह्यं नः सगुणमपि तद्ब्रह्म भजताम् ।
विरोधो नातीव स्फुरति नहिनिन्दानयविदां
न सूत्राणामर्थान्तरमपि भवद्वार्यमुचितम् ॥

वस्तुतो निर्विशेषब्रह्मणि प्रतिष्ठितस्यापि शारीरकमीमांसाशास्त्रस्य केचन शिवं विष्णुं वा विषयं वदन्ति चेत्, इष्टमेव । यतस्तत् शिवरूपं वा विष्णुरूपं वा सगुणं ब्रह्मोपासीनानामस्माकमद्वैतवादिनामुपास्यस्वरूपगुणमहिमावधारणाय तत्प्रतिपादनप्रवृत्तं तदीयं शास्त्रस्य प्रयोजनं ग्राह्यम् । अपेक्षितं खल्वस्माकमपि निदिध्यासनोपयोगिचित्तवशीकरणकैलासवैकुण्ठादिस्थानगतदिव्यभोगानुभवक्रममुक्तिरूपफलापेक्षिणां तयोरुपासनम् ।

End :

असुरान्विजिगीषोः स्वय-
मद्वैतब्रह्मदिव्यरत्नहरान् ।
विबुधेन्द्रस्य सखायः
श्लोका मरुत इव सन्त्विमे मुख्याः ॥

असुराः खलु वैरोचनीमुपनिषदमाश्रिता देहात्मवादिनः । प्रकृताः परेऽपि जीवस्यैव करचरणादिसकलकर्मज्ञानेन्द्रियसहितदेहरूपत्वं तेनैव देहेन स्वप्ने मुक्तौ च व्यवहारानपि वदन्तो देहात्मवादिन इति साम्यादसुरशब्देनातिशयोक्त्या परे निर्दिष्टाः । मुख्याः मुखे वदने भवाः सेनामुखवर्तिनश्च । अथ स्वनाम ग्रन्थनाम च कीर्तयन् प्रकरणसमाप्तिं दर्शयति—

विद्वद्धुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलि-
रस्त्यप्पदीक्षित इति प्रथितस्तनूजः ॥
सोऽयं मितपदमकरो-
न्महितार्थं मध्वशास्त्रमुखभङ्गम् ।
प्रीत्यै पुरामरातेः
श्रीकामाक्षीसमेतस्य ॥

Colophon :

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतिर्मध्वमुखभङ्गव्याख्यानं व्यध्वविध्वंसनं समाप्तम् ।

992 8. G. 5.

मध्वतन्त्रमुखमर्दनम्, व्यध्वविध्वंसनव्याख्यासहितम्—अप्पयदीक्षितकृतम्

Paper. 59 Foll. 8 × 6½ inches. 18

lines in a page. Telugu script. Old. Injured. Good writing.

Breaks off in the 54th verse.

993 19. P. 9.

मध्वतन्त्रमुखमर्दनम्, व्यध्वविध्वंसनव्याख्या-सहितम्—अप्पयदीक्षितकृतम्

Palm-leaf. 57 Foll. 15×1¾ inches. 11 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

994 24. K. 20.

विशिष्टाद्वैतदूषणसारसंग्रहः—ब्रह्मदेवपण्डितकृतः

Palm-leaf. 33 Foll. 17½ × 1½ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

An unfavourable criticism on the principles of Viśiṣṭādvaita Vedānta. The author Brahmadevapaṇḍita was the pupil and brother's son of Malles'vasūri. He belonged to Pinniṇṭi family of the Āndhradeśa. As he quoted Nāgesa's Vaiyākaraṇamañjūṣā he must have lived later than the 18th century A.D.

Complete.

Beginning :

ब्रह्म श्रुत्यन्तवृन्दैर्यदद्वितीयं प्रकाश्यते ।
सत्यज्ञानसुखाकारं परिपूर्णं तदस्म्यहम् ॥
श्रीगौरीकान्तपदद्वन्द्वं गणनाथं सरस्वतीम् ।
नमामि भगवत्पादप्रभृतीनपि देशिकान् ॥
पित्रिण्टिब्रह्मदेवःप्रथितगुणनिधीन्मल्लसूरीन्पितृव्या-
नानम्याशेषतन्त्रेष्वतितरचतुरान्सारसंबोधदक्षान् ।
वैशिष्ट्याद्वैतवादागुणगणमधुना पूर्वनिर्माणसुस्थं
संगृह्णाति प्रयत्नादतिऋजुमतयस्तेन तोषं प्रयान्तु ॥

इह खलु केचन दधीचिगौतमशापदग्धतया बहुजन्मसु दुर्वासनावासितान्तःकरणा बहुजनैः स्वरसतः श्रुतिसंप्रतिपन्नतया बहुधा निरूपितमप्यद्वैतमरोचयन्तः स्वमतिमात्रपरिकल्पितसंकेते विशिष्टाद्वैते प्रमाणपथातीते श्रुत्यन्तानामपि तात्पर्यमिति परिकल्पयन्ति । तथाहितत्त्वमस्यादि वाक्यं न जीवब्रह्मणोः स्वरूपाभेदबोधनपरम् । अनादिप्रवृत्तविविधानन्तकर्माविद्यापटलपिहितविज्ञानादिगुणस्वभावस्य देवमनुष्यतिर्यगादिदेहोपाधिकसंसारस्यापवर्गायोग्यस्य नानाभूतस्य जीवस्य एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प इत्यादिश्रुतिभिस्तदनुसारिणीभिः

तेजोबलैश्वर्यमहावबोध-
सुवीर्यशक्त्यादिगुणैकराशिः ।
परः पराणां सकला न यत्र
क्लेशादयः सन्ति परावरेशे ॥

इत्यादिस्मृतिभिश्च निरस्तनिखिलदोषतया समस्तकल्याणगुणसागरतया चावगम्यमानब्रह्मस्वरूपाभेदायोगात् । किंतु विशिष्टाभेदपरं तदिति ।

End :

व्युत्पादितं च राजपुरुषादिसमासेषु अर्थवत्सूत्रस्थभाष्यवाक्यपदीयादिकमनुसृत्याखण्डार्थत्वं मञ्जूषायां वैयाकरणवर्यैः । अतः कोऽयमित्यादिप्रश्नोत्तरे राजपुरुष इत्यादावपि अराजकीयभिन्नपुरुषविशेषस्य स्वरूपतोऽभेदे सिद्धमखण्डार्थत्वम् । एतेन वाक्यस्याखण्डार्थत्वं यत्र कुत्रापि तन्त्रे न प्रसिद्धमिति तान्त्रिककीटशलाटुकीटवदुपेक्षणीयमिति व्यक्तम् । तस्मात् विशिष्टाद्वैतस्योक्तिसंभवाभावान्निरस्तसमस्तोपप्लवमखण्डानन्दैकरसं प्रत्यगभिन्नं ब्रह्मैव सकलवेदान्तप्रतिपाद्यमिति सिद्धम् ।

विशिष्टाद्वैतवादस्य मानाभावादयुक्तितः ।
स्वरूपाद्वैतवादो नः सम्यग्विजयतेतराम् ॥

Colophon :

इति श्रीमत्सर्वतन्त्राद्वैतविद्याचार्यपितृव्यमल्लेश्वरतन्त्रिविनीतब्रह्मदेवपण्डितविरचितविशिष्टाद्वैतदूषणसारसंग्रहः समाप्तः ।

1166 10. J. 25.

विशिष्टाद्वैतभञ्जनम्

Paper. × Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgrī script. New. Good. Good writing.

This also is the criticism on the doctrine of Viśiṣṭādvaita-Vedānta as explained in the Śrībhāṣya of Śrī Rāmānuja. Incidently the author, whose name is not known, criticizes Śrī Rāmānuja's interpretation of certain Adhikaraṇas of Brahmasūtras. The title as Rāmānuja-śṛṅgabhaṅga is written in the top-lines of the pages.

Wants the beginning and end.

Beginning :

यत्र त्वस्य सर्वमात्मैवाभूदित्यत्र । तस्योक्तश्रुत्यैव विश्वमिथ्यात्वं च व्यवस्थापितम् । मिथ्यात्वे विश्वस्य श्रुतयोऽनन्ताः सन्ति । कामः संकल्प इत्यादि-श्रुतिभ्यश्च ज्ञानादीनामन्तःकरणधर्मत्वात् तेषामेवा संसर्गाग्रहादात्मधर्मत्वव्यवहारः । असंसर्गाग्रहादेव नाह खल्वयमेवं संप्रत्यात्मानं जानातीति श्रुतिप्रसिद्धेश्च । न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात् । न तु द्वितीयमस्ति । नान्यदतोऽस्ति द्रष्टृ । अतोऽन्यदार्तम् । नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् । अदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यम् । एकात्मप्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थमित्यादिभ्यः संविदैक्येतरविरहयोरपि प्रमितत्वाच्च ।

End :

ब्रह्म विना चेतनाचेतनजगतो जीवं विना शरीरस्येव चक्षुषा पृथक्प्रत्ययात् । अन्यथा ब्रह्मतदनुविद्धत्वादिसंशयविपर्ययविरहप्रसङ्गात् । प्रभाज्योत्स्नारवीन्द्वादिशब्दानां परस्परवाचकत्वप्रसङ्गात् । अवयवं विनावयविनः पृथगुत्पादविरहवत् स्थितिप्रतीत्यादिविरहेणावयविशब्दैरवयवप्रतीत्यापत्तेश्च । अवयविनं विनावयवानां सद्भावः शुक्लादिगुणादीन् विना गुणिन इवेत्यविशेषः । एवं संस्थानविशेषस्यैव गोत्वादिजातित्वात् तं विना सं.

1167 30. I. 16.

विशिष्टाद्वैतभञ्जनम्

Palm-leaf. 46 Foll. 17 × 1¼ inches. 7 lines in a page. Telugu script. Old. Much injured. Illegible writing.

This is the original MS. from which the transcript described in the last number, was made.

Incomplete.

1168 20. H. 20.

वेदान्तकल्पलतिका—मधुसूदनसरस्वतीकृता

Palm-leaf. 28 Foll. 15¾ × 1 inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

This is one of the Prakaraṇa works on Advaita Vedānta specially dealing with the nature and characteristics of Mokṣa. The author attempts to refute the views of various philosophers on the subject and establish his own view. The author Madhusūdanasarasvatī was the pupil of Viśveśvarasarasvatī and a contemporary of Gadādharabhaṭṭa, Tulasīdāsa and Nṛsiṁhāśrama in the latter half of the 16th century A.D. Among his other works the Advaitasiddhi and Siddhāntabindu deserve special mention. The work was printed and published in the Sarasvati Bhavana Texts Series, Benares, No. 3.

Complete.

Beginning :

मीमांसया कपटतो भुजगाम्बयेव
स्वाधीनतामुपनिषद्वनितेव नीत्वा ।
येनोद्धृतामृतफलेन गरुत्मतेव
तस्मै नमो भगवतेऽद्भुतशंकराय ॥
दुरापः शास्त्रार्थो नियतयतमानैरपि बुधै-
र्न संप्राप्तुं शक्यो मलिनमतिना यद्यपि मया ।
तथापि श्रीविश्वेश्वरचरणपङ्केरुहसुधा-
सुधाराभिः सिक्तो न कथमपि रिक्तोऽस्मि भविता ॥

सत्तर्कबोधनिकरैः परमात्मबोध-
निष्ठाफलेन दधसी परमां विभूतिम् ।
शारीरकार्थसुरशाखिगता सुधीभि-
र्वेदान्तकल्पलतिकेयमुपासनीया ॥
निर्धूय जैमिनिपतञ्जलिगौतमोक्ती:
काणादकापिलशिवादिमतानि चाहम् ।
श्रीव्यासशंकरसुरेश्वरसूत्रितार्थ-
बुद्धिं व्यनज्मि विशदं मितभाषितेन ॥
मुमुक्षूणामनुष्ठेयं विक्षेपविनिवृत्तये ।
मोक्षं ससाधनं वच्मि परपक्षनिरासतः ॥

अथ मोक्षे तत्साधने च विप्रतिपद्यन्ते विपश्चितः । तत्र लौकायतिकास्तावत् प्राकृतलोकानुसारिणो मनुष्यत्वादिविशिष्टभूतचतुष्टयसंघात एव चैतन्यं मन्यमाना नानागमपुराणानुमानादिसिद्धमपि देहादिव्यतिरिक्तं चेतनं बन्धमोक्षभागिनमशुद्धबुद्धयोऽपलपन्ति नाप्रत्यक्षं प्रमाणमिति वदन्तः ।

End :

तत्सिद्धमात्मैवाविद्यानिवृत्त्युपलक्षितो मोक्षः । तत्साधनं च वेदान्तवाक्यकरणकोऽन्यानुपरक्तब्रह्मात्मैक्यसाक्षात्कार एव श्रवणाद्यपनीतप्रतिबन्धः सन्निति सर्वं समञ्जसम् ।

न्यायैर्निर्धूय दुष्टानिह कपिलकणादाक्षपादादिवादा-
नादायादुष्टमेकं श्रुतिमितममृतद्वारमद्वैतवादम् ।
वेदान्तैकप्रमेयं परमसुखमयं ज्ञानमज्ञानशून्यं
मोक्षं व्याचक्षतेयं कमपि सुकृतिनः सोऽहमेवास्मि पूर्णः॥

Colophon :

इति श्रीवेदान्तकल्पलतिकायां परमहंसपरिव्राजकमधुसूदनसरस्वतीकृतायां ससाधनापवर्गनिरूपणं नाम प्रथमः स्तबकः ।

1169 20. H. 27.

वेदान्तडिण्डिमः

Palm-leaf. 8 Foll. 9 × 1 inches. 5 lines in a page. Telugu script. Old Injured. Good writing.

This is a metrical Prakaraṇa work explaining the principles of Advaita Vedanta. The work is called Vedānta-ḍiṇḍima because each stanza has its fourth pāda as इति वेदान्तडिण्डिमः. The author's name is not known.

Complete.

Beginning :

वेदान्तडिण्डिमास्तत्त्वमेकमुद्घोषयन्ति यत् ।
आस्तां पुरस्तात्तत्तेजो दक्षिणामूर्तिशब्दितम् ॥ १ ॥
आत्मानात्मपदार्थौ द्वौ भोक्तृभोग्यत्वलक्षणौ ।
ब्रह्मैवात्मा न देहादिरिति वेदान्तडिण्डिमः ॥ २ ॥
ज्ञानाज्ञानपदार्थौ द्वावात्मनो बन्धमुक्तिदौ ।
ज्ञानान्मुक्तिर्निबन्धोऽन्यादिति वेदान्तडिण्डिमः ॥३॥

End :

अहोऽस्माकमलं मोहादात्मा ब्रह्मेति निर्भयम् ।
श्रुतिभेरीरवोऽद्यापि श्रूयते श्रुतिरञ्जनः ॥ ७७ ॥
वेदान्तभेरीभांकारः प्रतिवादिभयंकरः ।
श्रूयतां ब्राह्मणैः श्रीमद्दक्षिणामूर्त्यनुग्रहात् ॥ ९७ ॥

Colophon :

वेदान्तडिण्डिमग्रन्थः संपूर्णः ।

1170 20. H. 25.

वेदान्तडिण्डिमः

Palm-leaf. 9 Foll. 12 × 1 inches. 4 lines in a page. Telugu script. Old. Much injured. Illegible writing.

Wants beginning; otherwise complete.

1171 22. D. 88.

वेदान्तडिण्डिमः

Palm-leaf. 6 Foll. 17 × 1 inches. 4 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Adds the following verses at the end:

नाभिकमलमध्ये ज्योतिरानन्दरूपं
हृदयकमलमध्ये सूर्यबिम्बानुरूपम् ।
भ्रुवयुगलमध्ये हंसमार्गानुरूपं
दशशतदलमध्ये ब्रह्ममार्गानुरूपम् ॥
सकलमिदमयं स्यात्स्थूलसूक्ष्मानुरूपं
विभु परमरूपं पातु मां नारसिंहम् ।

1172 33. C. 24.

वेदान्तडिण्डिमः

Palm-leaf. 5 Foll. 15 × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good and small writing.

Complete.

1173 20. H. 31.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 16 Fol. 18¾ × 1 inches. 15 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides.

This is the famous Prakaraṇa work on Advaita Vedānta. The author Dharmarājādhvarīndra was the grand pupil of the famous Nṛsiṁhāśrama and pupil of Veṅkaṭanātha of Velāṅguḍi village in Tanjore Dt. He was the author of the following other works: Tarkacūḍāmaṇi, Pañcapadikāvyākhyā Padayojanā, Nyāyasiddhāntadīpa vyākhyā and Yuktisaṁgraha. He was the younger brother of Trivedi Nārāyaṇādhvarin and a native of the village Kaṇḍramāṇikkam in Tanjore Dt. (Vide D. No. 6217, Tanjore). He belonged to the Ṛgveda and the Kauṇḍinyagotra. He must have flourished in the 17th century A.D. The work is also called Advaitaparibhāṣā. It is divided into 8 Paricchedas as given below:

१. प्रत्यक्षपरिच्छेदः ५. अर्थापत्तिपरिच्छेदः
२. अनुमानपरिच्छेदः ६. अनुपलब्धिपरिच्छेदः
३. उपमानपरिच्छेदः ७. विषयपरिच्छेदः
४. आगमपरिच्छेदः ८. प्रयोजनपरिच्छेदः.

The work has the following four commentaries so far as known—1. Vedāntasikhāmaṇi by Rāmakṛṣṇādhvarin, Printed. 2. Prakāśikā by Pettādīkṣita, Printed. 3. Tattvabodhinī by Vedādrisūri (No. 357, Vol. III, Curator's Office Library, Trivandrum.) 4. Bhūṣaṇa by Nārāyaṇabhaṭṭa of Guṇḍu family (R. No. 1463, Madras).

Complete.

Beginning:

यदविद्याविलासेन भूतभौतिकसृष्टयः ।
तं नौमि परमात्मानं सच्चिदानन्दविग्रहम् ॥
यदन्तेवासिपञ्चास्यैर्निरस्ता भेदिवारणाः ।
तं नौमि नरसिंहाख्यं यतीन्द्रं परमं गुरुम् ॥
श्रीमद्वेंकटनाथाख्यान् वेलांकुटिनिवासिनः ।

जगद्गुरूनहं वन्दे सर्वतन्त्रप्रवर्तकान् ॥
येन चिन्तामणौ टीका दशटीकाविभञ्जनी ।
तर्कचूडामणिर्नाम कृता विद्वन्मनोरमा ॥
टीका शशधरस्यापि बालव्युत्पत्तिदायिनी ।
पदयोजनया पञ्चपादिका व्याकृता तथा ॥
तेन बोधाय मन्दानां वेदान्तार्थावलम्बिनी ।
धर्मराजाध्वरीन्द्रेण परिभाषा वितन्यते ॥

इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः । न च पुनरावर्तत इत्यादिश्रुत्या तस्य नित्यत्वावगमात् । इतरेषां त्रयाणां प्रत्यक्षेण, तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते इत्यादिश्रुत्या चानित्यत्वावगमात् ।

End:

तदुक्तमाचार्यवाचस्पतिमिश्रैः—

उपासनादिसंसिद्धितोषितेश्वरचोदितम् ।
अधिकारं समाप्यैते प्रविशन्ति परं पदम् ॥

इति । एतच्चैकमुक्तौ सर्वमुक्तिरिति पक्षे नोपपद्यते । तस्मादेकाविद्यापक्षेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया । तदेवं ब्रह्मज्ञानान्मोक्षः । मोक्षश्चानर्थनिवृत्तिः निरतिशयब्रह्मानन्दावाप्तिश्चेति सिद्धं प्रयोजनम् ।

Colophon:

इति धर्मराजाध्वरीन्द्रविरचितायां वेदान्तपरिभाषायामष्टमः परिच्छेदः । समाप्ता परिभाषा ।

1174 20. H. 32.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 54 Foll. 8 × 1¾ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

The fly-leaf gives the former owner's name as Balakrishna Sastri.

Complete.

1175 20. H. 33.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 29 Foll. 16 × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the last chapter.

1176 22. D. 86.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 4 Foll. 13½ × 1¼ inches. 11 lines in a page. Grantha script. Old. Much injured. Good writing.

Contains a very small portion of the 1st chapter.

1177 22. M. 10.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 36 Foll. 15½ × 1⅛ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the last chapter.

1178 23. A. 35.

वेदान्तपरिमाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 34 Foll. 15 × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the last chapter.

One extra leaf added at the end reads the following verses:

बिल्वेशो जयति श्रुतैकविदितः संदर्शनान्मामकं
पापं दूरतरं जगाम सुगुरौ भक्तिर्दृढैधिष्यते ।
आगन्ता निखिलापि सिद्धिरनघा लोकः सुखं तिष्ठता-
च्चिन्तागच्छदथो सुखं त्विदमभूदात्माभविष्यत्ततः ॥
स्वात्मानन्दस्वरूपाय संयतेन्द्रियवृत्तये ।
स्वाधिष्ठितप्रपञ्चाय सात्कृतोऽहं हनूमते ॥

1179 26. A. 12.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 20 Fol. 16 × 1¼ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The former owner of the MS.—Āsūri S'aṭhakopācārya.

1180 26. M. 7.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 34 Foll. 15½ × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

1181 27. O. 11.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 21 Foll. 15 × 1¼ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

The owner's name—Āccādīkṣita.

1182 29. A. 9.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 37 Foll. 15½ × 1⅜ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

Date of copying: 3rd day of the bright-fortnight of the Māgha month in the year Viṣu.

The former owner of the MS.—Veṅkayya.

1183 30. I. 18.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 7 Foll. 18 × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

1184 33. B. 11.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 60 Foll. 12 × 1¼ inches. 4 lines in a page. Oriya script. Old. Fair. Good writing.

Wooden boards are added to both sides.

Complete.

1185 33. M. 7.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 31 Foll. 20 × 1½ inches.

9 lines in a page. Grantha script. Old, Injured. Good writing.

Complete.

One extra leaf added in the beginning contains a few lines of the Āgamaparic-cheda of the work in duplicate.

1186 34. N. 19.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 68 Foll. 11½ × 1¼ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

One extra leaf added in the beginning contains the verses of S'āntipāṭha to be recited before commencing the reading of Vedānta works.

1187 27. O. 11.

वेदान्तपरिभाषाव्याख्या वेदान्तशिखामणिः—रामकृष्णाध्वरिकृतः

Palm-leaf. 76 Foll. 15 × 1¼ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

This is a commentary on Dharmarājā-dhvarīndra's Vedāntaparibhāṣā by his son and pupil Rāmakṛṣṇādhvarin. He must have flourished in the beginning of the 18th century A.D. The Commentary is called Vedāntas'ikhāmaṇi. There are two editions of the commentary printed and published in Telugu character by Dharmādhikāri Chakravartiayyangar, Mysore, and in Devanāgari character by the S'rī Venka-tesvara Press, Bombay.

Complete.

Beginning:

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥
नैदाघभानुकिरणेष्विव वारिपूरः
सर्वो विभाति यदबोधवशात्प्रपञ्चः ।
मालाफणीव च निमीलति यत्प्रबोधात्
तद्ब्रह्म नौमि सुखमद्वयमात्मरूपम् ॥
आसेतोरासुमेरोरपि भुवि विदितान्धर्मराजाध्वरीन्द्रान्
वन्देऽहं तर्कचूडामणिमणिजननक्षीरधीस्तातपादान् ।
यत्कारुण्यान्मयाभूदधिगतमधिकं दुर्ग्रहं सूक्ष्मधीकै--
रप्यात्तं शास्त्रजातं जगति मखकृता रामकृष्णाह्वयेन ॥
वेदान्तपरिभाषाख्यां सोऽहं तातविनिर्मिताम् ।
व्याकरोमि कृतिं सर्वश्रुत्यन्तार्थप्रकाशिकाम् ॥
मत्कृतिं च प्रबन्धं च न प्रशंसन्ति पण्डिताः ।
तथापि बुद्धिवैशद्यफलोऽयं मत्परिश्रमः ॥

प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजने निर्दिशन् निर्विघ्न-परिसमाप्तये मङ्गलमाचरितं शिष्यशिक्षायै ग्रन्थतो निब-ध्नाति—यदविद्येति । तं परमात्मानं नौमीति संबन्धः । जीवाभिन्नं ब्रह्म शास्त्रप्रमेयमिति सूचयितुमात्मशब्दः । नन्वेवं तस्यैव तमेव प्रत्युत्कर्षापकर्षाभावेन नमस्कर्तृ-नमस्कार्यतानुपपत्तिरित्याशङ्क्य कल्पितभेदमादा-याविद्याप्रतिबिम्बं कर्तृत्वादिविशिष्टमपकृष्टरूपं नम-स्कर्तृ, तद्व्यावृत्तं सर्वज्ञत्वादिविशिष्टमुत्कृष्टरूपं नम-स्कार्यमित्यभिप्रेत्याह—परमिति ।

End:

नन्वेकाविद्यागतनानाशक्त्यभ्युपगन्तृमतेऽप्येक-मुक्तौ सर्वमुक्तिरेव । इयमावरणशक्तिर्निवर्त्या, नेयमित्यत्र नियामकाभावेन ब्रह्मसाक्षात्कारात् सर्वावरणशक्ति-विशिष्टाविद्याविनाशावश्यंभावादित्याशङ्क्य यथा शुक्तिसाक्षात्कारात्फलबलेनैकावरणशक्तिनाशः, यथा सर्वज्ञानप्रागभावनिवृत्तिस्वरूपयोग्येन ज्ञानेन कस्य-

चिदेव प्रागभावस्य निवृत्तिः, एवमन्यस्य प्रपञ्चोपलम्भानुरोधेन यस्य ब्रह्मज्ञानं तदीयानर्थहेत्वावरणशक्तेरेव नाशः, नान्यदीयसंसारहेत्वावरणशक्तीनामिति व्यवस्थोपपद्यत इत्याह—तस्मादिति । परिच्छेदप्रतिपाद्यमर्थं निगमयति—तदेवमिति ।

प्रमादलिखितं त्यक्तं प्रमादालस्यदोषतः ।
तत्क्षन्तव्यं बुधैः सद्भिः क्षमा हि विदुषां धनम् ॥
सुवर्णखचिताकारा कृतिरेषा मया कृता ।
विदुषामस्तु वेदान्तशिखामणिरलंक्रिया ॥
अनेन मत्प्रबन्धेन वेदान्तार्थावलम्बिना ।
गुरुकारुण्यलब्धेन तारकं ब्रह्म तुष्यतु ॥
वन्देऽहं वन्दनीयानां वन्द्यां वाचामधीश्वरीम् ।
कामिताशेषकल्याणकलनाकल्पवल्लरीम् ।

Colophon :

इति श्रीधर्मराजाध्वरीन्द्रात्मजरामकृष्णाध्वरिविरचिते वेदान्तशिखामणौ अष्टमः परिच्छेदः ।

1188 20. H. 31.

वेदान्तपरिभाषाव्याख्या वेदान्तशिखामणिः—रामकृष्णाध्वरिकृतः

Palm-leaf. 23 Foll. $18\frac{3}{4} \times 2$ inches. 15 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides. Incomplete.

1189 22. L. 38.

वेदान्तपरिभाषाव्याख्या वेदान्तशिखामणिः—रामकृष्णाध्वरिकृतः

Palm-leaf. 26 Foll. $18\frac{1}{2} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

One extra leaf added in the beginning contains a small list of books owned by the owner of this MS.

Date of copying : Sādhāraṇa year.

1190 25. A. 53.

वेदान्तपरिभाषाव्याख्या वेदान्तशिखामणिः—रामकृष्णाध्वरिकृतः

Palm-leaf. 45 Foll. $17\frac{1}{2} \times 2$ inches. 14 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

1191 26. M. 7.

वेदान्तपरिभाषाव्याख्या वेदान्तशिखामणिः—रामकृष्णाध्वरिकृतः

Palm-leaf. 146 Foll. $15\frac{1}{2} \times 1\frac{1}{4}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides. Complete.

1192 38. C. 14.

वेदान्तपरिभाषाव्याख्या प्रकाशिका—पेत्तादीक्षितकृता

Paper. 80 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

This is another commentary on the Vedāntaparibhāṣā of Dharmarājādhvarīndra. The commentary is called Prakāśikā.

The author Pettādīkṣita (or Peddadīkṣita in Telugu) is known to have written the other work called Tattvacintāmaṇi-prakāśasāra (R. No. 3947*b* Madras) wherein he mentions himself as the son of Dharmarājādhvarīndra's brother whose name is mentioned as Trivedi Nārāyaṇādhvarin in Tarkacūḍāmaṇi (Vide No. D. 6217 Tanjore). He must have lived about the beginning of the 18th century A.D. This Pettādīkṣita of Kauṇḍinya-gotra should not be confounded with another Pattādīkṣita, the author of the Chandovicitivṛtti, who belonged to Kauśikagotra. The work was printed and published in the Trivandrum Sanskrit Series No. 93.

Incomplete.

Beginning:

ज्ञानं विशुद्धं परमात्मभूतं स्वयंप्रकाशं जगदेकहेतुम् ।
आनन्दरूपं परमं परेशं वेदान्तवेद्यं तमहं प्रपद्ये ॥
यत्प्रसादप्लवेनैव शास्त्राब्धिमतरं सुखम् ।
तं धर्मराजाध्वरिणं वन्दे सर्वार्थसिद्धये ॥
पेत्तादीक्षितवर्येण परिभाषाप्रकाशिका ।
क्रियते विदुषां प्रीत्यै बालानां मतिदायिनी ॥

अत्र प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजने प्रदर्शयन् निर्विघ्नपरिसमाप्तये इष्टदेवतां नमस्करोति—यदविद्येति । यस्याविद्या यदविद्या । अत्र षष्ठ्यर्थस्तु विवरणाचार्यमते आश्रयाश्रयिभावः । आचार्यवाचस्पतिमते विषयविषयिभावः । अविद्या नाम भावरूपा ज्ञानम् ।

End:

ननु सोऽयमादिपदानां शक्त्या स्वार्थप्रतिपादकत्वमस्तु । न लक्षणया । मुख्यार्थे संभवत्यमुख्यार्थकल्पनाया अन्याय्यत्वादित्याशङ्क्य मुख्यार्थासंभवात् तत्कल्पनमित्याह—अत्र हीति । सोऽयं देवदत्त इत्यत्र तद्देशतत्कालविशिष्टस्य.

Fol. 75*b* reads the following colophon:

इति श्रीमत्त्रिवेदिनारायणदीक्षितात्मजेन पेत्तादीक्षितवर्येण विरचितायां वेदान्तपरिभाषाप्रकाशिकायामनुमानपरिच्छेदः संपूर्णः ।

1193 23. C. 3.

वेदान्तपरिभाषाव्याख्या प्रकाशिका—पेत्तादीक्षितकृता

Palm-leaf. 84 Foll. 13 × 1½ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Incomplete.

1194 8. I. 20.

वेदान्तभूषणम्

Paper. 31 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

A treatise on Advaita Vedānta. The author's name is not known. The work has been quoted in the Vedāntatattvasāra by Vidyendrasarasvatī (D. No. 7575, Tanjore). As the author salutes the deity worshipped at Tiruvayyar in Tanjore Dt. he may be supposed to have been a native of that place.

Incomplete.

Beginning:

यः स्वाज्ञानाद्विश्वयोनिस्तदीयः
सत्यज्ञानानन्दनिर्भेदरूपः ।
यस्मिन्ब्रह्म्यन्तः प्रमाणं समस्तं
तं प्रत्यञ्चं श्रीनृसिंहं नमामः ॥

आमीलिताक्षममलेन्दुकलावतंस-
मात्ताक्षसूत्रवटपुस्तकबोधमुद्रम् ।
आवीतमादिमुनिभिर्विनयावनम्रै
रुद्रं वटद्रुतलवासि महः प्रपद्ये ॥
नमः पञ्चनदेशाय संचिताधाम्बिकात्मने ।
वञ्चिताखिलमोहाय प्रपञ्चोत्पत्तिहेतवे ॥
विधिना श्रुतवेदान्तः श्रुतसर्वमतान्तरः ।
नत्वाहं गुरुविघ्नेशान् कुर्वे वेदान्तभूषणम् ॥

ननु कथं श्रवणविधिः ? श्रोतव्य इत्यादौ तव्यप्रत्ययस्य अर्हार्थतया तरति शोकमात्मवित् इति प्रकरणस्यात्मनः स्तावकत्वेनैकवाक्यत्वसंभवे वाक्यभेदेन विधिपरत्वस्यान्याय्यत्वात् । अन्यथा विष्णुरुपांशु यष्टव्य इत्यादावपि विधित्वमापद्येत ।

End :

नापि स्वाध्यायोऽध्येतव्य इतिवन्नियमविधिः; मुक्तिसाधननिर्विशेषब्रह्मज्ञानस्य वाक्यप्रमाणमात्रजन्यत्वेनाध्ययननियमादृष्टजन्यकृत्वपूर्ववदिह नियमादृष्टजन्यस्य कस्यचिदभावात् । अक्षरावासौ लिखितपाठादिवत् इह नियमव्यावर्त्यस्य पाक्षिकसाधनान्तरस्याप्राप्तत्वात् । विद्या . .

1195 9. F. 22.

वेदान्तसंज्ञाप्रकरणम्

Paper. 23 Foll. 8½ × 6½ inches. 25 lines in a page. Telugu script. Old. injured. Good writing.

This is a short Prakaraṇa work explaining the meaning of the technical terms used in the works on Advaita Vedānta. The author's name is not known.

Complete.

Beginning :

श्रीमद्गुरोः पादयुगं नत्वा तस्य प्रसादतः ।
वेदान्तसंज्ञाः प्रत्येकं निरूप्यन्ते यथामति ॥

अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यत इति वृद्धवचनम् । अध्यारोपो नाम वस्तुन्यवस्त्वारोपः । वस्तु सच्चिदानन्दात्मकं ब्रह्म । अवस्तु अज्ञानादिसकलजडसमुदायस्वरूपमहाप्रपञ्चः । प्रपञ्चद्वयम्, अज्ञानद्वयम्, सूक्ष्मशरीरद्वयम्, स्थूलशरीरद्वयम्, शक्तिद्वयम्, निःश्रेयसद्वयम्, संशयद्वयम्, संभावनाद्वयम्, विपरीतद्वयम्, प्रज्ञाद्वयम् ।

End :

अथ चासङ्गाद्वितीयब्रह्मप्रतिपादकवेदान्तशास्त्रमनुसृत्याध्यारोपवशात् संज्ञाः संभवन्तीति प्रतिपादितम् । संप्रति अपवादो निरूप्यते । अधिष्ठानमात्रपर्यवशेषणमपवादः । तथाच सर्वप्रपञ्चरहितं ब्रह्मास्मीति प्रत्यगभिन्नब्रह्मज्ञानान्मुक्तिरिति सिद्धम् ।

Colophon :

इति वेदान्तसंज्ञाप्रकरणं संपूर्णम् ।

Total number of Granthas in the work is stated as शतचतुष्टयग्रन्थसंख्या (400).

1196 21. G. 6.

वेदान्तसंज्ञाप्रकरणम्

Palm-leaf. 11 Foll. 17½ × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

1197 25. N. 11.

वेदान्तसंज्ञाप्रकरणम

Palm-leaf. 22 Foll. 13½ × 1¼ inches

7 lines in a page. Grantha scripts. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

1198 40. A. 51.

वेदान्तसंज्ञाप्रकरणम्

Paper. 48 Foll. $6\frac{1}{4} \times 4$ inches. 7 lines in a page. Devanāgarī script. Old. Fair. Good writing.

Complete.

1199 20. H. 34.

वेदान्तसारः—सदानन्दसरस्वतीकृतः

Palm-leaf. 11 Foll. $15 \times 1\frac{1}{2}$ inches. 9 lines in a page. Telugu script. Old. Injured. Good writing.

The Vedāntasāra is one of the most popular and authoritative works on Advaita Vedanta. The author Sadānanda-sarasvatī was the pupil of Advayānanda-sarasvatī and a contemporay of Nṛsimh-āśrama in the 16th centary A.D. This author should not be confounded with Sadānanda of Kashmir who wrote the Advaita-Brahmasiddhi in the 18th century A.D.

Complete.

Beginning :

अखण्डसच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धिदम् ॥
अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः ।
गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ।

वेदान्तो नामोपनिषत्प्रमाणम् । तदुपकारीणि शारीरकसूत्रादीनि च । अस्य वेदान्तप्रकरणत्वात् तदीयैरेवानुबन्धैस्तद्वत्तासिद्धेर्न ते पृथगालोचनीयाः । अत्रानुबन्धो नामाधिकारिसंबन्धविषयप्रयोजनानि ।

End :

तदवसाने प्रत्यगानन्दब्रह्मणि प्राणे लीने सति अज्ञानतत्कार्यसंस्काराणामपि विनाशात्परमकैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डब्रह्मैवावतिष्ठते । न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते, विमुक्तश्च विमुच्यत इति श्रुतेः ।

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यसदानन्दकृतौ वेदान्तसारः समाप्तः ।

1200 8. D. 90.

वेदान्तसारः—सदानन्दसरस्वतीकृतः

Paper. 13 Foll. $10 \times 5\frac{1}{2}$ inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Incomplete.

1201 20. I. 8.

वेदान्तसारः—सदानन्दसरस्वतीकृतः

Palm-leaf. 12 Foll. $14\frac{1}{2} \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wants the beginning and end.

1202 29. M. 21.

वेदान्तसारः—सदानन्दसरस्वतीकृतः

Palm-leaf. 10 Foll. 15×1 inches.

8 lines in a page. Telugu script. Old. Injured. Good writing.

Incomplete.

1203 33. C. 1.

वेदान्तसारः—सदानन्दसरस्वतीकृतः

Palm-leaf. 21 Foll. $14\frac{1}{4} \times 1\frac{1}{4}$ inches. 5 lines in a page. Oriya script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Incomplete.

1204 40. D. 40.

वेदान्तसारः—सदानन्दसरस्वतीकृतः

Paper. 76 Foll. $9 \times 4\frac{1}{2}$ inches. 21 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The MS. contains the commentary also copied up and down the text.

Complete.

1205 42. B. 118.

वेदान्तसारः—सदानन्दसरस्वतीकृतः

Paper. 12 Foll. $12\frac{1}{2} \times 3$ inches. 6 lines in a page. Bengali script. Old. Injured. Good writing.

Incomplete.

1206 54. A. 40.

वेदान्तसारव्याख्या ब्रह्मबोधिनी—रामचन्द्रानन्दसरस्वतीकृता

Paper. 70 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is a commentary on Sadānandasarasvatī's Vedāntasāra. The commentary is called Brahmabodhinī. The author Rāmacandrānandasarasvatī was the pupil of Brahmānandasarasvatī. He also salutes Pūrṇānandasarasvatī, Puruṣottamayogin, S'ivarāmasarasvatī, Gopālānandasarasvatī and Svayamprakāsānandasarasvatī. Our author's other work is Bhagavadgītāvyākhyā Padayojanā (D. No. 2068, Madras).

Complete.

Beginning :

नारायणं पद्मभुवं वसिष्ठं
शक्तिं च तत्पुत्रपराशरं च ।
व्यासं शुकं गौडपदं महान्तं
गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥
श्रीशंकराचार्यमथास्य पद्म-
पादं च हस्तामलकं च शिष्यम् ।
तं तोटकं वार्त्तिककारमन्या-
नस्मद्गुरून् संततमानतोऽस्मि ॥
वन्दारुबृन्दमन्दारान् सनन्दनशुकोपमान् ।
चिदानन्दानहं वन्दे पूर्णानन्दसरस्वतीन् ॥
बृन्दारकपदं गत्वा मन्दारकुसुमान्यहो ।
येनानीतानि तं वन्दे पुरुषोत्तमयोगिनम् ॥
यस्मै प्रसन्ना कामाक्षी क्षीरान्नं कृपया ददौ ।
लब्धापदानं तं नौमि शिवरामसरस्वतीन् ॥
सर्वातिशायिने वीतमायिनेऽभीष्टदायिने ।
गोपालानन्दसंज्ञाय कस्मैचिन्महसे नमः ॥
स्वयंप्रकाशकानन्दश्रीपादसुरपादपम् ।
अखण्डानन्दफलदं कृपामूलमुपाश्रये ॥
श्रीनाथाचलपादपद्मयुगलीहेमाब्जनीडाश्रिता-
नाब्रह्माण्डलसद्द्विजागतसुपर्णाच्छादनालंकृतान् ।

नानासत्कलहंसपक्षकलनात्संपोषितास्मद्गुरून्
ब्रह्मानन्दसरस्वतीपरमहांसान् प्रशंसाम्यहम् ॥
अविघ्नं शुभदं भूयाद्भूयो वैनायकं महः ।
गेयं ध्येयममेयं यदवाङ्मनसगोचरम् ॥

अत्रभगवान् ग्रन्थकारो ग्रन्थादौ स्वगतसजातीय-विजातीयभेदरहितसच्चिदानन्दलक्षणब्रह्माभिन्नकूटस्थ-प्रत्यग्रूपसर्वसाक्षिस्वरूपात्मानुस्मरणलक्षणं मङ्गलं करोति—अखण्डमिति ।

अखण्डसच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥

अखण्डम्; अपरिच्छिन्नम् । सच्चिदानन्दम्; सत् सत्यं, चित् ज्ञानम् । सच्चितौ चासावानन्दश्च तम् ।

End :

अस्य जीवन्मुक्तस्य प्राणा नोत्क्रामन्ति लोकान्तरं न यान्ति । अत्रैव ब्रह्मण्येव समवलीयन्ते । यत्र घटो भिद्यते तत्रैव घटाकाशो लीयते । तद्वत् विमुच्यत इति भावः ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यब्रह्मानन्दसरस्वतीशिष्यरामचन्द्रानन्दसरस्वतीविरचिता वेदान्तसारव्याख्या ब्रह्मबोधिन्याख्या संपूर्णा ।

Date of copying of the orginal MS. from which this transcript was made :

वैशाखे शुक्लपक्षे तु दशम्यां भृगुवासरे ।
वेल्लंक्यन्वयसंभूत आचनोपण्डितः स्वयम् ।
लिलेख वेदान्तसारटीकां सर्वगुणान्विताम् ॥

1207 29. M. 21.

वेदान्तसारव्याख्या ब्रह्मबोधिनी—रामचन्द्रानन्दसरस्वतीकृता

Palm-leaf. 45 Foll. 15 × 1 inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

This is the original MS. from which the transcript described in the last number was made.

Complete.

Date of copying :

वैशाखे शुक्लपक्षे तु दशम्यां भृगुवासरे ।
वेल्लंक्यन्वयसंभूत आचनोपण्डितः स्वयम् ।
लिलेख वेदान्तसारटीकां सर्वगुणान्विताम् ॥

1208 41. A. 42.

वेदान्तसारव्याख्या सुबोधिनी—नृसिंहसरस्वतीकृता

Paper. 41 Foll. 12 × 4 inches. 11 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is another commentary on Sadānandasarasvatī's Vedāntasāra. The commentary is called Subodhinī. The author Nṛsiṁhasarasvatī was the pupil of Kṛṣṇānandasarasvatī. It is stated in further No. 1209 that the commentary was composed in Śaka 1510=1588 A.D. and the author was the pupil of Rāmānanda, the pupil of Kṛṣṇānanda.

Complete.

Beginning :

कृष्णानन्दगुरुं नत्वा परमानन्दमद्वयम् ।
वक्ष्ये वेदान्तसारस्य टीकां नाम्ना सुबोधिनीम् ।

इह खलु कश्चिन्महापुरुषः नित्याध्ययनविहितसकलवेदराशीनां चिन्मात्राश्रयतद्रूपाद्वयानन्दविषयानाद्यनिर्वचनीयभावरूपाज्ञानविलसितानन्तभवानुष्ठितकाम्यनिषिद्धवर्जितनित्यनैमित्तिकप्रायश्चित्तोपासना-

कर्मभिः सम्यक्प्रसन्नेश्वराणामिष्टकाचूर्णादिसंघर्षिता-
दर्शतलवदतिनिर्मलाशयानां नलिनीदलगतजलबिन्दु-
वत् हिरण्यगर्भादिस्तम्बपर्यन्तजीवजातं स्वात्मव-
न्मृत्योरास्यान्तर्गतं क्षणभङ्गुरं तापत्रयाग्निसंदह्य-
मानमनिशमनुपश्यतामतिविवेकिनाम् ।

End:

तस्माद्ब्रह्मात्मविज्ञानं दृढं चरमविग्रहे ।
जायते मुक्तिदं ज्ञानं प्रसादादेव मुच्यते ॥

इति ।

नित्यशुद्धपरिपूर्णमद्वयं सच्चिदात्मकमखण्डमद्वयम् ।
सर्वदा सुखमबोधतत्कृतैर्वर्जितं सदहमस्मि तत्परम् ॥
गोवर्धनप्रेरणया विमुक्त-
क्षेत्रे पवित्रे नरसिंहयोगी ।
वेदान्तसारस्य चकार टीकां
सुबोधिनीं विश्वपतेः पुरस्तात् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्कृष्णानन्द-
भगवत्पूज्यपादशिष्यनृसिंहसरस्वतीकृता वेदान्तसार-
टीका सुबोधिनी समाप्ता ।

The scribe adds:

शके १६८८ व्ययनामसंवत्सरे भाद्रपदमासि लोखकेन गोविन्ददशपुत्रेण लिखितेयं टीका । गोविन्ददशपुत्रस्येदं पुस्तकम् ।

1209 40. D. 40.

वेदान्तसारव्याख्या सुबोधिनी—नृसिंहसरस्वती-कृता

Paper. 76 Foll. 9 × 4½ inches. 21 lines in a page. Devanāgari script. Old. Injured. Good writing.

The MS. contains the text also copied in the centre of the pages.

It begins with the verse:

रामानन्दं गुरुं नत्वा परमानन्दमद्वयम् ।

The following verse indicating the date of the work is added at the end:

जाते पञ्चशताधिके दशशते संवत्सराणां पुनः
संजाते दशवत्सरे प्रभुवरश्रीशालिवाहे शके ।
प्राप्ते दुर्मुखवत्सरे शुभशुचौ मासेऽनुमत्यां तिथौ
प्राप्ते भार्गववासरे नरहरिष्टीकां चकारोज्ज्वलाम् ॥

Saka 1510=1588 A.D.

1210 40. D. 43.

वेदान्तसारव्याख्या सुबोधिनी—नृसिंहसरस्वती-कृता

Paper. 56 Foll. 10 × 1¼ inches. 9 lines in a page. Devanagarī script. Old. Injured. Good writing.

Complete.

1211 20. I. 8.

वेदान्तसारसंग्रहः—शिवरामभट्टाचार्यकृतः

Palm-leaf. 3 Foll. 14½ × 1⅛ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

This is a summary of the principles accepted in the school of Advaita Vedānta. The author's name is mentioned as S'ivarāmabhaṭṭācārya.

Complete.

Beginning:

नत्वा हरिहरव्यासभाष्यकारादिदेशिकान् ।
बालबोधाय वेदान्तसारः संगृह्यते स्फुटम् ॥

इह कश्चित्पुरुषधौरेयः कुतश्चिद्भाग्योदयात् तदनुष्ठितनिष्कामकर्मकलापः तत्समाराधितपरमेश्वरानुग्रहात् परिशुद्धान्तःकरणः स्वयमेव नित्यानित्यवस्तु विवेचयति। आत्मा नित्यः परमप्रेमास्पदत्वात्। एषोऽस्य परमानन्दः इति श्रुतेश्चानन्दः। तद्व्यतिरिक्तं जगदनित्यं कृतकत्वात्। यत्कृतकं तदनित्यमिति व्याप्तेः। तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति श्रुतेश्च। अत एव नित्यफलार्थी अनित्यधर्मफलेभ्यो विरक्तो भवति।

End:

निर्विशेषब्रह्मज्ञानं साक्षान्मोक्षहेतुः। सगुणब्रह्मोपासनं त्वर्चिरादिमार्गेण सत्यलोकनिवासहेतुः। तन्निवासश्चावान्तरमुक्तिः। तत्रत्यानां च तल्लोकनिवासिनां हिरण्यगर्भेण सह मुक्तिः परममुक्तिः।

ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे।
परस्यान्ते कृतात्मानः प्रविशान्ति परं पदम्॥

इति स्मृतेः। इति सर्वमनवद्यम्।

हस्तामलकवद्ब्रह्म भासते गुर्वनुग्रहात्।
यस्य तेन बुधेन्द्रेण कृतो वेदान्तसंग्रहः॥
मुमुक्ष्वाकाङ्क्षितो ग्रन्थः शिवरामममनीषिणा।
कृतो वेदान्तसाराख्यस्तेन तुष्यतु शंकरः॥
य इमं ग्रन्थमालोच्य प्रमेयं दधते हृदि।
आविर्भूतं भवेद्ब्रह्म सत्यज्ञानसुखात्मकम्॥

Colophon:

इति शिवरामभट्टाचार्यकृतवेदान्तसारसंग्रहः समाप्तः।

1212 22. P. 4.

वेदान्तसारसंग्रहः—शिवरामभट्टाचार्यकृतः

Palm-leaf. 3 Foll. $10\frac{3}{4} \times 1\frac{1}{4}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

1213 28. N. 32.

वेदान्तसारसंग्रहः—शिवरामभट्टाचार्यकृतः

Palm-leaf. 3 Foll. $16 \times 1\frac{1}{2}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

1214 34. J. 2.

वेदान्तसारसंग्रहः—शिवरामभट्टाचार्यकृतः

Palm-leaf. 3 Foll. $16 \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

1215 34. O. 25.

वेदान्तसारसंग्रहः—शिवरामभट्टाचार्यकृतः

Palm-leaf. 4 Foll. $9\frac{1}{2} \times 1\frac{1}{2}$ inches. 10 ines in a page. Grantha script. Old. Injured. Good writing.

Complete.

1216 28. N. 32.

वेदान्तसारसंग्रहव्याख्या आत्मबोधामृतम्—शिवरामभट्टाचार्यकृतम्

Palm-leaf. 14 Foll. $16 \times 1\frac{1}{2}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

This is a commentary by Sivarāmabhaṭṭācarya on his Vedāntasārasaṁgraha

described in the above numbers. The commentary is called Ātmabodhāmṛta. A complete MS. copy of the work in available in the Madras Govt. Oriental MSS. Library (D. No. 4749, Vol IX.)

Incomplete.

Beginning :

हरिब्रह्ममहेशानव्यासशंकरदेशिकान् ।
नत्वा स्वकृतवेदान्तसारव्याकृतिमारभे ॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय स्वानुष्ठितं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते—नत्वेति । आदिपदेनाचार्यवाचस्पतिमिश्रविवरणाचार्यादयो वेदान्तशास्त्रप्रवर्तकाः स्वगुरवश्च कथ्यन्ते । बालशब्देन ग्रहणधारणपटुः साधनचतुष्टयसंपन्नो विशिष्टाधिकारी विवक्षितः ।

End :

तासां त्रिवृतं तिवृत्तमेकैकं करवाणीत्यत्र त्रिवृत्करणपदं पञ्चीकरणोपलक्षणमिति संप्रदायः, श्रुतिचोदितत्वात् । त्रिवृत्करणमेव युक्तमित्याचार्यवाचस्पतिमिश्राः । एकैकं द्वेधा विभज्येतरदर्धं द्वेधा विभज्येतरयोर्योजयेदित्ययं त्रिवृत्करणप्रकारः । अत्रैवेति देहपाते स्थूलस्वरूपेणावस्थानात् गन्तव्यप्रदेशान्तराभावादित्यर्थः । तत्र प्रमाणमाह—न चास्मेति ।

1217 34. D. 13.

वेदान्तसिद्धान्तकल्पवल्ली सव्याख्या—सदाशिवेन्द्रसरस्वतीकृता

Palm-leaf. 48 Foll. 11½ × 1½ inches 10 lines in a page. Grantha script. Old. Good, Good writing.

Wooden boards are added to both sides.

This is a metricalt reatise on Advaita Vedānta summarising the conclusions as found in Appayadīkṣita's Siddhāntalesasaṁgraha. The work is accompanied by a commentary called Kesarāvalī. The text and commentary were written by Sadāsivendrasarasvatī also called Sadāsivabrahmendra, the pupil of Paramasivendrasarasvatī. The author is known to have written the following other works: Ātmavidyāvilāsa (No. 738 *ante*) Gururatnamālikā, Sivamānasapūjā, Saparyāparyāyastava, Ātmanirvedastava, Yogapañcāsikā, Navamaṇimālā (D. No. 7734, Tanjore) and Brahmasūtravṛtti (No. 505 *ante*). He was a contemporay of the king Sarabhoji or Sarfoji of Tanjore (1711 to 1727 A.D). Therefore he must have belonged to the 18th century A.D. The work is divided into 4 Stabakas dealing with Samanvaya (116 verses), Avirodha (52), Sādhana (28), and Phala (18). The work with commentary was printed and published in the Sri Vani Vilas Press, Srirangam in 1910, with the title Siddhāntakalpavallī.

Complete.

Beginning :

स्वाज्ञानेन विवर्तते त्रिभुवनाकारेण यः सर्वतः
स्वस्मै यः स्वयमेव चोपदिशति स्वं शिष्यगुर्वात्मना ।
स्वज्ञानेन च योऽद्वितीयसुखसद्बोधात्मना शिष्यते
तस्मै विस्मयनीयशक्तिनिधये कस्मैचिदस्मै नमः ॥

सिद्धान्तलेशसंग्रहाख्यग्रन्थे वर्णितानां मतानां सुखेनावधारणार्थं चिकीर्षितस्य सिद्धान्तकल्प-

वल्ल्याख्यग्रन्थस्य निष्प्रत्यूहपरिपूरणाय कृतमिष्टदेवतोपासनालक्षणं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—

अङ्कुरितबोधमुद्रिकमपसव्योरूपरिस्थसव्यपदम्।
वस्त्वेकमनुसरामो वटभूरुहमूलवास्तव्यम् ॥

अङ्कुरिता संजाताङ्कुरा स्फुरन्ती बोधमुद्रिका यस्य तथोक्तम्। अपसव्योरूपरिस्थसव्यपदम्। अपसव्यस्य दक्षिणस्य ऊरोरुपरि तिष्ठतीत्युपरिस्थम्। सव्यं वामं पदं पादं यस्य तथोक्तम्। एतेन वीरासनासीनत्वमुक्तं भवति।

End:

मुक्तस्य सर्वमुक्तिपर्यन्तमीश्वरभावापत्तिरपि बद्धपुरुषान्तरदृष्ट्या। वस्तुतस्तु अस्पृष्टेश्वरत्वादिधर्मनिर्मृष्टनिखिलभेदप्रपञ्चनित्यशुद्धबुद्धमुक्तपरमानन्दाद्वितीयाखण्डैकरसब्रह्मात्मनावस्थानमिति परमसिद्धान्तमाह—

परमार्थतस्तु मुक्तः सर्वेश्वरत्वादिधर्मनिर्मुक्तः।
विगलितसर्वविकल्पो विमलं ब्रह्मैव केवलं भवति ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्परशिवेन्द्रसरस्वतीपादाम्बुजसेवापरायणेन श्रीमत्सदाशिवेन्द्रसरस्वत्या विरचितायां श्रीमद्वेदान्तसिद्धान्तकल्पवल्लीव्याख्यायां केसरावल्ल्याख्यायां चतुर्थः स्तबकः संपूर्णः।

1218 41. C. 92.

वेदान्तसिद्धान्तचन्द्रिका—रामानन्दसरस्वतीकृता

Paper. 6 Foll. 9 × 5 inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is a metrical treatise explaining the essence of Advaita Vedānta. The author Rāmānandasarasvatī was the pupil of Rāmabhadrānandasarasvatī who must be the same as mentioned by Kṛṣṇānandasarasvatī in the Siddhāntasiddhāñjana. The author must have lived in the 17th century A.D. The work was printed and published by Gopala Narayan & Co., Bombay, with the Commentary called Udgāra by Gaṅgādharasarasvatī *alias* Gaṅgādharendrasarasvatī.

Complete in 51 verses.

Beginning:

श्रीरामभद्रसंयमि-
चरणौ शरणं विधाय बोधाय।
सिद्धान्तचन्द्रिकामृत-
सेकैः संबोधयामि चेतः स्वम् ॥ १ ॥
श्रीगुरुकृपाकटाक्षात्
सारं शास्त्रस्य सकलमाकलयन्।
सुकृती कृतीह कश्चि-
च्छ्रुतिसुखमित्थं जगौ मिथः सुहृदे ॥ २ ॥
चित्रमकृत्रिममेकं
ज्योतिर्निहितं गुहास्वसंख्यासु।
तदुपरि किमपि तमिस्रं
त्रैलोक्यमहो विविच्य दर्शयति ॥ ३ ॥
दीपः कोऽपि समिन्धे
स्नेहदशाधारहीनमस्पन्दः।
यस्य किल किमपि कज्जल-
मभवज्जगदण्डमद्भुतपिचण्डम् ॥ ४ ॥

End:

इत्थं श्रुतिशतशिरसा-
मर्थं विदुषां हितं मितं गदितम्।

आकर्ण्य सपदि विगलित-
शोकः स सखा सुखार्णवनिमग्नः ॥ ४९ ॥
इति सुखचिदात्मवस्तुनि
कुतुकादतिमन्दमपि मया गीतम् ।
कलभाषितं शिशोरिव
कलयतु हर्षं सतामभीक्ष्णमिदम् ॥ ५० ॥
श्रीरामयतिमुखेन्दोः
शारदसमये गुरुप्रसादमये ।
सिद्धान्तचन्द्रिकाजनि
संभूय पिबन्तु सहृदयचकोराः ॥ ५१ ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दसरस्वतीतिलकश्रीमद्रामभद्रभगवत्पूज्यपादपादपाथोजपादुकापरिचरणपरायणश्रीमद्रामानन्दसरस्वतीविरचिता सिद्धान्तचन्द्रिका संपूर्णा ॥

1219 30. B. 10.

वेदान्तसिद्धान्तचूडामणिः

Palm-leaf. 45 Foll. 16½ × 1¼ inches 6 lines in a page. Telugu script. Old. Injured. Good writing.

This is a Prakaraṇa work on Advaita Vedānta. As the MS. is very much injured the extracts given from the beginning and end are defective. The author, whose name is missing in the colophon, was the pupil of S'ivarāmānandasarasvatī. The work is not available in print.

Complete with gaps.

Beginning :

निर्माय निखिलविश्वं धर्माधर्मौ च . . . जयति ।
निर्मायः स्वयमात्मा निर्मलबोधः स नीतनवनीतः ॥
लम्बोदरजन . . . . . ।
. . . . मान्नायान्तबोधितानन्दाम् ॥
गुरोस्तत्त्वमनुस्मृत्य शुद्धं वेदान्तवाक्यतः ।
तन्वे वेदान्तसिद्धान्तचूडामणि . . . . . ॥
. . . . . .
वक्तुं कर्तुं प्रभवति यतो धीर्ममैषा प्रवृत्ता ।
प्रत्यक्तत्त्वप्रमितिबलतस्तद्विरुद्धं निरोद्धुं
तत्क्षन्तव्यं प्रकृति . . . . ॥

आत्मानात्मनोरितरेतराध्यासपुरःसरं व्यवहरति । ततो दुःखं सुखाभासलक्षणमनुभवति ।

End :

आम्नायान्तैकनिष्ठेन मनसात्मावधार्यताम् ॥
. . . . . निद्रेयमद्वयात्मनि मोदते ।
जीवेश्वरादिभावानां जनयित्री निरूपिता ॥
नित्यं वेदान्तवाक्येषु समाधाय धियं सदा ।
प्रत्यगेकरसं वस्तु नित्यात्तमवधारय ॥
प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।
इत्यादिविदुषां वाक्यादसौ . . . . ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
इत्यादि भगवद्वाक्यबोध्य आत्मावधार्यताम् ॥
इति वेदान्तसिद्धान्तचूडामणिरयं मुदा ॥

Colophon :

इति शिवरामानन्दपूज्यपादशिष्य . . . . विरचितवेदान्तसिद्धान्तचूडामण्याख्यं प्रकरणं संपूर्णम् ।

1220 35. B. 106.

वेदान्तसिद्धान्तसारसंग्रहः—सदानन्दसरस्वतीकृतः

Paper. 16 Foll. 14 × 7 inches. 21 lines in a page. Devanāgarī script. Old. Injured. Good and clear writing.

This is a metrical summary of the

principles concluded in various works on Advaita-Vedānta. It contains about 1058 verses and seems to be mostly identical with the Sarvavedāntasiddhāntasārasaṁgraha which is generally attributed to S'rī Saṁkarācārya. The colophon of this MS. wrongly mentions the author's name as Advayānanda which must be Sadānanda pupil of Advayānanda as supported by the MSS. described in R. No. 1939(*d*) of the Madras Govt. Oriental MSS. Library and D. No. 366, Vol. III of the Trivandrum Curator's Office Library. This fact is further supported by the last verse of the work (*viz.* श्रीगुरूनद्वयानन्दं etc.) and the verses 2 and 3 found in the beginning which must be undoubtedly Sadānanda's. (Vide the Vedāntasāra). The author mentions the line of his teachers as S'aṁkarānanda, Sadānanda (senior) and Advayānanda. He must be identical with the author of the famous Vedāntasāra.

Complete.

Beginning :

यदालम्बो दरं हन्ति सतां प्रत्यूहसंभवम् ।
तमालम्बे दयालम्बं लम्बोदरपदाम्बुजम् ॥
अखण्डसच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥
अर्थतोऽप्यद्वयानन्दमतीतद्वैतलक्षणम् ।
आत्मारामम्हं वन्दे श्रीगुरुं शिवविग्रहम् ॥
वेदान्तशास्त्रसिद्धान्तसारसंग्रह उच्यते ।
प्रेक्षावतां मुमुक्षूणां सुखबोधोपपत्तये ॥
अस्य शास्त्रानुसारित्वादनुबन्धचतुष्टयम् ।
यदेव मूलशास्त्रस्य वक्तव्यं तदिहोच्यते ॥
अधिकारी च विषयः संबन्धश्च प्रयोजनम् ।
शास्त्रारम्भफलं प्राहुरनुबन्धचतुष्टयम् ॥

End :

इत्युक्त्वा स्वगुरुं नत्वा भूयो भूयः पुनः पुनः ।
कृतार्थोऽस्मीति शिष्योऽसौ सुखं तस्थौ समाहितः ॥
मुक्तं शिष्यं परिज्ञाय गुरुः संतुष्टमानसः ।
वृत्तिं प्रत्यङ्मुखीं कृत्वा रमयामास निर्गुणे ॥
इति वेदान्तशास्त्रस्य तात्पर्यं गुरुशिष्ययोः ।
संवादेन विनिर्णीतं साधूनां मुक्तिसाधनम् ॥
श्रीगुरूनद्वयानन्दं सदानन्दं च तद्गुरुम् ।
तद्गुरुं शंकरानन्दं प्रणमामि पुनः पुनः ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमदद्वयानन्दसरस्वतीकृतो वेदान्तसारः समाप्तः ।

नमः कृष्णाय गुरवे बुद्धितद्वृत्तिसाक्षिणे ।
सच्चिदानन्दरूपाय परस्मै ब्रह्मणे नमः ॥
आध्यात्मिकीं कथां त्यक्त्वा भैक्ष्यचर्यं सुरस्तुतिः ।
अनुग्रहपरिप्रश्नौ वृथा जल्पो न उच्यते ॥

1221 10. E. 10.

वेदान्तसिद्धान्तसूक्तिमञ्जरी—गङ्गाधरेन्द्रसरस्वतीकृता

Paper. 41 Foll. 12 × 6½ inches. 10 lines in a page. Devanāgarī script. Old. Fair. Good writing.

The MS. contains the commentary also.

This is a metrical composition on Advaita Vedānta summarizing the principles explained in the Siddhāntalesa-saṁgraha of Appayadikṣita. The work is divided into four Pariccheda. The first Pariccheda is called Samanvaya and consists of 121 verses, the second is

called Avirodha with 68 verses, the third is called Sādhana with 36 verses and the fourth is called Phala with 25 verses. The author Gaṅgādharendrasarasvatī was the pupil of Rāmacandrasarasvatī and Sarvajñasarasvatī. He is known to have written the following other works: Vedāntasiddhāntacandrikāvyākhyā Udgāra, Svārājyasiddhi, Praṇavakalpa-prakāśa, Vedāntasiddhāntasūktimañjarī-prakāśa and Svārājyasiddhivākhyā Kaivalyakalpadruma. In the last work he gives the date of its composition as S'aka 1748=1826 A.D. The work together with the author's commentary was printed and published by Metropolitan Printing and Publishing House, Calcutta in 1935.

Complete.

Beginning:

तरणिशतसवर्णं कर्णघूर्णद्विरेफा-
वलिवलितकपोलोद्दामदानाभिरामम् ।
गिरिशगिरिसुताभ्यां लालितं नित्यमङ्के
स्वजनभरणशीलं शीलये विघ्नराजम् ॥ १ ॥

श्रीमद्गुरुपदाम्भोजद्वन्द्वमानम्य भक्तितः ।
सिद्धान्तलेशसिद्धान्तान् कारिकाभिर्निदर्शये ॥ २ ॥
अपूर्वो नियमोऽन्यस्य परिसंख्येति च क्रमात् ।
त्रयो हि विधयस्तेषु श्रोतव्य इति को विधिः ॥ ३ ॥
तत्रोपायापरिज्ञानादलौकिकसमीक्षणे ।
प्रकटार्थकृतः प्राहुरपूर्वं श्रवणे विधिम् ॥ ४ ॥
विचारस्य विचार्यार्थनिर्णयं प्रति हेतुता ।
अपरोक्षप्रमाणस्य तत्साक्षात्कारहेतुता ॥ ५ ॥

End:

जीवेशभेदसत्यत्वेऽप्येतत्सर्वमसंगतम् ।
न च शक्त्यन्तरं जीवे प्रमाणफलवर्जनात् ॥
आसर्वमुक्ति परिकल्पितसत्यकाम-
संकल्पकल्पितजगत्स्थितिभङ्गसर्गम् ।
सत्यं स्वतस्तु सुखचिद्घनमद्वितीये
मुक्तोपसृप्यमहमस्मि विशुद्धतत्त्वम् ॥
श्रुतिकल्पलताकुञ्जसंजाता सूक्तिमञ्जरी ।
रम्या राद्धान्तरत्नाढ्या रञ्जयत्वखिलान् बुधान् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्रामचन्द्रेन्द्रसरस्वतीपूज्यपादशिष्यगङ्गाधरेन्द्रसरस्वत्याख्यभिक्षुणा विरचिता वेदान्तसिद्धान्तसूक्तिमञ्जरी संपूर्णा॥

1222 10. E. 10.

वेदान्तसिद्धान्तसूक्तिमञ्जरीव्याख्या प्रकाशः—गङ्गाधरेन्द्रसरस्वतीकृतः

Paper. 41 Foll. 12 × 6½ inches. 10 lines in a page. Devanāgarī script. Old. Fair. Good writing.

This is a commentary by Gaṅgādharendrasarasvatī on his Vedāntasiddhāntasūktimañjarī, described in the last number. The commentary is called Prakāsa. The author Gaṅgādharendrasarasvatī was the pupil of Rāmacandrasarasvatī and Sarvajñasarasvatī. For his other works, date etc. vide the remarks on the text described in the last number.

Complete.

Beginning:

तारानाथकलाधरस्त्रिजगतां नाथस्त्रयीविग्रहः
कारुण्यैकनिधिर्विधीन्द्रसुमुखैर्देवर्षिसिद्धैर्नुतः ।
वामाङ्कस्थितशैलजाङ्कमहितं विघ्नाधिपे लालयन्
सानन्दःशुभदःसदास्तु भगवान्प्रारिप्सितेऽस्मिञ्शिवः

वितततरदुरवगाहवेदान्तशास्त्रार्णवप्रवेशेन बहुविधसिद्धान्तसंकलनासमर्थानां गुरुतरोपायप्रयत्नालसानामनायासेन सर्वसिद्धान्तपरिज्ञानलालसानां मुमुक्षुविशेषाणामुपकाराय वेदान्तसिद्धान्तसूक्तिमञ्जरीं प्रारिप्समानः प्रत्यूहव्यूहप्रशमनाय प्रथमं साम्बशिवस्पृहणीयगुणकदम्बं हेरम्बमनुसंधत्ते—तरणिशतसवर्णमिति। श्रेयांसि बहुविघ्नानीति प्रवादात् परमश्रेयःसाधने ग्रन्थे विघ्नबाहुल्यं संभाव्य सर्वविघ्ननिबर्हणक्षमश्रीगुरुनमस्कारलक्षणं मङ्गलान्तरमाचरन् चिकीर्षितं प्रतिजानीते—श्रीमदिति।

End:

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्त इति पतञ्जलिस्मृतेः ग्रन्थान्ते मङ्गलार्थमनुसंधत्ते—आसर्वेति। कीर्तिप्रचयगमनादिसिद्धये ग्रन्थस्य विशिष्टमूलगुणनामधेयानि दर्शयन् आशीर्वचनलक्षणं मङ्गलान्तरमाचरति—श्रुतिकल्पलतेति।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रसरस्वतीपूज्यपादाशिष्येण श्रीसर्वज्ञसरस्वतीपूज्यपादशिष्येण गङ्गाधरसरस्वत्याख्ययतिना विरचिते वेदान्तसिद्धान्तसूक्तिमञ्जरीप्रकाशे चतुर्थः परिच्छेदः। ग्रन्थश्च संपूर्णः।

1223 8. F. 54.

वेदान्तसिद्धान्तादर्शः—मोहनलालकृतः

Paper. 21 Foll. 8¼ × 1½ inches. 18 lines in a page. Telugu script. Old. Injured. Illegible writing.

A very recent work on Advaita-Vedānta written in Anuṣṭubh verses. The author Mohanalāla was the pupil of Mukundadāsa and Rāmamiśrasāstrin of Benares. The work contains four Pariccheḍas—1. Saṁjñā, 2. Utpattipralaya, 3. Yauktika and 4. Matabheda. The work was printed and pubblished at Benares in Saṁ. 1943.

Wants beginning in the 1st Pariccheda and goes on upto the end of the 4th Pariccheda.

Beginning:

. . . . . ।
. . . . . संशयादित्रिधा मतम् ॥
संशयस्यात्मनश्चाथ विपरीता च भावना।
तथा संभावनैतत्स्यात् त्रयं तत्प्रतिबन्धकम् ॥
श्रुत्वा मत्वा निदिध्यास्य स्वात्मानं तन्निवर्तयेत्।
श्रवणादित्रयं ह्येतत्कीर्तितं बोधसाधनम् ॥
अनिष्पन्नात्मबोधानां प्रपञ्चो निखिलोऽप्ययम्।
स्वात्मातिरेकतः सत्यो विभात्यज्ञानतोऽनिशम् ॥

End:

मया स्वानुभवाच्चैष वर्णितोऽर्थः सविस्तरम्।
ग्रन्थे स्वानुभवोद्रेके पक्षपातावलम्बिना ॥
सर्वांश्च क्रोधकामादीन् त्यक्त्वैकाग्रेण चेतसा।
ध्येयो नारायणः पुंभिः सच्चिदानन्दविग्रहः ॥
एतावज्जन्मसाफल्यमेतावान् दुःखसंक्षयः।
एतावान् सर्ववेदान्तसिद्धान्तादर्श ईरितः ॥

Colophon:

इति श्रीमन्मुकुन्ददासशिष्येण श्रीमद्रामामिश्रशास्त्रिणां कृपापात्रेण मोहनलालवेदाचार्येण निर्मितो वेदान्तसिद्धान्तादर्शः समाप्तः।

तिरुमलरामेण लिखितः।

1224 19. G. 6.

व्यासतात्पर्यनिर्णयः

Palm-leaf. 15 Foll. 17 × 1½ inches.

8 lines in a page. Telugu script. Old. Injured. Illegible writing.

This is a Prakaraṇa work on Advaita-Vedānta briefly setting out the purport of the Brahmasūtras of Vyāsa *alias* Bādarāyaṇa according to the view of S'rī Saṁkarācāya. A complete MS. of the work is available in the Madras Govt. Oriental MSS. Library (D. No. 15276) and it mentions the author as Ayyaṇasūri, the son of Veṅkaṭakavi, who wrote Rādhāmādhavasaṁvāda and some other works and younger brother of Narahari who wrote the Sudantākalyāṇa. The work is divided into 2 Paricchedas. The work was printed and published in the Sri Vani Vilas Press, S'rirangam.

Contains Paricchedas 1 and 2 wanting the introductory verses in the 1st Paricheda and the Colophon of the 2nd Paricheda.

Beginning :

इह खलु भगवान्नारायणः परमकारुणिकः सकललोकानुग्रहाय व्यासरूपेणावतीर्णः परस्परविरुद्धार्थतया प्रतीयमानवेदान्तवाक्यार्थावबोधासमर्थानां मन्दमतीनां सकलोपनिषन्महातात्पर्यनिर्णयद्वारा परमपुरुषार्थसाधनभूतपरतत्त्वावधारणाय तत्सूचकानि अथातो ब्रह्मजिज्ञासेत्यादीनि अनावृत्तिः शब्दादित्यन्तानि प्रणिनाय ।

End :

व्यासतात्पर्यनिर्णीतिपूर्णचन्द्रप्रभामिमाम् ।
समास्वाद्याभिनन्दन्तु सन्मनीषिचकोरकाः ॥
बादरायणसिद्धान्तकेवलाद्वैतडिण्डिमः ।
उद्घोष्यतां विपश्चिद्भिर्द्वैद्वैदी भेदवादिनाम् ॥

1225 9. B. 27.

व्यासपुत्राष्टकम्

Paper. 2 Foll. $8\frac{1}{2} \times 6\frac{1}{2}$ inches. 22 lines in a page. Telugu script. Old. Injured. Good writing.

Eight verses on greatness of Jivanmuktas according to the view of the school of Advaita Vedānta. The work is also called S'ukāṣṭaka as found in the Telugu printed edition of the work. The author's name is not known.

Complete.

Beginning :

भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे
मायामोहौ क्षयमधिगतौ नष्टसंदेहवृत्ती ।
शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः ॥

End :

सत्यं सत्यं परममृते शान्तकल्याणरूपं
मायारण्ये दहनमनलं शान्तिनिर्वाणदीपम् ।
तेजोरूपं निगमसदनं व्यासपुत्राष्टकं यः
प्रातः काले पठति सुमनाः को विधिः को निषेधः ॥

Then adds the following extra verse :

जपो जल्पः शिल्पः सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः ।
प्रणामः संवेशः सुरवमखिलमात्मार्पणविधिः
सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ॥

1226 9. F. 9.

व्यासपुत्राष्टकम्

Paper. 2 Foll. $9\frac{1}{2} \times 6\frac{3}{4}$ inches. 17

lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

1227 9. F. 84.

व्यासपुत्राष्टकम्

Paper. 2 Foll. $10\frac{1}{4} \times 8$ inches. 11 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

The work is mentioned here with the title S'ukāṣṭaka.

1228 19. P. 2.

व्यासपुत्राष्टकम्

Palm-leaf. 1 Foll. 7×2 inches. 13 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

1229 20. H. 25.

व्यासपुत्राष्टकम्

Palm-leaf. 2 Foll. $12 \times \frac{3}{4}$ inches. 4 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

Reads the following colophon:

शुकाष्टकं संपूर्णम् ।

1230 24. F. 11.

व्यासपुत्राष्टकम्

Palm-leaf. 2 Foll. 8×1 inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

1231 28. C. 22.

व्यासपुत्राष्टकम्

Palm-leaf. 2 Foll. $8 \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The title is mentioned here as S'ukāṣṭaka.

1232 28. M. 51.

व्यासपुत्राष्टकम्

Palm-leaf. 3 Foll. $11\frac{1}{4} \times 1$ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

The title is mentioned here as S'ukāṣṭaka.

1233 30. D. 21.

व्यासपुत्राष्टकम्

Palm-leaf. 2 Foll. $14\frac{3}{4} \times 1$ inches. 4 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

1234 30. O. 23.

व्यासपुत्राष्टकम्

Palm-leaf. 2 Foll. $8\frac{3}{4} \times 1\frac{1}{2}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The colophon mentions the title as S'ukāṣṭakam.

1235 34. O. 25.

व्यासपुत्राष्टकम्

Palm-leaf. 2 Foll. 9½ × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The colophon mentions the title as S'ukāṣṭaka.

1236 24. E. 23.

शतश्लोकी—शंकराचार्यकृता

Palm-leaf. 63 Foll. 17½ × 1½ inches. 6 lines in a page. Telugu script. Old. Fair. Illegible writing.

The MS. contains the commentary also.

One hundred verses explaining the principles of Advaita Vedānta. The work is attributed to the famous S'ri S'aṁkarācārya. The work together with Ānandagiri's commentary was printed and published in the Mysore Govt. Oriental Library Series No. 19 in 1898. The work is also called Vedāntas'atas'lokī.

Breaks off in the 88th verse.

Beginning :

दृष्टान्तो नैव दृष्टस्त्रिभुवनजठरे सद्गुरोर्ज्ञानदातुः
स्पर्शश्चेत्तत्र कल्प्यः स नयति यदहो स्वर्णतामश्मसारम्।
न स्पर्शत्वं तथापि श्रितचरणयुगे सद्गुरुः स्वीयशिष्ये
स्वीयं साम्यं विधत्ते भवति निरुपमस्तेन वालौकिकोऽपि॥

End :

प्राणेनाम्भांसि भूयः पिबति पुनरसावन्नमश्नाति तत्त
त्तत्पाकं जाठरोऽग्निस्तदुपहितबलो द्राक् शनैर्वा करोति।
व्यानः सर्वाङ्गनाडीष्वथ नयति रसं प्राणसंतर्पणार्थं
निःसारं पूतिगन्धं त्यजति बहिरयं देहतोऽपानसंज्ञः॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छंकराचार्यकृता वेदान्तशतश्लोकी समाप्ता।

The scribe adds :

नगरे मङ्गलनाम्नि स्थितविदुषा तरणिरुचिसदृशः।
शिवरामनाममणेः सुतलिखिताष्टदशाष्टशतश्लोकी॥

प्रमोदूते सहस्येति मासे कृष्णाख्यद्वादशे अह्नि घण्टात्रिके काले ग्रन्थः पारमजीगमत्।

1237 24. E. 23.

शतश्लोकीव्याख्या—आनन्दज्ञानकृता

Palm-leaf. 63 Foll. 17½ × 1½ inches. 6 lines in a page. Telugu script. Old. Fair. Illegible writing.

Wooden boards are added to both sides.

The MS. contains the text also.

This is a commentary by Āṇandajñāna or Ānandagīri on Srī Saṁkarācārya's Satas'lokī described in the last number. The commentary was printed and published in the Mysore Govt. Oriental Library Series No. 19 in 1898.

Breaks off in the 88th verse.

Beginning :

दृष्टान्त इति। ज्ञानदातुः सद्गुरोः त्रिभुवनजठरे दृष्टान्तो नैव दृष्टः। क्षुद्रविद्योपदेष्टृणां गुरूणां दृष्टान्तः कथंचिदुपलभ्येत। परं तु न हि ज्ञानेन सदृशं पवित्रमिह विद्यते इत्युक्तत्वात् ज्ञानदातुः श्रीगुरोः दृष्टान्तः त्रिभुवनजठरान्तर्वर्तिषु देवादिलोकेषु नानाविचित्रवस्तुषु नैव दृष्टः। अथ मनाक्

साम्यस्पर्शनेन स्पर्शः पाषाणः दृष्टान्तत्वेन कल्प्यः कल्पनीयश्चेत् तथापि न घटत इत्याह—स नयतीति।

End:

तस्य सवितुः देवस्य आत्मभूतं संसारक्लेशमूलभर्जकं भर्गः तेजः परं ज्योतिः धीमहि ध्यायेमहि। किंभूतः? रजसः परः। अत्र रजस इति चतुर्थ्या पञ्चम्यर्थोऽवगम्यते। असौ अदः व्यक्ताव्यक्तस्वरूपात् रजसो लोकात्परः। रजांसि लोका इति यास्कः। ओमित्याद्यङ्गिनि प्रणवगम्या.

1238 8. G. 39.

शान्तिपाठः

Paper. 2 Foll. 6 × 4½ inches. 16 lines in a page. Telugu script. Old. Fair Good writing.

Gives some Vedic and other passages to be recited just before commencing the study of Brahmasūtrabhāṣya, Gītābhāṣya and Upaniṣadbhāṣya of S'rī S'aṁkarācāryā.

Complete.

Beginning:

शिवनामनि भावितेऽन्तरङ्गे
महति ज्योतिषि मानिनीमयार्धे।
दुरितान्यपयान्ति दूरदूरे
मुहुरायान्ति महान्ति मङ्गलानि॥
स्मृते सकलकल्याणभाजनं यत्र जायते।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम्॥

शं नो मित्रः शं वरुणः। शान्तिः। सह नाववतु। शान्तिः। यश्छन्दसामृषभो विश्वरूपः। श्रुतं मे गोपाय। शान्तिः। अहं वृक्षस्य रेरिवा। वेदानुवचनम्। शान्तिः।

End:

ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ॥

वन्दनानि। ओं तत्सत्।

1239 9. F. 65.

शान्तिपाठः

Paper. 3 Foll. 18½ × 7 inches. 14 lines in a page. Telugu script. Old. Much injured. Clear writing.

Similar to the above.

Beginning:

वाङ् मे मनसि प्रतिष्ठिता। मनो मे वाचि प्रतिष्ठितम्। माविरासीर्म एधि।

End:

स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः।

एवं निरन्तरकृता ब्रह्मैवास्मीति भावना।
हरत्यविद्याविक्षेपान् रोगानिव रसायनम्॥
अनात्मवद्धि शैथिल्यफलं ध्यानादिने दिने।
पश्यन्नपि न च ध्यायेत्कोऽपरोऽस्मात्पशुर्भवेत्॥

1240 21. G. 6.

शास्त्रारम्भसमर्थनम्—त्र्यम्बकभट्टकृतम्

Palm-leaf. 8 Foll. 18 × 1⅛ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

The work attempts to prove the need and importance of the Brahmasutras according the Advaitic view of S'rī S'aṁkarācāya. The author Tryambakabhatta was the pupil of the famous Brahmānandasarasvatī (17 century A.D.). His other works

are Advaitasiddhāntavidyotana, S'rutimatoddyota, S'rutimatānumānopapatti and Tattvasaṁkyānakhaṇḍana (No. 837 of this Vol.)

The work is called Laghu-S'āstrārambhasamarthana in the colophon.

Complete.

Beginning :

पूर्णानन्दस्वप्रकाशसर्वाधिष्ठानमूर्तये ।
निर्दोषागमवेद्याय साक्षिणे ब्रह्मणे नमः ॥

ननु स्वप्रकाशस्यात्मनो नागमवेद्यत्वं संभवति, प्रमाणान्तरवेद्य इव स्वप्रकाशेऽपि वस्तुन्यागमतात्पर्यायोगात् । प्रमाणान्तरविषये हि संदिग्धत्वाभावात् नागमस्य तात्पर्यम् । तच्च स्वप्रकाशेऽपि तुल्यम् । तथाच सिद्धत्वात् प्रत्यगभिन्नब्रह्मण्येव वेदान्तानां तात्पर्यनिर्णायकन्यायग्रन्थनात्मकं ब्रह्ममीमांसाशास्त्रमनारम्भणीयम् । न च ब्रह्मणः स्वप्रकाशत्वेऽपि तस्य प्रत्यगात्माभिन्नत्वं संदिग्धमेवेति तस्य विषयत्वं संभवत्येवेति वाच्यम्, ऐक्यस्यापि ब्रह्मातिरिक्तत्वे सत्यत्वे चाद्वैतहानेः ।

End :

तस्मात्प्रमाणविरोधविधुरमागमगम्यमात्माद्वैतं विषयः । तत्प्रतिपत्त्यधीननिःशेषाविद्यानिवृत्तौ परमानन्दाविर्भावलक्षणमोक्षाख्यं फलं, तत्कामश्चाधिकारीत्यनुबन्धजातस्य निरपवादतया ब्रह्ममीमांसाशास्त्रमारम्भणीयमिति सिद्धम् ।

Colophon :

इति श्रीशंकरभगवत्पादपूज्यचरणानुग्रहलब्धब्रह्मवैशद्येन श्रीमद्ब्रह्मानन्दसरस्वतीसारस्वतसाम्राज्यानुभवसमेधमानयुक्तिशतशतधारोत्सारितविपक्षदुरुक्तिनिचयेन भट्टत्र्यम्बकेन स्फुटीकृतं लघुशास्त्रारम्भसमर्थनं संपूर्णम् ।

1241 20. F. 44.

श्रीभाष्यदूषणम्—स्वामिशास्त्रिकृतम्

Palm-leaf. 4 Foll. $14\frac{1}{2} \times 1\frac{1}{8}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

This is a small metrical treatise on Advaita-Vedānta attempting to criticize the interpretation of S'rī Rāmānuja on the Brahmasūtras in his S'ri-Bhāṣya. The author Svāmis'āstrin was the son of Nīlakaṇṭhādhvarin and grandson of Tyāgarājādhvarin in the family of the famous Appayadīkṣita.

Incomplete containing the verses 1 to 31 only.

Beginning :

निरवधिगुणनिधिमीडे नियमितनिखिलप्रपञ्चमनवद्यम् ।
निष्टप्तकनकवर्णं निरतिशयानन्दमादिमं सोमम् ॥
यन्नानाग्रन्थवीक्षाकुतुकभरजुषः संततं सर्वधीरा
यत्कीर्तिर्भाति काष्ठागजपतिवनितोद्गाढबद्धात्मसख्या ।
यच्चेतः सर्वदोमाधवपदनलिनद्वन्द्वनित्यानुषक्तं
वन्दे वंशावतंसं विमतविदलनोद्युक्तमप्पाध्वरीन्द्रम् ॥
यद्वाग्गुम्भस्तवन्ती निखिलजनमनःपङ्कमुन्मूलयन्ती
यद्दृष्टिः प्रेमपूर्वा विमलमतियशःप्राभवाद्यर्पयन्ती ।
यत्पादाम्भोजयुग्मं प्रणतसकलभूदेवमूर्धैकरत्नं
हंसोत्तंसच्छलेन क्षितिकृतवसतिं भारतीं भावयेऽहम् ॥
श्रीमानप्पय्यनामा सकलपरिवृढो यज्वनां सार्वभौमो
विख्यातः शंकरात्मा चतुरधिकशतग्रन्थकर्ताविरासीत् ।
तद्वंश्यस्यागराजाध्वरिवरतनयो नीलकण्ठाध्वरीन्द्रस्तत्सूनुःस्वामिशास्त्री विरचयति कृतिं कामपीशस्यतुष्यै
कृष्णद्वैपायनेनापरिमितविमलज्ञानरत्नाकरेण
श्रीमच्छारीरकाख्यं व्यरचि भगवता शास्त्रमद्वैतसारम् ।

तत्तात्पर्यानभिज्ञो निजमतिमनुरुन्धान एव व्यतानी-
द्भाष्यं रामानुजार्यस्तदिह तदुदिते दूषणान्युल्लसन्ति ॥
पूर्वैरद्वैतविद्यागुरुभिरमितधीसागरैरुद्धृतानि
ग्रन्थाद्रामानुजीयात्परिहृतिरहितान्यञ्जसा दूषणानि ।
संगृह्याचार्यवर्यादधिगतविमलज्ञानविद्यो विपश्चि-
त्पद्यैर्ग्रथ्नाति कैश्चित्स्वमतिविकसनायैव विद्वन्मुदेऽपि ॥
निर्दोषे निर्विकारे भगवति चिदचिद्देहभाजि स्वदेह-
द्वारोपादानभाव:सुवचइतिवचस्तुच्छतामृच्छतिद्राक् ।
संसृष्टस्यापि दुष्टैरघमिव चिदचिद्विग्रहैः सद्विकारैः
सद्दोषैर्नित्ययुक्ते भगवति सुदृढः स्यात्तदा हेयसङ्गः ॥

End:

प्रत्याख्येयश्च सङ्गः कत . . हतु संयोगमुख्या न वाच्याः
संयोगस्यैव सत्त्वादवयविनि हरौ स्वामितादेश्च सत्त्वात् ।
रूपव्यक्त्योरिवात्रायुतगतिभवनाद्दुस्त्यजो नित्ययोगः
प्रत्याख्यातुं न युक्ता विषयविषयिता सर्ववित्त्वस्य बाधात्
शब्दानां कार्युयुक्ते न भवति विषमा किंतु लोकप्रसिद्धे
शक्तिर्वाच्येति पूर्वाधिकरण उदितं तद्विरुद्धं चरेति ।
सूत्रे कुम्भादिशब्दा अपि दधति हरौ शक्तिमित्युक्तियुक्तं
वाच्यत्वे श्रुत्यनिष्टंपुनरपिभवता स्वीकृतं तद्विरोधः ॥

1242 28. A. 79.

श्रुतितात्पर्यनिर्णयः

Palm-leaf. 14 Foll. 20½ × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves bear the serial numbers 14 to 27.

The S'rutitātparyanirṇaya attempts to prove that the vedic passages support only the view of the school of Advaita Vedānta. The author's name is not known. The work should not be confounded with another S'rutitātparyanirṇaya which supports the Viśiṣṭādvaitic view of the Vedānta and condemns the S'ivakarṇāmṛta of Appayadīkṣita. (Vide D. No. 15383 of the Madras Govt. Oriental MSS. Library.)

Incomplete.

Beginning:

श्रीदेशिकेशाममलं नत्वा शिष्यमुदावहम् ।
तात्पर्यनिर्णयं वक्ष्ये श्रुतेः षड्विधलिङ्गतः ॥
उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

उपक्रमो नाम सदेव सोम्येदमग्र आसीत् एक-
मेवाद्वितीयमिति छान्दोग्ये षष्ठाध्याये द्वितीयखण्डा-
दावुक्तः । उपसंहारश्च तत्रैव तत्खण्डान्ते ऐतदात्म्य-
मिदं सर्वं तत्सत्यं स आत्मेत्युक्तः । अभ्यासोऽपि
तत्त्वमसि तत्त्वमसीति नवकृत्वो व्यपदेशः । अपूर्वता
नामाद्वितीयप्रत्यगात्मन इतरप्रमाणागम्यत्वेनोपनिषदे-
कवेद्यत्वम् । तदपि तं त्वौपनिषदं पुरुषं पृच्छामीति
वेदैरनेकैरहमेव वेद्य इति श्रुतम् । फलं च आचार्य-
वान् पुरुषो वेद । तस्य तावदेव चिरं यावन्न विमोक्ष्ये
इति तत्रैव श्रुतम् । अर्थवादश्च येनाश्रुतं श्रुतं भवति
अमतं मतमविज्ञातं विज्ञातमिति । तत्तेजोऽसृजत ।
अनेन जीवेनात्मनानुप्रविश्येत्यादि श्रुतः । उपप-
त्तिश्च वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव
सत्यम्, लोहमित्येव सत्यम्, कृष्णायसमित्येव सत्य-
मित्युक्त्वोपक्रमोपसंहारयोरेकलिङ्गत्वमितरेषां तु भिन्न-
तया लिङ्गत्वमित्येतत् षड्विधं लिङ्गम् । तेन
प्रत्यगात्मरूपब्रह्मण्येव श्रुतीनां तात्पर्यमिति द्रष्टव्यम् ।
एवं प्रतिश्रुति यथायोग्यं द्रष्टव्यम् ।

End:

न हि निरवयवस्याकाशस्य कस्मिंश्चित्कर्मण्यधि-
कारो दृश्यते । तस्मादपि सूक्ष्मोऽहं सर्वान्तरो

दृग्रूपः केनापि संबन्धरहित इति जानतोऽकर्मापादयितुं शक्यते। तस्मात् यस्त्वेवं षड्विधलिङ्गैः श्रुतितात्पर्यसूचकमिदं प्रकरणं मत्सरादिरहितः सन् सुविचार्यावधारयति स तु ब्रह्मैवेति श्रुतेरभिप्रायो महतामपीति सर्वमतिमङ्गलम्।

1243 19. P. 2.

श्रुतिसारसमुद्धरणम्—तोटकाचार्यकृतम्

Palm-leaf. 11 Foll. 7 × 1¾ inches. 16 lines in a page. Grantha script. Old. Injured. Good writing.

This is a metrical exposition of the truth of Advaita Vedānta according to the view of S'rī S'aṁkarācārya's school. The author whose real name was Giri, was also called Toṭakācārya as the verses of his work were written in Toṭaka metre. It contains 178 verses in all. The work was printed and published in the Ānandāśrama Sanskrit Series, Poona and the Sri Vani Vilas Press, Srirangam with the commentary. It is understood that the author wrote another work called S'aṁkara-deśikāṣṭaka.

Complete.

Beginning:

तं वन्दे मुनिवर्यं तोटकवृत्तं चकार यः कृपया।
प्रकरणमध्यात्मपरं प्रकटितपरमात्मतत्त्वमभ्यसताम्॥
त्रैलोक्यनाथहरिमीड्यमुदारसत्त्वं
शक्तेस्तनूजतनयं परमेष्ठिकल्पम्।
जीमूतमुक्तविमलाम्बरचारुवर्णं
वासिष्ठमुग्रतपसं प्रणतोऽस्मि नित्यम्॥ १॥
सकलं मनसा क्रियया जनितं
समवेक्ष्य विनाशितया तु जगत्।
निरविद्यत कश्चिदतो निखिला-
दविनाशि कृतेन न लभ्यमिति॥ २॥
प्रतिपित्सुरसावविनाशि पदं
यतिधर्मरतो यतिमेव गुरुम्।
विदितात्मसतत्त्वमुपेत्य कविं
प्रणिपत्य निवेदितवान् स्वमतम्॥ ३॥

End:

येषां धीसूर्यदीत्या प्रतिहतमगमन्नाशमेकान्ततो मे
ध्वान्तं ध्वान्तस्य हेतुर्जननमरणसंतानदोलाधिरूढेः।
येषां पादौ प्रपन्नाः श्रुतिशमविनयैर्भूषिताः शिष्यसंघाः
सद्यो मुक्तौ स्थितास्तान्यतिवरमहितान्यावदायुर्नमामि॥
भूः पादौ यस्य रवं चोदरमसुरनिलश्चन्द्रसूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः
अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यै-
श्चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि॥

Colophon:

इति तोटकाचार्यकृतं तोटकवृत्तं समाप्तम्।

1244 33. E. 3.

श्रुतिसारसमुद्धरणम्

Palm-leaf. 8 Foll. 14½ × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 87th verse.

1245 34. B. 10.

श्रुतिसारसमुद्धरणव्याख्या तत्त्वदीपिका—सच्चिदानन्दयोगिकृता

Palm-leaf. 40 Foll. 16 × 1½ inches. 10 lines in a page. Grantha script. Old. Fair. Good writing.

This is a commentary on the S'rutisārasamuddharaṇa *alias* Toṭakaslokas of Toṭakācārya. The commentary is called Tattvadīpikā. The commentator Saccidānandayogin was the pupil of Pūrṇātmayogin. The commentary printed and published in the Ānandasrama Sanskrit Series and S'rī Vaṇi Vilas Series, is different. Its author Saccidānandayogin was the pupil of Pūjyapādayogin.

Complete.

Beginning:

तं वन्दे मुनिवर्यं तोटकवृत्तं चकार यः कृपया ।
प्रकरणमध्यात्मपरं प्रकटितपरमार्थतत्त्वमभ्यसताम् ॥
श्रीमत्पूर्णात्मकृष्णस्य पादपङ्कजपादुकाम् ।
प्रणम्य रचये व्याख्यां तोटकश्लोकगामिनीम् ॥

इह खलु निखिलोपनिषत्सारभूतं श्रुतिसारसमुद्धरणाख्यं प्रकरणमारभमाणस्तस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपलिपालनाय च विशिष्टेष्टदेवताप्रणतिलक्षणं मङ्गलं प्रतिपादयन् अस्य प्रकरणस्य शारीरकभाष्यार्थसंग्रहत्वेन तत्प्रकरणत्वात् तदीयमेव विषयप्रयोजनादिकं सूचयति—त्रैलोक्यनाथेत्यादि । अत्र त्रैलोक्यमित्याकाशादिः प्रपञ्चो लक्ष्यते । तस्य त्रैलोक्यस्याकाशादिप्रपञ्चस्य नाथः कारणम् । स्वाज्ञानप्रतिबिम्बितकूटस्थपरमात्मा त्रैलोक्यस्य कारकत्वात् नियन्तृत्वाच्च त्रैलोक्यनाथ इत्युच्यते । स चासौ हरिश्चेति कर्मधारयः । तं त्रैलोक्यनाथं हरिं प्रणतोऽस्मि ।

End:

कीदृग्विशिष्टमित्याकाङ्क्षायां विशिनष्टि—भूः पादावित्यादिना । पद्भ्यां भूमिरिति श्रुतेः यस्य विष्णोः पादौ भूः । यस्योदरं खमाकाशम् । असुनिलय इत्याकाशविशेषणम् । चकारात् यस्य प्राणो वायुः । यस्य नेत्रे चन्द्रसूर्यौ । यस्य कर्णौ दिशः । यस्म शिरो द्यौः । यस्य मुखमपि दहनः । यस्य वास्तेयमब्धिः । वस्तिस्थानं समुद्र इत्यर्थः । यस्यान्तःस्थं विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैश्चित्रं नानाविधं रंरम्यते अतिशयेन रमते । तं त्रिभुवनवपुषमीशं नियन्तारं 'सहस्रशीर्षा' इत्यादिश्रुतिप्रसिद्धं विष्णुं मुहुर्मुहुर्नमामीत्यन्वयः ॥

अतिमन्दमुमुक्षूणां तत्त्वबोधप्रसिद्धये ।
तोटकश्लोकटीकेयं रचिता तत्त्वदीपिका ॥

Colophon:

इति श्रीमत्पूर्णात्मयोगीन्द्रशिष्येण चिदानन्दयोगिना रचिता तत्त्वदीपिका समाप्ता ।

1246 33. E. 3.

श्रुतिसारसमुद्धरणव्याख्या तत्त्वदीपिका—सच्चिदानन्दयोगिकृता

Palm-leaf. 39 Foll. 14½ × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the 87th verse.

1247 34. D. 16.

श्लोकत्रयम्—रामचन्द्रेन्द्रयोगिकृतम्

Palm-leaf. 1 Foll. 15 × 1¼ inches. 9 lines in a page. Grantha script. Old. Fair. Good writing.

Three verses writen on thep rinciples of Advaita Vedānta. The author Rāmacandrendrayogin was the pupil of Vāsudevendrayogin.

Complete.

Beginning and end :

देशिकं रामचन्द्रं च नत्वा श्लोकत्रयेण वै ।
मुमुक्षोः सर्ववेदान्तसिद्धसिद्धान्त उच्यते ॥
सच्चित्सुखात्मकं ब्रह्म नामरूपात्मकं जगत् ।
साक्ष्यादिभासकः साक्षी वक्ष्यमायो हि सर्ववित् ॥
अहंकारो हृदित्युक्तश्चिदेवायमितीरिता ।
मिथस्तादात्म्यमुभयोश्चिदाभास इतीरितम् ॥
स्वाज्ञानहृदयग्रन्थौ शिथिले स्वप्रबोधतः ।
साक्षीशजीवकलितं विश्वं ब्रह्मैव नेतरत् ॥

Colophon :

वासुदेवेन्द्रसच्छिष्यरामचन्द्रेन्द्रसूत्रितम् ।
यो वेत्ति सर्ववेदान्तसिद्धान्तं मुक्तिमेति सः ॥

1248 8. D. 88.

संक्षेपशारीरकम्—सर्वज्ञात्मकृतम्

Paper. 99 Foll. 9 × 4 inches. 9 lines in a page. Devanāgarī script. Old. Injured. Illegible writing.

The leaves bear the serial numbers 1 to 107. The leaves bearing the numbers 48, 49, 60, 65 to 67, 70 and 106 are missing.

The Saṁkṣepaśārīraka is a well known Prakaraṇa work on Advaita-Vedānta. It contains more than 1200 verses distributed among the four adhyāyas which are named after the four adhyāyas of the Brahmasūtras *i.e.* Samanvaya, Avirodha, Sādhana and Phala Adhyāyas. The author Sarvajñātman was the pupil of Deveśvara who must-have lived about the 10th century A.D.

Complete.

Beginning :

अनृतजडविरोधिरूपमन्त-
त्रयमलबन्धनदुःखताविरुद्धम् ।
अतिनिकटमविक्रियं मुरारेः
परमपदं प्रणयादभिष्टवीमि ॥ १ ॥
स्वाज्ञानकल्पितजगत्परमेश्वरत्व-
जीवत्वभेदकलुषीकृतभूमभावा ।
स्वाभाविकस्वमहिमस्थितिरस्तमोहा
प्रत्यक्चितिर्विजयते भुवनैकयोनिः ॥ २ ॥
प्रत्यक्प्रमाणकमसत्यपराक्प्रभेदं
प्रक्षीणकारणविकारविभागमेकम् ।
चैतन्यमात्रपरमार्थनिजस्वभावं
प्रत्यञ्चमच्युतमहं प्रणतोऽस्मि नित्यम् ॥ ३ ॥

End :

श्रीदेवेश्वरपादपङ्कजरजःसंपर्कपूताशयः
सर्वज्ञात्मगिराङ्कितो मुनिवरः संक्षेपशारीरकम् ।
चक्रे सज्जनबुद्धिवर्धनमिदं राजन्यवंश्ये नृपे
श्रीमत्यक्षतशासने मनुकुलादित्ये भुवं शासति ॥६२॥
भुजङ्गमाङ्गशायिने विहङ्गमाङ्गगामिने ।
तुरङ्गमाङ्गभेदिने नमो रथाङ्गधारिणे ॥ ६३ ॥

Colophon :

इति श्रीदेवेश्वरपूज्यपादशिष्यश्रीसर्वज्ञात्मभट्टारकमहामुनिविरचिते संक्षेपशारीरके फललक्षणं नाम चतुर्थोऽध्यायः ।

संवत् १६२१ समये ज्येष्ठैकादश्यां कृष्णपक्षे रवौ लिखितोऽयं ग्रन्थः ।

1249 8. I. 7.

संक्षेपशारीरकम्—सर्वज्ञात्मकृतम्

Paper. 85 Foll. 9½ × 7½ inches. 18

lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

1250 27. M. 28.

संक्षेपशारीरकम्—सर्वज्ञात्मकृतम्

Palm-leaf. 22 Foll. 15 × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

The MS. contains the commentary also.

Contains the adhyāyas 3 and 4 only.

1251 34. B. 1.

संक्षेपशारीरकम्—सर्वज्ञात्मकृतम्

Palm-leaf. 214 Foll. 15½ × 1¾ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

The MS. contains the commentary also.

1252 27. M. 28.

संक्षेपशारीरकव्याख्या तत्त्वबोधिनी—नृसिंहाश्रमकृता

Palm-leaf. 112 Foll. 15 × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

This is a commentary on Sarvajñātman's Saṁkṣepaśārīraka described in the last number. The author Nṛsiṁhāśrama was the pupil of Jagannāthāśrama and Gīrvāṇendrasarasvatī. He was the author of the following other works: Advaitadīpikā, Tattvaviveka, Tattvavivekadīpana *alias* Advaitaratnakośa, Pañcapādikāvyākhyā, Pañcapādikāvivaraṇavyākhyā, Bhedadhikkāra and Nṛsiṁhavijñapana. His Tattvaviveka is said to have been composed in 1547 A.D. Therefore his date must be the middle of the 16th century A.D.

Contains the adhyāyas 3 and 4 only.

The commentary was printed and published in the Sarasvatī Bhavana Texts Series No. 69.

Beginning:

यदज्ञानात्कर्तां गतितदितराभ्यां परवशो
न कुत्रापि स्वास्थ्यं भजति परिशुद्धो नरहरेः।
निरस्तद्वैतस्यानवधिसुखचित्सत्यवपुषः
पदं कर्मप्राप्ताशयशुचिरहं नौमि तदिदम्॥

एवं प्रथमाध्यायोपदर्शिताद्वैतासङ्गब्रह्मात्मसमन्वयो द्वितीयाध्यायेन प्रत्यक्षादिमानान्तरविरोधनिरासमुखेनोपपत्या संभावितः। संप्रति संभावितसमन्वयसमुपजातनिरुपसर्गब्रह्मात्मैक्यबुद्धेः फलपर्यन्ततायै अपेक्षितं साधनकलापं बुभुत्सोः शिष्यस्य प्रश्नमवतारयति—श्रुत्वेति। अविरोधं प्रत्यक्षाद्यविरोधम्। अद्वैतसमन्वयस्येति शेषः।

End:

तुरङ्गमाङ्गभेदिने केशिसंज्ञकासुरसंहर्त्रे, रथाङ्गधारिणे चक्रधारिणे श्रीविष्णवे नमः नमस्कारोऽस्त्विति।

यज्जिज्ञासा मुमुक्षोर्हिततमफलदं यस्य चिह्नं विवर्तो
विश्वाख्यो यः श्रुतीनां श्वसनपवनवद्योनिराम्नायराशेः।
तात्पर्येण प्रवृत्तिर्यत इदमखिलं ज्योतिषां ज्योतिरात्मा
गृह्णातु श्रीनृसिंहः स तु शुभमशुभं वा बलिं वाङ्मयं मे॥
श्रीमज्जगन्नाथगुरोरनुग्रहः प्रविश्य मायोजयदत्र कर्मणि।
अतो ग्रहग्रस्तमनुष्यवन्मम प्रवृत्तिरेवेति बुधाः क्षमध्वम्॥

Colophon :

इति श्रीमत्परमहंसपरिव्रजकाचार्यजगन्नाथाश्रमश्रीचरणपरिचरणप्राप्तविद्यनिखिलविद्वज्जनमनोहरश्रीमन्नृसिंहाश्रमश्रीचरणविरचितायां संक्षेपशारीरकव्याख्यायां तत्त्वबोधिनीसमाख्यायां फलाख्यश्चतुर्थोऽध्यायः ।

1253 34. B. 1.

संक्षेपशारीरकव्याख्या तत्त्वबोधिनी—नृसिंहाश्रमकृता

Palm-leaf. 214 Foll. 15½ × 1¾ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

The MS. contains the text also.

Contains the 1st adhyāya only.

Beginning :

यस्याज्ञानविभूतिरम्बरमरुद्वह्न्यम्बु भूतद्भवाः
स्वाभाभासितभास्वदादिवपुषा येनेदमाविष्कृतम् ।
यस्मिन् सत्यसुखानुभूतिमहिमन्यारोपिता वादिभि-
र्विष्णुः शंकर आत्मभूरिति भिदा तत्संनिधत्तां महः ॥
अव्यासुरव्याजकृपा नृसिंहपदरेणवः ।
यन्नामनिगमाधीतिरर्थितार्थसमर्थिनी ॥
भौमानन्दसमुद्रतृप्तमनिशं मुग्धं जनं मोहतो
दृष्ट्वैव क्षपिताखिलाघतमसा संमोचयन्तं शिवम् ।
साम्बं सेन्दुमहं परापरगुरुं व्याख्यासने सुस्थितं
वन्दे दक्षिणदिङ्मुखं सिततरं ज्ञानाब्धिचन्द्रोदयम् ॥
यस्याःप्रसादं समवाप्य लोकस्रष्टाभवद्विश्वपितामहोऽपि ।
उपासते यां मुनयोऽपि नित्यं तां वाचमाद्यामहमद्य वन्दे॥
महागणेशं निर्विघ्नान्तरायतमोनिरासैकसहस्रभानुम् ।
वन्दारुवृन्दारकवृन्दवन्द्यंवन्दामहेमञ्जुलमिष्टसिद्ध्यै ॥
वेदान्तार्थसरोजेषु सहस्रांशुरिवापरः ।
भासते व्याससंज्ञो यस्तं वन्दे हरिमीश्वरम् ॥ ६ ॥
नमः श्रीशंकराचार्यगुरवे शंकरात्मने ।
शरीरिणां शंकराय शंकरज्ञानहेतवे ॥ ७ ॥
श्रीमज्जगन्नाथयतीन्द्रपादपद्मद्वयं चेतसि चिन्तयामि ।
स्वनद्विचित्रागमशिष्यभृङ्गजुष्टं विसृष्टावधिसारराशिम्॥
गीर्वाणेन्द्रसरस्वत्याश्चरणं शरणं भजे ।
यो भवक्लेशखिन्नानां मूर्तं ब्रह्मापरं बभौ ॥ ९ ॥
शारीरकार्थान्सकलान्गभीरान्समुद्दिधीर्षुः कृपयाचकार।
संक्षेपशारीरकनामकं यः सर्वज्ञमात्मोत्तरमाश्रयेऽहम् ॥
संक्षेपशारीरकनामकेऽस्मिन्नशेषवेदार्थनिधानकोशे ।
कर्तुं यथार्हं विवृतिं कृपातः श्रीमज्जगन्नाथगुरोर्यतेऽहम्॥

श्रीमच्छारीरकार्थमनुभवप्रधानमाविष्कर्तुं किंचित्प्रकरणमारभमाणः सर्वज्ञाचार्यः तस्य ग्रन्थस्याविघ्नपरिसमाप्त्यादिप्रयोजनमविगीतशिष्टाचारानुमितश्रुतिप्रमितकर्तव्यताकं तत्त्वानुकीर्तनलक्षणस्मृतिरूपं मङ्गलं ग्रन्थतो निबध्नाति—अनृतेति ।

End :

एतदित्थं समन्वयनिरूपणं कृतमिति शेषः । एवमनेन प्रकारेणास्मिन् प्रतिपादिते समन्वये बुद्धिस्थे सति अद्वयविषयं यद्विज्ञानं तदेव वाक्यजन्यम् । तत एतस्मात् ज्ञानात् अन्यद् भेदादिविषयं ज्ञानं पुंसोऽपराधकृतं पुरुषापराधप्रयुक्तं शक्तितात्पर्याज्ञानात् पुरुषोत्प्रेक्षाकल्पितमिति प्रतीतिर्भवेत् । नित्यशुद्धबुद्धमुक्तसच्चिदानन्दपरब्रह्मैवाहमित्यविचला बुद्धिर्भवतीत्यर्थः ।

कररुहकुलिशैर्द्विषतां
चरणाम्बुजनखरकान्तिभिर्भजताम् ।
हृदयं हृदयग्रन्थिं
भिन्दन्नरसिंहः समुल्लसतु ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमज्जगन्नाथाश्रमश्रीचरणपरिप्राप्तविद्यनिखिलविद्वज्जनमनोहरश्रीमन्नृसिं-

हाश्रमश्रीचरणविरचितायां संक्षेपशारीरकव्याख्यायां तत्त्वबोधीनीसमाख्यायां समन्वयाख्यः प्रथमोऽध्यायः।

The scribe adds:

संक्षेपपूर्वकस्येयं व्याख्या शारीरकस्य तु।
लिखिता वासुदेवेन प्रथमाध्यायगोचरा॥
अस्ति चेल्लिखितेऽस्माभिर्यत्किंचिदसमञ्जसम्।
अनुग्रहेण साधूनां सर्वं भवतु मङ्गलम्॥
हरिगीतपुराधिवासलोलं
गिरिजाकान्तमुखारविन्दसूर्यम्।
अखिलार्तिविनाशनाय नित्यं
कलये तारकमारकं कुमारम्॥

चित्रामासं १३ गुरुवासरं पूर्वाषाढानक्षत्रं सुब्रह्मण्येन लिखितम्।

1254 24. E. 7.

संन्यासविचारः

Palm-leaf. 7 Foll. 17 × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

This short work emphasises that Saṁnyāsāśrama is necessary to acquir knowledge of the Brahman according to the view of the school of Advaita Vedanta. The author's name is not known.

Complete.

Beginning:

संन्यासस्य श्रवणाङ्गत्वं ज्ञाने प्रधानवत्तया तत्साधनत्वेन वेति बहवो विवदन्ते। तत्र विवरणाचार्याः एतमेव प्रव्रजिनो लोकमिच्छन्तः प्रव्रजन्ति, त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदमित्यादिश्रुतिभिः ज्ञानसाधनत्वमेव संन्यासस्य। लोकमिच्छन्त इत्यस्य लोक्यते ज्ञायत इति लोकं ब्रह्म। लोकृ दर्शन इत्यस्माद्धातोर्भावे घञ्। दर्शनं वेत्यर्थः।

End:

अत एव,

संन्यस्तोऽहमिति ब्रूयात्प्राणैः कण्ठगतैरपि।
स च्छित्वा मण्डलं भानोर्ब्रह्मलोकमवाप्नुयात्॥

इति स्मृत्यन्तरे आतुरसंन्यासस्य ब्रह्मलोकफलकत्वं स्पष्टमिति न किंचिदनुपपन्नमिति संक्षेपः।

Colophon:

इति संन्यासस्य ज्ञानाङ्गत्वसमर्थनं समाप्तम्।

1255 54. A. 12.

संन्यासविचारः

Paper. 13 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Complete.

This is a transcript of the original MS. described in the last number.

1256 40. C. 53.

सदाचारप्रकरणम्—शंकराचार्यकृतम्

Paper. 23 Foll. 8½ × 6⅓ inches. 14 lines in a page. Telugu script. Old. Injured. Clear writing.

On the good conduct to be observed by those who wish to attain the self-realisation. The work is attributed to S'rī S'aṁkarācārya. It was printed and published in the S'rī S'āṁkaragranthāvali, S'rirangam.

Complete.

Beginning :

सच्चिदानन्दकन्दाय जगदङ्कुरहेतवे ।
सदोदिताय पूर्णाय नमोऽनन्ताय विष्णवे ॥ १ ॥
सर्ववेदान्तसिद्धान्तग्रथितं निर्मलं शिवम् ।
सदाचारं प्रवक्ष्यामि योगिनां ज्ञानसिद्धये ॥ २ ॥
प्रातः स्मरामि देवस्य सवितुर्भर्ग आत्मनः ।
वरेण्यं तद्धियो यो नश्चिदानन्दे प्रचोदयात् ॥ ३ ॥
अन्वयव्यतिरेकाभ्यां जाग्रत्स्वप्नसुषुप्तिषु ।
यदेकं केवलं ज्ञानं तदेवास्मि परं बृहत् ॥ ४ ॥

End :

स गृही यो गृहातीतः शरीरं गृहमुच्यते ।
गुणाः कुर्वन्तु कर्माणि नाहं कर्तेति बुद्धिमान् ॥९४॥
सदाचारमिमं नित्यं योऽनुसंदधते बुधः ।
संसारसागराच्छीघ्रं स मुक्तो नात्र संशयः ॥ ९९ ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं सदाचारप्रकरणं संपूर्णम् ।

Date of copying : 18-10-1912.

1257 8. G. 39.

सर्ववेदान्तसारसंग्रहः—सदाशिवब्रह्मेन्द्रकृतः

Paper. 11 Foll. 6 × 4¼ inches. 16 lines in a page. Telugu script. Old. Fair. Good writing.

This is a summary of the principles accepted in the school of Advaita Vedānta of S'rī S'aṁkarācārya. The author according to the colophon of this MS. was Sadāsivabrahmendra who probably must have been the same as the author of the Ātmānātmaviveka and the Ātmavidyāvilāsa described under numbers 738 and 750 respectively in this volume. The author must have flourished between the last part of the 17th century and the middle of the 18th century A.D. A similar work has been described in R. No. 2232 of the Triennial Catalogue of the Madras Govt. Oriental MSS. Library, wherein the author's name is mentioned as Pāpayārādhya.

Complete.

Beginning :

श्रीकृष्णं सच्चिदानन्दं जगज्जन्मादिकारणम् ।
सत्यज्ञानानन्दरूपं प्रणमामि जगद्गुरुम् ॥

अस्मिन् लोके तापत्रपार्कसंतप्ता जननमरणप्रवाहरूपसंसारे पतितास्तन्निवृत्त्युपायमजानन्तो दुःखानन्तरं दुःखमेव प्राप्नुवन्ति । तेषां विवेकार्थं श्रीकृष्णानुग्रहवशात् आत्मानात्मविवेकरूपं सर्ववेदान्तसारसंग्रहं कथयिष्याम । आद्य आवरणविचारः क्रियते। प्राणिनां दुःख केन भवति। शरीरपरिग्रहवशाद्भवति। शरीरपरिग्रहः केन भवति । कर्मणा भवति । कर्म केन भवति। रागद्वेषादिना भवति ।

End :

तथा अयं ब्रह्मवित्तमो ब्रह्मस्वरूपेण नित्यकल्पात्मना संतिष्ठते । न तस्य प्राणा उत्क्रामन्ति, ब्रह्मैव सन् ब्रह्माप्येतीति तस्य प्राणोत्क्रमणाश्रवणात् प्राणे ब्रह्मणि लीने सति स्वयं केवलात्मना आकाशवत्तिष्ठतीत्यर्थः । एवं विदेहकैवल्यसिद्धेर्नातः परमस्तीति सर्वमनवद्यम् ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसदाशिवब्रह्मेन्द्रसरस्वतीस्वामिना विरचितः सर्ववेदान्तसारसंग्रहः समाप्तः ।

1258 30. G. 13.

सर्ववेदान्तसारसंग्रहः—सदाशिवब्रह्मेन्द्रकृतः

Palm-leaf. 8 Foll. 13 × 1⅛ inches. 6 lines in a page. Grantha script. Old. Injured. clear writing.

Incomplete.

1259 29. B. 17.

सर्ववेदान्तसारसंग्रहः—सदाशिवब्रह्मेन्द्रकृतः

Palm-leaf. 10 Foll. 16½ × 1⅛ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

The first leaf is partly broken.

Reads the following colophon attributing the authorship to Saccidānanda though the work is the same as described above.

इति श्रीमत्परमहंसपरिव्राजकाचार्यसच्चिदानन्दस्वामिना विरचितः सर्ववेदान्तसारसंग्रहः समाप्तः।

1260 19. E. 29.

सर्ववेदान्तसिद्धान्तसारसंग्रहः—सदानन्दसरस्वतीकृतः

Palm-leaf. 80 Foll. 8 × 1½ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

2 leaves are inserted between the numbers 40 and 41 with the marks 40 (1) and 40 (2) as supplemental leaves.

This work seems to be the same as the Vedāntasiddhāntasārasaṁgraha of Sadānandasarasvatī described already in No. 1220 of this volume. But the end and colophon are different. The colophon wrongly ascribes the work to S'rī Saṁkarācārya. There are two editions of this work, one belonging to the Mysore Govt. Oriental Library Series No. 92 and the other to the S'āṁkaragrantharatnamālā, Srirangam. The former reads the same beginning as found in Sadānandasarasvati's work mentioned above and concludes with different end and colophon. The latter begins with the verses slightly modified and ends with different verses and colophon. Both of the publications attribute the authorship to S'ri S'aṁkarācārya. As far as this MS. is concerned, the author should be Sadānandasarasvatī, and not S'rī S'aṁkarācārya as found in the colophon, because one of the introductory verses mentions Advayānanda as the author's teacher. The work contains 971 verses entirely agreeing with those of the Mysore edition. This MS. seems to have been the original on which the Mysore edition was based.

Complete.

Beginning:

अखण्डानन्दसंबोधो वन्दनाद्यस्य जायते।
गोविन्दं तन्नहं वन्दे चिदानन्दतनुं गुरुम्॥
अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये॥
यदालम्बो दरं हन्ति सतां प्रत्यूहसंभवम्।
तदालम्बे दयालम्बं लम्बोदरपदाम्बुजम्॥
अर्थतोऽप्यद्वयानन्दमतीतद्वैतलक्षणम्।
आत्माराममहं वन्दे श्रीगुरुं शिवविग्रहम्॥
वेदान्तशास्त्रसिद्धान्तसारसंग्रह उच्यते।
प्रेक्षावतां मुमुक्षूणां सुखबोधोपपत्तये॥

अस्य शास्त्रानुसारित्वादनुबन्धचतुष्टयम् ।
यदेव मूलं शास्त्रस्य निर्दिष्टं तदिहोच्यते ॥
अधिकारी च विषयः संबन्धश्च प्रयोजनम् ।
शास्त्रारम्भफलं प्राहुरनुबन्धचतुष्टयम् ॥

End:

इत्याचार्यस्य शिष्यस्य संवादेनात्मलक्षणम् ।
निरूपितं मुमुक्षूणां सुखबोधोपपत्तये ॥
सर्ववेदान्तसिद्धान्तसारसंग्रहनामकः ।
ग्रन्थोऽयं हृदयग्रन्थिविच्छित्त्यै रचितः सताम् ॥
श्रीमद्भिर्भगवत्पादैराद्यायं मुमुक्षुभिः ।
श्रोतव्यो दर्शनीयश्च पठनीयश्च सर्वदा ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादकृतौ सर्ववेदान्तसिद्धान्तसारसंग्रहः संपूर्णः ।

The last page repeats the verses found on Fol. 34.

1261 34. L. 22.

सर्वसिद्धान्तसंग्रहः—शंकराचार्यकृतः

Palm-leaf. 21 Foll. 14 × 1½ inches. 8 lines in a page. Telugu script. Old. Good. Good writing.

Wooden boards are added to both sides.

Some blank leaves are added in the beginning and end of the MS.

This is a summary of the doctrines of the various Indian philosophical systems. The author is said to be S'rī S'aṁkarācārya. The work was printed and published by the Madras Govt. Oriental MSS. Library. It contains the following 12 chapters:

१. उपोद्घातप्रकरणम्, २. लौकायतिकपक्षः, ३. आर्हतपक्षः, ४. बौद्धपक्षः, ५. नैयायिकपक्षः, ६. वैशेषिकपक्षः, ७. सांख्यपक्षः, ८. योगपक्षः, ९. भाट्टपक्षः, १०. प्राभाकरपक्षः, ११. व्यासपक्षः, १२. वेदान्तपक्षः ।

Complete.

Beginning:

वादिभिर्दृश्यते सर्वैर्दर्शनैर्वस्त्वनेकधा ।
वेदान्तवेद्यं तं विष्णुमेकरूपमुपास्महे ॥
अङ्गोपाङ्गोपवेदाश्च वेदस्यैवोपकारकाः ।
धर्मार्थकाममोक्षाणामाश्रयाश्च चतुर्दश ॥
वेदाङ्गानि षडेतानि शिक्षा व्याकरणं तथा ।
निरुक्तं ज्योतिषं कल्पश्छन्दोविचितिरित्यपि ॥
मीमांसा न्यायशास्त्रं च पुराणं स्मृतिरित्यपि ।
चत्वार्येतान्युपाङ्गानि बहिरङ्गानि तानि वै ॥

End:

उक्तोऽवधूतमार्गश्च कृष्णेनोद्धवं प्रति ।
श्रीभागवतसंज्ञे तु पुराणे दृश्यते हि सः ॥
सर्वदर्शनसिद्धन्तान् वेदान्तान्तानिमान् क्रमात् ।
श्रुत्वार्थवित्सुसंक्षिप्तांस्तत्त्वतः पण्डितो भवेत् ॥
शंकराचार्यरचिते सर्वसिद्धान्तसंग्रहे ।
वेदान्तपक्ष एवायं यस्मिन्पक्षाः प्रतिष्ठिताः ॥

Colophon:

सर्वसिद्धान्तसंग्रहः समाप्तः ।

1262 40. A. 109.

सिद्धान्ततत्त्वम्—अनन्तदेवकृतम्

Paper. 12 Foll. 9½ × 5½ inches. 55 lines in a page. Grantha script. Old. Injured. Good and small writing. Copied with pencil.

The Siddhāntatattva, as the title itself indicates, is a Prakaraṇa work elucidat-

ing the truth of the principles of Advaita-Vedānta. The author was Anantadeva, the son of Āpadeva I and grandson of Ekanātha. He was the pupil of Rāmatīrtha. The author Anantadeva may be identified with Anantadeva I as distinguished from Anantadeva II the author of the Smṛtikaustabha written under the instance of Baijcandra (1675 A.D.) and the son of Āpadeva II the famous author of the Mīmāṁsānyāyaprakāśa. His other work is Manorañjananāṭaka, printed and published in the Sarasvatī Bhavana Texts Series, No 72, Benares. For further particulars on the anthor attention may be drawn to the Manuscripts Notes on the Adhikaraṇādarśa of Bābadeva by Pandit V. Krishnamāchārya, published in the Adyar Library Bulletin, Vol. XIV. Part I, dated 17-2-1950. He must have flourished about 1600 A.D. The work was printed and published in the Benares Pandit Series No. XXII, August 1900. The Descriptive Catalogue of Sanskrit MSS in the Tanjore Palace Library describes this work with two different titles *viz.* Tattvaprakriyā and Siddhāntatattva and a commentary on it (No. 7546, 7547 and 7673, Vol. XIII—1931).

Complete.

Beginning :

सर्ववेदान्तसिद्धान्तसंप्रदायानुसारतः ।
नमस्कृत्य गुरूनवक्ष्ये प्रक्रियां तत्त्वसंश्रयाम् ॥
यच्छ्रीमद्रामतीर्थेभ्यः संप्रदायसमागतम् ।
श्रुतं सत्तर्कसचिवं विविच्य तदिहोच्यते ॥

अखण्डमद्वितीयमानन्दैकरसं स्वप्रकाशं चैतन्यमेव जगतस्तत्त्वमनिर्वचनीयस्येव सर्पस्य रज्जुः । कथं तर्हि जीवेश्वरविभागप्रतिपत्तिरिति चेत् अज्ञानरूपादुपाधेरिति । यथा ह्येकस्यैव मुखस्य दर्पणोपाधिसंबन्धात् बिम्बप्रतिबिम्बवादः, एवं चिन्मात्रस्योक्तोपाधिसंबन्धाज्जीवेश्वरभावः । न तत्त्वान्तरमस्ति । अज्ञानं त्वनाद्यनिर्वचनीयमायाविद्यादिशब्दाभिधेयं चिन्मात्राश्रयविषयं जीवाश्रयं ब्रह्मविषयं वेति वर्णयन्ति ।

End :

तस्माद् दृष्टिसृष्टिवादेऽपि नित्यनैमित्तिकानुष्ठानेन शुद्धान्तःकरणस्य शमादिसंपन्नस्य गुरुमनुसृतस्य श्रवणादिपरिपाकसमुत्पन्नतत्त्वज्ञानस्याज्ञानतत्कार्य - बाधे सति सत्यज्ञानानन्दाखण्डाद्वितीयं वस्तुमात्रमवशिष्यते नान्यदिति सर्वमवदातम् ।
इत्थं परिव्राजकतीर्थपादश्रीरामतीर्थानुसृतिप्रसादात् ।
सिद्धन्ततत्त्वं गतवाग्विवादमनन्तदेवेन मुदा न्यरूपि ॥
इत्येषा वाङ्मयी पूजा श्रीमद्गोपालपादयोः ।
अर्पिता तेन मे देवः प्रीयतां परमेश्वरः ॥

Colophon :

इति श्रीमत्सकलदिङ्मण्डलविश्रान्तयशोमण्डलनिखिलश्रुतिशिरस्तत्त्वपरिशीलनमर्यादाधुरंधरश्रीमदापदेवसूनुना अनन्तदेवेन कृतं सिद्धान्ततत्त्वं नाम प्रकरणम् ।

1263 10. E. 2.

सिद्धान्तमुक्तावलिः—प्रकाशानन्दकृता

Paper. 104 Foll. 14 × 5½ inches. 15 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The MS. contains the commentary also copied up and down the text on each page.

This is a small treatise in the form of Kārikās and Vṛtti thereon, dealing with the principles of Advaitā Vedāntā. The author Prakāsānanda was the pupil of Jñānānanda and the teacher of Nānādīksita, the commentator on the work. He refers to Prakāsātman, Sarvajñātman and Sureśvara. The work is mentioned by Appayadīkṣita (1520 to 1593 A.D.) in his Siddhāntaleśasaṁgraha. He may be assigned in the beginning of the 16th century A.D. The work was printed and published with English translation in the Benares Pandit Series.

Complete.

Beginning:

अदृष्टद्वयमानन्दमात्मानं ज्योतिरव्ययम् ।
विनिश्चित्य श्रुतेः साक्षाद्युक्तिस्तत्राभिधीयते ॥

तत्रादौ मङ्गलं तत्त्वानुस्मरणरूपं सूचयन् अभिधेयप्रयोजने साक्षात्प्रतिपाद्य कर्तव्यं प्रतिजानीते—अदृष्टेत्यादिना । आत्मानमुक्तविशेषणचतुष्टयविशिष्टं श्रुतितोऽपरोक्षीकृत्य तत्रोक्तविशेषणचतुष्टयविशिष्टे आत्मनि युक्तिः श्रुत्यनुग्राहकस्तर्कोऽभिधीयत इत्यन्वयः । नन्वात्मसाक्षात्कारे श्रुत्यपेक्षैव नास्ति, देहादेरेवात्मत्वात्; तस्य च लौकिकप्रत्यक्षत्वादिसिद्धत्वादिति चेन्न,

आत्मा नित्योऽथवानित्यो भेदस्त्वाद्ये स्फुटो मतः ।
अन्त्ये तु कृतहानिः स्यादकृताभ्यागमस्तथा ॥

End:

प्रकाशानन्दयतिना कृतिना स्वात्मशुद्धये ।
सिद्धान्तमुक्तावल्येषा रचिता रन्ध्रवर्जिता ॥
अद्वैतानन्दसंदोहसत्यज्ञानादिलक्षणा ।
नारायणसमासक्ता श्रियः सापत्न्यदूषिता ॥
शृणु प्रकाशरचितां सद्द्वैततिमिरापहाम् ।
वादीभकुम्भनिर्भेदसिंहदंष्ट्राधरीकृताम् ॥
वेदान्तसारसर्वस्वज्ञेयमधुनातनैः ।
अशेषेण मयोक्तं तत्पुरुषोत्तमयत्नतः ॥
स्नातं तेन समस्ततीर्थसलिले सर्वापि दत्तावनिर्यज्ञानां च कृतं सहस्रमखिला देवाश्च संपूजिताः ।
संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ
यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यज्ञानानन्दपूज्यपादशिष्यप्रकाशानन्दविरचिता सिद्धन्तमुक्तावली समाप्ता ।

1264 40. E. 52.

सिद्धान्तमुक्तावलिः—प्रकाशानन्दकृता

Paper. 24 Foll. 11 × 4¼ inches. 15 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

1265 10. E. 2.

सिद्धान्तमुक्तावलिव्याख्या—नानादीक्षितकृता

Paper. 104 Foll. 14 × 5½ inches. 15 lines in a page. Devanāgarī script. Old. Injured. Good writing.

The MS. contains the text also copied in the middle of the pages.

This is a commentary on Prakāsānanda's Siddhāntamuktāvali. The author Nānādīkṣita was the pupil of Prakasānanda the author of the text. The commentary is called Pradīpikā. It is stated that the commentary was

composed at Kāsi or Benares. Nānādīkṣita mentions Nṛsiṁha and Rāghavendrayati. An extract of the commentary was printed and published at Calcutta by Jivānanda Vidyāsāgara.

Complete.

Beginning :

विश्वेशं ढुण्ढिराजं जगदुदयकृतं शारदां सूत्रकारं
व्यासं चाचार्यवर्यं त्रिभुवनविदितं शंकरं भाष्यकारम् ।
आनन्दान्तप्रकाशानुभवपदमहं सद्गुरुं श्रीनृसिंहं
वन्दे विद्यानिधानं शमदमनिरतं राघवेन्द्रं यतीन्द्रम् ॥
यच्छिष्यशिष्यसंदोहव्याप्ता भारतभूमयः ।
वन्दे तं यतिभिर्वन्द्यं प्रकाशानन्दमीश्वरम् ॥
सिद्धान्तमौक्तिकश्रेणीप्रकाशाय प्रदीपिका ।
क्रियते परपक्षौघध्वान्तध्वंसप्रवर्तिनी ॥

शिष्टाचारप्राप्तमङ्गलमाचरन्निरूपणीयं प्रतिजानीते —अदृष्टद्वयमिति । देहादिभ्य आत्मनो व्यावर्तनायाव्ययमिति पदम् । आत्मनि प्रमाणसत्त्वासत्त्वाभ्यामनात्मत्वासत्त्वसङ्कां पराकर्तुं ज्योतिरिति विशेषणम् । आत्मैव पुरुषार्थ इति प्रतिपादनायानन्द इति विशेषणम् । सजातीयविजातीयभेदापनुत्तये प्रपञ्चमिथ्यात्वाद्युपपादनायादृष्टद्वयमिति विशेषणम् ।

End :

तस्मादिति । इतिशब्दो ग्रन्थसमाप्तौ । एवं ग्रन्थस्यावान्तरप्रयोजनमाह — शृणु प्रकाशेति । तादृक् सिंहदंष्ट्रा अधरीकृता ययेत्यर्थः । एतेन वादिविजयार्थिभिरियमभ्यसनीयेति भावः । शेषमतिरोहितार्थम् ।

नानादीक्षितसंज्ञेन विदुषेयं विनिर्मिता ।
सिद्धान्तमौक्तिकश्रेणीदीपिकात्मप्रकाशिका ॥
विदितसकलवेद्यैर्न प्रशंसन्ति लोके
ग्रथितमपि महद्भिः किं पुनर्मादृशेन ।
इति विफलसमेऽस्मिन्वाङ्मयेऽहं प्रवृत्तः
स्वमतिविमलतायै क्षन्तुमर्हन्ति सन्तः ॥
यदज्ञानादिदं भाति यज्ज्ञानाच्च प्रलीयते ।
ब्रह्म स्यां तदहं नित्यं नित्यसंवित्सुखाद्वयम् ॥
अधिकाश्युपविश्वेशमियं सिद्धान्तदीपिका ।
निर्मिता राजतां शश्वत्सदानन्दप्रदायिनी ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीप्रकाशानन्दपूज्यपादशिष्यश्रीनानादीक्षितविरचिता वेदान्तसिद्धान्तमुक्तावलीटीका समाप्ता ।

The scibe adds :

संवत् १७८९ फाल्गुनमासे शुक्लपक्षे भौमवासरे सिद्धिरामकारेण । ग्रन्थसंख्या ९०००.

1266 8. F. 81.

सिद्धान्तलेशसंग्रहः—अप्पयदीक्षितकृतः

Paper. 45 Foll. 13 × 8½ inches. 35 lines in a page. Grantha script. Old. Injured. Good writing.

The Siddhāntalesasaṁgraha also called Śāstrasiddāntalesasaṁgraha is a very popular Prakaraṇa work on Advaita Vedānta, summarizing various views held by different authors. The author Appayadīkṣita was the son of Raṅgarājādhvarin of Bhāradvājagotra. His date has been fixed as 1520 to 1593 A.D. He was under patronage of Cinna Timma, Cinna Bomma and Venkaṭabhūpāla I. He was the author of the following other works : Vidhirasāyana with commentary, Upakramaparākrama, Vādanakṣatramālā, Mayūkhāvali, citramīmāṁsā, Kuvalayānanda, Vṛttivār

ttika, Kalpataruparimala, Nyāyarakṣāmaṇi, S'ivārkamaṇidīpikā, S'ivādvaitanirṇaya, Caturmatasārasaṁgraha and many Stotra works. He is said to have belonged to the village Aḍaipalam near Kāñcīpuram.

There are about half a dozen printed editions of this work.

Complete.

Beginning :

अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्रधा
सरिदिव महीभेदान्संप्राप्य शौरिपदोद्गता ।
जयति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता
जननहरणी सूक्तिर्ब्रह्माद्वयैकपरायणी ॥
प्राचीनैर्न्यवहारसिद्धविषयेष्वात्मैक्यसिद्धौ परं
संनह्यद्भिरनादरात्सरणयो नानाविधा दर्शिताः ।
तन्मूलानिह संग्रहेण कतिचित् सिद्धान्तलेशान्धियः
शुद्ध्यै संकलयामि तातचरणव्याख्यावचःख्यापितान् ॥
तेषूपपादनापेक्षान् पक्षान् प्रायो यथामति ।
युक्त्योपपादयन्नेव लिखाम्यनतिविस्तरम् ॥

तत्र तावत् आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्य इत्यधीतसाङ्गस्वाध्यायस्य वेदान्तैरापातप्रतिपन्ने ब्रह्मात्मनि समुदितजिज्ञासस्य तज्ज्ञानाय वेदान्तश्रवणे विधिः प्रतीयमानः किंविध इति चिन्त्यते ।

End :

तस्मादुदाहृतश्रुतिसूत्रानुसारिभिर्मुक्तजीवानां यावत्सर्वमुक्ति वस्तुसच्चैतन्यमात्रत्वाविरोधिबद्धपुरुषाविद्याकृतनिरवग्रहैश्वर्यतदनुगुणगुणकलापविशिष्टनिरतिशयानन्दस्फुरणसमृद्धनिःसंधिबन्धपरमेश्वरभावापत्तिरादर्तव्येति सिद्धम् ।

Colophon :

इति सिद्धान्तलेससंग्रहे चतुर्थः परिच्छेदः ।

Then adds the following verse :

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलि-
रस्त्यप्पदीक्षित इति प्रथितस्तनूजः ॥

The date of copying etc :

Pramāthi year, Kanyā month, 24th day, copied by Ramachandran. Three extra leaves in much injured condition contain extracts from Acyutakṛṣṇānanda's commentary on the work.

1267 9. H. 28.

सिद्धान्तलेशसंग्रहः—अप्पयदीक्षितकृतः

Paper. 129 Foll. 13 × 5½ inches. 11 lines in a page. Devanāgarī script. Old. Fair. Good writing.

The MS. contains the commentary also copied up and down the text.

Contains the 1st Pariccheda only.

1268 19. G. 7.

सिद्धान्तलेशसंग्रहः—अप्पयदीक्षितकृतः

Palm-leaf. 59 Foll. 16½ × 1½ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wants one leaf in the beginning ; otherwise complete.

1269 19. G. 10.

सिद्धान्तलेशसंग्रहः—अप्पयदीक्षितकृतः

Palm-leaf. 51 Foll. 18 × 1¼ inches.

6 lines in a page. Telugu script. Old. Injured. Clear writing.

Incomplete.

The fly leaf added in the beginning reads some Upaniṣadic passages connected with the work.

1270 25. B. 10.

सिद्धान्तलेशसंग्रहः—अप्पयदीक्षितकृतः

Palm-leaf. 41 Foll. 16½ × 1⅛ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

The first two leaves are not given the serial numbers.

Contains the Paricchedas 1 to 3.

1271 26. B. 33.

सिद्धान्तलेशसंग्रहः—अप्पयदीक्षितकृतः

Palm-leaf. 35 Foll. 14½ × 1½ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the Paricchedas 1 and 2.

1272 27. N. 2.

सिद्धान्तलेशसंग्रहः—अप्पयदीक्षितकृतः

Palm-leaf. 98 Foll. 15¼ × 1⅜ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete in 4 Paricchedas.

1273 33. M. 10.

सिद्धान्तलेशसंग्रहः—अप्पयदीक्षितकृतः

Palm-leaf. 25 Foll. 14¼ × 1⅝ inches. 11 lines in a page. Grantha script. Old. Injured. Clear writing.

Contains the first Pariccheda incomplete.

1274 9. H. 28.

सिद्धान्तलेशसंग्रहव्याख्या कृष्णालंकारः—अच्युतकृष्णानन्दतीर्थकृतः

Paper. 129 Foll. 13 × 5½ inches. 11 lines in a page. Devanāgarī script. Old. Fair. Good writing.

The MS. contains also the text copied in the centre of pages.

This is a commentary on Appayadīkṣita's Siddhāntaleśasaṁgraha. The commentary is called Kṛṣṇālaṁkāra. The commentator Acyutakṛṣṇānandatīrtha was the pupil of Svayaṁprakāśānandasarasvatī who was the pupil of Advaitānandasarasvatī. He is known to have written the following other works: 1. Bhāmatīvyākhyā Bhāvadīpikā, 2. Bhāṣyaratnaprabhāvyākhyā (Nos. 458 and 482 respectively of this volume.) 3. Taittirīyopaniṣadvyākhyā Vanamālā and 4. Mānamālā. He is believed to have flourished towards the end of the 17th century A.D. The commentary was printed and published in the Advaitamañjarī Series, Kumbakonam.

Contains the first Pariccheda only.

Beginning:

वेदवेद्यमुमाकान्तं कुमाराभ्यामलंकृतम् ।
नन्दीशप्रमुखैः सेव्यं प्रणमामीष्टसिद्धये ॥ १ ॥
शंकरं शंकराचार्यं व्यासं नारायणात्मकम् ।

सरस्वतीं च ब्रह्माणं प्रणमामि पुनः पुनः ॥ २ ॥
गोविन्देति समाक्रन्द्य रक्षां प्राप भयातुरः ।
यं गजः करुणामूर्तिं गोविन्दं तं भजेऽन्वहम् ॥ ३ ॥
आपन्ना यं समाश्रित्य रक्षां प्राप सुदुर्लभाम् ।
कृष्णा कृष्णस्य महीषी कृष्णं तं संश्रयेऽन्वहम् ॥ ४ ॥
प्रकाशितब्रह्मतत्त्वं प्रकृष्टगुणशालिनम् ।
प्रणवस्योपदेष्टारं प्रणमाम्यनिशं गुरुम् ॥ ५ ॥
यो मे विश्वेश्वरक्षेत्रं विश्वेश्वरसमो गुरुः ।
समध्यास्ते स्वयंज्योतिर्वाणीसंज्ञो भजाम्यहम् ॥६॥
यस्य शिष्यप्रशिष्याद्यैर्व्याप्तेयं सांप्रतं मही ।
सर्वज्ञस्य गुरोस्तस्य चरणौ संश्रये सदा ॥ ७ ॥
गुरोरपि गरीयान्मे यः कलाभिरलंकृतः ।
अद्वैतानन्दवाण्याख्यस्तं वन्दे शमवारिधिम् ॥८॥
ओतप्रोतमिदं सर्वं यस्मिन् सच्चित्सुखात्मके ।
पर्यवस्यन्ति वेदान्ता यत्र चाहं तदक्षरम् ॥ ९ ॥
श्रीकृष्णचरणद्वन्द्वं प्रणिपत्य निबन्धनम् ।
व्याकुर्वे शास्त्रसिद्धान्तलेशसंग्रहसंज्ञितम् ॥ १० ॥
आचार्यचरणद्वन्द्वस्मृतिर्लेखकरूपिणम् ।
मां कृत्वा कुरुते व्याख्यां नाहमत्र प्रभुर्मतः ॥११॥

कुमाराभ्याम्-विघ्नेश्वरसुब्रह्मण्याभ्याम् । शंकरम्-शंकरस्य शिवस्यावताररूपम् । शंकराचार्यम्-भगवत्पादम् । तथाच शिवपुराणवचनम्—

व्याकुर्वन् व्याससूत्रार्थं श्रुतेरर्थं यथोचिवान् ।
श्रुतेर्न्याय्यः स एवार्थः शंकरः सवितानन: ॥

इत्यादि ।

End:

यथा चेति । सर्वेषां वेदान्तानामयमेव परमतात्पर्यविषयीभूतोऽर्थः, न तूपासनादिरिति प्रपञ्चितमित्यर्थः । अत्रापि कुतो न प्रपञ्च्यते ? तत्राह—विस्तरेति । ग्रन्थविस्तरभयादित्यर्थः ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानन्दसरस्वतीचरणारविन्दसंलग्नरजोभूतस्याच्युत-कृष्णानन्दतीर्थस्य कृतौ शास्त्रसिद्धान्तलेशसंग्रहव्याख्यायां प्रथमः परिच्छेदः समाप्तः ।

The text and commentary were printed and published in Telugu character also at Mysore in 1904.

1275 26. M. 31.

सिद्धान्तलेशसंग्रहव्याख्या कृष्णालंकारः—अच्युतकृष्णानन्दतीर्थकृतः

Palm-leaf. 44 Foll. $16\frac{1}{2} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Legible writing.

Contains the 4th Pariccheda without beginning. The colophon mentions the title of the commentary as Kṛṣṇālaṁkāra.

1276 9. J. 18.

सिद्धान्तसिद्धाञ्जनम्—कृष्णानन्दयतिकृतम्

Paper. 1085 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. Old. Injured. Good writing.

Bound in three volumes. The first volume contains 456 Foll. the second 250, and the third 379.

This is an original treatise expounding the principles of the Advaita Vedānta. The author attemts to criticize the views of other schools of Vedānta and to maintain the views of Advaita-Vedānta as held by S'rī S'aṁkarācārya and his followers,

The author Kṛṣṇānandasarasvatī was the pupil of Rāmabhadrānandasarasvatī in Vedānta and Vāsudevendrasarasvatī in regard to the Saṁnyāsaśrama. He also salutes Svayaṁprakāśānandasarasvatī. The verses found at the end give the following list of the successive teachers in Advaita Vedanta: 1. Prakāśānanda, 2. Advaitānanda, 3. Sadānanda, 4. Nārāyaṇasarasvatī, 5. Padmanābhasarasvatī, 6. Pūrṇānanda, 7. Gopālasarasvatī, 8. Svayaṁprakāśānanda, 9. Vāsudevendra, 10. Rāmabhadrayogīndra and 11. Kṛṣṇānandasarasvatī (the author). The author must have belonged to the 17th century A.D.

The work was printed and published in the Trivandrum Sanskrit Series No. 47 in 1916.

Contains the Jijñasāsūtra (1-1-1).

Beginning:

जगज्जन्मस्थेमाप्ययनियमसीमादिमगुरु-
र्विचेयो योगेनानिदमुदयवाचामवधिषु ।
प्रकाशानन्दात्मा परिमुषितनिःशेषकलुष-
स्त्रिभेदातीतो धीनटनचटुसाक्षी विजयते ॥ १ ॥
स्वालोकक्षणविप्लुतस्वपरधीभेदेऽन्यराजन्यके
साकूतस्मितविभ्रमाञ्चितमुपायान्त्या निजस्यन्दनम्।
रुक्मिण्या मिषति त्वशेषदिविषद्वर्गे रथारोपण-
व्याजालिङ्गनतो हरेरवतु नः स्तैमित्यमानन्दजम् ॥
परिचयमुपयामो भारतीपादपद्मे
यदुपनिहितलाक्षापङ्कलक्षण्यमुद्रा ।
प्रणयकलहनम्रे पद्मभूमौलिदेशे
प्रथमशरविलासं पञ्चबाणस्य धत्ते ॥ २ ॥
ये वेदान्तसुधोदधिं सुमनसां निःश्रेयसाय स्वयं
निर्मथ्योदहरन्निरूपणगुणावृत्तेन चेतोमथा ।
अद्वैतामृतमासुरानुशयिनामास्वादनीयेतरं
तानस्माकगुरोरुपैमि भगवत्पादादिमान् देशिकान् ॥
संपद्यन्ते सरसिरुहभूसंपदः किंपचाना
लिम्पन्त्यन्तःकरणमिह यन्नैव नैलिम्पभोगाः ।
संपत्सा नः समजनि यतः सानुकम्पैरपाङ्गै-
स्तं पर्येमि प्रणतिभिरहं वासुदेवं यतीन्द्रम् ॥ ९ ॥
सन्तः सन्तु सहस्रहशः समदृशः सर्वप्रियंभावुका
जागर्ति त्रिजगद्गुरुर्मनसि नः श्रीरामभद्रो यमी ।
औदासीन्यमनादृतावधि दया सान्द्रा धुताधिः शमः
शब्दब्रह्म परं च यस्य विषये लोकोत्तरं वर्तते ॥ ६ ॥
श्रीपरहंसवतंसं चतुराननन्यदिव्यगतिशीलम् ।
श्रीमत्स्वयंप्रकाशं परमगुरुं नौमि योगीशम् ॥ ७ ॥
येन ज्ञानदृगञ्जिता न रजसा संक्षुभ्य संक्षिप्यते
शश्वत्पश्यति शान्तसंततततमःप्रत्यूहमन्तर्हितम् ।
तृष्णादूषिकया न दुष्यति न वा निद्राति तत्तादृशं
कृष्णानन्दसरस्वती वितनुते सिद्धान्तसिद्धाञ्जनम् ॥
मृषोत्कर्षश्लाघारभसमविषोढा समयिना-
मनारूढं दोषं सदसि परिहस्ये परिहरन् ।
तथापि त्रय्यन्तप्रवणभगवत्पादसरणौ
यते मादृङ्मन्दप्रकृतिमतिभेदं शमयितुम् ॥ ९ ॥
पुरोभागी भागी पुरुषपशुतायामगुणवित्
समस्तो नाम स्तादपि किमियता नः सुवचसाम् ।
स चापि स्यादेकः क्वचिदपि गुणज्ञो गुणवता-
मपर्यन्तानन्ता निरवधिरनेहापि भगवान् ॥ १० ॥
इह मम कृतबुद्धयो निबन्धे
धियमवधाय निगूढभावबन्धे ।
गुणमभिदधतामथागुणं वा
द्वितयमभावविदोदितं दुनोति ॥ ११ ॥
प्रगल्भन्ते येषां प्रकृतिमुषिताशेषकलुषा
धियः शास्त्राम्भोधौ जगति ऋजवस्ते कतिपये ।

ममामीषामञ्चन्मतिमुकुरबिम्बेषु महतां
निबन्धः संधत्तामनिशमनुबिम्बव्यतिकरम् ॥ १२ ॥

इह खलु तावदतीतानेकभवपरंपरासमर्जितसुकृतसंपदावर्जितभगवदनुग्रहासादितसत्त्वप्रसादतया संपन्नविवेकवैराग्यादिसाधनो मात्रयापि दुःखानुषङ्गदविष्टां पुरुषार्थकाष्ठामभिलषंस्तदुपायं पर्येषमाणो यद्यधीतसाङ्गस्वाध्यायः स्यात् तत एव तदुपायमात्मतत्त्वज्ञानमधिगम्य जिज्ञासते ।

End :

वाचालयति यः सर्वं सर्वभूतगुहाशयः ।
वासुदेवो निबन्धं मे क्षमात्मा सुसमीक्षताम् ॥
सन्तो ये गुणयन्ति दोषमपि ते दूरे गिरां मादृशा-
मुच्यन्ते सुजनेषु तेऽपि सगुणं मन्यामहे तानपि ।
ये दोषं प्रथयन्ति साधुषु मुदा तानञ्जसा सज्जन-
द्रोही यद् द्रुहिणो व्यजीजनदिदं त्वेकं न मृष्यामहे ॥
प्रगल्भन्ते येषां प्रकृतिमुषिताशेषकलुषा
धियः शास्त्राम्भोधौ जगति ऋजवस्ते कतिपये ।
ममामीषामञ्चन्मतिमुकुरबिम्बेषु महतां
निबन्धः संधत्तामनिशमनुबिम्बव्यतिकरम् ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यवर्यश्रीभगवद्रामभद्रानन्दसरस्वतीश्रीगुरुचरणपरिचरणावाप्तविद्येन श्रीवासुदेवेन्द्रसरस्वतीचरणप्रसादासादितपारिव्रज्येन श्रीकृष्णानन्दयतिवरेण विरचिते सिद्धान्तसिद्धाञ्जने जिज्ञासासूत्रविवरणलिखितः ।

Then reads the following stanzas :

त्रयीसीमन्तिनीकान्तसीमन्तमणिमञ्जरीम् ।
अरविन्दभुवो दारानुदारानुपमन्महे ॥
श्रीपारिव्रज्यसाम्राज्यलक्ष्मीललितमूर्तये ।
वासुदेवयतीन्द्राय गुरवे करवै नमः ॥
जडीकृतजगत्यन्तस्तमःसंभेदकर्मणे ।
रामभद्रयतीन्द्राय महते महसे नमः ॥
श्रीपरमहंसधुरीणं चतुराननन्नित्यनव्यदिव्यगतिम् ।
श्रीमत्स्वयंप्रकाशश्रीचरणं परममानतोऽस्मि गुरुम् ॥
प्रकाशानन्दयोगीन्द्रा अद्वैतानन्दयोगिनः ।
वेदान्तसारकर्तारः सदानन्दाख्ययोगिनः ॥
नारयणसरस्वत्यः सदा नारायणप्रियाः ।
पद्मनाभसरस्वत्यः पूर्णानन्दमुनीश्वराः ।
गोपालभक्तिनिष्णाताः श्रीमद्गोपालयोगिनः ।
स्वयंप्रकाशमुनयः सर्वभूतसुहृत्तमाः ।
श्रीवासुदेवेन्द्रयोगीन्द्राः सर्वसद्गुणशालिनः ।
सर्वशास्त्रप्रणेतारः श्रीकृष्णानन्दयोगिनः ।
संप्रदायविदस्त्वेवं प्राहुर्गुरुपरंपराम् ॥

1277 26. M. 29.

सिद्धान्तसिद्धाञ्जनम्—कृष्णानन्दसरस्वतीकृतम्

Palm-leaf. 84 Foll. 15¼ × 1½ inches. 11 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

1278 39. G. 15.

सिद्धान्तसिद्धाञ्जनव्याख्या रत्नतूलिका—भास्करदीक्षितकृता

Paper. 1224 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in five valumes. The first volume contains 216 Foll. Second 224, third 252, fourth, 276 and the fifth 256. The Ratnātūlikā is a commentary on Kṛṣṇānandasarasvatī's Siddhāntasiddhāñjana described in the last number. The

commentator Bhāskaradīkṣita was the son of Veṅkaṭapatiyajvan of Hārītagotra and the pupil of Kṛṣṇānandasarasvatī (the author of the text) and Vijayarāghava-sāstrin. He was one of the donees of the village called Tiruvasanallur in Tanjore Dt. given by the King Sāhaji I who ruled Tanjore between 1684 to 1711 A.D. Therefore Bhāskaradikṣita must have flourished in the latter part of the 17th century A.D.

Incomplete.

Beginning :

यत्सद्बोधसुखैकरूपमखिलं विश्वात्मना भासते
सृष्टिस्थेमलयैर्विरिञ्चमुरभिद्रुद्रादिसंज्ञान्वितः ।
प्रत्यग्रूपतया च यद्वयवसितं वेदान्तवाक्यैर्महे-
ज्ज्योतिस्तत्समुपास्महे गणपतिं देव्या समालिङ्गितम् ॥
यस्याः कटाक्षलेशेन मूकस्यापि प्रगल्भता ।
जायते सर्वशास्त्रेषु भारतीं तां नमाम्यहम् ॥ २ ॥
कर्पूरगौरवपुषं कलितेन्दुमौलिं
कान्ताजनेन कबलीकृतवामभागम् ।
कन्दर्पदर्पमथने कृतलीलमाद्यं
कारुण्यवारिधिमहं कलयामि चित्ते ॥ ३ ॥
यद्दीक्षाविषयं विनैव विमतिं प्रीत्या भजन्ते स्वयं
लक्ष्मीकीर्तिसरस्वतीधृतिदयाह्रीशान्तिदान्त्यादयः ।
कृष्णानन्दसरस्वतीशमधनश्चित्ते मदीये शुभे
नित्यं संनिहितोऽस्त्वसौ मम गुरुर्ध्वान्तापनुत्त्यै विभुः ॥
यदुपदेशवशान्मम शेमुषी गहनमर्थमपि स्फुटयत्यसौ ।
विजयराघवशास्त्रिणमाश्रये गुरुमहं तमशेषगुणाकरम् ॥
ग्रामे पल्लुकचेरिनाम्नि महिते विद्वज्जनालंकृते
यज्वा याजयिता च वेंकटपतिर्नाम्ना शिवे भक्तिमान् ।
अस्ति श्रीहरितान्वये समुदितः श्रुत्यर्थनिर्णायकः
सूत्रेषु त्रिषु कल्पसंज्ञिषु पटुः स्मृत्यर्थविज्ञाग्रणीः ॥
तत्सूनुर्विवृणोत्येष सिद्धाञ्जनकृतिं गुरोः ।
सर्वतोमुखयागस्य कर्ता भास्करदीक्षितः ॥ ७ ॥

इह खलु तावत् पथित्रयगतागतपरिखिन्नां भवाब्धिनिमग्नां जगतीमुद्दिधीर्षुर्भगवान् परमेश्वरः

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥

इति स्वप्रतिज्ञातार्थपरिपालनाय श्रीकृष्णानन्दसरस्वतीगुरुरूपेणोर्व्यामवतीर्णः

End :

असन्तमिति । मूलबाधितत्वेन पुनर्भ्रमायोग्यत्वमुक्तम् । इत्याद्याः स्मृतयोऽपि निर्विशेषं ब्रह्माद्वितीयं प्रतिपादयन्तीति संबन्धः ।

1279 34. O. 25.

सृष्टिक्रमः

Palm-leaf. 5 Foll. 9¼ × 1⅛ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Deals with the creation of the world according to the view of the school of Advaita-Vedānta. It is said that this portion forms the 8th adhyāya of the Vāyusaṁhitā.

Complete.

Beginning :

लोकोत्तरोत्तरमनोरथवैभवस्य
यस्यैव शक्तिशकलैः सकलः समाप्तः ।
अध्वानमध्वपतिमध्वविदो वदन्त-
स्तस्मै नमः सकललोकविचक्षणाय ॥

वायुः—

पुरुषाधिष्ठितात्पूर्वमव्यक्तादीश्वराज्ञया ।

बुद्ध्यादयो विशेषान्ता विकाराश्चाभवन्क्रमात् ॥
ततस्तेभ्यो विकारेभ्यो रुद्रविष्णुपितामहाः ।
जगतः कारणत्वेन त्रयो देवा विजज्ञिरे ॥

End :

महेश्वरः परोऽव्यक्ता . . . व्यक्तसंभवम् ।
अजाज्ञे विभुर्ब्रह्मा लोकास्तेन कृतास्त्विमे ॥

Colophon :

इति वायव्यसंहितायामष्टमोऽध्यायः ।

1280 19. H. 10.

सृष्टिप्रक्रिया

Palm-leaf. 4 Foll. 16 × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Describes the method of creation of the world according to the view of the school of Advaita-Vedānta. The author's name is not known.

Complete.

Beginning :

अथ सृष्टिप्रक्रिया वक्ष्यते । अस्याः सृष्टेः पूर्वं सत्यज्ञानानन्दस्वरूपप्रत्यग्ब्रह्मात्मन्यध्यस्तेनानादिना त्रिगुणात्मकेन साभासेनानिर्वचनीयेन मिथ्याभूतेन स्वशक्त्याव्याकृते सृष्टमिदं सर्वम् । अस्याव्याकृतस्य लक्षणम् । प्रकृतिरेव सत्त्वगुणविजृम्भितेन मायेत्युच्यते । अस्यां मायायां प्रतिबिम्बितचैतन्यमपि सा । तस्या मायाया अधिष्ठानचैतन्यमपि । इदं त्रयमोघभूतः सन् अव्याकृत इति गदितः ।

End :

अथ व्यष्टिसमष्ट्योर्लक्षणमुच्यते । व्यष्टिरिति किम् । समष्टिरिति किम् । एकैका व्यष्टिरित्युक्ता । सर्वमोघीभूता सती समष्टिरित्युच्यते । किंच व्यष्टिसमष्ट्योर्दृष्टान्तमुच्यते । वनस्यैकवृक्षे व्यष्टिरिति संज्ञा । सकलवृक्षेष्वपि समष्टिरिति संज्ञोच्यते । प्रसङ्गेनात्रागतसृष्टिप्रक्रिया समाप्ता ।

1281 8. G. 43.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Paper. 2 Foll. 6⅜ × 4 inches. 19 lines in a page. Telugu script. Old. Fair. Good writing.

Five verses showing step by step the means of Mokṣa. The work is attributed to the famous S'rī S'aṁkarācārya. The work is variously called as Sopānapañcaka, Sādhanapañcaka, Upades'apañcaka, Abhyāsapañcaka, Pañcaratna and Advaitapañcaratna. There are many printed editions of this work.

Complete.

Beginning :

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम् ।
पापौघः परिधूयतां भवसुखे दोषोऽनुसंधीयता-
मात्मेच्छा व्यवसीयतां निजगृहात्तूर्णं बहिर्गम्यताम् ॥

End :

एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम् ।
प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरे श्लिष्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं सोपानपञ्चकं समाप्तम् ।

1282 9. B. 23.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Paper. 1 Foll. 6 × 4 inches. 18 lines in a page. Telugu script. Old. Fair. Good writing.

Complete.

The colophon mentions the name as Sopānapañcaka.

1283 9. F. 43.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Paper. 1 Foll. 8 × 6½ inches. 32 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The colophon mentions the name as Sopānapañcaka.

1284 9. G. 50.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Paper. 1 Foll. 12¾ × 5½ inches. 15 lines in a page. Devanāgari script. Old. Injured. Good writing.

Complete.

The colophon calls the work Sopānapañcaka.

1285 19. H. 9.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Palm-leaf. 3 Foll. 9 × 1¼ inches. 4 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

The colophon calls the work Sopānapañcaka.

1286 19. P. 2.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Palm-leaf. 2 Foll. 7 × 1¾ inches. 13 lines in a page. Grantha script. Old. Injured. Illegible writing.

Complete.

The title of the work is mentioned as Abhyāsapañcaka in the margin.

1287 20. G. 72.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Palm-leaf. 1 Foll. 16½ × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Clear writing.

Complete.

The colophon calls the work as Sopānapañcaka.

1288 22. P. 7.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Palm-leaf. 20 Foll. 14¼ × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the commentary also which mentions the text as Advaitapañcaratna.

Complete.

1289 25. L. 23.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Palm-leaf. 1 Foll. 14½ × 1¼inches. 6

lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The colophon calls the work as Sādhanapañcaka.

1290 25. M. 6.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Palm-leaf. 1 Foll. $16\frac{1}{2} \times 1\frac{1}{2}$ inches. 13 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

The work is mentioned as Sopānapañcaka in the colophon.

1291 25. N. 11.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Palm-leaf. 1 Foll. $15 \times 1\frac{1}{8}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

The title of the work is mentioned as Sopānapañcaka in the margin.

1292 25. O. 9.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Palm-leaf. 1 Foll. $13\frac{1}{2} \times 1\frac{1}{8}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The work is called as Sādhanapañcaka in the colophon.

1293 30. G. 13.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Palm-leaf. 2 Foll. inches. 7 lines in a page. Grantha script. Old. Injured. Clear writing.

Complete.

The work is called as Sopānapañcaka in the colophon.

1294 33. K. 3.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Palm-leaf. 2 Foll. $8\frac{1}{2} \times 2$ inches. 13 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The colophon calls the work as Sādhanapañcaka.

1295 34. O. 25.

सोपानपञ्चकम्—शंकराचार्यकृतम्

Palm-leaf. 2 Foll. $9\frac{1}{2} \times 1\frac{1}{2}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The work is called as Upadeśapañcaka.

1296 22. P. 7.

सोपानपञ्चकव्याख्या किरणावली—बालकृष्णानन्दसरस्वतीकृता

Palm-leaf. 20 Foll. $13\frac{3}{4} \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

This is a commentary on Sri Śaṁkarācārya's Sopānapañcaka described in the

last number. The commentary is called Kiraṇāvalī. The author Bālakṛṣṇānanda-sarasvatī was the pupil of Saccidānanda-sarasvatī who was the commentator on Bhodhāryā and S'rutisārasamuddharaṇa. The author salutes Vāsudevendrayogin in one of the introductory verses probably as his another teacher. He calls the text as Pañcaratna or Advaitapañcaratna.

Complete.

Beginning :

मन्दस्मितमुखाम्भोजं रामालंकृतवक्षसम् ।
वन्दारुजनमन्दारं वन्देऽहं रघुनन्दनम् ॥
पुण्डरीकाजिनधरं विलसत्फाललोचनम् ।
ज्ञानमुद्राञ्चितकरं दक्षिणामूर्तिमाश्रये ॥
यत्प्रसादप्लवं प्राप्य प्रत्यूहजलधिं जनाः ।
महारम्भास्तरन्त्येतं विघ्नेशमनिशं नुमः ॥
यां श्रियं नगजां वाचां देवीमाहुर्विचक्षणाः ।
तां लोकमातरं वन्दे वाग्विभूतिप्रसिद्धये ॥
यदीयसूत्रविलसच्छास्त्रनावा भवाम्बुधिम् ।
सन्तस्तरन्ति तं वन्दे पाराशर्यमहर्निशम् ॥
यदीयभाष्यकमलस्यन्दमानमरन्दतः ।
विद्वद्वृन्दस्तृप्तिमेति शंकरं तमुपाश्रये ॥
यस्य प्रसादकणिकानौका तारयते नतान् ।
संसारसिन्धुं तं वन्दे सच्चिदानन्दयोगिनम् ॥
यस्योपदेशमाहात्म्याज्जडा अपि विनिर्गताः ।
संसारबन्धात्तं वन्दे वासुदेवेन्द्रयोगिनम् ॥
काहं क्व भगवत्पादकृतिर्गाम्भीर्यजन्मभूः ।
तथाप्यत्रावगाहं मे काङ्क्षते खलु मानसम् ॥
महतां पक्षपातेन दुःसाधेऽप्यर्थकल्पने ।
मम सामर्थ्यमस्त्येव टिट्टिभोऽत्र निदर्शनम् ॥
गुरुपादाम्बुजद्वन्द्वध्याननिर्मलमानसः ।
आरभे पञ्चरत्नस्य विवृतिं किरणावलीम् ॥

अथ खलु परमकृपालवो भगवत्पादा निखिललोकं संसारदावानलपरिपीडितमुपलभ्यात्मज्ञानामृतमेव तदुपशमनं सुखसाधनं चाहुः । युक्तं च तत्, तस्यैव तन्मूलाविद्यानिवर्तकत्वात् ।

Then reads on the fourth page the following lines :

सिद्धान्तगम्भीरात्प्रस्थानत्रयपयोनिधेः पञ्चरत्नमद्भुतमाददुः । तत् स्वभावतः सरलमपि केषांचिन्मन्दमतीनां तदर्थाविष्करणाय प्रयतामहे । शास्त्रस्य तत्त्वबुभुत्सुकथारूपत्वात् तदेकदेशभूतस्य तत्प्रकरणत्वात् प्रकरणस्य च बालाधिकारितया बालस्य च जन्मान्तरसुकृतमहिम्ना तज्जन्मतरणोपायजिज्ञासासंभवात् तादृशमेवावनतं शिष्यं गुरुरुपदिशति । सोपानारोहणन्यायेन पुरुषार्थसाधनानि क्रमेणोपदिदिक्षुः वेदो नित्यमित्यादिनोपदिशति । बालस्यादितः कर्म निर्दिशति—वेद इति ।

End :

अज्ञातं ब्रह्मतत्त्वं ये ज्ञातुं वाञ्छन्ति ते बुधाः ।
समाश्रयन्तु सततं किरणावलिमादरात् ।
मदीयकृतिमध्ये यो दूषणं भूषणं जनः ।
विचार्यैव वदेत्तस्मै महते विदधे नमः ॥

Colophon :

इति श्रीपरहंसपरिव्राजकाद्वैतविद्याचार्यवर्यश्रीमत्सच्चिदानन्दयोगीन्द्रचरणकमलयुगलभृङ्गायमाणबालकृष्णानन्दसरस्वतीविरचिताद्वैतपञ्चरत्नव्याख्या किरणावलीसमाख्या संपूर्णा ।

1297 34. D. 16.

स्वरूपदर्शनसिद्धाञ्जनम्—रामब्रह्मेन्द्रयोगिकृतम्

Palm-leaf. 18 Foll. $15\frac{1}{2} \times 1\frac{1}{2}$ inches.

8 lines in a page. Grantha script. Old. Injured. Good writing.

Begins on Fol. 59 and ends on Fol. 76.

This is a metrical work dealing with the nature and characteristics of the soul. The author Rāmabrahmendrayogin was the pupil of Rāmacandrendrayogin.

Complete.

Beginning :

यस्यैकदेशे वियदादि विश्वं
जन्म स्थितिं भङ्गमुपैति शश्वत् ।
अंशांश्यभावाद्यदखण्डसौख्यं
तद्ब्रह्म रामाख्यमहं प्रपद्ये ॥ १ ॥
नत्वा श्रीगुरुपादाब्जं यमिनां नियतात्मनाम् ।
योगद्वयसुनिष्पन्नसमाधिः प्रोच्यते मया ॥ २ ॥
सदेहादेहमुक्त्योश्च सरूपारूपनाशयोः ।
निर्विकल्पसमाध्योस्तज्ज्ञानमेव हि साधनम् ॥ ३ ॥
प्रत्यक्परैक्यविज्ञानजन्मने साधनद्वयम् ।
सिद्धन्तश्रवणं पश्चान्मननं तदनन्तरम् ॥ ४ ॥
निदिध्यासनमित्याद्यं ज्ञानसाधनमीरितम् ।
यमाद्यष्टाङ्गयोगाख्यं द्वितीयं साधनं भवेत् ॥ ५ ॥
सत्कुलीनो द्विजो विद्वान्नित्यकर्मपरायणः ।
आदौ साधनसंपत्तिमभ्यस्य तदनन्तरम् ॥ ६ ॥
वेदान्तश्रवणार्थी सद्गुरुं ब्रह्मविदं व्रजेत् ।
स्वसंशयविपर्यासनिवृत्त्यन्तं गुरोर्मुखात् ॥ ७ ॥
शृणुयात्सर्ववेदान्तरहस्यार्थं मुहुर्मुहुः ।
ततः स्वगृहमभ्येत्य स्वाश्रमाचारसंयुतः ॥ ८ ॥

End :

समाध्यभाववेलायां मरणं यदि लभ्यते ।
तस्योत्क्रान्तिर्भवत्येव ब्रह्मलोकं स गच्छति ॥ ३२१ ॥
तत्र वा भुवि वा जन्म लब्ध्वा लोकैकपावनम् ।
तेजोमयं नृभिः सेव्यं योगसंसिद्धिभाजनम् ॥ ३२२ ॥
जीवन्मुक्तश्चरन्तुर्व्यां पूर्वजन्मसुसेविते ।
सहस्रारगते तुर्यतुर्ये सर्वं विलाप्य सः ॥ ३२३ ॥
विदेहमुक्तिमापन्नो योगी ब्रह्मैव जायते ।
प्रतिबन्धज्ञानयोगसमुच्चयविधानतः ॥
द्वितीयं साधनं प्रोक्तं ज्ञानस्य श्रुतिसंमतम् ॥ ३२४ ॥

Colophon :

रामचन्द्रेन्द्रसच्छिष्यरामब्रह्मेन्द्रयोगिना ॥
स्वरूपदर्शनस्यास्य सिद्धाञ्जनमिदं स्फुटम् ।
कृतं लोकोपकाराय तद् गृह्णन्तु मुमुक्षवः ॥
यस्त्वभ्यासं करोत्येवमचिरात् सिद्धिभाग्भवेत् ।
यः श्रद्धया पठेन्नित्यमनुसंधानपूर्वकम् ।
एकेन जन्मना योगी भूत्वा कैवल्यमश्नुते ॥

1298 19. H. 9.

स्वरूपानुसंधानाष्टकम्—शंकराचार्यकृतम्

Palm-leaf. 2 Foll. 9 × 1⅜ inches. 5 lines in a page. Telugu script. Old. Injured. Good writing.

Eight stanzas written in Bhujaṅgaprayāta metre on the subject of Self-realization. The work is attributed to S'rī S'aṁkaracārya.

Complete.

Beginning :

तपोयज्ञदानादिभिः शुद्धबुद्धि-
र्विरक्तोऽप्रजातिः फले तुच्छबुध्या ।
परित्यज्य सर्वं यदाप्नोति तत्त्वं
परं ब्रह्म नित्यं तदेवाहमस्मि ॥

End :

यदानन्दसिन्धौ निमग्नः पुमान् स्या-
दविद्याविलासः समस्तः प्रपञ्चः ।

तदा न स्फुरत्यद्भुतं यन्निमित्तं
परं ब्रह्म नित्यं तदेवाहमस्मि ॥
स्वरूपानुसंधानरूपां स्तुतिं यः
पठेदादराद्भक्तिभावैर्मनुष्यः ।
शृणोतीह वा नित्यमुद्युक्तचित्तो
भवेद्विष्णुरत्रैव वेदप्रमाणात् ॥

Colophon :

इति स्वरूपानुसंधानाष्टकं संपूर्णम् ।

1299 25. L. 23.

स्वरूपानुसंधानाष्टकम्—शंकराचार्यकृतम्

Palm-leaf. 2 Fol. 15 × 1⅛ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The colophon mentions the work as Svarūpānusaṁdhāna.

1300 25. M. 6.

स्वरूपानुसंधानाष्टकम्—शंकराचार्यकृतम्

Palm-leaf. 1 Fol. 16 × 1½ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

Adds in the beginning the following verse from the Ātmabodha.

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥

1301 19. P. 2.

स्वात्मप्रकाशिका—शंकराचार्यकृता

Palm-leaf. 5 Foll. 6¾ × 2 inches. 14 lines in a page. Grantha script. Old. Injured. Good writing.

This is a short metrical Prakaraṇa work explaining the nature and characteristics of the soul which is distinct from the body and senses and identical with the Supreme Brahman according to Advaitic view of Vedānta.

Complete in 98 verses.

Beginning :

जगत्कारणमज्ञानमेकमेव चिदन्वितम् ।
एकमेव मनःसाक्षी जानात्येवं जगत्त्रयम् ॥ १ ॥
विवेकयुक्तबुध्याहं जानाम्यात्मानमद्वयम् ।
तथापि बन्धमोक्षादिव्यवहारः प्रतीयते ॥ २ ॥
विवर्तोऽपि प्रपञ्चो मे सत्यवद्भाति सर्वदा ।
इति संशयपाशेन बद्धोऽहं छिन्द्धि संशयम् ॥ ३ ॥
एवं शिष्यवचः श्रुत्वा गुरुराहोत्तरं स्फुटम् ।
नाज्ञानं न च बुद्धिश्च न जगन्न च साक्षिता ॥ ४ ॥
बन्धमोक्षादयः सर्वे कुतः सत्येऽद्वये त्वयि ।
भातीत्युक्ते जगत्सर्वं भानं ब्रह्मैव केवलम् ॥ ९ ॥

End :

मूढबुद्धिपरिव्याप्तं दुःखानामालयं सदा ।
बाल्यं रोदनशीलं तन्न मे सुखजलाम्बुधे ॥ ९७ ॥
एवं तत्त्वविचाराब्धौ निमग्नानां सदा नृणाम् ।
परमाद्वैतविज्ञानमपरोक्षं न संशयः ॥ ९८ ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यभगवत्पादविरचितस्वात्मप्रकाशिका संपूर्णा ।

1302 22. D. 88.

स्वात्मप्रकाशिका—शंकराचार्यकृता

Palm-leaf. 6 Foll. 17½ × 1⅛ inches.

5 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

1303 28. F. 42.

स्वात्मप्रकाशिका—शंकराचार्यकृता

Palm-leaf. 4 Foll. 15½ × 1½ inches. 8 lines in a page. Grantha script. Old. Fair. Good writing.

Complete.

Adds the following extra verse at the end:

जाग्रत्स्वप्नसुषुप्तियोगसमये स्वात्मानिशं वर्तते
स्वप्ने स्थूलशरीरनाशनमभूत्सुप्तौ च सूक्ष्मा तनुः।
लुप्ता कारणगात्रहानिरभवद्योगे तदङ्गत्रयं
दृश्यानित्यजडात्मकं तु न तथा स्वात्मा स एवास्म्यहम्॥

Reads the following colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादकृतिषु स्वात्मप्रकाशिका संपूर्णा।

1304 19. J. 2.

स्वात्मसाक्षात्कारोपदेशः

Palm-leaf. 16 Foll. 16½ × 1¼ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves bear the serial numbers 293 to 308.

The work teaches how a man can obtain self-realization. The work seems to be a portion of a big Purāṇa or Saṁhitā work addressed by S'iva to Subrahmaṇya. The title Svātmasākṣātkāropades'alakṣaṇa is mentioned in the margin of the first page.

Incomplete.

Beginning:

अथान्यार्थं प्रवक्ष्यामि उपायं ते यतो गुह।
अग्राह्यस्यापि सूक्ष्मस्य सर्वदाव्यक्तनिष्कलम्॥
येन विज्ञायते सम्यग्यं ज्ञात्वा तु शिवो भवेत्।
न कस्यचिन्मयाख्यातं तद्विज्ञानं शृणुष्व मे॥
गुरोः परंपरायातमदृष्टं सर्ववन्दिभिः।
भवबन्धविमोक्षार्थं परमं सर्वभोगदम्॥
योऽसौ सर्वगतो देवः सर्वात्मा सर्वतोमुखः।
सर्वतत्त्वमयोऽचिन्त्यः सर्वस्योपरि संस्थितः॥
सर्वतत्त्वव्यतीतश्च वाङ्मनोनामवर्जितः।
सोऽहमेवमुपासीत निर्विकल्पेन चेतसा॥

End:

सर्वे विनाशकाभावान्मत्त एव पृथग्विधाः।
भावाभावविनिर्मुक्तोऽस्म्यहमेव शिवोऽव्ययः॥
योगसंन्यस्तकर्मा यो ज्ञानयोगान्न संशयः।
निर्विकल्पस्तथा नित्यमात्मानं पर्युपासते॥

1305 9. F. 43.

स्वात्मस्फूर्तिविलासः—त्यागराजकृतः

Paper. 2 Foll. 8¼ × 6½ inches. 33 lines in a page. Grantha script. Old. Injured. Good writing.

This is a metrical work dealing with self-realization in 37 verses. The author Tyāgarāja of Kās'yapagotra was the pupil of Ānandanātha and the author of the Upades'as'ikhāmaṇi No. 770 *ante*, Pañcakos'avimars'inī No. 872 *ante*, Saṁvits'sataka and some stotra works.

Complete.

Beginning:

वन्दे गुरुपदद्वन्द्वं वाञ्छितार्थप्रदायकम्।
वागीशविष्णुरुद्रेन्द्रवाचारम्भणहेतुकम्॥ १॥

स्वात्मस्फूर्तिविलासोऽयं स्वात्मानन्दजनप्रियः ।
स्वात्मसंवित्प्रकाशार्थं स्वात्मरूपेण कल्प्यते ॥ २ ॥
स्फूर्तिरूपेण तिष्ठामि सद्रूपः प्रलयस्य हि ।
आदावन्ते तथा मध्ये कटके हाटकं यथा ॥ ३ ॥
यथेक्षुदण्डे काण्डे च रसः पूर्णस्तथा स्थितः ।
तथा सर्वास्ववस्थासु तिष्ठामि सुखचिद्घनः ॥ ४ ॥

End :

सच्चिदानन्दरूपे तु माया सच्चित्सुखात्मिका ।
शार्करा लड्डुके यद्वच्छर्करारूपमेव हि ॥ ३६ ॥
एष ह्यानन्दनाथस्य पादपद्मोपजीविना ।
स्वात्मस्फूर्तिविलासाख्यो ग्रन्थो विरचितोऽव्ययः ॥

1306 28. J. 2.

स्वात्मानुभूतिमणिदर्पणः सव्याख्यः—वेंकटेशकृतः

Palm-leaf. 65 Foll. $11\frac{3}{4} \times 1\frac{1}{2}$ inches. 9 lines in a page Grantha script. Old. Injured. Good writing.

Svātmānubhūtimaṇidarpaṇa is a single verse dealing with self-realization, written in praise of Vidyā-S'aṁkaraguru by Veṅkaṭeśa of Koyampurī. The work is accompanied by a commentary written by the same author. The author was also called Ayyāttorais'āstrin. In the commentary the author explains the causes of Saṁsāra and Mokṣa. He refers to Ṇatvasamarthana of Appayadīkṣita and Ṇatvabādhāvidhūnana of Seṣādris'āstrin of Koliñjivāḍi. He also refers to Bodhendra's Nāmaratnākara.

Complete.

Beginning :

लक्ष्यालक्ष्यविहीनोऽपि यो लक्ष्यस्थलनर्तकः ।
स एव सद्गुरुर्ध्यानलक्ष्यो भवतु मे सदा ॥
प्रवृत्तिपदमाश्रित्य जीवेशजगदात्मकः ।
निवृत्तिपदमासाद्य यो ब्रह्मैव स पातु माम् ॥
बन्धमोक्षव्यवस्थाख्यनाट्यलीलां भजन्नपि ।
यो बन्धमोक्षरहितः स मे बन्धं व्यपोहतु ॥
वटमूलनिवासी यो दक्षिणामूर्तिसद्गुरुः ।
स एव मे सहायोऽस्तु वाक्यग्रन्थप्रवर्तने ॥
यो वर्णपदवाक्यानामर्थरूपी महेश्वरः ।
स एव मम जिह्वाग्रे स्थित्वा नृत्यतु संततम् ॥
अदृष्टवाक्यग्रन्थोऽपि वाक्यकर्ता भवन्नहम् ।
हसनीयोऽस्मि हा सम्यग्वाक्यग्रन्थप्रवर्तकैः ॥
प्रवृत्तोऽस्म्यहमज्ञानाद्वाक्यग्रन्थप्रवर्तने ।
वाक्यग्रन्थप्रवक्तारः क्षमन्तां मम साहसम् ॥
अथवा जातु ते हर्षमेव यास्यन्ति वा मयि ।
अवाक्यविदयं वाक्यमियद्वा कृतवानिति ॥

अत्र तावदात्रेयगोत्रजनितः कोयंपुरीनिवासी श्रीवेंकटेशाख्यः कश्चिदध्यात्मविद्याकविरनादिमायामोहपरिकल्पितबन्धमोक्षव्यवस्थान्यायनिष्कर्षरूपमहाचित्रमण्डपमध्यगतं स्वात्मानुभवमणिदर्पणाख्यं कंचिदेकं प्रकरणं कर्तुकामः सन् आदौ शिष्टाचारपरंपरया कर्तव्यत्वेन प्राप्तस्वेष्टदेवताप्रणामरूपमङ्गलाचारविधिसूचकं फालाक्षपदमेव पद्यादौ निधाय पूर्वोक्तबन्धमोक्षव्यवस्थान्यायनिष्कर्षविषयकबह्वर्थसाराभिप्रायगर्भितमात्मजिज्ञासुजनहृदयाभरणभूतं किंचिदेकं श्लोकरत्नमुत्पदयामास । प्रायशोऽस्य श्लोकस्य समीपान्वयत्वपदलालित्यसिद्धावपि तत्प्रतिपाद्यबन्धमोक्षव्यवस्थान्यायनिष्कर्षरूपविषयाभिप्रायकाठिन्याश्रयभूतत्वात् तद्विषयजिज्ञासुसौकर्याय श्लोककर्तैव किंचिद्व्याख्यानमालिखति ।

Fol. 7 reads the following verse of the text.

फालाक्षप्राड्विवाकः प्रबलतरमहाबन्धमोक्षव्यवस्थासंसिद्धिन्यायसिंहासनवरमधिरुह्यात्र निष्पक्षपातः ।

तत्तज्जीवाशयान्तःकलहदसुकृतापुण्यवाद्यैतदन्य-
प्रत्यक्साक्षिप्रवाचा विशदयति च यो बन्धमोक्षौ तमीडे॥

End:

स्वात्मानुभवमणिदर्पणप्रकरणस्य का वा मुख्याभिप्रायसीमेति चेत्, तत्तद्दृश्येषु तत्तन्मयस्थितविमलदृङ्मात्राकारेणैव सर्वदा यावत् स्थितिर्दृढनिश्चयानुभवसिद्धा भवति, सैव स्वात्मानुभवमणिदर्पणप्रकरणस्य मुख्याभिप्रायसीमेत्यभिप्रायः। इतः परं तु बन्धमोक्षव्यवस्थान्यायनिष्कर्षप्रदर्शनचातुर्याभिप्रायेण स्वात्मानुभवस्फुटीकरणपूर्वकं श्रीविद्यारण्यशंकरभगवत्पादाचार्यसमीडनानुष्ठानपर्यवसन्नं फालाक्षप्राड्विवाक इत्येतच्छ्लोकं कृतवतः कवेस्तदभिन्नदेहिनो मम चाशयस्य मुख्याभिप्रायसीमा कीदृशीति चेत्, तादृशमहामहिमामृताम्बुराशिस्वरूपश्रीमदाचार्यवर्यसमीडनाकारमहापुण्यकर्मविशेषेण समस्तदुरितकदम्बके निरवशेषतया निवर्तिते सति प्रागनाद्यविद्यारूपमहामोहचण्डालीप्रसवजनितदुःसंतानात्मकशुभाशुभकर्मजालमुख्यफलभूतसुखदुःखयोरुभयोरपि पूर्वोक्तसाम्यावस्थासिद्धौ तत्सिद्धिसाक्षित्वानुभवस्फुटीकरणेनास्माकमुदितादित्यप्रभेव मोक्षसाम्राज्यलक्ष्मीकटाक्षवीक्षणशोभा संततमपि पुरःस्थितैव भूयादिति श्लोकं कृतवतः कवेस्तदभिन्नदेहिनो मम चाशयस्य मुख्याभिप्रायसीमा प्रदर्शिता। स्पष्टमन्यत् श्लोकपदार्थजालमपीति व्याख्यापरिसमाप्तिः।

Colophon:

इति श्रीवेंकटेशाख्यसूरिविरचितो बन्धमोक्षव्यवस्थान्यायनिष्कर्षरूपमहाचित्रमण्डपमध्यगतस्वात्मानुभवमणिदर्पणाख्यप्रकरणप्रतिपादनविषयकश्लोकोऽयं सव्याख्यानः परिसमाप्तः।

अद्वैतपक्षकालक्ष्यत्वसाध्यकावाच्यत्वहेतुकानुमाननिराकरणनिपुणतमानां बद्धस्पर्धान्यविद्वद्वचनचयझरीच्छेदनोन्निद्रमेधाशिल्पानां सर्वज्ञशिखामणिनिजनिष्ठाकनिष्ठीकृतवसिष्ठादिशमधननिष्ठानाम् उपास्यदेवताकरुणापरिणामसमेधितनिरुपमनिःसीममहिमाभिरामाणां निजमुखारविन्दनिरर्गलप्रवहदपारकवितापारावारसकलदिग्विसृत्वरपूर्णचन्द्रचन्द्रिकाधवलायमानकीर्तिपुञ्जश्रीमद्योगीन्द्रवर्याण्यात्तोरेशास्त्रिवर्याणां कृतिरनवद्या संपूर्णा॥

The last page reads the following some Subhāṣita verses:

अयुक्तं युक्तं वा यदभिहितमज्ञेन विभुना
स्तुयादेतन्नित्यं जडमपि गुरुं तस्य विनुयात्।
विवित्सुर्नैःस्पृह्यं कथमपि सभायामभिनयेत्
स्वकार्यं संतुष्टे क्षितिभृति रहस्येव कथयेत्॥
इच्छेद्यस्तु सुखं निवस्तुमवनौ गच्छेत्स राज्ञः सभा
कल्यणीं गिरमेव संसदि वदेत्कार्यं विदध्यात्कृती।
अक्लेशाद्धनमार्जयेदधिपतेरावर्जयेद्वल्लुभान्
कुर्वीतोपकृतिं जनस्य जनयेत्कस्यापि नापक्रियाम्॥
गवाशनानां स शृणोति वाक्या-
न्यहं तु राजन् वचनं मुनीनाम्।
न तस्य दोषो न च सद्गुणो वा
संसर्गजा दोषगुणा भवन्ति॥

On extra leaf added in the beginning reads the following verses:

सौहार्दं खलु नौ परस्परमनोवेद्यं निरौपाधिकं
नैतज्जात्वपि याति देशसमयोत्कर्षेऽपि वर्षिष्ठताम्।
किं त्वैकाधिकरण्यमेतदुचितं दुष्टेन दिष्टेन नौ
नादिष्टं तदिदं समीकुरु सहावासेन मासत्रयम्॥
सर्वे खलास्तिलकयन्तु चिराय पृथ्वीं
यत्संभवो बहुमतेः सुजनेषु हेतुः।
घोरेषु घर्मदिवसेष्वतिवाहितेषु
छायाद्रुमान्मृगयते न हि कोऽपि मर्त्यः॥

1307 8. H. 55.

स्वानुभूतिप्रकाशः—सदाशिवब्रह्मेन्द्रसरस्वतीकृतः

Paper. 1 Fol. 9 × 7 inches. 22 lines lines in a page. Telugu script. Old. Injured. Good writing.

In 12 verses the work describes the nature and characteristics of the soul realized in the state of Jīvanmukti. The author Sadāśivabrahmendrasarasvatī was the pupil of Paramaśivendrasarasvatī.

Complete.

Beginning :

गौरीपतिभजनोद्गतविलोकनैकविषयपाशोऽहम् ।
देशिकवरकरुणोदितपरजीवात्मैक्यतत्त्वबोधोऽहम् ॥
प्रशमितनिजमायोऽहं प्रगलितजगदीशजीवभेदोऽहम् ।
प्रत्यगभिन्नलक्ष्योऽहं प्रविततसुखपूर्णसंविदेवाहम् ॥

End :

इति संततमनुभावितपरजीवात्मैक्यबोधतुहिनांशुः ।
अवधूयान्तरतिमिरं परशिवमेवाहं प्रकाशयति ॥१२॥

Colophon :

इति श्रीसदाशिवब्रह्मेन्द्रविरचितः स्वानुभूतिप्रकाशः समाप्तः ॥

1308 21. R. 6.

हरिहरभेदधिक्कारः—बोधेन्द्रसरस्वतीकृतः

Palm-leaf. 266 Foll. 12¾ × 2 inches. 12 lines in a page. Grantha script. Old. Fair. Good writing.

Wooden boards are added to both sides.

This is an original treatise on Advaita Vedānta attempting to refute the difference between Viṣṇu and Śiva and prove that both are identical. The author quotes passages from the works of Śrī Śaṁkarācārya, Appayadīkṣita and Haradatta. The work contains five Paricchedas. The author's name is not mentioned in the MS. However as Viśvādhikasarasvatī is mentioned here as the author's teacher and as some of the introductory verses of this work are identical with those of Bodhendra's Nāmāmṛtarasodaya (R. No. 42 of the Madras Govt. Oriental MSS. Library) it is presumed that the author must be Bodhendrasarasvatī, the pupil of Viśvādhikasarasvatī.

Complete.

सदानन्दैकरूपाय सर्गस्थित्यन्तकारिणे ।
सर्वान्तर्यामिणे तुभ्यं श्रीरामायात्मने नमः ॥
सर्वेश्वरोऽपि प्रेम्णा यं भजते राघवं परम् ।
तं वन्दे जानकीजानिं करुणामृतवारिधिम् ॥
सर्वोपनिषदामर्थं सच्चिदानन्दविग्रहम् ।
चिन्मुद्राशोभितं कृष्णं वन्देऽहं पार्थसारथिम् ॥
भूमानन्दं परं दैवं सर्वान्तर्यामिणं शिवम् ।
वन्दे विज्ञानदातारं वटमूलनिवासिनम् ॥
यत्कृपालवमात्रेण मूकः सर्वज्ञतामियात् ।
श्रीमद्विश्वाधिकगुरून् वन्दे तान्करुणानिधीन् ॥
वेदान्तार्थाभिधानेन सर्वानुग्रहकारिणम् ।
यतिरूपधरं नौमि शंकरं लोकशंकरम् ॥
विघ्नेशं विघ्नहर्तारं भक्ताभीष्टविधायिनम् ।
सर्वशास्त्रमयीं देवीं भारतीं च समाश्रये ॥
श्रीरामकृपादृष्टिज्ञानबलप्रभृतिसाम्यमैक्यं च ।
कथयन्तं हरिहरयोः कुरुते हरिगिरीशभेदधिक्कारम् ॥

इह खलु धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थेषु यत्किंचित्पुरुषार्थार्थिनां सर्वेषां विष्णुशिवयोर्भेदबुद्धिराहित्यमावश्यकमेवेत्याशयेन भगवद्भिः सर्वशास्त्रार्थ-

संप्रदायप्रवर्तकैः शिष्टाग्रगण्यैर्दयामयतनुभिः श्रीभगवत्पादाचार्यैः सहस्रनामभाष्यादिषु विष्णुशिवयोरभेदः सम्यक्प्रतिपादितः ।

End:

जगदुदयलयादेः कारणं यो हि रामो
मुरपुरहरयोस्तद्रूपयोः सर्वदैक्यम् ।
निरुपमसुखसच्चिन्मूर्तिरूपेण भेदः
सकलगुणसमूहैः सर्वदा साम्यमेव ॥
इति दृढतरबुद्धिः सर्वसौख्यैकहेतुः
सकलनिरयहेतुस्तारतम्यादिबुद्धिः ।
इति निगमपुराणन्यायसंसाधितार्थो
निपुणतरमिहोक्तः पञ्चमे साधुतुष्ट्यै ॥
पञ्चमेऽस्मिन् परिच्छेदे प्रतिपाद्यः परेश्वरः ।
श्रीरामो नीरदश्यामः सदा स्फुरतु मे हृदि ॥
पञ्चमोऽयं परिच्छेदः श्रीरामकृपया कृतः ।
प्रीतयेऽस्तु सदा तस्य श्रीरामस्याखिलेशितुः ॥

Colophon:

इति हरिहरभेदधिक्कारे पञ्चमः परिच्छेदः ।

The scribe adds:

हरीशभेदधिक्कारे परिच्छेदस्तु पञ्चमः ।
लिखितो विप्रवर्येण कृष्णाख्येन हरेर्मुदे ॥

This seems to be the original Codex from which the transcript described in R. No. 2820 of the Madras Govt. Oriental MSS. Library, was copied.

1309 22. O. 4.

हरिहराद्वैतभूषणम्—बोधेन्द्रसरस्वतीकृता

Palm-leaf. 116 Foll. $15\frac{3}{4} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Like the Hariharabhedadhikkāra, this work also attempts to refute the difference between Viṣṇu and Siva and establish the identity of them. The author is believed to be Bodhendrasarasvatī, the pupil of Visvādhikasarasvatī.

Complete.

Beginning:

सदानन्दात्मने सर्वसर्गस्थित्यन्तकारिणे ।
सर्वान्तर्यामिरूपाय श्रीरामायात्मने नमः ॥
श्रीशगौरीश्वराभिन्नरूपं राममहं भजे ।
सकृत्प्रपन्नसंत्राणे दीक्षितं सीतयाश्रितम् ॥
यस्य नामापि सर्वस्मादुत्कर्षं ख्यापयत्यहो ।
विश्वाधिकगुरोः पादपद्मं वन्दे सरस्वतीम् ।
सर्वशास्त्रमयीं वन्दे सर्वाभीष्टप्रदायिनीम् ॥
वेदान्तार्थाभिधानेन सर्वानुग्रहकारिणम् ।
पतिरूपधरं वन्दे शंकरं लोकशंकरम् ॥
हरेर्हरस्य चाद्वैतभूषणं विद्वदीप्सितम् ।
श्रीरामस्य कृपादृष्ट्या क्रियतेऽद्य मया शिवम् ॥

अत्र महाविष्णुपरमशिवयोः श्रीगौरीकान्तयोः सर्वज्ञत्वसर्वशक्तित्वसत्यकामत्वसत्यसंकल्पत्वकरुणामृतवारिधित्वादिसकलकल्याणगुणैः साम्यं, तथा सकलजगदुदयस्थितिलयहेतुभूतमायोपहितपरब्रह्मरूपेणैक्यं, तथा तत्साम्यैक्ययोर्ज्ञानं सकलश्रेयोऽर्थिनामावश्यकमित्येतच्च श्रुतीतिहासपुराणादितात्पर्यविषयभूतमेवेति प्रतिपाद्यते । तस्मिन् विष्णौ शिवे च तत्साम्यैक्ययोः सिद्धसाधनरूपस्य तयोः सर्वेश्वरत्वस्योपनिषत्तात्पर्यविषयत्वं क्रमेण दर्शयिष्यते ।

End:

यत्कृपालवतो ज्ञातो मया रामः सुखाम्बुधिः ।
तं देशिकवरं वन्दे ख्यातं विश्वाधिकं गुरुम् ॥

हरेर्हरस्य चाद्वैतभूषणाख्योऽयमुत्तमः ।
ग्रन्थो भूयात्सदा प्रीत्यै श्रीरामस्य कृपाम्बुधेः ॥

Colophon :

इति हरिहराद्वैतभूषणाख्योऽयं ग्रन्थः संपूर्णः ।

1310 25. O. 9.

विवेकमञ्जरी—हस्तामलकाचार्यकृता

Palm-leaf. 2 Foll. $12\frac{1}{2} \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The Vivekamañjarī is a short Prakaraṇa work on Advaita Vedānta written in 12 verses. It explains the nature of the individual soul which is identical with the Supreme Brahman according to the Advaitic view. The work is attributed to Hastāmalakācārya who was, according to the tradition, one of the four direct disciples of S'rī S'aṁkarācārya. According to the commentary and tradition, the work contains only 12 verses beginning with निमित्तं मनश्चक्षुरादि etc. and ending with उपाधौ यथा etc. But this and some other MSS. add some more verses *viz.* two in the beginning and one at the end counting the total number of verses 15. The first of the additional verses reveals that the author Hastāmalakācārya was questioned in his childhood by some body (probably S'rī S'aṁkarācārya) about his (Hastāmalaka's) birth, place, name parentage etc. The verses 2 to 15 represent the answer given by the child. Most of the MSS. and printed editions call the work vaguely as Hastāmalakas'lokāḥ. But this MS. specifies the title as Vivekamañjarī. The work was printed and published along with S'rī S'aṁkarācārya's commentary, in the S'rī S'āṁkaragranthāvali, Srirangam.

Complete in 15 verses.

Beginning :

कस्त्वं शिशो कस्य सुतः क्व जातः
किं नाम ते त्वं कुत आगतोऽसि ।
एतद्वद त्वं तव चार्भक त्वं
मत्प्रीतये प्रीतिविवर्धनोऽसि ॥ १ ॥
नाहं मनुष्यो न च देवयक्षो
न ब्रह्म न क्षत्रियवैश्यशूद्रः ।
न ब्रह्मचारी न गृही वनस्थो
भिक्षुश्च नाहं निजबोधरूपः ॥ २ ॥
निमित्तं मनश्चक्षुरादिप्रवृत्तौ
निरस्ताखिलोपाधिराकाशकल्पः ।
रविर्लोकचेष्टानिमित्तं यथा यः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ३ ॥

End :

उपाधौ यथा भेदता सन्मणीनां
तथा भेदता बुद्धिभेदेषु तेऽपि ।
यथा चन्द्रिकाणां जले चञ्चलत्वं
तथा चञ्चलत्वं तवापीह विष्णो ॥ १४ ॥
यथा लोकदृष्टैव ते सूतकादौ
दृढा बुद्धिरुत्पद्यते सूतकीति ।
तथा वेदवेद्यं विशुद्धात्मतत्त्वं
स्वकीयं ग्रहीतुं विवादः कथं ते ॥ १५ ॥

Colophon :

हस्तामलकाचार्यविवेकमञ्जरी समाप्ता ।

1311 19. P. 2.

विवेकमञ्जरी—हस्तामलकाचार्यकृता

Palm-leaf. 2 Foll. 7 × 2 inches. 15

lines in a page. Grantha script. Old. Injured. Good and small writing.

Complete in 16 verses.

Reads in the beginning the two additional verses as noted in the previous number as 1 and 2 and adds the following two more verses to them :

नाहं कर्ता कारयिता वा न च कार्यं
नाहं भोक्ता भोजयिता वा न च भोज्यम् ॥
नाहं दुःखी दुःखयिता वा न च दुखं
सोऽहं प्रत्यक्चिन्मयरूपः परमात्मा ॥ ३ ॥
यथा वेदद्दष्टयैव ते सूतकादौ
दृढा बुद्धिरुत्पद्यते सूतकीति ।
तथा वेदवेद्यं विशुद्धात्मतत्त्वं
स्वकीयं ग्रहीतुं विवादः कथं ते ॥ ४ ॥

(This last verse is cited as the 15th in the MS. described in last number). Then begins निमित्तं मनश्चक्षुरादि etc. with the serial numbers 1 to 12, thus counting the total number of verses as 16. The MS. does not contain any colophon.

1312 20. C. 78.

विवेकमञ्जरी—हस्तामलकाचार्यकृता

Palm-leaf. 10 Foll. 16 × 1½ inches. 10 lines in a page. Grantha script. Old. Injured. Illegible writing.

The MS. contains the commentary also.

Complete in 12 verses.

1313 22. D. 38.

विवेकमञ्जरी—हस्तामलकाचार्यकृता

Palm-leaf. 10 Foll. 16 × 1¼ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

The MS. contains the commentary also.

Complete in 12 verses.

1314 22. P. 4.

विवेकमञ्जरी—हस्तामलकाचार्यकृता

Palm-leaf. 2 Foll. 12 × 1 inches. 6 lines in a page. Grantha script. Old. Injured. Illegible writing.

Complete in 12 verses.

Colophon :

हस्तामलकद्वा.

Evidently the missing portion of the colophon must be दशकं संपूर्णम्. Therefore according to this MS. the total number of verses of the work is 12 only.

1315 25. L. 23.

विवेकमञ्जरी—हस्तामलकाचार्यकृता

Palm-leaf. 2 Foll. 15 × 1½ inches. 6 lines in a page. Grantha script. Old. injured. Good writing.

Complete in 15 verses as found in the MS. described in No. 1310 above.

Colophon :

इति हस्तामलकं समाप्तम्।

1316 28. J. 54.

विवेकमञ्जरी—हस्तामलकाचार्यकृता

Palm-leaf. 15 Foll. 12 × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides. The MS. contains the commentary also. Complete in 12 verses.

1317 33. C. 24.

विवेकमञ्जरी—हस्तामलकाचार्यकृता

Palm-leaf. 13 Foll. 14½ × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the commentary also. Complete in 12 verses.

1318 20. C. 78.

विवेकमञ्जरीव्याख्या—शंकराचार्यकृता

Palm-leaf. 10 Foll. 16 × 1½ inches. 10 lines in a page. Grantha script. Old. Injured. Illegible writing.

This is a commentary on Hastāmalakācārya's Vivekamañjarī. The authorship of the commentary is attributed to S'rī S'aṁkaracārya. It is strange to note that the teacher wrote a commentary on his pupil's work.

The commentary is printed and published in the S'rī S'aṁkaragranthāvali, Srirangam with the title Hastāmalakabhāṣya.

Complete.

Beginning :

यस्मिन् ज्ञाते भवेत्सर्वं विज्ञातं परमात्मनि ।
तं वन्दे नित्यविज्ञानमानन्दमजमव्ययम् ॥
यदज्ञानादभूद् द्वैतं ज्ञाते यस्मिन् निवर्तते ।
रज्जुसर्पवदत्यन्तं तं वन्दे पुरुषोत्तमम् ॥
यस्योपदेशदीधित्या चिदात्मा नः प्रकाशते ।
नमः सद्गुरवे तस्मै स्वाविद्याध्वान्तभानवे ॥

इह सर्वस्य जन्तोः सुखं मे भूयात्, दुःखं मा भूदिति स्वत एव सुखोपादित्सादुःखजिहासे भवतः । तत्र यः कश्चित् पुण्यातिशयशाली अवश्यंभाविदुःखाविनाभूतत्वादनित्यत्वाच्च विषयजं सुखं दुःखमेवेति ज्ञात्वा यत्नेन संसारात्यन्तासक्तेर्विरज्यते । विरक्तश्च संसारहानौ यतते । संसारस्य च आत्मस्वरूपापरिज्ञानकृतत्वादात्मज्ञानान्निवृत्तिरिति तं प्रत्यात्मज्ञानमाचार्य उपदिशति—निमित्तमिति ।

End :

यथा चन्द्रिकाणाम् । चन्द्रा एव चन्द्रिकाः । स्वार्थे कप्रत्ययः । यथा जले स्वच्छे प्रतिबिम्बस्वरूपेण दृश्यमानानां जलस्य चञ्चलत्वात् चञ्चलत्वमौपाधिकम्, तथा बुद्धीनां चञ्चलत्वात् तवापि चञ्चलत्वमौपाधिकम् । न पारमार्थिकमित्यर्थः । इहापि बुद्धिषु हे विष्णो ॥

Colophon :

इति श्रीभगवत्पादकृतौ हस्तामलकभाष्यं समाप्तम् ।

1319 28. J. 54.

विवेकमञ्जरीव्याख्या—शंकराचार्यकृता

Palm-leaf. 15 Foll. 12 × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides. The MS. contains the text also. Complete.

Reads the following colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादस्य कृतौ हस्तामलकभाष्यं समाप्तम् ।

The scribe adds :

प्रजोत्पत्त्यभिधे वर्षे चापमासे शुभे दिने ।
गोपालो व्यलिखं श्रीमद्धस्तामलकभाष्यकम् ॥

1320 33. C. 24.

विवेकमञ्जरीव्याख्या—शंकराचार्यकृता

Palm-leaf. 13 Foll. $14\frac{1}{2} \times 1$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

The MS. contains the text also.

Complete.

1321 22. D. 38.

विवेकमञ्जरीव्याख्या—शंकराचार्यकृता

Palm-leaf. 10 Foll. $16 \times 1\frac{1}{4}$ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

This is another version of the commentary of S'rī S'aṁkarācārya on the Vivekamañjarī of Hastāmalakācārya.

Incomplete.

Beginning :

यदज्ञानाज्जगत्सर्वं यस्मिन्नेवावभासते ।
विज्ञाने नास्ति तत्सर्वं तद्वन्दे ब्रह्म सर्वगम् ॥

श्रीकैवल्याख्ये ग्रामे कस्यचित् द्विजस्य पुत्रत्वेनाविर्भूतदेहो जन्मान्तरानुष्ठितश्रवणादिना निवृत्ताज्ञानो दिव्ययोगीन्द्रो मूढजनैः पिशाचत्वेनाभिमतः शंकराचार्यैः कस्त्वमसीति पृष्टः स्वानुभवं वदन् अन्येषां मुमुक्षूणामनुभवो भूयादिति प्राणिनामनुकम्पया द्वादशश्लोकैरात्मतत्त्वमुपनिषदर्थं समधिगम्य प्रत्युत्तरच्छलेनाह—निमित्तमित्यादिना ।

End :

सन्तश्च ते मणयश्च सन्मणयः । तेषां सन्मणीनां स्फटिकमरकतादीनाम् । जपाकुसुमाद्युपाधौ संनिहिते सति तद्रौहित्यादिप्रतीतिर्यथा लोके दृश्यते, तथा बुद्ध्युपाधौ संनिहिते सति एकत्वादिप्रतीतिः । न परमार्थतः । उपाधीनां भ्रान्तिपरिकल्पितत्वेन मिथ्यात्वं पूर्वमेवावोचाम । दृष्टान्तमाह—हे विष्णो चन्द्रिकाणां यथा जले चञ्चलत्वं तथेह बुद्धौ तवापि चञ्चलत्वम् । तस्मात् एकमेवाद्वितीयं ब्रह्मेति सिद्धम् ।

Then adds 2 verses from the Nirguṇamānasapūjā of S'rī S'aṁkarācārya.

SUPPLEMENT

MĪMĀṂSĀ

1322 34. K. 13.

शास्त्रदीपिका—पार्थसारथिमिश्रकृता

Palm-leaf. 56 Foll. 17½ × 1¼ inches. 14 lines in a page. Grantha script. Old. Much injured. Good writing.

Wooden boards are added to both sides.

Contains from 6-2-3 to 11-4-5.

Same work as that described in No. 57 of this volume.

VEDĀNTA

(*a*) ADVAITA-VEDĀNTA

1323 23. A. 15.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 7 Foll. 16 × 1¼ inches. 8 lines in a page. Grantha script. Old. Much injured. Clear writing.

Wooden boards are added to both sides.

Incomplete.

Same work as that described in No. 354 of this volume.

1324 34. D. 12.

ब्रह्मसूत्राणि—बादरायणकृतानि

Palm-leaf. 8 Foll. 16½ × 1¾ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

1325 23. O. 14.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 146 Foll. 16 × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Legible writing.

The leaves bear the serial numbers 1 to 151; but leaves 127, 128 and 135 to 137 are missing.

Wooden boards are added to both sides.

Same work as that described in No. 377 of this volume.

Breaks off in the 2nd Sūtra of the 3rd pāda of the 2nd adhyāya.

1326 25. M. 6.

ब्रह्मसूत्रभाष्यम्—शंकराचार्यकृतम्

Palm-leaf. 8 Foll. 16 × 1½ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the first four sūtras of the 1st pāda of the 1st adhyāya.

1327 20. C. 75.

ब्रह्मसूत्रवृत्तिः

Palm-leaf. 14 Foll. 15½ × 1½ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Similar to the work described under No. 536 of this volume. The author's name is not known.

Incomplete.

Beginning :

अथातो ब्रह्मजिज्ञासेति विचार्यत्वेन प्रतिज्ञातस्य शुद्धब्रह्मणो लक्षणमुक्तं जन्माद्यस्य यत इति । तच्च लक्षणमसंभवग्रस्तम्, शुद्धे ब्रह्मणि प्रमाणाभावात् इत्याशङ्का शास्त्रयोनित्वादित्यनेन परिहृता । सिद्धस्य प्रमाणन्तरवेद्यत्वात् तत्प्रतिपादनस्य निष्फलत्वात् सिद्धस्य ब्रह्मणो न शास्त्रयोनित्वमित्याशङ्का तु तत्तु समन्वयादित्यनेन निराकृता । ततश्चानुमानसिद्धप्रधानावेदकत्वमेव कारणवाक्यानामिति शङ्का ईक्षत्यधिकरणेन निराकृता । ततः परस्य ग्रन्थस्यानुत्थानमिति चेन्न । ईश्वरलिङ्गैर्जगत्कारणत्वादिभिः शुद्धलिङ्गैरानन्त्यमोक्षफलकज्ञानविषयत्वादिभिः प्रधानादिव्युदासेन वाक्यसमन्वये स्थिते यत्रोपासनादिकार्यश्रवणं तत्र श्रूयमाणगुणविलक्षणासंभवात् गुणानां विशेषणता ।

End :

एवं सर्वभूताभ्यवहरणीयत्वमपि न देवतायाः संभवति । अतस्तयोः पर्याययोः देवताशब्दोऽचेतनपर एव । न च तत्प्रायपाठात् प्रकृतेऽपि लाक्षणिकत्वं भवत्विति शङ्क्यम्, तत्र वाक्यशेषस्य सर्वात्मना अचेतनेऽनुपपत्त्या प्रथमश्रुतस्य देवतापदस्य लाक्षणिकत्वाभ्युपगमेऽपि प्रकृते देवतापदस्य निरुक्त्या ब्रह्मपरत्वमेव स्वीकर्तव्यम् ।

1328 34. O. 11.

ब्रह्मसूत्रवृत्तिः वैयासिकसूत्रोपन्यासः—रामेश्वरभारतीकृतः

Palm-leaf. 144 Foll. 16½ × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Same work as that described under No. 524 of this volume.

Owner's name : Nārāyaṇaśarman son of Rāmakṛṣṇabhaṭṭa and pupil of Kaivalyendrasvāmin.

1329 41. A. 32.

अद्वैतप्रकरणम्

Paper. 12 Foll. 8 × 5 inches. 11 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is a metrical Prakaraṇa work on Advaita-Vedānta. The author's name is not known.

Wants beginning and end.

Beginning :

स्वतः प्रमाणत्वमिदं श्रुतीनां
विचारसापेक्षतया प्रपश्येत् ।
अतो विचारस्य फलं प्रकल्प्यं
संदेहविभ्रान्तिविनाशमात्रम् ॥ ८ ॥
स्वोत्पत्तिमात्रे सकलं विचार-
मपेक्षते चोपनिषद्भवा मतिः ।
स्वोत्पत्तितो मूलतमो निहन्ति
दीपो यथान्यं सहकारिणं विना ॥ ९ ॥

End :

किं गौतमीयैः कणभुग्वचोभि-
र्नात्मा गुणी नापि गुणा यथार्थाः ।

सच्चित्सुखात्मन्यथ निर्विशेषे
गुणा न सन्त्येव सुखादयो ये ॥ १२० ॥
इच्छादयो ये परिकल्पिता गुणा
बुद्धेस्तु ते नात्मन एष निश्चयः ।
विज्ञानमानन्दमिति श्रुतेर्वच-
स्तथा प्रमाणं खलु काम इत्यपि ॥ १२१ ॥

1330 19. M. 53.

अवधूतगीता

Palm-leaf. 12 Foll. 10 × 1½ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves are in disorder.

Same work as that described under No. 665 of this volume. The work is mentioned as Cittavṛtti in the margin.

Wants beginning and end.

1331 25. C. 6.

आत्मबोधः—शंकराचार्यकृतः

Palm-leaf. 5 Foll. 12 × 1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Same work as that described in No. 676 above.

Complete.

1332 9. B. 25.

आत्मभुजङ्गम्—शंकराचार्यकृतम्

Paper. 5 Foll. 5⅞ × 4 inches. 18 lines in a page. Telugu script. Old. Fair. Illegible writing.

This is a small metrical work on Advaita Vedānta written in Bhujaṅga-prayāta metre. It is attributed to S'rī S'aṁkarācārya.

Complete in 39 verses.

Beginning :

यथा बुद्धिभेदेष्वनेकोऽयमेकः
शरावोदकेषु प्रभिन्नः शशीव ।
सुषुप्त्याद्यवस्थासु नित्यप्रबोधः
सदा सच्चिदानन्दरूपोऽहमात्मा ॥ १ ॥
यथा रज्जुसर्पभ्रमज्ञानभेदः
प्रपञ्चस्य सत्यत्वमारोपितं यत् ।
तथा बुद्धिभेदं विसृज्यैवमेकः
सदा सच्चिदानन्दरूपोऽहमात्मा ॥ २ ॥

End :

अहं ब्रह्मेति वाक्ये सदाभ्यासदार्ढ्या-
त्परब्रह्मजीवैक्यमेवेति सिद्धम् ॥
चिदानन्दसंदोहमाकाशदीप्तिः
सदा सच्चिदानन्दरूपोऽहमात्मा ॥ ३९ ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्द-भगवत्पूज्यपादाचार्यशिष्यश्रीमच्छंकरभगवत्पूज्यपादाचार्यविरचितमात्मभुजङ्गं संपूर्णम् ।

1333 22. G. 43.

ऋभुगीता

Palm-leaf. 27 Foll. 10¾ × 1⅓ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Like the Avadhūtagītā and Aṣṭāvakra-gītā, the work Ṛbhugītā also belongs to the Advaita school of Venānta teaching the identity of the soul with the Brahman and falseness of every thing other than

the Brahman. The work is written in the Purāṇa style as a conversation between the sage Ṛbhu and his pupil Nidāgha. The author whose name is not known, seems to have borrowed the names of the teacher and pupil from the 15th chapter of the 2nd Aṁśa of the Viṣṇu-purāṇa. A complete copy of the work is described by Rajendralalamitra in his Notice of Sanskrit MSS. Vol. VII. (No. 2333) giving full details of the subjects dealt with in 27 chapters.

This MS. wants beginning and end.

Beginning:

. . . . . वेदवाक्यैरगम्यगः ।
स्वान्तेनानुभवन्दूरे . . एव . . . . . यः ॥
यस्य किंचिद्बहिर्नास्ति किंचिदन्तः कियन्न च ।
यस्य लिङ्गप्रपञ्चं वा ए . . . . . यः ॥
नास्ति यस्य शरीरं वा जीवो वा भूतभौतिकः ।
वार्ता वा ज्ञानमेकं वा ए . . . . यः ॥
यस्य कारणकार्यं वा भोज्यं वा भोगभुक् च वा ॥
नस्ति रूपं नाम वापि ए . . . . . यः ॥
यश्चात्मा वाप्यनात्मा वा नास्ति वर्णादिकं क्वचित् ।
सद्वासद्वा स्थितिर्वापि ए . . . . . यः ॥
यस्य सत्यमसत्यं वा यस्य नास्ति क्षराक्षरम् ।
गुणो वा विगुणो वापि ए . . . . यः ॥
यस्य वाच्यं वाचकं वा श्रवणं मननं च वा ।
गुरुशिष्यादिभेदो वा ए . . . . . यः ॥
. . . . . .

Colophon:

इति ऋभुगीतायामात्मनिर्णयप्रकरणं समाप्तम् ।
प्रथमाध्यायः ।

End:

आत्मैवायमयं गन्ध आत्मैवायमयं शमः ।
आत्मैवेदमिदं दुःखमात्मनोऽन्यन्न किंचन ॥
आत्मैव यदिदं जाग्रदात्मैवेदमिदं सुखम् ।
आत्मैवेदमिदं ध्यानमात्मनोऽन्यन्न किंचन ॥
आत्मैवेदमिदं स्वप्न आत्मैवेदमिदं जगत् ।
आत्मैवेदमिदं कार्यमात्मनोऽन्यन्न किंचन ॥
आत्मैवायमयं प्राण आत्मैवेदमिदं द्वयम् ।
आत्मैवेदमिदं द्वन्द्वमात्मनोऽन्यन्न किंचन ॥

1334 21. K. 35.

ऋभुगीता

Palm-leaf. 4 Foll. $9\frac{1}{4} \times 1$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Wants beginning and end.

1335 22. D. 88.

एकश्लोकः—शंकराचार्यकृतः

Palm-leaf. 1 Foll. $17\frac{1}{2} \times 1\frac{1}{4}$ inches. 5 lines in a page. Grantha script. Old. Injured. Good writing.

Same work as that described under No. 784 of this volume (किं ज्योतिः etc.)

Complete.

1336 22. D. 86.

एकश्लोक. सव्याख्यः—स्वयंप्रकाशमुनिकृतः

Palm-leaf. 2 Foll. $14\frac{1}{2} \times 1\frac{1}{2}$ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

This is another work in single verse 'मोहातीतो' etc. as given below, with a commentary which explains the Advaitic view that the ultimate reality 'knowledge'

alone assumes various forms as knower, known, etc. The author of the text and commentary is Svayamprakāsamuni who salutes Gopālayogin probably as his teacher.

Complete.

Does not read any colophon.

Beginning :

गुरुरात्मा परात्मेति त्रिधा भिन्नाय ते नमः ।
ज्ञानमुद्राय रामाय जगन्मङ्गलमूर्तये ॥
स्वयंप्रकाशमुनिना व्यख्यानं क्रियतेऽधुना ।
प्रमात्रादिविभागाख्यमेकश्लोकस्य सादरम् ॥
स्वयं मन्मननान्नित्यं भगवान्जानकीपतिः ।
प्रीयतां देवदेवेशो हरिः सर्वज्ञगद्गुरुः ॥
विघ्नेशं भारतीं विष्णुं ब्रह्माणं शिवमेव च ।
श्रीमद्गोपालयोगीन्द्रं प्रणमामि पुनः पुनः ॥

परमार्थदशायामेकमेवाद्वितीयमित्यादिश्रुत्या एकमेव चैतन्यं यद्यपि सिद्धम्; भेदे प्रमाणाभावात्, मत्तः परतरं नान्यत् किंचिदस्ति धनंजयेत्यादिस्मृत्या च । तथापि व्यवहारदशायां कल्पितभेदमादाय विचित्रं प्रतीयत इत्याह—

मोहातीतो विशुद्धो मुनिभिरभिहितो मोहसंक्रान्तमूर्तिः साक्षी स्वान्ते विशुद्धे प्रतिफलितवपुर्गीयतेऽसौ प्रमाता । वृत्त्यारूढः प्रमाणं फलमथ धिषणावृत्तिसंवृत्तचेत्योपाधिर्मायोत्थशब्दप्रमुख . . . . गस्याप्रमेयः परात्मा ॥

अत्र परमात्मानुसंधानेन शिष्टाचारपरिप्राप्तं मङ्गलं दर्शितम् । विशुद्ध इति पदेन ब्रह्म वेद ब्रह्मैव भवति इत्यादिश्रुतेरानन्दावाप्तिलक्षणं, मोहातीतपदेन चानर्थनिवृत्तिरूपं प्रयोजनं च दर्शितम् ।

End :

श्रोत्रेन्द्रियस्य तु चक्षुरादिवत् शब्ददेशगमनमेव । कर्णशष्कुल्यवच्छिन्ननभो . . . . श्रोत्रेन्द्रियत्वे प्रमाणाभावत् श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणरूपज्ञानेन्द्रियाणामपञ्चीकृतपञ्चमहाभूतसात्त्विकांशानां प्रत्ये . . . . त्वात् । तस्मात् एकमेव चैतन्यमुपाधिवशात् विचित्रं प्रतीयत इति सिद्धम् ।

1337 26. D. 9.

तत्त्वमसिदशकम्

Palm-leaf. 1 Foll. 17 × 1½ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Same work as that described under No. 827 of this volume.

1338 26. M. 24.

दशश्लोकी—शंकराचार्यकृता

Palm-leaf. 1 Foll. 15 × 1⅜ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Same work as that described under No. 841 of this volume.

1339 19. H. 9.

पञ्चरत्नम्—शंकराचार्यकृतम्

Palm-leaf. 2 Foll. 9 × 1 inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Same work as that described under No. 894 of this volume.

